राजस्थानविश्वविद्यालयभारतीयदर्शनाध्ययनमालायाम् अष्टमं पुष्पम्

पण्डितखड्गनाथमिश्रः

सिद्धान्तलक्षणतत्त्वालोकप्रकाशः

धर्मदत्तशर्मणस्तत्त्वालोकसंवलितः

दर्शनविभागः
राजस्थानविश्वविद्यालयः, जयपुरम्

About the work

The relation of Vyāpti (universal concomitance or law - like connection) is unique in the family of epistemologically important content-neutral entities. The contributions of Navya-Naiyāyikas to the investigation and precise characterisation of this relation have few parallels in the history of thought. In the Indian Philosophical literature tradition of commentaries & sub-commentaries, Gaṅgeśa's-siddhāntalakṣaṇa-vyāpti was successively commented upon by Raghunātha Jagadīśa & Dharmadatta respectively in Didhīti, Jāgadīsī and Tattvāloka. This last work has been in need of a simple and precise commentary. Pt. Khadganatha Miśra's Prakāśa meets this need. In the first volume of this work relevant texts of Tattvacintāmaṇi, Didhītī, Jāgadīsī were presented in theme-based sections for the convenience of the readers. Tattvāloka and Prakāśa on it, are presented here as in the first and second volumes in theme-based sections.

About the Author

Pt. Khadaganath Miśra was born in Mithilā and received his training in the school founded by Dharmadatta Jha in the disciplines of Nyāya, Vyākaraṇa and Vedānta. Mahārāṇā & Mahārāja sanskrit colleges of Udaipur and Jaipur were privileged to have him as the Principal. He was the Dean of Sanskrit Studies and served in the Śāstrī position in the Department of Philosophy, University of Rajasthan.

A two volume work by Pt. Miśra on the semantical analysis of natural languages & metaphysical problems is yet to reach the public. The city of Jaipur was fortunate to have Pt. Miśra as a permanent resident. Though he is no more with us in physical body, his invaluable contribution to Indian philosophical tradition will always be a matter of pride and source of inspiration for future generations.

ISBN 81-86027-12-2 (Vol. III)
Price: Rs. 350/-

राजस्थानविश्वविद्यालयभारतीयदर्शनाध्ययनमालायाम् अष्टमं पुष्पम्

सिद्धान्तलक्षणतत्त्वालोकप्रकाशः

तृतीयो भागः

सिद्धान्तलक्षणतत्त्वालोकप्रकाशः

धर्मदत्तशर्मणस्तत्त्वालोकसंवलितः

तृतीयो भागः

पण्डितखड्गनाथमिश्रविरचितः

श्रीकृष्णशर्मणा सम्पादितः

दर्शनविभागः

राजस्थानविश्वविद्यालयः, जयपुरम्

२००३

राजस्थानविश्वविद्यालयभारतीयदर्शनाध्ययनमाला: ८
प्रधानसम्पादकः कुसुमजैनः
समन्वयकः दर्शनविभागीयविशेषसहायताकार्यक्रमस्य

विश्वविद्यालयानुदानायोगस्य राजस्थानसर्वकारस्य च विशेषसहायताकार्यक्रमपरियोजनायां राजस्थानविश्वविद्यालयदर्शनविभागेन २००३ तम ईशवीयेऽब्दे प्रकाशितो ग्रन्थः।

ISBN 81-86027-03-3 सम्पूर्णग्रन्थः
81-86027-12-2 तृतीयो भागः

मूल्यम्– ३५० रूप्यकाणि

राजस्थानविश्वविद्यालयदर्शनविभागस्य
सङ्गणकयन्त्रेण श्रीशङ्करलालशर्मणा टङ्कितः

जयपुरस्थपॉपुलरप्रिन्टर्सद्वारा मुद्रितः

UNIVERSITY OF RAJASTHAN STUDIES IN INDIAN PHILOSOPHY : 8

SIDDHĀNTALAKṢAṆATATTVĀLOKA-PRAKĀŚAḤ

with Tattvāloka of Dharmadatta Śarmā

VOLUME - III

By PAṆḌITA KHAḌGANĀTHA MIŚRA

Edited by ŚRĪKṚṢṆA ŚARMĀ

DEPARTMENT OF PHILOSOPHY
UNIVERSITY OF RAJASTHAN, JAIPUR
2003

University of Rajasthan Studies in Indian Philosophy: 8
General Editor: Kusum Jain
Co-ordinator, Special Assistance Programme

Published in 2003 by the Department of Philosophy, University of Rajasthan, Jaipur- 302 004, India, under the Special Assistance Programme of the University Grants Commission and the Government of Rajasthan State-Plan.

ISBN 81-86027-03-3 (Set)
81-86027-12-2 (Vol. III)

Price: Rs. 350/-

Phototype set by: Shankar Lal Sharma, Computer Operator
Department of Philosophy, University of Rajasthan, Jaipur.

Printed by: Popular Printers, Jaipur.

सिद्धान्तलक्षणतत्त्वालोकप्रकाशगर्भित-विषयानुक्रमणिका

ग्रन्थकर्तुः प्राक्कथनम्*

ओन्नमो गुरुभ्यो गुरुपादुकाभ्यः। विद्याप्रस्थानेषु आन्वीक्षिकीयं न्यायविद्या प्रथमोपात्ता यथैव अभ्यर्हिततमा विद्यान्तरोपकारिणी तथैव विद्यान्तरापेक्षया कठिनतमापि चेति वस्तुस्थितिः। न्यायविद्यायाः प्राचीन-नव्यभेदेन द्विशाखत्वम्। तयोर्नव्यन्यायस्य व्याघ्रमुखगोत्वेन पण्डितसमाजे प्रसिद्धिः।

सूत्ररूपाया खल्वस्याः न्यायविद्यायास्तत्त्वं वस्तुतोऽजानद्भिर्योगाचारादि-नास्तिकदिग्गजैराक्रम्याक्रम्योन्मूल्यमानामिमां [न्यायविद्यां] रक्षितुं महर्षिदेशीयैर्गङ्गेशोपाध्यायैरेकमेवांशं प्रमाणात्मकं 'प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानी'ति न्यायसूत्रम् (१.१.३) आदाय श्लोकद्वादशसाहस्रीपरिमितचिन्तामणिरिव प्रामाणिकानां 'चिन्तामणि'नामा खण्डचतुष्टयात्मको विलक्षणो ग्रन्थो निरमायि, यस्योपरि व्याख्यानानि वर्द्धमान-पक्षधर-वाचस्पति-यज्ञपति-वासुदेवसार्वभौम-चक्रवर्तिरघुनाथशिरोमणि-मथुरानाथ-भवानन्दादिभिर्वाग्देवतावतारैर्जगद्विदितपाण्डित्यैर्विहितानि।

उक्तानि चिन्तामणेर्व्याख्यानान्यपि जगदीशतर्कालङ्कार-गदाधरभट्टाचार्य-मथुरानाथतर्कवागीशादिभिः प्रकाशं परिवर्द्धितानि। तान्यपि बहुभिः प्रकाण्डपण्डितैर्गोलोकनाथ-बलदेव-ऋद्धिनाथादिभिरलं पल्लवितानि। परन्तु कृतेषु क्रोडपत्रविवेचाभिधेषु परिष्कारेषु ख्रिष्टीयैकोनविंशतितमशतकोत्तरार्धे (१८६० ई.) समुत्पन्नेन कृतिकुल-कैरवकमलाकरेण न्यायस्य श्वसितनिभेन, मीमांसायाः सर्वस्य सदृशेन, वेदान्तस्य सर्वस्य सदृशेन, साहित्यस्य सौहित्याभेन, कल्पनाया जीवातुना, सर्वतन्त्रस्वतन्त्रेण, कीर्तिनिकरस्याकरेण, धर्मदत्तापरनामकेन सुप्रसिद्ध-बच्चा झा-शर्मणा मैथिलेन कृतो गूढार्थतत्त्वालोकः पूर्वजातानेकपरिष्कारसारसमुच्चितप्रचुरतरस्वतन्त्रचिन्तनपरो मितवचनात्मको विदुषामपि दुरूहो नैयायिकानां नैयायिकत्वस्य निकषायमाणः पूर्वोक्तान् सर्वानपि परिष्कारानधिशय्य चकास्ति।

---

* प्रकाशकृतामिदं प्राक्कथनं 'सिद्धान्तलक्षणतत्त्वालोकप्रकाश' इति ग्रन्थस्य प्रथम-द्वितीयखण्डप्रकाशनकाले नोपलब्धम्, परमिदानीं तृतीयखण्डप्रकाशनवेलायां [ग्रन्थकृन्निधनानन्तरं] तदात्मजेन डॉक्टरगोपालमिश्रेणान्विष्य अवाप्तं प्रदत्तञ्चेति सौभाग्यादत्र प्रकाशितम्। -सम्पादकः

प्रकृतजागदीशीसिद्धान्तलक्षणगूढार्थतत्त्वालोकस्यान्ते तेन विनिर्दिष्टमधोलिखितपद्यम् –

स्वश्चारिचञ्चलदृगञ्चलचञ्चरीक-
सञ्चारिचारुचरणाब्जरसञ्चरन्तु।
चेतोमधुप्रणयिनः परिचिन्तनैक-
लभ्यं विनिन्दितसुधारसमद्रिपुत्र्याः ।।इति।

अस्यायं भावः। हे चेतोमधुप्रणयिनः ! भावनाविशेषात्मकचिन्तनलभ्यार्थविशेषात्मकं यन्मधु, तत्प्रणयिनस्तदीप्सवो मनीषिणोऽद्रिपुत्र्याः पार्वत्याः लक्ष्मी-सरस्वत्यभिन्नायाः श्रीचरणाब्जरसं चरन्तु। अर्थाच्छ्रीपार्वत्याश्चरणकमलरसं चरन्तु = आस्वादयन्तु = जानन्तु, सेवन्तामिति यावत्। तच्चरणाब्जरसं कीदृशम् ? तन्निर्दिशति – विनिन्दितसुधारसम् (अधःकृतामृतरसम्) तथा परिचिन्तनैकलभ्यम् = परितः सर्वतोभावेन यच्चिन्तनं तन्मात्रलभ्यम्, भावनाविशेषमात्रलभ्यमिति यावत्।

अद्रिपुत्र्याश्चरणाब्जं यादृशं तन्निर्दिशति – तद् विशेषणेन = सञ्चारिणा स्वश्चारिचञ्चलदृगञ्चलेन चञ्चरीकेण चारु इति। यस्य चञ्चरीकस्य = यस्य भ्रमरस्य, दृगञ्चलं दृष्टिरूपम् अञ्चलं वस्त्रप्रान्तभागाभिधम् स्वश्चारि, अर्थाद् यस्य मध्वर्थिनो भ्रमरस्य दृष्टिपताका स्वश्चारिणी स्वर्गे प्रवहति, तादृशेन सञ्चारिणा = भ्रमता भ्रमरेण, चारु सुन्दरं यदद्रिपुत्र्याः चरणाब्जं तद्रसम् सञ्चरन्तु इति। अर्थाद् विशेषितश्चञ्चरीको भ्रमरो यथा अद्रिपुत्र्याश्चरणाब्जरसं = चरणकमलरसं, मधु प्राप्नोति, तथैव तादृशचञ्चरीकवदाचरणशीलेन जनेनैव चेतोमधु प्राप्तुं शक्यमिति। महत्तम-बहुतर-निवासभोजनादिप्रदानपूर्वकं यस्य दृष्टिपताका स्वर्गे प्रवहति = दूरातिदूरं स्वर्गस्थिताद्रिपुत्र्याः चरणकमलपर्यन्तं गच्छति, तादृश एव मनीषी = बुद्धिमान्, पार्वतीपादसेवातत्परः, चेतोमधु = भावनाविशेष-पुण्यविशेषलभ्यमर्थम्, अत्रोपात्तं प्राप्तुं शक्नोतीति भावः।

सर्वतन्त्रस्वतन्त्रः तत्त्वालोकरचयिता परमगुरुर्महत्तमानेकग्रन्थनिर्माणकार्ये व्यग्रत्वादत्यन्तपरिमितशब्दैरेव ग्रन्थनिर्माणं कृतवान्। तस्य जीवनकाल एकाधिकषष्टिवर्ष-परिमित एवासीत्। स्वनिवासस्थान एव देश-देशान्तरागतान् मैथिलांश्च समुपेतान् सर्वान् छात्रान् प्रेम्णा दिनेषु अध्यापयन् रात्रिषु ग्रन्थनिर्माणकार्यं प्रसाधयन्नासीत् सः। मत्पिता तत्रैव स्थित्वा तदन्नमेव स्वयं पक्त्वा भुञ्जानस्तत एव न्याय-वेदान्ताध्ययनं समकार्षीत्।

प्रकृतस्य तत्त्वालोकस्य व्याख्या तत्समय एव बहुपूर्वमेवापेक्षितासीत् किन्तु तदा न कस्यापि साहसः समजनि तद्विधातुम्। प्रकृतस्य तत्त्वालोकस्य मुद्रणं सकृदेव

सञ्जातम्। तदपि दुर्भाग्यादशुद्धिपूर्णम्। ततश्च विषयस्य गहनतमत्वाद् विषयप्रतिपादकशब्दस्यात्यन्तपरिमितत्वाद् मुद्रणाशुद्धिवैपुल्याच्चात्यन्तोपादेयेऽपि तत्र प्रवेशोऽतिकठिनः सञ्जात इति न्यायविदो विजानन्तीति वस्तुस्थितिः।

यद्यपि प्रकृततत्त्वालोकोपरि एका सरला 'सुबोधनी' नामिका व्याख्या मैथिलेनैव पण्डितश्री-कृष्णमाधवझामहोदयेन वार्द्धक्याधिक्ये कृता यत्र मूलतत्त्वालोको व्याख्यया सह उपरि नैव निर्दिष्टोऽस्ति। क्वचिदुपन्यस्तोऽपि अपूर्णोऽशुद्धश्च। बहुत्र तत्त्वालोकस्याशुद्धपाठमेवाश्रित्य सा व्याख्या कृतास्ति मद्दृष्ट्या। मन्ये सरलाकृता मूलस्य प्रकृततत्त्वालोकस्य मुद्रणे दुर्भाग्यात् सञ्जाताशुद्धिसंशोधनाय नैव प्रयतितम्– इत्यादिकतिपयतथ्यानि यद्यपि दिवङ्गतस्य गुरुकल्पस्य परमादरणीयस्य सरलाकृतो विषये उद्घाटयितुमनुचितान्यप्युद्घाटितानि मया, तज्जनितपापप्रक्षालनार्थं भगवतः परमेश्वराद् भवद्भ्यश्च भूयोभूयः शतशः क्षमां याचे। मम कृते सा सरलैव व्याख्या मुख्यतया सम्पादनप्रवृत्तौ प्रेरणाप्रदा।

मयाऽत्र प्रकृततत्त्वालोकस्य प्रकाशाख्यव्याख्यां कुर्वता व्याख्योपरिभागे मूलं (तत्त्वालोकभागः) एक-द्वि-त्र्यादिसंख्याक्रमेण खण्डशः पूर्णतया सन्निवेशितम्। (प्राचीन)तत्त्वालोकमुद्रणे सञ्जाताशुद्धिसंशोधनञ्च गुरुपितृचरणेन अध्यापनसमये विहितसंशोधनमनुसृत्य विहितम्।

मया सर्वतन्त्रस्वतन्त्रस्य परमगुरोर्महामहतो लेखोपरि लेखनसाहसिक्यं यद् व्यधायि, तत्र अनुद्घाटनीयमपि यदुद्घाटितं मया, तदेव मुख्यं कारणम्। नैयायिकख्यातः इदानीं दिविस्थितः श्रीबदरीनाथशुक्लमहोदयः, [तस्मै] श्रावितोऽयं तदा प्रकाशात्मकव्याख्यात्मको लेखः। विश्वनाथशास्त्रीदातारमहोदयमपि श्रावितवान् एवमिदानीम् कार्यरतं दरभङ्गास्थ-कामेश्वरसिंहसंस्कृतविश्वविद्यालये न्यायविभागाध्यक्षं श्रीराम- सेवकमहोदयम् तथा तिरुपतिस्थं श्रीरामानुजताताचार्यमहोदयमपि [श्रावितवान्]।

तथापि 'आपरितोषाद् विदुषां साधु न मन्ये प्रयोगविज्ञानम्' इत्याद्युक्त्या ममात्र कियत्साफल्यं सञ्जातमिति परीक्षकैर्विद्वद्भिरेव निश्चेतव्यमिति।

पण्डितखड्गनाथमिश्रः

जयपुरम्

सम्पादकीयम्

तस्मै श्रीगुरवे नमः। अस्मद्गुरुभिः स्वर्गीयपण्डितखड्गनाथमिश्रैर्विरचितोऽयं 'सिद्धान्तलक्षणतत्त्वालोकप्रकाशः' इति नाम्ना प्रौढनव्यन्यायग्रन्थः। इतः पूर्वं भागद्वयं राजस्थानविश्वविद्यालयभारतीयदर्शनाध्ययनमालायां प्रकाशितं विद्वद्भिरधीत्य प्रशस्तञ्च। प्रकृतश्चायमन्तिमस्तृतीयो भागः। न्यायशास्त्रस्य गाम्भीर्यं तार्किकशिरोमणिना रघुनाथेन प्रतिपादितमनुमानचिन्तामणिदीधितौ –

न्यायमधीते सर्वस्तनुते कुतुकान्निबन्धमप्यत्र।

अस्य तु किमपि रहस्यं केचन विज्ञातुमीशते सुधियः।।इति।।

तदिदं न्यायशास्त्रं प्राच्य-नव्य-नव्यनव्यभेदेन त्रिधा विभक्तमिति विद्वांसो मन्वते। तत्र न्यायसूत्रकारमहर्षिगोतमादारभ्य न्यायकुसुमाञ्जलिकारोदयनाचार्यपर्यन्तं प्रणीतं प्राच्यन्यायशास्त्रम्, तत्त्वचिन्तामणिकार-गङ्गेशोपाध्यायमिश्रादारभ्य दीधितिकार-रघुनाथशिरोमणि-जगदीशतर्कालङ्कार-गदाधरभट्टाचार्यप्रभृतिप्रणीतं नव्यन्यायशास्त्रम्, व्याप्तिसिद्धान्तलक्षणजागदीशीविवेचनात्मक-गूढार्थतत्त्वालोकप्रणेता सर्वतन्त्रस्वतन्त्रपण्डितधर्मदत्तसूरि(बच्चा झा)महोदयस्तु नव्यनव्यन्यायशास्त्रप्रणेतृषु महिम्ना परिगण्यते। सोऽयं दुर्लभः सिद्धान्तलक्षणतत्त्वालोकोऽस्मद्गुरुवर्याणां 'प्रकाश'टीकया संवलितः प्रकाशितोऽधुना सुलभः सुगमश्च सञ्जात इति महान् प्रमोदः। महती साधनाऽऽसीद् गुरूणामेतादृशग्रन्थलेखने।

'प्रकाश'ग्रन्थस्यास्य प्रथमो भागो गङ्गेशोपाध्याय-रघुनाथशिरोमणि-जगदीशतर्कालङ्कारधर्मदत्तानां क्रमशः सिद्धान्तलक्षणतत्त्वचिन्तामणि-दीधिति-जागदीशी-तत्त्वालोकसंवलितः १२० खण्डेषु विवृत आसीत्, द्वितीयो भागः १२१ खण्डतः २१६ खण्डपर्यन्तेषु षण्णवति(९६)खण्डेषु तत्त्वालोकव्याख्यानभूतः प्रकाशितः, तृतीयश्चायमन्तिमो भागः २१७ खण्डतः ३६७ खण्डपर्यन्तः (१५१ खण्डेषु) विभक्तः। अत्र 'उत्पत्तिकालावच्छेदेन घटादौ गुणस्य प्रलयावच्छेदेन गगनादौ संयोगस्य सामान्याभावो वर्तते' इति दीधितेर्व्याख्यानभूतायाः 'प्रथमक्षणे घटादौ गुणो नास्तीति व्यवहारादिकञ्च सन्दिग्धप्रामाण्यकमि'ति जागदीश्याः विवेचनापरकस्तत्त्वालोकस्तत्प्रकाशश्च समारब्धौ। अग्रेतनः सम्पूर्णस्तत्त्वालोकोऽस्मिन् भागे प्रकाशितः। 'प्रकाश'-ग्रन्थश्च 'यद्वा स्वावच्छेदकताघटकसम्बन्धेने'त्यादि 'तेन सम्बन्धेन तद्धर्मावच्छिन्नस्य व्यापकत्वं विवक्षणीयमि'त्यन्तजागदीश्याः तत्त्वालोकस्य व्याख्यानभूतः (३५८

खण्डपर्यन्तः) अस्मिंस्तृतीयभागे प्रकाशितः। प्रायेण सर्वोऽपि तत्त्वालोकः प्रकाशेन प्रकाशितस्तथापि किञ्चिदंशोऽवशिष्टो यतोऽष्टपञ्चाशदधिकद्विसहस्रतमे विक्रमाब्दे वैशाखमासे कृष्णपक्षे तृतीयायां चन्द्रवासरे (दिनाङ्के ९.४.२००१) कीर्त्तिशेषं गताः प्रकाशकृतोऽस्माकं गुरवः। गुरूणां गिरः स्मारं स्मारं ग्रन्थोऽयं यावच्छक्यं सावधानं भूत्वाऽस्माभिस्सम्पादितस्तथा हि—

(क) अस्मद्गुरुचरणैः पण्डितखड्गनाथमिश्रमहोदयैः गूढार्थतत्त्वालोकस्य 'प्रकाश' व्याख्यालेखनावसरे झोपाख्यश्रीजगदीशशर्ममहोदयैः [तत्त्वालोककर्तुरात्मजैः] सम्पादितस्तत्त्वालोकग्रन्थः समाश्रितः। यत्पुस्तकं पण्डितषष्ठीनाथमिश्रैः [प्रकाशकर्तुः पितृचरणैः] अध्यापितम् तदेव 'तत्त्वालोके'ति पुस्तकं प्रकाशकृत्समीपे आसीत्। तस्मिन् पण्डितषष्ठीनाथमिश्रैरध्ययनाध्यापनवेलायां यत्र क्वचित् मुद्रणजन्याशुद्धिसंशोधनमपि व्यधायि। पण्डितषष्ठीनाथमिश्रास्तत्त्वालोककर्तुस्साक्षाच्छिष्या आसन्। अस्माभिस्सम्पादनवेलायां संशोधितपाठमङ्गीकृत्य प्राचीनमुद्रितपुस्तकस्थपाठोऽपि टिप्पण्यां सुरक्षितः, यथा— २३३ तमे तत्त्वालोकखण्डे 'पटाभावाभावात्मकतये'ति पण्डितषष्ठीनाथमिश्रसंशोधितः पाठस्तत्रैव टिप्पण्यां 'पटाभावात्मकतये'ति प्राचीनमुद्रितपुस्तकस्थपाठोऽपि सङ्केतितः। एवमेव २३६, ३२६, ३५९ प्रभृतिखण्डेष्वपि द्रष्टव्यम्।

(ख) 'प्रकाश' व्याख्याकृद्भिरपि पण्डितजगदीशशर्मसम्पादितमूलतत्त्वालोकपुस्तकस्थतत्त्वालोकपाठे मुद्रणजन्याशुद्धिसंशोधनं विहितम्, तत्रापि प्रकाशकृतां पाठमङ्गीकृत्य प्राचीनमुद्रितपाठः टिप्पण्यां सङ्केतितस्तथा हि— तत्त्वालोकखण्डसंख्या २१७, २२६, २२७, २२८, २२९, २३१, २३२, २३६, २३८, २३९, २४०, २४९, २७२ प्रभृतिषु द्रष्टव्यम्।

(ग) गूढार्थतत्त्वालोको जागदीशीविवेचनात्मको ग्रन्थो जागदीशीप्रतीकमाश्रित्य लिखितः। जागदीश्यामपि पाठभेदास्सन्ति। क्वचित् क्वचित् तत्त्वालोककृताऽङ्गीकृतो जागदीशीपाठोऽधुनोपलब्धजागदीशीग्रन्थेषु नोपलब्धः परिवर्तितो वोपलब्धः। एतत् सर्वं स्पष्टतः सङ्केतितं टिप्पणीषु। तथा हि— तत्त्वालोकखण्डसंख्या २१७, २४८, २४९, २७६, २८४, ३०५, ३०७, ३१६, ३६६ प्रभृतिषु द्रष्टव्यम्।

(घ) प्रायेण प्रकाशकृत्संशोधितस्तत्त्वालोकपाठः मूलेऽङ्गीकृतस्तथापि यत्र क्वचन पाठभेदस्थितौ प्राचीनमुद्रितपाठोऽपि समीचीन एव प्रतीतस्तत्र मूले पाठसङ्गत्या प्राचीनमुद्रितपाठ एव स्वीकृतः, प्रकाशकृतां पाठश्च टिप्पण्यां प्रदत्तः। तथा हि— तत्त्वालोकखण्डसङ्ख्या २६०, २६२, २९८, ३०१, ३०३, ३०४, ३१७, ३२० प्रभृतिषु द्रष्टव्यम्।

(ङ) द्विसहस्राधिकपृष्ठात्मकहस्तलेखे विस्तरेण महता परिश्रमेण लिखितेयं 'प्रकाश' टीका। अतो दत्तावधानेऽपि लेखनेऽनवधानात् स्खलनमपि सम्भवत्येव। अतः 'प्रकाश' ग्रन्थे कुत्रचित् पाठसंशोधनस्य कुत्रचिच्च विस्मृतपाठयोजनस्यावश्यकतापि प्रतीता। प्रकाशकृल्लेखसंरक्षणेन सहैव यथामति कोष्ठके सर्वमेतत् सम्पादितम्, तथा हि– प्रकाशटीकायां पृष्ठसंख्या ३, ५, ९, १०, १३, १४, १५, १६, १७, २२, २४, २७, २८, ३२, ३५, ३८, ४०, ४२, ६५ प्रभृतिषु द्रष्टव्यम्।

(च) सम्पादनवेलायामस्माभिस्तत्त्वालोकस्थ-चिन्तामणि-दीधिति-जागदीशी-गादाधरीप्रभृतिमूलग्रन्थानां प्रतीकानि अन्विष्य पादटिप्पणीषु प्रदत्तानि, टिप्पण्यश्च क्वचित् क्वचित् प्रस्तुताः। प्राचीनमुद्रितपाठः प्रकाशकृल्लेखश्च सर्वथा सुरक्षितः।

तदेवं सम्पादनकर्मणि व्यापृतेन मयकाऽल्पज्ञेन यथामति समीक्षापूर्वकं सम्पादितोऽयं 'तत्त्वालोकप्रकाश'ग्रन्थस्तथापि मानवसहजातभ्रमप्रमादादिदोषा अप्यवश्यं भवेयुरिति मत्वा तदशेषदोषाणां क्षमां गुणैकपक्षपातिनो विपश्चितोऽभ्यर्थये।

नव्य-नव्यन्यायग्रन्थस्यास्य साफल्येन भागत्रये प्रकाशनं जातम्। तत्र प्रथमं दर्शनशास्त्रविभागीयविशेषसहायताकार्यक्रमस्य पूर्वसमन्वयकेभ्यः प्रोफेसरविश्वम्भरपाहिमहोदयेभ्योऽनन्तरञ्च वर्तमानसमन्वयक-प्रोफेसरकुसुमजैनमहोदयायै हार्दिकीं कृतज्ञतां प्रकाशयामि येषां विद्यानुरागेणैतादृशं शास्त्रीयं प्रकाशनं समपद्यत। ग्रन्थस्यास्य पूर्वरूपसंशोधनकर्मणि प्रकाशकृतामात्मजेन विनम्रेण जयपुरस्थ-राजकीयमहाराज-संस्कृतमहाविद्यालयीय-दर्शनप्राध्यापक-डॉक्टरगोपालमिश्रेण, जोधपुरस्थ– जयनारायणव्यासविश्वविद्यालयीयसंस्कृतविभागे अंशकालिकप्राध्यापकेन डॉक्टर-महेशचन्दशर्मणा चैताभ्यां मत्प्रियशिष्याभ्यां यत्साहाय्यं व्यधायि, तदर्थमनयोरभ्युदयाय भवानीपतिं शङ्करं प्रार्थये। शुद्धमुद्रणकर्मण्यत्यन्तं सावहिताय दर्शनविभागीयसङ्गणकयन्त्रेण टङ्कणकर्त्रे कर्तव्यपरायणाय श्रीशङ्करलालशर्मणे च हार्दिकं मङ्गलं कामये।

सम्पादकः
पण्डितखड्गनाथमिश्रान्तेवासी
श्रीकृष्णशर्मा
संस्कृतविभागाध्यक्ष एवम् अधिष्ठाता
कला, शिक्षा एवं समाजविज्ञानसङ्कायः
जयनारायणव्यासविश्वविद्यालयः
जोधपुरम् (राजस्थानम्)

वसन्तपञ्चमी
विक्रमसंवत् २०६०

सिद्धान्तलक्षणतत्त्वालोकप्रकाशः

तृतीयो भागः

तत्त्वालोकः – 'व्यवहारे'ति[१]। शब्देत्यर्थः। 'संदिग्धप्रामाण्यकमि'ति[२]। आप्तोक्तत्वानिश्चयेनेत्यादिः।

नन्वाद्यक्षणावच्छिन्नो घटो गुणसामान्याभाववान् गुणसमवायिकारण-स्वाव्यवहितोत्तरत्वशून्यत्वादित्यनुमानमेवास्तु मानमिति चेद्।

न। द्रव्योत्पत्तावववयवद्वयसंयोगस्यासमवायिकारणतया तत्सद्भावार्थ-मस्तु समवायिकारणस्य प्राक्त्वापेक्षा, समवायिकारणगुणजन्ये गुणे समवा-यिकारणङ्कार्येण सहभावेनैवापेक्ष्यत इत्येतदर्थेनाप्रयोजकत्वशङ्काकवलितत्वा-दनुमानस्येति भावः।

'प्रलयत्वमेव व्याहन्येते'ति[३]। भावकार्य्यत्वं स्वाश्रयप्रागभावानधिकर-णवृत्तिध्वंसप्रतियोगिवृत्ति, स्वाश्रयानधिकरणस्वाश्रयप्रागभावासमानकालीन-वृत्तिध्वंसप्रतियोगिवृत्ति वा कार्य्यैकवृत्तित्वाच्चैत्रत्ववदित्यनुमानस्यैव प्रलये प्रमाणतया तेनैव कार्यानधिकरणतयैव तत्सिद्धेः, तदभावे प्रलयत्वस्यैवासिद्धि-प्रसङ्गादिति भावः।

'मानाभावादि'ति[४]। स्वत्वस्याननुगततया दृष्टान्तपक्षयोरनुगतसाध्या-भावेनानुमानासम्भवादागमस्य च तात्पर्यानिर्णयादिना संदिग्धार्थतया प्रामा-ण्यानिर्णयादिति भावः।

---

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. १२

२. (क) तदेव, जागदीशीमूलम्, पृ. १२

(ख) 'सन्दिग्धाप्रामाण्यकमि'ति तु प्राचीनमुद्रितपुस्तके।

३. (क) तदेव, जागदीशीमूलम्, पृ. १२ (ख) 'प्रलय एवे'त्यादिपाठ इदानीमुपलब्धपुस्तकेषु।

४. तदेव, जागदीशीमूलम्, पृ. १२

अथोक्तरूपेण प्रतीतिविषयत्वस्यावच्छेदकत्वाभावे वृत्तित्वाभावे वा कल्पने कुत्राप्यभावस्याव्याप्यवृत्तित्वं न स्यादित्यस्वरसादाह 'यदि ब्रूयादि'ति[१]।

सम्बन्धसत्तायास्सम्बन्धिसत्ताप्रयोजकतया प्रयोजकविरहे प्रयोज्यविरहस्यावश्यकत्वमित्याशयेनाह 'तथा चे'ति[२]।

'यत्सम्बन्धाभाववानि'ति[३]। अभावश्च तत्सम्बन्धेन तद्वत्ताबुद्धिर्येन सम्बन्धेन तत्सम्बन्धसत्तामपेक्षते तत्सम्बन्धावच्छिन्नप्रतियोगिताकः। तेन जलाद्यवच्छेदेन कालिकेन वह्निसंयोगाभाववति समये तदवच्छेदेन संयोगसम्बन्धावच्छिन्नवह्न्यभावासत्त्वेऽपि न व्यभिचारः।

'अन्यथे'ति[४]। सम्बन्धसत्ताया सम्बन्धिसत्ताप्रयोजकत्वमभ्युपेत्योक्तस्य नियमस्य स प्रयोजकत्वोपगम इत्यर्थः।

'तुल्यन्यायेने'ति[५]। प्रयोजकाभावस्य कार्य्याभाव इवोक्तस्यासाधारणप्रयोजकस्य प्रयोज्यस्यापि नियामकतयोदीच्यव्याप्तेरपि स प्रयोजकत्वमेव स्यादिति तात्पर्यार्थः।[२१७]

प्रकाशः – 'प्रतियोग्यसामानाधिकरण्ये'त्यस्य व्यावृत्तिं प्रथमं 'कपिसंयोगी एतद्वृक्षत्वादि'त्यत्र, तदनु 'यत्तु' मतेन 'इदं संयोगि द्रव्यत्वादि'त्यत्राभिधाय साम्प्रदायिकमतेन 'यत्तु' मतमपाकृत्य च 'उत्पत्तिकालावच्छेदेन साध्यसाधनभेदेन व्याप्तिभेदादिति वदन्ती'त्यन्तेन नवीनानां मतमाश्रित्य तस्य = प्रतियोग्यसामानाधिकरण्यस्य, व्यावृत्तिमुपपादयन्ति दीधितिकृतः।

तद्दीधितिव्याख्यात्मकजागदीश्या विवरणं तत्तत्प्रतीकमादाय कर्तुमुपर्युक्ततत्त्वालोकखण्डः।

तत्र 'उत्पत्तिकालावच्छेदेन घटादौ गुणस्य प्रलयावच्छेदेन गगनादौ संयोगस्य सामान्याभावो वर्तते' इति[६] दीधितेर्व्याख्यायां तर्कालङ्कारेण 'ननु आद्यक्षणे

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. १२
२. तदेव, जागदीशीमूलम्, पृ. १२
३. तदेव, जागदीशीमूलम्, पृ. १२
४. तदेव, जागदीशीमूलम्, पृ. १२
५. तदेव, जागदीशीमूलम्, पृ. १२
६. तदेव, दीधितिमूलम्, पृ. १२

घटे गुणो नास्ती'ति, प्रत्यक्षमसम्भवि, सन्निकर्षाद्यभावात्, प्रथमक्षणे घटादौ गुणो नास्तीति व्यवहारादिकञ्च संदिग्धप्रामाण्यकमतः स्थलान्तरमाह प्रलयावच्छेदेने'ति यदुपन्यस्तमस्ति[१], तद्घटक'व्यवहार'पदं शब्दार्थकम्। प्रथमक्षणे घटादौ गुणो नास्तीति व्यवहारादिकमर्थाद्, वाक्यात्मकशब्दादिकम् आप्तोक्तत्वानिश्चयेन 'संदिग्धा-[सन्दिग्ध]प्रामाण्यकमि'त्यस्य विवक्षितवाक्यस्वरूपस्य बोधाय तत्त्वालोककृता 'व्य-वहारे'ति परिगृह्य 'शव्दे'त्यर्थः।

'संदिग्धा[सन्दिग्ध]प्रामाण्यकमि'ति परिगृह्य 'आप्तोक्तत्वानिश्चयेनेत्यादिरि'ति विवृतम्।

अनन्तरं तत्र शङ्क्यते यद् आद्यक्षणे घटादौ गुणाभावसाधकप्रत्यक्षप्रमाणस्य तदानीं तत्र सन्निकर्षाभावेन सम्भवविरहेऽपि आद्यक्षणावच्छिन्नो घटो गुणसामान्याभा-ववान् गुणसमवायिकारणस्वाव्यवहितोत्तरत्वशून्यत्वादित्यनुमानमेव मानरूपं प्रमाणं तत्र प्रमाणं स्यादिति समवायेन गुणं प्रति तादात्म्यसम्बन्धेन द्रव्यस्य कारणत्वाङ्गीकाराद् घटोत्पादाव्यवहितप्राक्काले तादात्म्येन घटात्मककारणविरहात् तदात्मकस्वाव्यवहि-तोत्तरत्वशून्यत्वरूपस्य तदानीं तत्र गुणाभावसाधकहेतोः सत्त्वादिति तदाशयः।

अत्र समाधीयते। 'अवयवद्वयसंयोगस्यासमवायिकारणतया तत्सद्भावार्थमस्तु समवायिकारणस्य प्राक्सत्त्वापेक्षा समवायिकारणगुणजन्ये गुणे समवायिकारणं कार्येण सहभावेनैवापेक्ष्यते इत्येतदर्थेनाप्रयोजकत्वशङ्काकवलितत्वादनुमानस्येति भाव' इत्युप-न्यस्य घटात्मककार्यं प्रति असमवायिकारणं कपालद्वयसंयोगः, समवायिकारणन्तु कपालः, तत्र कपालात्मकसमवायिकारणस्य घटोत्पादकालप्राक्कालसत्त्वं यदि न स्यात् तदा कपालद्वयसंयोगात्मकासमवायिकारणसम्पत्तिः घटोत्पादकालेऽपि न स्याद्। अतस्तत्र असमवायिकारणसम्पत्तयेऽस्तु कपालात्मकसमवायिकारणस्य घटोत्पादका-लप्राक्कालसत्त्वापेक्षा, किन्तु समवायिकारणगुणजन्ये गुणे = घटसमवायिकारणकपा-लगतगुणजन्ये घटगतगुणे समवायिकारणं = घटगतगुणसमवायिकारणं घटः, कार्यसह-भावेन = घटगतगुणसहभावेनैव, अपेक्ष्यते इति स्वीकारे नापत्त्यनुपपत्ती।

अतो दर्शितस्य आद्यक्षणावच्छिन्नो घटो गुणसामान्याभाववान् गुणसमवायि-स्वाव्यवहितोत्तरत्वशून्यत्वादित्यनुमानस्याप्रयोजकत्वव्यभिचारशङ्कानिवर्तकतर्कशून्य-त्वशङ्काकवलितत्वान्मानाभावोक्तेरसङ्गतिविरहादित्याशयः।

---

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. १२

अनन्तरं 'प्रलयावच्छेदेन गगनादौ संयोगस्य सामान्याभावो वर्तते' इति दीधितेर्व्याख्या 'तदानीं जन्यभावसत्त्वे प्रलयत्वमेव व्याहन्येते'ति जगदीशेन विहितास्ति, तत्परिगृह्योच्यते तत्त्वालोककृता 'भावकार्यत्वं स्वाश्रयप्रागभावानधिकरणवृत्तिध्वंसप्रतियोगिवृत्ति, कार्यैकवृत्तित्वात् चैत्रत्ववत्' अथवा 'भावकार्यत्वं स्वाश्रयानधिकरणस्वाश्रयप्रागभावासमानकालीनवृत्तिध्वंसप्रतियोगिवृत्ति, कार्यैकवृत्तित्वात् चैत्रत्ववत्' इत्यनुमानद्वयस्यैव प्रलये प्रमाणता।

तत्र प्रथमानुमानस्य व्याख्या– साध्यघटक'स्व'पदग्राह्यं 'भावकार्यत्वं, तदाश्रयस्य भावकार्यविशेषस्य यः प्रागभावः, तदनधिकरणे = भावकार्यविशेषानधिकरणे, कालविशेषे, वृत्तिर्यो ध्वंसः, तस्य ध्वंसस्य यः प्रतियोगी, तत्र वृत्तित्वं साध्यम्।

द्वितीये च 'स्व'पदग्राह्यं भावकार्यत्वमेव, तदाश्रयो भावकार्यविशेषः, तदनधिकरणं तथा स्वाश्रयस्य = भावकार्यत्वाश्रयभावकार्यविशेषस्य, यः प्रागभावः, तदसमानकालीनो यः कालविशेषः, तत्र वृत्तिर्यो ध्वंसः, तत्प्रतियोगिवृत्तित्वं साध्यम्। अर्थात् यत्र कालविशेषे भावकार्यत्वाश्रयः भावकार्यत्वाश्रयस्य प्रागभावश्च न तिष्ठतः, तादृशः कालविशेष एव प्रलयः।

तादृशकालविशेषाभावे कार्यैकवृत्तित्वरूपसाधनसिद्धदर्शितसाध्यवत्ता भावकार्यत्वेनोपपन्नं स्यात्, दृष्टान्ततया प्रस्तुते चैत्रत्वे शरीरविशेषावच्छिन्नात्मविशेषवर्तिनि शरीरविशेषमादाय कार्यैकवृत्तित्वरूपहेतोः, तच्छरीरविशेषात्मककार्यानधिकरणतच्छरीरप्रागभावासमानकालविशेषवृत्तिध्वंसप्रतियोगिवृत्तित्वरूपसाध्यस्य सत्त्वादुपपत्तिः। दर्शितेन प्रलयसाधकप्रमाणेन कार्यानधिकरणतयैव प्रलयसिद्ध्या तस्य कालविशेषस्य कार्यानधिकरणत्वाभावे तत्र प्रलयत्वस्यैवासिद्धिप्रसङ्गादिति तर्कालङ्कारस्य जगदीशस्याशयस्तत्त्वालोककृता व्यक्तीकृतः।

अनन्तरं 'तथा धूमवत्यपि विरहो दहनस्ये'त्यादि[१] दीधितेरवतरणतया 'ननु महाप्रलये मानाभावेन तदवच्छेदेनेत्ययुक्तमत आह तथेती'ति यदुपन्यस्तं[२] जगदीशतर्कालङ्कारेण, तदाशयं 'मानाभावेने'ति परिगृह्य प्रकाशयति तत्त्वालोककारः 'स्वत्वस्याननुगततया दृष्टान्तपक्षयोरनुगतसाध्याभावेनानुमानासम्भवादागमस्य च तात्पर्यानिर्णयादिना संदिग्धार्थकतया प्रामाण्यानिर्णयादिति भाव' इत्युपन्यासेन।

---

१. प्रकृतग्रन्थः (प्रथमो भागः), दीधितिमूलम्, पृ. १२

२. तदेव, जागदीशीमूलम्, पृ. १२

जगदीशेनोत्तरग्रन्थावतरणतया 'महाप्रलये मानाभाव' इति यदुक्तम्, तत्र इतः पूर्वमेव प्रलयसाधकानुमानस्योक्ततया असङ्गत्याशङ्कापनोदायोच्यते तत्त्वालोककृद्भिः, दर्शितस्य प्रलयसाधकानुमानस्य स्वत्वघटितसाध्यकत्वेन स्वत्वस्यानुगतत्वाभावात् पक्षदृष्टान्तयोरनुगतसाध्यासम्भवेनानुमानासम्भवे तात्पर्यनिर्णायकाभावेन तन्निर्णयासम्भवात्, तात्पर्यसन्देहे सति आगमस्य संदिग्धार्थकतया प्रामाण्यनिर्णयासम्भवात्प्रलये मानाभाववक्तुस्तर्कालङ्कारस्य तात्पर्यादिति।

'इह पर्वते नितम्बे हुताशनो न शिखरे' इत्येवं प्रतीत्या धूमवत्यपि हुताशनस्य विरहः संयोगेन द्रव्यस्याव्याप्यवृत्तित्वमूलक उक्तः। तदनन्तरं 'वृत्तेः = सम्बन्धस्य, अव्याप्यवृत्तित्वे वृत्तिमतो = सम्बन्धिनः, व्याप्यवृत्तित्वस्यात्यन्तमसम्भावितत्वाच्चे'-ति। तत्रोपपत्तिर्दीधितिकृतोक्ता।

तत्रोत्तरग्रन्थस्य 'वृत्तेरि'त्यादेरवतरणिकारूपेण तर्कालङ्कारेण 'ननूक्तप्रतीतिः = इह पर्वते नितम्बे हुताशनो न शिखरे इति प्रतीतिः, पर्वतवृत्तिहुताशनावच्छेदकत्वाभावं शिखरे, शिखरावच्छिन्नपर्वतवृत्तित्वाभावं वा हुताशनेऽवगाहते, न तु पर्वते एव हुताशनाभावमिति यदि ब्रूयात्तदाऽप्याह वृत्तेरिती'ति यदुपन्यतम्[१], तद्घटकस्य 'यदि ब्रूयादि'त्यस्य तथोक्तावस्वरससूचकत्वं तत्त्वालोककृद्दर्शयति 'अथोक्तरूपेण प्रतीतिविषयकत्वस्यावच्छेदकत्वाभावे वृत्तित्वाभावे वा कल्पने कुत्राप्यभावस्याव्याप्यवृत्तित्वं न स्यादित्यस्वरसादाह यदि ब्रूयादिती'ति।

दर्शितप्रतीतिविषयता यदि अवच्छेदकत्वाभावे = पर्वतवृत्तिहुताशनस्य शिखरनिष्ठेऽवच्छेदकत्वाभावे, शिखरावच्छिन्नपर्वतवृत्तित्वाभावे वा, यदि स्वीकृता स्यात्तदा तादृशेऽन्यत्रापि तथैव स्यात्। तथासति अभावस्याव्याप्यवृत्तिता कुत्रापि न स्यादित्यस्वारस्यं 'यदि ब्रूयादि'त्युक्त्या सूचितमित्यालोकितं तत्त्वालोककृद्भिः।

'वृत्तेरव्याप्यवृत्तित्वे वृत्तिमतो व्याप्यवृत्तित्वस्यात्यन्तमसम्भावितत्वाच्चे'ति दीधितेर्व्याख्यायां तर्कालङ्कारेण 'तथा च यो यदवच्छेदेन यदीययत्सम्बन्धाभाववान् स तदवच्छेदेन तस्य तत्सम्बन्धावच्छिन्नतदभाववानिति व्याप्त्या शिखरावच्छेदेन संयोगसम्बन्धावच्छिन्नवह्न्यभावसिद्धिरिति भाव' इत्युपन्यस्तम्[२]। तत्र 'तथा चे'ति परिगृह्यालोकयति तत्त्वालोककारः 'सम्बन्धसत्तायास्सम्बन्धिसत्ताप्रयोजकतया

---

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. १२

२. तदेव, जागदीशीमूलम्, पृ. १२

प्रयोजकविरहेण (सम्बन्धविरहेण) प्रयोज्य(सम्बन्धि)विरहस्यावश्यकत्वमित्याशयेनाह तथा चेति' इति।

'तथा चे'त्यादिदर्शितजागदीशीघटकं 'यत्सम्बन्धाभाववानि'ति (यो यदवच्छेदेन यदीययत्सम्बन्धाभाववानिति) आदायोच्यते 'अभावश्च = यत्सम्बन्धाभावश्च, तत्सम्बन्धेन तद्वत्ताबुद्धिर्येन सम्बन्धेन तत्सम्बन्धसत्तामपेक्षते तत्सम्बन्धावच्छिन्नप्रतियोगिताकः' इति।

पर्वते संयोगसम्बन्धेन वह्निमत्ताबुद्धिस्तत्र समवायसम्बन्धेनैव वह्नेः संयोगात्मकसत्तामपेक्षते। अतः समवायसम्बन्धावच्छिन्नप्रतियोगिताकः वह्नेः संयोगात्मकसम्बन्धाभावः शिखरावच्छेदेन पर्वते तिष्ठति, तदवच्छेदेन तत्र संयोगसम्बन्धावच्छिन्नवह्न्यभावो भवति, काले सर्वस्यैव कालिकसम्बन्धेन सत्त्वात्, वह्निसंयोगाभावस्य कालिकसम्बन्धेन काले जलादौ च सत्त्वात्। अतो जलादिकमवच्छेदकीकृत्य समये = काले, कालिकेन वह्नेः संयोगात्मकसम्बन्धाभावस्य हेतोः सत्त्वात्तत्र समये जलाद्यवच्छेदेन संयोगसम्बन्धावच्छिन्नवह्न्यभावात्मकसाध्यस्यासत्त्वात्, तादृशसाध्याभावविरहस्यैव सत्त्वात्, साध्याभाववद्वृत्तित्वरूपो व्यभिचारः 'यो यदवच्छेदेन यत्सम्बन्धाभाववान् स तदवच्छेदेन तत्सम्बन्धावच्छिन्नतदभाववानि'त्यत्र 'तथा चे'त्यादिना दर्शितनियमे प्रसज्येत।

अतः 'तत्सम्बन्धाभाववानि'ति परिगृह्य 'अभावश्चे'त्याद्युक्तं तत्त्वालोककृता। 'यो यदवच्छेदेन यत्सम्बन्धाभाववान्' इत्यत्र यत्सम्बन्धाभावो न अविशेषितसम्बन्धावच्छिन्नप्रतियोगिताको यथाकथञ्चित्, किन्तु तत्सम्बन्धेन तद्वत्ताबुद्धिर्येन तत्सम्बन्धसत्तामपेक्षते, तत्सम्बन्धावच्छिन्नप्रतियोगिताको विवक्षित इति बोधितं तत्त्वालोककृद्भिः।

तथासति नोक्तनियमे व्यभिचारः, संयोगसम्बन्धेन वह्न्यादिमत्ताबुद्धेस्समवायसम्बन्धेनैव वह्न्यादिसम्बन्धसंयोगसत्तापेक्षणात्, समवायसम्बन्धावच्छिन्नप्रतियोगिताकस्य वह्निसम्बन्धसंयोगाभावस्य काले विरहात्, तत्र काले वह्निसम्बन्धस्य संयोगस्यैव समवायेन सत्त्वात्, विवक्षितसम्बन्धावच्छिन्नप्रतियोगिताकयत्सम्बन्धाभावात्मक = संयोगाभावात्मक, हेतोर्विरहेण संयोगसम्बन्धावच्छिन्नवह्न्यभावात्मकसाध्यस्यासत्त्वेऽपि व्यभिचाराभावात्, कालस्य द्रव्यतया व्यापकतया च तत्र वह्न्यात्मकद्रव्यसंयोगस्य सद्भावात्, संयोगसम्बन्धावच्छिन्नप्रतियोगिताकवह्न्यभावसत्त्वात्, जलादौ संयोगेन वह्नेरसत्त्वेऽपि काले साक्षादेव वह्निसम्बन्धस्य संयोगस्य समवायसम्बन्धेन संयोगेन च वह्नेः सत्त्वेन जलाद्यवच्छेदेनापि समये संयोगसम्बन्धावच्छिन्नवह्न्यभावस्य

सत्त्वासम्भवात्।

'एवं प्रतियोगिमतोरपि कालदेशयोर्देशकालभेदावच्छेदेन तदभावः' इत्युत्तरदीधितिग्रन्थावतरणिकारूपा 'ननूक्तव्याप्तौ = यो यदवच्छेदेन यत्सम्बन्धाभाववान् स तदवच्छेदेन तस्य तत्सम्बन्धावच्छिन्नाभाववानिति व्याप्तौ, अप्रयोजकत्वमन्यथा तुल्यन्यायेन यो यदीययत्सम्बन्धवान् स तत्सम्बन्धेन तद्वानिति व्याप्त्या कुण्डादिसंयोगिनो बदरादेः कुण्डादिमत्त्वापत्तेरित्युक्तावाह एवमि'ति [जागदीश्याम्] यद्व्याख्यातम्[१], तद्घटकान्यथेति परिगृह्य प्रकाश्यते तत्त्वालोककृद्भिर्यत् 'सम्बन्धसत्तायाः सम्बन्धिसत्ताप्रयोजकत्वमभ्युपेत्योक्तस्य नियमस्य = यो यदवच्छेदेन यत्सम्बन्धाभाववानित्यादिनियमस्य, स प्रयोजकत्वोपगमे इत्यर्थः = अन्यथार्थः।

'तुल्यन्यायेने'ति प्रतीकमादाय लिख्यते तैः 'प्रयोजकाभावस्य कार्याभाव इवोक्तस्यासाधारणप्रयोजकस्य प्रयोज्यस्यापि नियामकतयोदीच्यव्याप्तेरपि सप्रयोजकत्वमेव स्यादिति तात्पर्यार्थ' इति।

तस्यायं भावो यद् यो यदवच्छेदेन यत्सम्बन्धाभाववान् इति व्याप्तौ मया अप्रयोजकत्वदोषो दर्शितः, तथापि तस्या व्याप्तेस्त्वया कथञ्चित् सप्रयोजकत्वस्यैव स्वीकारे प्रयोजकाभावस्य कार्याभाव इवोक्तस्य अर्थादुक्तस्य प्रयोजकाभावस्य, प्रयोजकप्रयोज्यानुमित्यात्मककार्याभावनियामकत्वमिव तत्र त्वदभ्युपगतसप्रयोजकत्वघटकस्यानिर्दिष्टस्य, कस्यचिदसाधारणप्रयोजकस्य प्रयोज्यस्यापि नियामकतयोदीच्यव्याप्तेरपि = यो यदीययत्सम्बन्धवान् स तत्सम्बन्धेन तद्वानिति मदापादितव्याप्तेरपि, सप्रयोजकत्वमेव तुल्यन्यायात्स्यादिति तत्तात्पर्यात्।

अर्थाद् येन प्रयोजकविशेषेण त्वया यो यदवच्छेदेन यत्सम्बन्धाभाववानिति व्याप्तिः स्वीकृता स्यात्तेनैव यो यत्सम्बन्धवान् स तत्सम्बन्धेन तद्वानिति व्याप्तिरप्यभ्युपगता स्यात्, तथासति कुण्डादिसंयोगिनो बदरादेः कुण्डादिमत्त्वापत्तिः स्यादिति कथनाशयः।[२१७]

तत्त्वालोकः – 'यो यदीये'त्यादि[२]। अत्र रूपसमवायवति वायौ रूपासत्त्वेन व्यभिचारः। समवायस्य नानात्वमभ्युपेत्य बदरादेरित्यत्र 'आदि' पदाद्वायोरप्यापत्तिविशेष्यतां वा स्वीकृत्य यन्निरूपितत्वविशिष्टस्य सम्बन्ध-

---

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. १२

२. तदेव, जागदीशीमूलम्, पृ. १२

स्यानुयोगितया व्याप्यत्वम्वोरीकृत्य वारणीयः। रूपसमवायी वायुरित्यप्रत्ययान्न रूपनिरूपितत्वविशिष्टसमवायानुयोगित्वं वायौ, कुण्डसंयोगी बदर इति प्रत्ययाद्धि तत्र कुण्डनिरूपितत्वविशिष्टसंयोगानुयोगित्वं च स्वीक्रियत एव।

न च सम्बन्धादिपदोत्तरमत्वर्थीयस्य प्रतियोगित्वमर्थः सम्भवति, घटसमवायिरूपमित्यप्रत्ययात्।

अथ सम्बन्धिसत्तायाः सम्बन्धसत्ताप्रयोज्यत्वानभ्युपगमे ह्रदादौ न वह्निः पर्वते त्वस्तीत्येतन्नियमो न स्यादिति चेत्। सत्यम्। सम्बन्धसत्ताधीनत्वपक्षेऽपि सम्बन्धस्यासम्बद्धस्य नियामकत्वे उक्तदोषतादवस्थ्यात्। सम्बद्धस्य तथात्वे चानवस्थापातात्सम्बन्धस्य क्वचित्स्वरूपतो नियामकत्वाभ्युपगम एव कार्य्य इति सम्बन्धिसत्ताया एव स्वरूपप्रयोज्यत्वं वाच्यम्, रूपान्तरेण प्रयोज्यप्रयोजकभावयोरेकत्राविरोधात्। संयोगसमवायादीनां सम्बन्धत्वन्तु विशिष्टानुभवबलात् लाघवाच्चाश्रीयत इत्येतदभिमानम्।

'कुण्डादिमत्त्वापत्तिरि'ति[१]। इदन्तु चिन्तनीयम्। सम्बन्धिसत्तायां सम्बन्धसत्ताव्याप्यत्वे व्यभिचारदर्शनसामान्याभावेन निर्णीते व्यापकाभावेन व्याप्याभावसाधने तदुभयोर्व्याप्तसप्रयोजकत्वाङ्गीकारेऽपि नोक्तदोषः, प्रयोज्यप्रयोजकभावाङ्गीकारपक्षे पूर्वोक्तव्याप्तेस्सप्रयोजकत्वाङ्गीकारेऽपि तत्तन्निरूपिततत्तत्प्रतियोगिकत्वविशिष्टसंयोगसमवायादेरनुयोगितया नियतस्य संसर्गत्वस्वीकारात्। संयोगातिरिक्तसम्बन्धवाचकपदोत्तरमत्वर्थीयस्यैवानुयोगित्वार्थकत्वात्, संयोगपदोत्तरस्य चाश्रयत्वमात्रार्थकत्वात्कुण्डादिनिरूपितत्वविशिष्टानुयोगित्वस्य सत्त्वेऽपि तत्प्रतियोगिकत्वविशिष्टानुयोगिकत्वविरहात्, सम्बन्धान्तरस्थले विशिष्टानुयोगित्वभावेऽपि संयोगस्थले तस्यास्वीकाराद्वोक्तदोषस्य न संभव इति।[२१८]

प्रकाशः– 'यो यदीयेत्यादी'ति प्रतीकपरिग्रहेणालोकं दर्शयति यद् 'यो यदीययत्सम्बन्धवान् स तत्सम्बन्धेन तद्वानि'त्यस्यामन्यथादर्शितव्याप्तौ समवायात्मकसम्बन्धस्यैकस्यैव सत्त्वेन रूपस्य समवायात्मकसम्बन्धवति रूपवत्त्वविरहात् प्राप्तो व्यभिचारः, समवायस्य नानात्वमभ्युपगम्य वायौ स्पर्शसमवायसत्त्वेऽपि रूपसमवायाभावाद् वारणीयः।

---

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. १२

समवायस्य नानात्वानभ्युपगमे तु 'तद्व्याप्तिसत्त्वे कुण्डादिसंयोगिनो बदरादेः कुण्डादिमत्त्वापत्तेरि'त्येतज्जागदीशीघटकबदरादेरित्यत्रत्य'आदि'पदाद् वायुं परिगृह्य तद्व्याप्तिपक्षे बदरस्य कुण्डवत्त्वापत्तिर्यथा दीयते, तथैव वायोरपि रूपवत्त्वापत्तिर्जगदीशस्य दातुमिष्टा। अतो वायोरपि बदरस्येवापत्तिविशेष्यतां स्वीकृत्य रूपसमवायवति वायौ समवायेन रूपवत्त्वविरहप्रयुक्तप्राप्तव्यभिचारो वारणीयोऽर्थाद्दीयमानापत्तिविशेष्यातिरिक्त एव प्राप्तव्यभिचारस्य वारयितुमुचितत्वात्। अतो दीयमानापत्तिविशेष्ये बदरे यथा व्यभिचारवारणम् स्वाभाववत्त्वसम्बन्धेन तथैव द्वितीयस्मिन्नपि दीयमानापत्तिविशेष्ये वायौ वारणम्, अर्थाद्दीयमानापत्तिविशेष्यत्वेन बदरवाट(यु)वोः समानतया पूर्वं बदर इव वायौ अपि व्यभिचारप्रदर्शनौचित्यविरहात् पूर्वं वायौ व्यभिचारादर्शने च तत्र तद्वारणावश्यकत्वविरहात्।

अथवा अनुयोगितयैव यन्निरूपितत्वविशिष्टसम्बन्धस्य तेन सम्बन्धेन तद्वत्त्वव्याप्यत्वं स्वीकृत्य, अर्थात् यो यन्निरूपितत्वविशिष्टानुयोगित्ववान् स तेन सम्बन्धेन तद्वानित्येव व्याप्तिं स्वीकृत्य वायौ प्राप्तव्यभिचारो वारणीयः, रूपसमवायी वायुरित्येवं प्रतीतेरभावेन रूपनिरूपितत्वविशिष्टसमवायानुयोगित्वस्य वायावभावात्तत्र समवायसम्बन्धेन रूपाभावेऽपि उक्तव्याप्तौ व्यभिचारासम्भवात्।

कुण्डसंयोगी बदर इत्येवं प्रतीतेर्जायमानत्वेन कुण्डनिरूपितत्वविशिष्टसंयोगानुयोगित्वस्य बदरे सद्भावाद् बदरस्य कुण्डवत्त्वापत्तिसम्भवात्, सम्बन्धादिपदोत्तरमत्वर्थीयप्रत्ययस्य प्रतियोगित्वार्थकत्वादेव वायौ रूपनिरूपितत्वविशिष्टसमवायप्रतियोगित्वविरहादेव रूपसमवायी वायुरित्येवं प्रतीतेरभावः, न तु रूपनिरूपितत्वविशिष्टसमवायानुयोगित्वविरहात् कुण्डनिरूपितत्वविशिष्टसंयोगप्रतियोगित्वस्य बदरे सद्भावात् कुण्डसंयोगी बदर इति प्रतीतेः बदरे कुण्डवत्त्वापत्तिसम्भवः।

ततश्च यन्निरूपितत्वविशिष्टस्य सम्बन्धस्यानुयोगितया व्याप्यत्वं स्वीकृत्योक्तव्याप्तौ वायौ प्राप्तव्यभिचारवारणासङ्गतिरित्याशङ्कावारणाय उच्यते 'न च सम्बन्धादिपदोत्तरमत्वर्थीयस्य प्रतियोगित्वमर्थः सम्भवति, घटसमवायिरूपमित्यप्रत्ययादि'ति। घट[सम]वायिरूपमित्येवं प्रतीतेरभावेन प्रतियोगित्वस्य सम्बन्धादिपदोत्तरमत्वर्थीयार्थत्वासम्भवादुक्ताशङ्काया निरासाद् वायौ प्राप्तव्यभिचारवारणस्य दर्शिततृतीयरीत्यापि युक्तत्वादिति 'अत्रे'त्यादि 'घटसमवायिरूपमित्यप्रत्ययादि'त्यन्तेन तत्त्वालोककृता सूचितम्।

अनन्तरम् 'अथे'त्यादिना तत्त्वालोककृता शङ्क्यते यत् सम्बन्धिसत्तायाः सम्बन्धसत्ताप्रयोज्यत्वानभ्युपगमे ह्रदादौ न वह्निः, पर्वतादौ त्वस्तीति नियमो न

स्यादिति, अर्थात् सम्बन्धविरहेऽपि यदि तेन सम्बन्धेन तत्र तद्वत्ता स्यात्तदा पर्वतादाविव ह्रदादावपि वह्निः स्यात्। ह्रदादौ न वह्निः, पर्वतादौ वह्निरिति नियमो न स्यादित्याशङ्का।

अत्र समाधीयते यत् सम्बन्धिसत्तायाः सम्बन्धसत्ताप्रयोज्यत्वस्वीकारपक्षेऽपि यदि असम्बद्धस्यैव सम्बन्धस्य सम्बन्धिसत्ताप्रयोजकता स्यात्तदाऽपि ह्रदादौ न वह्निः, पर्वतादौ तु वह्निरिति नियमानुपपत्तिस्तदवस्थैव स्यात्, असम्बद्धस्य वह्निसम्बन्धस्य संयोगस्य जलादावपि सद्भावात्।

सम्बन्धस्यैव[1] सम्बन्धस्य सम्बन्धिसत्तानियामकत्वे सम्बन्धस्य सम्बन्धधारास्वीकारेऽनवस्थापातात्, अनवस्थावारणाय क्वचित् सम्बन्धस्य स्वरूपत एव, अर्थात् केनचित् सम्बन्धेन सम्बद्धत्वं विनैव, नियामकत्वाभ्युपगमे = सम्बन्धिसत्तानियामकत्वाभ्युपगम, एव कर्त्तव्यः स्यात्। तथासति सम्बन्धिसत्ताया एव = सम्बन्धसत्तामनपेक्ष्यैव, स्वरूपप्रयोज्यत्वसम्भवात् स्वस्मिन्नपि एकत्र रूपभेदेन = विभिन्नरूपेण, प्रयोज्यत्वप्रजोजकत्वरूपयोः प्रयोज्यप्रयोजकभावयोर्विरोधाभावेन सम्भवात् सम्बन्धिसत्तायाः सम्बन्धसत्ताप्रयोज्यत्वानभ्युपगमेऽपि विभिन्नरूपेण सम्बन्धिसत्तायामेव प्रयोज्यत्वप्रयोजकत्वोपगमादेव ह्रदादौ न वह्निः पर्वतादौ तु वह्निरिति नियमसम्भवात्।

यदि सम्बन्धसत्तामनपेक्ष्यैव सम्बन्धिसत्तोक्तदिशा स्वीक्रियेत तदा संयोगसमवायादीनां सम्बन्धत्वस्वीकारो व्यर्थ इत्याशङ्कानिरासाय उच्यते 'संयोगसमवायादीनां सम्बन्धत्वन्तु विशिष्टानुभवबलाल्लाघवाच्चाश्रीयते' इति।

दण्डी पुरुषः, रूपवान् घट इत्यादेः विशिष्टानुभवस्य विशिष्टबुद्धेरुपपत्तिः संयोगसमवायादीनां सम्बन्धमन्तरा न सम्भवति, अतो लाघवाच्च = संयोगिसमवायिप्रभृतीनां सम्बन्धिनां सम्बन्धत्वस्वीकारापेक्षया संयोगसमवायादीनामेव सम्बन्धत्वस्वीकारो लाघवाद्, आश्रीयते इति तदाशयात्।

परन्तु सम्बन्धिसत्तायां सम्बन्धसत्ताप्रयोज्यत्वाभ्युपगमावश्यकत्वविरहस्य सम्बन्धिसत्तायामेव रूपान्तरेण प्रयोज्यत्वप्रयोजकत्वयोः स्वीकारेणोपर्युक्तमुपपादनमभिमानमेव = अभिमानमूलकमेव, तथाननुभवात्। अनुभवतः सम्बन्धिसत्ता सम्बन्धसत्ताप्रयोज्यैव। अत एव घटाभाववद्भूतलमित्यादौ तत्तत्कालीन-तत्तद्भूतलादेस्तत्तदभावादिसम्बन्धत्वकल्पनेति 'इत्येतदभिमानमि'त्युपन्यस्य [तत्त्वालोककृता] सूचितम्।

---

१. 'सम्बद्धस्यैवे'त्यनेन भाव्यम्

अनन्तरं 'कुण्डादिमत्त्वापत्तिरि'ति जागदीशीं परिगृह्य 'इदं चिन्त्यमि'त्युच्यते तत्त्वालोककृद्भिस्तस्य चिन्त्यत्वे कारणञ्च सम्बन्धिसत्तायां सम्बन्धसत्ताव्याप्यत्वस्थितौ, अर्थाद् यत्र यत्र सम्बन्धिसत्ता तत्र तत्र सम्बन्धसत्ता इत्येवं नियमे व्यभिचारदर्शनसामान्याभावेन निर्णीते सति व्यापकाभावेन, व्यापकस्य = सम्बन्धसत्तायाः, अभावेन व्याप्याभावस्य = सम्बन्धिसत्ताऽभावस्य साधने = वह्न्यभावेन धूमाभावसाधन इव सम्बन्धसत्ताऽभावेन सम्बन्धिसत्ताऽभावसाधने, तदुभयोर्नियमयोर्व्याप्तिसप्रयोजकत्वाङ्गीकारेऽपि, अर्थात् यत्र यत्र सम्बन्धिसत्ता तत्र सम्बन्धसत्तेति नियमे तन्नियमात्मकव्याप्तिमति हेतौ वा सम्बन्धिसत्तायां तथा यत्र यत्र सम्बन्धसत्तात्मकव्यापकाभावस्तत्र तत्र सम्बन्धिसत्ताभाव इति नियमे तन्नियमाकव्याप्तिमति हेतौ व्यापकाभावे = सम्बन्धसत्ताऽभावे, सप्रयोजकत्वाङ्गीकारेऽपि = व्यभिचारशङ्कानिवर्तकात्मकानुकूलतर्कसहितत्वस्वीकारेऽपि, नोक्तदोषः = बदरादेः कुण्डादिमत्त्वापत्तिरूपोक्तदोषो न, उक्तनियमद्वयस्य बदरादौ कुण्डादिमत्त्वापादकत्वविरहात्।

सम्बन्धिसत्तासम्बन्धसत्तयोः प्रयोज्यप्रयोजकभावाङ्गीकारपक्षे पूर्वोक्तव्याप्तेः = यत्र यत्र सम्बन्धसत्ता तत्र तत्र सम्बन्धिसत्तेतिव्याप्तेः, सप्रयोजकत्वाङ्गीकारेऽपि = व्यभिचारशङ्कानिवर्तकानुकूलतर्कसहितत्वस्वीकारेऽपि, तत्तन्निरूपिततत्तत्प्रतियोगिकत्वविशिष्टसंयोगसमवायादेरनुयोगितानियतस्य संसर्गतास्वीकारादुक्तदोषासम्भवात्, घटनिरूपितघटप्रतियोगिकत्वविशिष्टस्य संयोगस्यानुयोगितानियतस्य भूतले सत्त्वात्तत्र घटात्मकसम्बन्धिसत्ता युज्यते।

'अनुयोगितानियतस्य संसर्गत्वस्वीकारादि'त्युक्त्या स्वानुयोगिनि अनुयोगितासम्बन्धेनैव विद्यमानस्य तत्तन्निरूपिततत्तत्प्रतियोगित्वविशिष्टस्य संयोगसमवायादेः संसर्गतास्वीकारः सूचितः। बदरादौ कुण्डादिनिरूपितकुण्डादिप्रतियोगिकत्वविशिष्टस्य संयोगस्य अनुयोगितया सत्त्वाभावात्कुण्डादिमत्त्वापत्त्यसम्भवात्।

अत्र कुण्डसंयोगिबदरमिति प्रतीतेर्बदरादौ कुण्डादिनिरूपितत्वविशिष्टसंयोगानुयोगित्वस्य सत्त्वात्, अनुयोगितया वा कुण्डनिरूपितत्वविशिष्टस्य संयोगस्य सत्त्वात्, बदरवत्कुण्डमितीव कुण्डवद्बदरमित्यपि स्यादेवेति शङ्काया निराकरणायोच्यते— 'संयोगातिरिक्तसम्बन्धवाचकपदोत्तरमत्वर्थीयस्यैवानुयोगित्वार्थकत्वात् संयोगपदोत्तरमत्वर्थीयस्याश्रयत्वमात्रार्थकत्वादि'ति। तेन कुण्डनिरूपितत्वविशिष्टसंयोगानुयोगित्वस्य बदरे विरहान्नोक्तदोषापत्तिसम्भवः, कुण्डसंयोगिबदरमिति प्रतीत्या कुण्डनिरूपितसंयोगाश्रयत्वमात्रस्य बदरे लाभात्।

कुण्डनिरूपितत्वविशिष्टानुयोगित्वं बदरेऽभ्युपेत्यापि समाधानान्तरमुच्यते

कुण्डादिनिरूपितत्वविशिष्टानुयोगित्वस्य = कुण्डादिनिरूपितत्वविशिष्टसंयोगानुयोगित्वस्य, बदरादौ सत्त्वेऽपि तत्प्रतियोगिकत्व(कुण्डादिप्रतियोगिकत्व)विशिष्टानुयोगित्वविरहादुक्तदोषासम्भवात्।

सम्बन्धान्तरस्थले = संयोगातिरिक्तसमवायादिसम्बन्धस्थले, विशिष्टानुयोगित्वभावेऽपि = तत्तन्निरूपितत्वविशिष्टानुयोगित्वस्य सम्बन्धत्वसद्भावेऽपि, संयोगस्थले तस्यास्वीकारात् = कुण्डादिनिरूपितत्वविशिष्टसंयोगानुयोगित्वस्य संबंधत्वास्वीकारात्, तत्र कुण्डादिनिरूपितकुण्डप्रतियोगिकत्वविशिष्टानुयोगित्वस्यैव सम्बन्धत्वस्वीकारात्, तादृशस्य बदरादावभावादुक्तदोषासम्भवादिति बदरादौ कुण्डादिमत्त्वापत्तौ चिन्त्यताकारणं दर्शितं तत्त्वालोककृद्भिरिति प्रकाशः।[२१८]

तत्त्वालोकः– 'न चैतत्काले'त्यादि[१]। न चात्र विनिगमकाभाव इति वाच्यम्, स्वारसिकोक्तप्रतीतेः। क्लृप्तेन तन्तुनिष्ठघटाभावेन विषयपर्य्यवसानसम्भवेऽक्लृप्तविषयकत्वस्यान्याय्यताया एव विनिगमकत्वादिति भावः।

'एतत्कालस्य तदवच्छेदकत्वे'ति[२]। न चैवमिदानीमत्र घटो नास्तीत्यत्रोभयाधिकरणत्वावगाहित्वं भट्टाचार्य्योक्तङ्कथं सङ्गच्छत इति वाच्यं, 'अत्रे'त्यस्यैतत्कपाल इत्यर्थकत्वात्तत्रोभयाधिकरणत्वस्यैवाव्याप्यवृत्तित्वादिति।

'प्रतियोगिकुक्षावग्रहेऽपी'ति[३]। नन्वेतत्कालवृत्तित्वस्य तन्तुविशेषणत्वे नायं दोष इति चेत्। मूले वृक्षे न कपिसंयोग इत्यत्राऽपि 'वृक्षे' इति सप्तम्या अवच्छेदकत्वार्थकत्वमभ्युपेत्य वृक्षावच्छेदकमूलवृत्तिकपिसंयोगाभावविषयकत्वसम्भवादव्याप्यवृत्त्यभावोच्छेदप्रसङ्गः।

न चेदानीमेतत्कपाले न घट इत्यत्र कालवृत्तिकपाले कपालवृत्तिकाले वा घटात्यन्ताभावविषयकत्वेऽव्याप्यवृत्त्यभावाङ्गीकार इति वाच्यम्, तत्राप्येतत्कालावच्छिन्नैतत्कपालवृत्तित्वाभावस्यैव घटे विषयत्वात्।

न च वृक्षावच्छेदकत्वस्य वृक्षसमवायित्वरूपस्यैव वाच्यतया शाखायां रूपे न रूपत्वमित्यस्यापि प्रामाण्यापत्तिः, न हि तत्प्रतीतेः कथञ्चिदपि प्रामाण्यं, रूपत्वस्य व्याप्यवृत्तित्वाङ्गीकारादिति वाच्यम्, मूलावच्छिन्नवृक्षवृत्तित्वाभावस्यैव तत्रापि विषयत्वाङ्गीकारात्। अत एवैकरूपताप्युक्तप्रतीतीनामुपपद्यते।

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. १३
२. तदेव, जागदीशीमूलम्, पृ. १३
३. तदेव, जागदीशीमूलम्, पृ. १३

यदि चोपरि मूले वृक्षे न तत्संयोग इति प्रतीतौ मूलावच्छिन्नोपरि दिगवच्छिन्नवृक्षनिरूपितवृत्तित्वाप्रसिद्ध्या तदभावस्य न विषयत्वसम्भवो यस्य हि वृत्ति र्न यत्र सार्वदैशिकी, न सार्वकालिकी, तन्निरूपित[तद्]वृत्तिताया एव सावच्छिन्नत्वस्याभ्युपेयत्वादिति मूलावच्छेदेनोपरिदिगवच्छेदेन वृक्षे तत्संयोगाभाव एव .विषय इत्यव्याप्यवृत्त्यभावसिद्धान्तस्य न हानिरित्युच्यते।

तदेदानीमस्ताचले प्राच्यां न ज्योतिरित्यत्र प्राचीदिगवच्छिन्नैतत्कालावच्छिन्नस्यास्ताचलवृत्तित्वस्यास्ताचलावच्छिन्नप्राचीवृत्तित्वस्य चाप्रसिद्धिः, प्राचीदिगवच्छिन्नास्ताचलावच्छिन्नैतत्कालवृत्तित्वस्यापि हि न सम्भवस्तादृशवृत्तिमतोऽसम्भवादिति काल एवाभावोऽभ्युपगन्तव्यः।

तत्कालसम्बद्धावस्ताचलप्राचीदिग्विशेषौ च तत्कालनिष्ठाधिकरणतावच्छेदकौ सम्भवत इति कालवृत्तितावच्छेदकत्वं देशस्य नाप्रामाणिकम्। यैस्त्वव्याप्यवृत्तिपदार्थो नाङ्गीक्रियते तैस्तु विशेषरूपेण संसर्गत्वमभ्युपेत्य वृत्तित्वविशेषीयस्वरूपसम्बन्धावच्छिन्नवृत्तित्वाभावविषयकत्वेन सर्वप्रतीतिरुपपाद्यत इति।[२१९]

प्रकाशः – 'प्रतियोगिमतोरपि कालदेशयोर्देशकालभेदावच्छेदेन तदभाव' इति दीधितेर्व्याख्यायां 'घटवत्यपि काले इदानीं तन्तौ न घटः इति प्रतीत्या तन्त्ववच्छेदेनैतत्काले घटाभावस्तथा घटवत्यपि कपाले घटनाशदशायाम् इदानीमिह कपाले न घट इत्याद्यनुभवात् तत्कालावच्छेदेन कपाले घटस्य सामान्याभावः सिद्ध्यती'त्युपपादितं[1] तर्कालङ्कारेण।

तदग्रे तेनैव 'न च इदानीं तन्तुषु न घट इत्यादिप्रतीतेरेतत्कालावच्छेदेन तन्तुष्वेव घटाभावो विषयो न तु तन्त्ववच्छेदेनैतत्काले तथेति वाच्यमि'ति यदाशङ्कितं 'न चैतत्काले'त्यादिप्रतीकतया तत्परिगृह्य 'न चात्र विनिगमकाभाव'इत्यनेन विनिगमकाभाव आशङ्कितस्तत्त्वालोककृता।

तन्त्ववच्छेदेन एतत्काले घटाभावः, एतत्कालावच्छेदेन तन्तौ वा घटाभावः, 'इदानीं तन्तौ न घट' इति प्रतीतिविषयोऽनयोरेकतरस्य विनिश्चायको नास्तीति शङ्काशयः।

---

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. १२

उक्ताशङ्कासमाधानं 'स्वारसिकोक्तप्रतीतेरि'त्यादिना दीयते। स्वारसिकी = स्वाभाविकी, अनादिपरम्परातो भवन्ती, उक्ता = 'इदानीं तन्तौ न घट' इति, या प्रतीतिः, तस्याः प्रतीतेः, क्लृप्तेन तन्तुनिष्ठघटाभावेन विषयपर्यवसानसम्भवे अक्लृप्तविषय-कत्वस्य = एतकालनिष्ठघटाभावविषयकत्वस्य, अन्याट(य्)यताया विनिगमकत्वादिति।

तन्तौ घटाभावात्मको विषयः पूर्वत एव क्लृप्त इदानीं घटवत्काले घटाभावा-त्मको विषयस्तु न पूर्वतः क्लृप्तोऽत उक्तायाः स्वारसिक्याः प्रतीतेः क्लृप्तविषयकत्वस्य न्याट(य्)यत्वरूपविनिगमकमाश्रित्य 'न चे'त्यादिना शङ्का नायुक्ता इति।

उक्तशङ्कायाः समाधानं 'तन्तुषु घटाभावस्य व्याप्यवृत्तितया एतत्कालस्य तदवच्छेदकत्वावगाहने उक्तप्रतीतेर्भ्रमत्वापातादि'ति विहितं[1] तर्कालङ्कारेण।

अत्र तत्त्वालोककृद्भिः शङ्क्यते यत् एवंसति तर्कालङ्कारोक्तयुक्त्या उक्तप्रतीतेरे-तत्काल एव तन्त्ववच्छेदेन घटाभावावगाहित्य[त्व]स्वीकारे 'इदानीमत्र घटो नास्तीत्यत्रोभयाधिकरणत्वा(कालदेशाधिकरणत्वा)वगाहित्वं भट्टाचार्योक्तं कथं सङ्ग-च्छते' इति।

उपपादितयुक्त्या तन्त्वधिकरणत्वावगाहित्वासम्भवात् कालमात्राधिकरणत्वा-वगाहित्वस्यैव सङ्गतत्वाद् भट्टाचार्योक्तेः सङ्गतेः सम्भवाभावादिति 'न चे'त्यादिनोत्था-पितशङ्काशयः।

'इदानीमत्र घटो नास्ती'त्येतद्घटकस्य 'अत्र' इत्यस्य 'एतत्कपाल' इत्यर्थक-त्वात् 'तन्तौ' इत्यर्थकत्वविरहात्, इदानीं = कालविशेषे, एतत्कपाले = कपालविशेषे, च घटाभावाधिकरणत्वस्याव्याप्यवृत्तित्वात्। एतत्कपाले घटारम्भकसंयोगराहित्यं यदा भवति, तदा तत्र तादृशकालावच्छेदेन घटाभावाधिकरणता भवति। यदा तु एतत्कपालेऽपि घटारम्भकसंयोगस्तिष्ठति, तदा तत्र घटाभावाधिकरणता न भवति। अपि तु घटाधिकरणतैव भवति। अत एतत्कपाले घटाभावादि[धि]करणताऽव्याप्य-वृत्तिः।

एवमिदानीं कालेऽपि घटारम्भकसंयोगरहितैतत्कपालावच्छेदेन घटाभावाधिक-रणता, घटारम्भकसंयोगवदेतत्कपालावच्छेदेन न घटाभावाधिकरणता।

ततश्च तत्र 'इदानीमत्र घटो नास्ती'ति प्रतीतिस्थले घटाभावाधिकरणत्वस्य एतत्कपालात्मकदेशवृत्तितायाम् 'इदानीं कालो'ऽवच्छेदकः तथा इदानींकालात्मक-

---

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. १२

कालविशेषवृत्तिघटाभावाधिकरणतायाम् 'एतत्कपालात्मक'देशविशेषोऽवच्छेदक इति 'इदानीमत्र घटो नास्ती'त्यत्र भट्टाचार्योक्तस्योभयाधिकरणत्वावगाहित्वस्य नासङ्गतिरिति कथनाशयः।

'इदानीं तन्तौ न घट' इति प्रतीतेर्विषयता यदि एतत्कालवृत्तिघटाभावस्तन्तौ इत्यत्र स्यात्तदाऽपि तत्प्रतीतेर्भ्रमत्वन्नैव भवेत्, ततश्च तस्या भ्रमत्ववारणाय तत्प्रतीत्या तन्त्ववच्छेदेनैतत्काले घटाभावोऽसिद्ध एवेति शङ्काया समाधानम् 'कालस्य प्रतियोगिकुक्षावग्रहेऽपि तादृशप्रतीतेस्तन्त्ववच्छेदेन समये घटाभावावगाहित्वस्यानुभवसिद्धत्वादि'ति कृतं[१] तर्कालङ्कारेण।

अत्र शङ्कते तत्त्वालोककृद् यदुक्तप्रतीतेः = इदानीं तन्तौ घटो नास्तीति प्रतीतेः, एतत्कालवृत्तिर्यस्तन्तुस्तादृशतन्तावेव घटाभावावगाहित्वे सति = तथासति, एतत्कालवृत्तित्वस्य तन्तोरेव विशेषणतया एतत्काले तन्त्ववच्छेदेन घटाभावावगाहित्वस्य विरह इति।

अत्र समाधीयते यदुक्तदिशा तत्रैतत्कालवृत्तित्वस्य तन्तुविशेषणे स्वीकृते सति एतत्काले तन्त्ववच्छेदेन घटाभावानवगाहित्वस्वीकारे सति 'वृक्षे मूले न कपिसंयोग' इत्यादावपि 'वृक्षे' इति सप्तम्या अवच्छेदकत्वार्थकत्वमभ्युपेत्य वृक्षावच्छेदकमूलवृत्तिकपिसंयोगाभावविषयकत्वसम्भवादव्याप्यवृत्त्यभावोच्छेदप्रसङ्गादिति।

'न चे'त्यादिना पुनः शङ्कते यदव्याप्यवृत्त्यभावाव्यच्छेदो न स्याद्। वृक्षेऽव्याप्यवृत्तिकपिसंयोगाभावस्यासिद्धावपि इदानीमेतत्कपाले न घट इति प्रतीत्या कालवृत्तिकपाले (एतत्कालवृत्तिकपाले) कपालवृत्तिकाले वा (एतत्कपालवृत्तीदानीं काले वा) घटात्यन्ताभावावगाहित्वेन तत्र घटवृत्तिकालविशेषे घटवति कपालविशेषे चाव्याप्यवृत्तिर्घटात्यन्ताभावः सिद्ध्यत्येवेति।

अत्र समाधीयते यद् इदानीं तन्तौ न घट इत्यत्र यदि इदानीं कालवृत्तितन्तौ घटाभावो विषयस्तर्हि तथैव इदानीमेतत्कपाले न घट इत्यत्रापि इदानींकालावच्छिन्नैतत्कपाल (इदानीं कालवृत्त्येतत्कपाल)वृत्तिघटाभावो विषयो भवेत्, तथासति अव्याप्यवृत्त्यभावोच्छेदः स्यादेवेति।

'न चे'त्यादिना पुनः शङ्कते यद् वृक्षे मूले न कपिसंयोग इत्यत्र वृक्षे मूलावच्छेदेन कपिसंयोगाभावावगाहित्य[त्व] निराकरणाय 'वृक्षे' इति सति सप्तम्या

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. १३

अवच्छेदकत्वमर्थं स्वीकृत्य वृक्षावच्छेदकमूलवृत्तित्वाभावस्य कपिसंयोगनिष्ठस्य विषयता उपपादिता, तत्र वृक्षावच्छेदकत्वं मूलस्य वृक्षसमवायित्वरूपमेव वाच्यं भवेत्, तथासति शाखायां रूपे न रूपत्वमित्यस्यापि प्रामाण्यापत्तिः स्यात्, रूपसमवायिशाखावृत्तित्वाभावस्य रूपत्वनिष्ठस्या[व]गाहित्वे तत्प्रतीतेः प्रामाण्यसम्भवात्। न च तत्प्रतीतेः कथञ्चिदपि केनापि प्रामाण्यमभ्युपेतम्, रूपत्वस्य व्याप्यवृत्तित्वाङ्गीकारादिति शङ्का।

अत्र समाधीयते। मूलावच्छिन्नवृक्षवृत्तित्वाभावस्यैव (कपिसंयोगगतस्य) तत्रापि (वृक्षे मूले न कपिसंयोग इत्यत्रापि) विषयत्वाङ्गीकारात्। अत एवैकरूपतापि उक्तप्रतीतीनामुपपद्यते इति।

वृक्षे मूले न कपिसंयोग इति प्रतीतेः मूलावच्छेदेन वृक्षे कपिसंयोगाभावावगाहित्वनिराकरणाय तस्याः प्रतीतेर्विषयता मया मूलावच्छिन्नवृक्षवृत्तित्वाभावे(कपिसंयोगनिष्ठे)एवाङ्गीक्रियते, न तु वृक्षावच्छेदकमूलवृत्तित्वाभावे (कपिसंयोगनिष्ठे)। अत एव, तत्र = वृक्षे मूले न कपिसंयोग इत्यत्र, कपिसंयोगनिष्ठस्य मूलावच्छिन्नवृक्षवृत्तित्वाभावस्य विषयतयाऽवगाहित्वस्वीकारादेव, उक्तप्रतीतीनाम् = इदानीं तन्तौ न घटः, इदानीमिह कपाले न घटः, मूले वृक्षे न कपिसंयोग इत्यादिप्रतीतीनाम्, एकरूपता = तत्तदवच्छिन्नतत्तद्वृत्तित्वाभावावगाहित्वरूपता, सङ्गच्छते। न तु 'मूले वृक्षे न कपिसंयोग' इत्यत्र वृक्षावच्छेदकमूलवृत्तित्वाभावावगाहिता, येन शाखायां रूपेन रूपत्वमित्यस्याप्रतीतेः प्रामाण्यं प्रसज्येत इति तदाशयः।

अनन्तरमुच्यते 'यदि चे'त्यादिना यत् उपरि मूले वृक्षे न तत्संयोग इति प्रतीतौ तत्संयोगनिष्ठो मूलावच्छिन्नोपरिदिगवच्छिन्नवृक्षवृत्तित्वाभावो विषयो भवितुन्नार्हति, मूलावच्छिन्नोपरिदिगवच्छिन्नवृक्षवृत्तित्वरूपस्य प्रतियोगिनोऽप्रसिद्धत्वात्, यस्या हि वृत्तिः = विषयता(वृत्तिता) यत्र सार्वदैशिकी सार्वकालिकी न भवति, तन्निरूपितवृत्तिताया एव सावच्छिन्नत्वस्याभ्युपेयत्वात्, तत्संयोगस्य = कपिसंयोगविशेषस्य, वृत्तिता यत्र = वृक्षे, सार्वदैशिकी न भवति, नापि सार्वकालिकी भवति, अतः वृक्षे तत्संयोगस्य = कपिसंयोगविशेषस्य वृत्तिता सावच्छिन्ना भवितुमर्हति, इति उपरिमूले वृक्षे न तत्संयोग इति प्रतीतौ मूलावच्छेदेनोपरिदिगवच्छेदेन वृक्षे तत्संयोगाभाव एव, गत्यन्तराभावात्, मूलावच्छिन्नोपरिदिगवच्छिन्नवृक्षनिरूपितवृत्तित्वस्याप्रसिद्धत्वात्, विषयः, इति अव्याप्यवृत्त्यभावसिद्धान्तस्य न हानिरिति यद्युच्यते।

तदा = इदानीमस्ताचले प्राच्यां न ज्योतिरित्यत्र प्रतीतौ, प्राचीदिगवच्छिन्नेदानींकालावच्छिन्नस्य अस्ताचलवृत्तित्वस्याप्रसिद्ध्या अस्ताचलावच्छिन्नस्य प्राचीदिग्-

वृत्तित्वस्य चाऽप्रसिद्ध्या तादृशवृत्तित्वाभावज्योतिषि अवगाहित्वासम्भवः। अस्य इदानीमस्ताचले प्राच्यां न ज्योति इति प्रतीतौ अन्वयः।

प्राचीदिगवच्छिन्नास्ताचलावच्छिन्नेदानीं कालवृत्तित्वाभावस्यापि ज्योतिषि इदानीमस्ताचले न ज्योतिरिति प्रतीत्या अवगाहनासम्भव एव, तादृशवृत्तिमतोऽसम्भवात्, अस्ताचलस्य प्रतीचीदिगवच्छिन्नत्वेन प्राचीदिगवच्छिन्नत्वविरहात्प्राचीदिगवच्छिन्नास्ताचलावच्छिन्नैतत्कालवृत्तित्वस्याप्रसिद्धत्वात्।

अतस्तत्र = इदानीमस्ताचले प्राच्यां न ज्योतिरित्यत्र, काल एव = इदानीं काल एव, अस्ताचलावच्छेदेन प्राचीदिगवच्छेदेन च ज्योतिषोऽभावो विषयः।

तत्कालसम्बद्धौ अस्ताचलप्राचीदिग्विशेषौ तत्कालनिष्ठाया ज्योतिरभावाधिकरणताया अवच्छेदकौ सम्भवत एव, इति कालवृत्तितावच्छेदकत्वं देशस्य नाप्रामाणिकम्, उक्तप्रतीतिस्थले गत्यन्तराभावेनास्ताचलदेशस्य प्राचीदिग्विशेषात्मकदेशस्य च कालवृत्त्यभावाधिकरणतावच्छेदकत्वात्।

उपरिमूले वृक्षे न तत्संयोग इत्यत्र तत्संयोगाभावस्य वृक्षात्मकदेशवृत्तितावच्छेदकौ मूलोपरिदेशविशेषौ भवतः।

घटनाशदशायामिदानीं कपाले न घटः अभावस्य देशवृत्तितावच्छेदकः कालः इति देशकालयोरुभयोरपि अभावाधिकरणतावच्छेदकत्वं विभिन्नप्रतीतिस्थले अभावस्याव्याप्यवृत्तित्वव्यवस्थापनाय यदुक्तं, तदयुक्तमेव।

अनन्तरमिदमुच्यते यद् यैस्तु अव्याप्यवृत्तिः पदार्थो नाङ्गीक्रियते, तैर्विशेषरूपेण संसर्गत्वमभ्युपेत्य इदानीं तन्तौ न घटः, इदानीं कपाले न घटः, मूले वृक्षे न संयोग इत्यादिसर्वप्रतीतीनां वृत्तित्वविशेषीयस्वरूपसम्बन्धावच्छिन्नप्रतियोगिताकवृत्तित्वाभावविषयकत्वमेवोपपाद्यते इति।

अर्थात् इदानीं तन्तौ न घट इति प्रतीतेः एतत्काले तन्त्ववच्छेदेन घटाभावो न विषयः, किन्तु कपालवृत्तित्वप्रतियोगिको यः स्वरूपसम्बन्धविशेषस्तादृशस्वरूपसम्बन्धावच्छिन्नप्रतियोगिताकः तस्तु [तन्तु] वृत्तित्वाभाव एव। अथवा एतत्कालवृत्तित्वप्रतियोगिको यः स्वरूपसम्बन्धविशेषस्तादृशस्वरूपसम्बन्धावच्छिन्नप्रतियोगिताकः घटनिष्ठस्तन्तुवृत्तित्वाभाव एव विषयः। एवमेवान्यत्रापि सर्वत्र उक्तप्रतीतिस्थलेषु इति।[२१९]

तत्त्वालोकः– 'येन रूपेणे'त्यादि[1]। यत्सम्बन्धावच्छिन्नयद्धर्म्मावच्छि-

---

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. १३

न्नाधिकरणतावन्निष्ठाभावप्रतियोगितानवच्छेदकतद्धर्मवत्त्वं तेन सम्बन्धेन तेन-रूपेण व्याप्यवृत्तित्वमित्यर्थः। नित्यज्ञानानुयोगिकविषयित्वादिना व्याप्यवृत्तित्वसम्पत्तये च तादृशाधिकरणतावन्निष्ठाभावीयप्रतियोगितासामान्ये यत्सम्बन्धावच्छिन्नत्व, - यद्धर्मावच्छिन्नत्वोभयाभाववत्त्वमेव विवक्षणीयमिति।

'द्रव्यत्वस्य समवायेने'ति[1]। घटे गुणे न द्रव्यत्वमित्यादौ गुणावच्छेदेन घटे द्रव्यत्वाभावो न विषयः, किन्तु घटे द्रव्यत्वं गुणे तदभावः, घटवृत्तिगुणे वा द्रव्यत्वाभावः। तादृशप्रतीतिरेव वाऽप्रामाणिकी। प्रामाणिकी च घटे द्रव्यत्वं, न तु गुण इत्यादिर्न घटे द्रव्यत्वाभावसाधनायालम्।

इदानीं यद्द्रव्यत्वं तद्घटे न तु गुण इत्यादयः काले स्वरसत एवाभावं साधयन्तीति कालिकेनाव्याप्यवृत्तित्वं न तु समवायेनेत्याशयः।

'नित्यगुणत्वादि'ति[2]। गुणत्वाधिकरणे जन्ये कालिकेन कपिसंयोगात्मकाभावस्य वृत्तित्वात्प्रतियोगिवैयधिकरण्योपादानं सम्भाव्येतेत्यत उक्तं 'नित्ये'ति। 'प्रयोजनविरहादि'ति[3]। तद्विशेषणविरहेऽपि व्याप्तिज्ञानस्य प्रमात्वसम्भवादिति शेषः।[२२०]

प्रकाशः – 'तथा च तत्तत्साध्यकाव्याप्तिवारणाय तत्' इति[4] दीधितेर्व्याख्यायां 'गुणवत् संयोगवद्वा द्रव्यत्वात्, वह्निमान् धूमात्, समयो घटवान् एतत्कालत्वात्, कपालं घटवत् घटध्वंसादित्यादावव्याप्तिवारणायासमानाधिकरणान्तमि'त्युपन्यस्य 'नोपादेयञ्च सर्वथैव व्याप्यवृत्तिसाध्यके' इति[5] दीधितेर्व्याख्यायां 'येन रूपेण येन सम्बन्धेन च यद्व्याप्यवृत्ति तेन सम्बन्धेन तेन रूपेण तत्साध्यतायां नोपादेयमि'त्युपन्यस्तम्[6] तर्कालङ्कारैः।

तत्र 'येन रूपेणेत्यादी'ति परिगृह्य तेन सम्बन्धेन तेन रूपेण व्याप्यवृत्तित्वं परिष्क्रियते तत्त्वालोककृद्भिर्यद् 'यत्सम्बन्धावच्छिन्नयद्धर्मावच्छिन्नाधिकरणतावन्निष्ठ-

---

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. १३

२. तदेव, जागदीशीमूलम्, पृ. १३

३. तदेव, जागदीशीमूलम्, पृ. १३

४. तदेव, दीधितिमूलम्, पृ. १२

५. तदेव, दीधितिमूलम्, पृ. १२

६. तदेव, जागदीशीमूलम्, पृ. १३

तत्सम्बन्धावच्छिन्नप्रतियोगिताकाभावप्रतियोगितानवच्छेदकतद्धर्मवत्त्वं तेन सम्बन्धेन तेन रूपेण व्याप्यवृत्तित्वमि'ति।

समवायसम्बन्धेन द्रव्यत्वत्वरूपेण द्रव्यत्वस्य व्याप्यवृत्तित्वं भवति, तत्र तादृशेऽन्यत्र चोक्तपरिष्कृतस्य सङ्गतिर्ज्ञेया। समवायेन द्रव्यत्वत्वरूपेण द्रव्यत्वाधिकरणतावति समवायसम्बन्धावच्छिन्नद्रव्यत्वत्वावच्छिन्नप्रतियोगिताकाभावासत्त्वादभावान्तरप्रतियोगितानवच्छेदकधर्मवत्त्वस्य तत्र सत्त्वात्। द्रव्यत्वादेर्नित्यज्ञानानुयोगिकविषयितासम्बन्धेन द्रव्यत्वत्वादिना रूपेण व्याप्यवृत्तित्वस्येष्टत्वेन तत्रोक्तपरिष्कृतलक्षणसङ्गति र्न स्यात्, नित्ये ईश्वरीयज्ञाने तदनुयोगिकविषयितासम्बन्धेन सर्वस्यैव सत्त्वेन तन्निष्ठतत्सम्बन्धावच्छिन्नप्रतियोगिताकाभावस्याप्रसिद्धत्वात्।

अतो नित्यज्ञानानुयोगिकविषयित्वादिना व्याप्यवृत्तित्वसम्पत्तये यत्सम्बन्धावच्छिन्नयद्धर्मावच्छिन्नाधिकरणतावन्निष्ठाभावप्रतियोगितासामान्ये यत्सम्बन्धावच्छिन्नत्वयद्धर्मावच्छिन्नत्वोभयाभावस्तत्सम्बन्धावच्छिन्नत्वतद्धर्मावच्छिन्नत्वमेव, तेन सम्बन्धेन तेन रूपेण व्याप्यवृत्तित्वमित्युपन्यस्तं तत्त्वालोककृद्भिः।

तादृशाधिकरणतावन्नित्यज्ञाननिष्ठाभावप्रतियोगिताकसामान्ये नित्यज्ञानानुयोगिकविषयित्वसम्बन्धावच्छिन्नत्वद्रव्यत्वत्वावच्छिन्नत्वोभयाभावसत्त्वादुक्ते सङ्गतिरिति तदाशयः।

अनन्तरं 'तेन संयोगत्वेनाव्याप्यवृत्तेरपि संयोगस्य समवेतत्वेन साध्यतायां, कालिकेनाव्याप्यवृत्तेरपि [द्रव्यत्वस्य] समवायेन साध्यतायाञ्च प्रतियोगिवैयधिकरण्यं नोपादेयम्, परन्तु समवायेन व्याप्यवृत्तेरपि द्रव्यत्वसत्त्वादेः कालिकेन साध्यतायां तदुपादेयमेवे'ति[१] यत्स्पष्टीकृतं तर्कालङ्कारैस्तत्र 'द्रव्यत्वस्य समवायेने'ति परिगृह्य उच्यते— यद् घटे गुणे न द्रव्यत्वमिति प्रतीतिः घटे गुणावच्छेदेन द्रव्यत्वाभावविषयिका न, किन्तु घटे द्रव्यत्वविषयिणी गुणे द्रव्यत्वाभावविषयिणी एव।

अथवा घटे गुणे न द्रव्यत्वमिति प्रतीतिर्नैव प्रामाणिकी, किन्तु घटे द्रव्यत्वं न तु गुणे इत्यादिप्रतीतिरेव प्रामाणिकी। सा च न घटे द्रव्यत्वाभावसाधनसमर्था। अतः कालिकतयाऽव्याप्यवृत्तिरपि द्रव्यत्वं समवायेन समवेतत्वेन व्याप्यवृत्त्येव। 'इदानीं यद्द्रव्यत्वं तद् घटे न तु गुणे' इत्यादिप्रतीतयः काले गुणावच्छेदेन द्रव्यत्वाभावविषयिण्यः घटावच्छेदेन च काले कालिकेन द्रव्यत्वविषयिण्यः। अतो

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. १३

द्रव्यत्वे कालिकेनाव्याप्यवृत्तित्वं, न तु समवायेन अव्याप्यवृत्तित्वमित्याशय इति विवृतं तत्त्वालोककृद्भिः।

तदनन्तरम् 'अव्याप्यवृत्तिसाध्यके वृक्षः संयोग्येतद्वृक्षत्वादित्यादौ देयम्, कपिसंयोगाभाववान् नित्यगुणत्वादित्यादौ क्वचिदेव न देयमि'ति[१] तर्कालङ्कारव्याख्या-घटकं 'नित्यगुणत्वादि'ति परिगृह्य तद्घटक'नित्य'पदप्रयोजनमालोकितं 'गुणत्वाधि-करणे जन्यज्ञाने कपिसंयोगाभावसाध्यकस्थले कपिसंयोगात्मकस्य साध्याभावस्य कालिकेन वृत्तित्वात्, तदादाय प्राप्ताव्याप्तिवारणार्थं प्रतियोगिवैयधिकरण्योपादानं सम्भाव्येतेत्यत उक्तं नित्ये'ति। तदुपादाने नित्ये कालिकायोगान्नाव्याप्तिसम्भावना।

तदनन्तरं तदग्रिमं 'प्रयोजनविरहादि'ति[२] परिगृह्योच्यते 'व्याप्यवृत्तिसाध्यके प्रतियोगिवैयधिकरण्यविशेषणविरहेऽपि व्याप्तिज्ञानस्य प्रमात्वसम्भवात्तत्र प्रतियोगिवैय-धिकरण्यविशेषणं नोपादेयमिति तर्कालङ्कारोक्तेराशय' इति।[२२०]

तत्त्वालोकः – 'द्रव्यत्वानतिरिक्तत्वादि'ति[३]। ननूक्ताभावस्यातिरिक्तत्वेऽपि तत्प्रतियोगितावच्छेदकत्वस्य साध्यतावच्छेदके विरहादतिव्याप्तिसम्भवेऽनति-रिक्तत्वानुधावनमफलमिति चेद्।

अत्र केचित् पारिभाषिकावच्छेदकत्वघटितकल्पेऽतिरिक्तत्वे तस्याति-व्याप्त्यप्रसक्ते'रनतिरिक्ते'ति।

यत्त्वत्र तस्यानतिरिक्तत्वेऽपि घटध्वंसाद्यात्मकाभावमादाय न दोषः। तद्रूपभिन्नं गुणत्वादित्यादावपि विषयत्वस्य जन्यत्वे तद्ध्वंसात्मकाभावं, विष[य]त्वस्यातिरिक्तत्वे नित्यत्वेऽपि च तस्य तत्स्वरूपाभावं, तद्रूपभेदतद्रूप-त्वप्रकारकयत्किञ्चिज्ज्ञानान्यतरस्य विषयत्वस्वरूपान्यतरसम्बन्धावच्छिन्नप्र-तियोगिताकाभावादिकं वाऽऽदाय न दोष इति।

तत्तुच्छम्। द्रव्यवृत्त्यवृत्तिधर्म्मावच्छिन्नप्रतियोगिकस्वरूपसम्बन्धेन द्रव्यत्वाभावसाध्यकस्थले वृत्त्यनियामकसम्बन्धस्य प्रतियोगितावच्छेदकत्वे यथाश्रुतसाध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगित्वस्यैव विवक्षिततयोक्ता-भावस्यानतिरिक्तत्वेऽतिव्याप्तिवारणायोगात्, घटध्वंसाद्यभावाभावादीनां

---

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. १३

२. तदेव, जागदीशीमूलम्, पृ. १३

३. तदेव, जागदीशीमूलम्, पृ. १३

साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकानां केवलान्वयितया साध्यवन्निष्ठत्वादित्याहुः।

परे तु समनियताभावयोर्भेदेऽपि तदधिकरणत्वमेकमेवेति हेत्वधिकरणत्वनिष्ठविशेषणत्वसम्बन्धावच्छिन्नाधिकरणत्वनिरूपकत्वस्य द्रव्यत्वस्वरूपाभावसत्त्वान्नातिव्याप्तिः।

न च समवायावच्छिन्नत्वस्वरूपसम्बन्धावच्छिन्नत्वाभ्याममधिकरणताभेद इति वाच्यम्, व्यासज्यवृत्त्ये[१]कावच्छेदकत्वपक्षे सावच्छिन्नत्वनिरवच्छिन्नत्वतत्तत्सम्बन्धावच्छिन्नत्वादीनामव्याप्यवृत्तित्ववदत्राप्येकस्यामेवाधिकरणतायां तत्तन्निरूपितत्वावच्छेदेन तत्सम्बन्धावच्छिन्नत्वस्यापि स्वीकारेणाव्याप्यवृत्तित्वाभ्युपगमादिति प्राहुः।

ऋजवस्त्वभावसाध्यकेऽतिव्याप्तिमुक्त्वा द्रव्यभिन्नत्वप्रकारकप्रमाविशेष्यत्वरूपभावसाध्यकेऽपि तामाह 'द्रव्यभिन्नत्वप्रकारकप्रमाविशेष्यत्वस्यापी'[२]ति वदन्ति।[२२१]

प्रकाशः—प्रसङ्गेऽस्मिन् तर्कालङ्कारेणात्र 'यद्यपि व्याप्यवृत्तिसाध्यके तदप्रवेशे = प्रतियोगिवैयधिकरण्याप्रवेशे, सत्तावान् जातेरित्यादावव्याप्तिः, साधनवति स्पन्दादौ समवायेन सत्ताभावस्यापि कालिकादिसम्बन्धेन वृत्तेः। न चाभावे हेत्वधिकरणवृत्तित्वस्याभावीयविशेषणतया विवक्षणान्न दोषः, तथासति द्रव्यत्वाभाववान् सत्त्वादित्यत्रातिव्याप्तेः, द्रव्यत्वस्वरूपस्य साध्याभावस्य दैशिकविशेषणतया वृत्तित्वविरहात् द्रव्यभिन्नत्वप्रकारकप्रमाविशेष्यत्वाभावस्यापि द्रव्यत्वानतिरेकादि'ति व्याख्यातम्[३]।

तत्र 'द्रव्यत्वानतिरेकादि'ति परिगृह्य तत्त्वालोककृद्भिः शङ्क्यते यद् द्रव्यभिन्नत्वप्रकारकप्रमाविशेष्यत्वाभावस्य द्रव्यत्वातिरिक्तत्वेऽपि = हेत्वधिकरणे दैशिकविशेषणतया वृत्तित्वेऽपि, तत्प्रतियोगितावच्छेदकत्वस्य द्रव्यत्वाभावत्वरूपसाध्यतावच्छेदके विरहादतिव्याप्तिसम्भवे तत्रातिव्याप्तिदोषप्रयोजकतयोक्ताभावस्य द्रव्यत्वानतिरिक्तत्वकथनमसङ्गतमिति।

---

१. 'व्यासज्यवृत्त्यै' इति पाठः प्राचीनमुद्रितपुस्तके।

२. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. १३

३. तदेव, जागदीशीमूलम्, पृ. १३

अत्र केचित्समादधति यत् पारिभाषिकावच्छेदकत्वघटितव्याप्तिकल्पे उक्ताभावस्य = द्रव्यभिन्नत्वप्रकारकप्रमाविशेष्यत्वाभावस्य, द्रव्यत्वातिरिक्तत्वे द्रव्यत्वाभाववान् सत्त्वादित्यत्रातिव्याप्तिर्न स्यात्, यतो हि प्रमेयधूमवान् वह्नेरित्यादौ प्रमेयधूमत्वादेः साध्यतावच्छेदकस्य गुरुधर्मतया हेतुसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वेन प्राप्तातिव्याप्तिवारणाय हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकं यद्धर्मविशिष्टसमानाधिकरणाभावप्रतियोगितानवच्छेदकं तदेव पारिभाषिकं व्याप्तिघटकावच्छेदकम्।

तथासति हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकधूमत्वादेः प्रमेयधूमत्वविशिष्टसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वात् प्रमेयधूमत्वादिगुरुधर्मात्मकसाध्यतावच्छेदकस्य पारिभाषिकावच्छेदकत्वोपपत्तिः। प्रकृते द्रव्यभिन्नत्वप्रकारकप्रमाविशेष्यत्वाभावप्रतियोगितावच्छेदकस्य द्रव्यभिन्नत्वप्रकारकप्रमाविशेष्यत्वत्वस्य द्रव्यत्वाभावत्वविशिष्टसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वेन साध्यतावच्छेदकीभूतस्य द्रव्यत्वाभावत्वस्य पारिभाषिकप्रतियोगितावच्छेदकत्वोपपत्त्याऽतिव्याप्तिर्न स्याद्। अतस्तादृशस्याभावस्य = द्रव्यभिन्नत्वप्रकारकप्रमाविशेष्यत्वाभावस्य, द्रव्यत्वानतिरिक्तत्वमुक्तमिति।

अनतिरिक्तत्वे तादृशाभावस्य दैशिकविशेषणतया हेत्वधिकरणवृत्तित्वविरहान्न परिग्रहः। दैशिकविशेषणतया हेत्वधिकरणवृत्त्यभावान्तरप्रतियोगितानवच्छेदकत्वस्य साध्यतावच्छेदके सत्त्वादतिव्याप्तिः स्यादेव।

अनन्तरं 'यत्तु'मतं दर्शयति। द्रव्यभिन्नत्वप्रकारकप्रमाविशेष्यत्वाभावस्य द्रव्यत्वानतिरिक्तत्वेऽपि = दैशिकविशेषणतया हेत्वधिकरणावृत्तित्वेऽपि, घटध्वंसाद्यात्मकमभावमादाय तत्रातिव्याप्तिर्न स्यात्, तस्य ध्वंसादिस्वरूपाभावस्य सत्तात्मकहेत्वधिकरणे कपाले दैशिकविशेषणतया वृत्तित्वात्, तत्प्रतियोगितावच्छेदकत्वस्य घटध्वंसाभावत्वे सत्त्वेऽपि तस्य घटध्वंसाभावत्वस्य साध्यतावच्छेदकद्रव्यत्वाभावत्वविशिष्टसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वेन साध्यतावच्छेदकस्य पारिभाषिकावच्छेदकत्वात्।

एवं 'तद्रूपभिन्नं (रूपभिन्नं) गुणत्वाद्' इत्यादौ अपि विषयत्व[स्य] = तद्रूपभिन्नत्वप्रकारकप्रमाविशेष्यत्वरूपस्य, जन्यत्वे जीवात्मसमवेतप्रमाया जन्यत्वेन तद्विषयत्वापि[त्वस्यापि] जन्यत्वे गुणत्वाधिकरणे तद्रूपे तद्रूपभेदाभावस्य तद्रूपभिन्नत्वप्रकारकप्रमाविशेष्यत्वाभावस्य वा तद्रूपानुयोगिकसमवायेन रूपत्वस्वरूपतया दैशिकविशेषणतया हेत्वधिकरणे वृत्तित्वविरहेऽपि तद्रूपभिन्नत्वप्रकारकप्रमाविशेष्यत्वरूप-

विषयत्वध्वंसात्मकमभावमादाय साध्यतावच्छेदके दर्शितरीत्या पारिभाषिकावच्छेदकत्वसम्पत्त्याऽतिव्याप्तिर्न स्यात्।

विषयत्वस्यातिरिक्तत्वे = अतिरिक्तपदार्थत्वे, नित्यत्वे वा तद्रूपभिन्नत्वप्रकारकप्रमाविशेष्यत्वरूपविषयत्वध्वंसात्मकाभावविरहेऽपि तद्ध्वंसात्मकाभावमादायातिव्याप्तिवारणासम्भवेऽपि तत्स्वरूपाभावतद्रूपभिन्नत्वप्रकारकप्रमाविशेष्यत्वात्मकविषयत्वस्वरूपमभावाभावं हेत्वधिकरणवर्तिनमादायोक्तस्थले न दोषः, नातिव्याप्तिसम्भवः, साध्यतावच्छेदके पारिभाषिकावच्छेदकत्वसद्भावात्।

अथवा तद्रूपभेदतद्रूपत्वप्रकारकयत्किञ्चिज्ज्ञानान्यतरस्य विषयत्वस्वरूपान्यतरसम्बन्धावच्छिन्नप्रतियोगिताकाभावमादाय तद्रूपभिन्नं गुणत्वादित्यादौ नातिव्याप्तिरूपो दोषः, तद्रूपात्मके गुणत्वात्मकहेत्वधिकरणे तद्रूपभेदस्य उक्तान्यतरान्तर्गतस्य उक्तान्यतरसम्बन्धान्तर्गतस्वरूपसम्बन्धेनासत्त्वेऽपि उक्तान्यतरान्तर्गतस्य तद्रूपत्वप्रकारकयत्किञ्चिज्ज्ञानस्य उक्तान्यतरसम्बन्धार्गतविषयत्वसम्बन्धेन सत्त्वात्।

तद्रूपभिन्ने गुणत्वात्मकहेत्वधिकरणे तद्रूपभेदस्य उक्तान्यतरस्य उक्तान्यतरसम्बन्धात्मकस्वरूपसम्बन्धेन सत्त्वात्कथमुक्तस्य अभावस्य दैशिकविशेषणतया हेत्वधिकरणवृत्तित्वमिति चेत्, तद्रूपत्वप्रकारकयत्किञ्चिज्ज्ञानत्वेन भ्रमात्मकतद्रूपभिन्नविशेष्यकतद्रूपत्वप्रकारकज्ञानं परिगृह्य तद्रूपात्मकहेत्वधिकरणे उक्तान्यतराभावस्योक्तान्यतरसम्बन्धावच्छिन्नप्रतियोगिताकस्य सत्त्वसम्भवात्, इति — 'यत्तु' मतम्।

'तत्तुच्छमि'त्यादिना खण्डयति। व्याप्यवृत्तिसाध्यके प्रतियोगिवैयधिकरण्याप्रवेशे दैशिकविशेषणतया हेत्वधिकरणवृत्तित्वस्य विवक्षणे द्रव्यत्वाभाववान् सत्त्वात्, तद्रूपभिन्नं गुणत्वादित्यादौ उक्तप्रकारेण दोषाभावेऽपि द्रव्यवृत्त्यवृत्तिधर्मावच्छिन्नप्रतियोगिकस्वरूपसम्बन्धेन द्रव्यत्वाभावसाध्यके व्यभिचारिणि सत्तादिहेतौ वृत्त्यनियामकसम्बन्धस्याभावप्रतियोगितावच्छेदकत्वे यथाश्रुतसाध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगित्वस्यैव विवक्षया उक्ताभावस्य = द्रव्यभिन्नत्वप्रकारकप्रमाविशेष्यत्वाभावस्य, अनतिरिक्तत्वे = द्रव्यत्वानतिरिक्तत्वे, अतिव्याप्तिवारणायोगात् = द्रव्यत्वाभावाभावस्य द्रव्यभिन्नत्वप्रकारकप्रमाविशेष्यत्वाभावस्य च द्रव्यत्वस्वरूपस्य दैशिकविशेषणतया हेत्वधिकरणवृत्तित्वविरहेण लक्षणघटकत्वासम्भवात्। घटध्वंसादीनामप्यभावाभावानां दर्शितसाध्यतावच्छेदकसम्बन्धद्रव्यवृत्त्यवृत्तिधर्मावच्छिन्नप्रतियोगिकस्वरूपावच्छिन्नप्रतियोगिताकानां केवलान्वयितया[१] साध्यवन्निष्ठत्वादिति — केचित्प्राहुः।

---

१. व्यधिकरणसम्बन्धावच्छिन्नप्रतियोगिताकाभावस्य केवलान्वयित्वादिति भावः।

द्रव्यवृत्ति = द्रव्यम्, अवयवात्मकद्रव्ये अवयविरूपद्रव्यस्य वृत्तित्वात्, गुणः क्रिया, सत्ता च द्रव्यवृत्तिः। तत्र द्रव्यगुणक्रियासत्तात्मके द्रव्यवृत्तौ अवृत्तिधर्मो द्रव्यत्वाभाववत्वम्, द्रव्यत्वाभाववत्वस्य द्रव्ये गुणे क्रियायां सत्तायां च वृत्तित्वविरहात्। ततश्च द्रव्यवृत्त्यवृत्तिधर्मावच्छिन्नप्रतियोगिकस्वरूपसम्बन्धेन, अर्थात् द्रव्यत्वाभाववत्वावच्छिन्नप्रतियोगिकस्वरूपसम्बन्धेन, द्रव्यत्वाभावस्य साध्यता फलिता। द्रव्यभिन्नत्वप्रकारकप्रमाविशेष्यत्ववत्वस्यापि द्रव्यवृत्त्यवृत्तिधर्मतया तदवच्छिन्नप्रतियोगिकस्वरूपसम्बन्धस्यापि साध्यतावच्छेदकोक्तसम्बन्धान्तर्गतता, घटध्वंसाभावत्वावच्छिन्नप्रतियोगिताकस्याभावस्य घटध्वंसात्मकस्य यः प्रतियोगितावच्छेदकः सम्बन्धो द्रव्यवृत्त्यवृत्तिधर्मावच्छिन्नप्रतियोगिकः स्वरूपसम्बन्धः, स व्यधिकरणसम्बन्ध एव, यतो हि घटवति कपालात्मकद्रव्ये घटध्वंसो न तिष्ठति, घटध्वंसस्य तत्रासत्त्वे घटध्वंसाभावस्य तत्र सत्त्वात्, घटध्वंसाभावस्य द्रव्यवृत्तितैव भवति।

तथा घटध्वंसाभावत्वधर्म[स्य]द्रव्यवृत्त्यवृत्तित्वविरहात् घटध्वंसाभावत्वावच्छिन्नप्रतियोगिकस्वरूपस्य द्रव्यवृत्त्यवृत्तिधर्मावच्छिन्नप्रतियोगिकस्वरूपानन्तर्गतत्वात् तस्य व्यधिकरणसम्बन्धावच्छिन्नप्रतियोगिताकाभावत्वेन दर्शितकेवलान्वयित्वोपपत्तिः। तस्य केवलान्वयितया साध्यवन्निष्ठत्वोक्त्या साध्यतावच्छेदकस्य द्रव्यत्वाभावत्वस्य पारिभाषिकावच्छेदकत्वाभावः सूचितः। घटध्वंसात्मकाभावप्रतियोगितावच्छेदकस्य द्रव्यत्वाभावत्वविशिष्टसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वविरहादिति तदाशयः।

अनन्तरं प्रसङ्गेऽस्मिन् परे कथयन्ति— यत् समनियतयोरभावयोर्भेदेऽपि = प्रकृते द्रव्यत्वाभावाभाव, द्रव्यभिन्नत्वप्रकारकप्रमाविशेष्यत्वाभावयोर्भेदेऽपि, समनियताभावनिरूपिताधिकरणत्वमेकमेव, अतो दैशिकविशेषणत्वसम्बन्धावच्छिन्ना सत्तात्मकहेत्वधिकरणद्रव्यनिष्ठा या द्रव्यभिन्नत्वप्रकारकप्रमाविशेष्यत्वाभावीया अधिकरणता, तन्निरूपकत्वस्य द्रव्यत्वस्वरूपद्रव्यत्वाभावाभावेऽपि सत्त्वेन, द्रव्यत्वाभाववान् सत्त्वात्, तदीयप्रतियोगितावच्छेदकत्वसाध्यतावच्छेदके द्रव्यत्वाभावत्वे सम्भवाद् द्रव्यत्वाभाववान् सत्त्वादित्यत्रातिव्याप्तिर्न स्यात्।

[अथ] समवायसम्बन्धावच्छिन्नत्वस्वरूपसम्बन्धावच्छिन्नत्वाभ्यामधिकरणभेदः स्यादिति चेत्। [न]।

व्यासज्यवृत्त्येकावच्छेदकत्वपक्षे सावच्छिन्नत्वनिरवच्छिन्नत्व-तत्तत्सम्बन्धावच्छिन्नत्वादीनां यथाऽव्याप्यवृत्तित्वमर्थादवच्छेदकभेदेन एकत्र समाविष्टत्वं तथैव

तत्तन्निरूपितत्वरूपावच्छेदकभेदेन समवायसम्बन्धावच्छिन्नत्वस्वरूपसम्बन्धावच्छिन्नत्वयोरपि एकत्र सन्निविष्टत्वस्यार्थादव्याप्यवृत्तित्वस्याभ्युपगमात्।

महानसीयवह्न्यभावादेः प्रतियोगितावच्छेदकत्वं महानसीयत्ववह्नित्वोभयवृत्तिव्यासज्यवृत्ति एकमेवेति पक्षे तत्रैकावच्छेदकत्वे व्यासज्यवृत्तौ सावच्छिन्नत्वनिरवच्छिन्नत्वस्वरूपसम्बन्धावच्छिन्नत्वसमवायसम्बन्धावच्छिन्नत्वादीनां परस्य विरुद्धवद्भासमानानामव्याप्यवृत्तितया यथा एकत्रावच्छेदकत्वे स्थितिस्तथैव प्रकृतेऽपि अभ्युपगमात्, विभिन्नसमनियताभावाधिकरणतायामेकस्यां द्रव्यत्वाभावाभावनिरूपितत्वावच्छेदेन समवायसम्बन्धावच्छिन्नत्वस्य द्रव्यभिन्नत्वप्रकारकप्रमाविशेष्यत्वाभावनिरूपितत्वावच्छेदेन स्वरूपसम्बन्धावच्छिन्नस्य च अव्याप्यवृत्तितयाऽभ्युपगमसम्भवादिति [प्राहुः परे]।

तदनन्तरम् ऋजवः सरलाः कोमलमतयो वदन्ति यद् व्याप्यवृत्तिसाध्यके दैशिकविशेषणतया हेत्वधिकरणवृत्तित्वविवक्षणेऽभावसाध्यके द्रव्यत्वाभाववान् सत्त्वादित्यत्रातिव्याप्तिमुक्त्वा द्रव्यभिन्नत्वप्रकारकप्रमाविशेष्यत्वरूपभावसाध्यकेऽपि ताम् = अतिव्याप्तिं, द्रव्यभिन्नत्वप्रकारकप्रमाविशेष्यत्वाभावस्यापि तदनतिरेकात् = द्रव्यत्वानतिरेकादित्यनेनाह[१] इति [ऋजवो वदन्ति]।[२२१]

तत्त्वालोकः – **'साध्यतावच्छेदकसम्बन्धे'त्यादि[२]। घटत्वाभावस्य कालिकेन योऽभाव इत्युपलक्षणमभावाभावसाध्यकेऽपि द्रष्टव्यम्। घटत्वाभावश्च स्वरूपादिसम्बन्धावच्छिन्नप्रतियोगिताकः, समवायादिसम्बन्धावच्छिन्नप्रतियोगिताकस्य कालिकादिनाऽव्याप्यवृत्तितया तदभावसाध्यकस्थलस्याव्याप्यवृत्तिसाध्यकस्थलत्वादिति।**

'तथापि साध्यतावच्छेदकसम्बन्धेने'त्यादि[३]। प्रतियोगिताविशिष्टप्रतियोगित्वानवच्छेदकत्वमनवच्छेदकत्वान्तार्थः। वैशिष्ट्यञ्च स्वतादात्म्य, - स्वविशिष्टप्रकारताशालिग्रहत्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकप्रकारतावच्छेदकसम्बन्धावच्छिन्नहेत्वधिकरणनिरूपितवृत्तितावदभावीयत्वोभयसम्बन्धेन। स्ववैशिष्ट्यञ्च स्वावच्छेदकधर्मावच्छिन्नत्व,

१. जगदीशतर्कालङ्कारः।

२. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. १४

३. तदेव, जागदीशीमूलम्, पृ. १४

-स्वावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेन। एवञ्च साध्याभावस्योक्त-स्थले घटत्वाभावरूपतया तदीयघटत्वनिष्ठप्रतियोगितावच्छेदकावच्छिन्नग्रह-विरोधितावच्छेदकसम्बन्धत्वस्य स्वरूपे सत्त्वेऽपि न क्षतिः।

स्वावच्छेदकधर्मावच्छिन्नत्वं विहाय स्वसामानाधिकरण्यप्रवेशे वह्न्यधिकरणत्वकालिकसम्बन्धावच्छिन्नप्रतियोगिताकप्रमेयाभावान्यतरस्य स्वरूपेण साध्यतायां धूमे सद्धेतौ साध्याभावप्रतियोगितासमानाधिकरणतादृशप्रमेयाभावत्वावच्छिन्नप्रकारताकग्रहविरोधिताघटककालिकमादायाव्याप्त्यापत्तेः।

न च प्रतिबध्यतायां तादृशग्रहत्वव्यापकत्वासम्भव इति वाच्यम्, तादृशप्रतिबध्यताप्रसिद्ध्यर्थं यत्किञ्चिद्धर्मावच्छिन्नविशेष्यतानिरूपितस्ववि-शिष्टप्रकारतासमानाधिकरणभेदप्रतियोगितावच्छेदकत्वन्नास्तीति प्रतीतिसिद्धा-भावरूपस्यैव व्यापकत्वस्य प्रवेश्यत्वात्।

स्वावच्छेदकावच्छिन्नत्वं च स्वावच्छेदकतात्वावच्छिन्नप्रतियोगिताक-पर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगिताकपर्याप्तिकावच्छेदकता-कत्वम्। तेन विषयितासम्बन्धेन वह्निधूमोभयसाध्यकव्यभिचारिणि साध्याभा-वप्रतियोगिताविशिष्टप्रकारताकग्रहत्वव्यापकप्रतिबध्यत्वाप्रसिद्धावपि नाति-व्याप्त्यापत्तिः।

न च प्रतियोगिताविशिष्टप्रकारत्वावच्छिन्नत्वमेव निवेशनीयमिति वाच्यम्। कालिकसम्बन्धावच्छिन्नप्रतियोगिताकप्रमेयाभावसाध्यकात्मत्वहेतुके प्रमेयाभावज्ञानाधिकरणत्वोभयाभावत्वावच्छिन्नस्वरूपसम्बन्धावच्छिन्नप्रकार-त्वावच्छिन्नप्रतिबध्यतानिरूपितां साध्याभावप्रतियोगितावच्छेदकधर्मावच्छिन्न-प्रकारत्वावच्छिन्नामुभयवत्ताज्ञानसाधारणप्रतिबध्यतामादायाव्याप्त्यापत्तेः।

स्वावच्छेदकसम्बन्धावच्छिन्नत्वनिवेशात् कालिकेन प्रमेयाद्यभाववत्ता-बुद्धिप्रतिबन्धकताघटकस्वरूपसम्बन्धमादाय प्रमेयाभावसाध्यकस्थले नाव्या-प्त्यापत्तिः।[२२२]

प्रकाशः–साध्यसाधनभेदेन साध्यताघटकसम्बन्धहेतुताघटकसम्बन्धभेदेन च व्याप्तेर्भेदात्सर्वथैव व्याप्यवृत्तिसाध्यके प्रतियोगिवैयधिकरण्यविशेषणन्नोपादेयमिति कथनानन्तरं व्याप्यवृत्तिसाध्यके प्रतियोगिवैयधिकरण्यप्रवेशविरहे सत्तावान् जातेरित्या-दावव्याप्तिः स्यात्। तद्वारणाय हेत्वधिकरणवृत्तित्वस्य दैशिकविशेषणतया विवक्षणे द्रव्यत्वाभाववान् सत्त्वादित्यत्रातिव्याप्तिः स्यात्। तद्वारणाय अभावत्वप्रतीतेः प्रमात्वर-

क्षार्थञ्चाभावाभावानामतिरिक्तत्वे भावात्मकप्रतियोगिस्वरूपतानङ्गीकारे द्रव्यत्वाभाववान् सत्त्वादित्यत्रातिव्याप्त्यभावेऽपि घटत्वाभावस्य कालिकसम्बन्धावच्छिन्नाभावे स्वरूपसम्बन्धेन साध्ये गगनत्वादिसद्धेतावव्याप्तिः स्यात्। विशेषणतासम्बन्धेन गगननिष्ठघटत्वाभावस्यैव तादृशघटत्वाभावाभावाभावत्वकल्पनात् तावतैवाभावत्वप्रतीतेः प्रमात्वसम्भवात्। 'अत एव = घटत्वाभावस्य कालिकसम्बन्धावच्छिन्नाभावे स्वरूपेण साध्य[साध्ये]गगनत्वादिहेतावव्याप्तेः, द्रव्यत्वाभाववान् जातित्वादित्यादौ चाव्याप्तेरेव, साध्यताघटकसम्बन्धेन साध्यवत्त्वबुद्धेर्विषयविधया प्रतिबन्धको [प्रतिबन्धकतावच्छेदको] यः सम्बन्धस्तेन सम्बन्धेन हेतुसमानाधिकरणत्वमभावस्य ग्राह्यमित्युक्तावपि न निस्तार' इति तर्कालङ्कारैरुक्तम्[१]।

तत्र 'साध्यतावच्छेदकसम्बन्धेत्यादि' इति तत्त्वालोके व्याख्येयः जागदीश्याः सङ्केतः। अयं प्रतीकपरिग्रहात्मकसङ्केतो यद्यपि 'तथापि साध्यतावच्छेदकसम्बन्धेनेत्यादी'त्यग्रिमप्रतीकपरिग्रहात्मकसङ्केततः पूर्वम् इदानीमुपलब्धे जागदीशीसिद्धान्तलक्षणपुस्तके प्राचीने हस्तलिखितजागदीशीसिद्धान्तलक्षणपुस्तके च 'घटत्वाभावस्य कालिकसम्बन्धावच्छिन्नाभावे स्वरूपेण साध्ये गगनत्वादिहेतावव्याप्तेस्तथाप्यनुद्धाराच्च' इत्यादि 'तावतैवाभावत्वप्रतीतेः प्रमात्वसम्भवादि'त्यन्तजागदीश्यनन्तरम् 'अत एव साध्यताघटकसम्बन्धेन' इत्यादिरेव जागदीशीपाठोऽस्ति, न तु 'अत एव साध्यतावच्छेदकसम्बन्धे'त्यादि[२], तथापि तत्त्वालोकलेखाधारभूततदानीमुपलब्धजागदीशीपुस्तके 'अत एव साध्यतावच्छेदकसम्बन्धे'त्यादिरेव पाठो भवेत्। तदनुसारमेवेदं प्रतीकधारणं 'साध्यतावच्छेदकसम्बन्धे'त्यादि इति। 'साध्यतावच्छेदकसम्बन्ध' 'साध्यताघटकसम्बन्ध'इत्यनयोः पर्यायशब्दान्तरत्वेनार्थभेदविरहात्।

'साध्यतावच्छेदकसम्बन्धे'त्यादि उपन्यस्य 'घटत्वाभावस्य कालिकेन योऽभाव इत्युपलक्षणम् अभावाभावसाध्यकेऽपि = अभावाभावसाध्यकेऽन्यत्रापि, द्रष्टव्यमि'ति[३]। अभावाभावसाध्यकस्थलं यथा घटत्वाभावस्य कालिकेन योऽभावः स्वरूपसम्बन्धेन तादृशद्वितीयाभावसाध्यकस्थलं तथैव पटत्वाभावाभावसाध्यकमठत्वाभावा-

---

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. १३-१४

२. 'साध्यतावच्छेदकसम्बन्धे'त्यादिपाठः श्रीसोमनाथोपाध्यायसम्पादितजागदीशीसंस्करणे उपलब्धः, प्रकाशकृता ग्रन्थलेखनावसरे उक्तसंस्करणं नोपलब्धम्। 'साध्यताघटकसम्बन्धे'त्यादिपाठस्तु श्रीगुरुप्रसादशास्त्रिसम्पादितपुस्तकेऽस्ति, तदेव पुस्तकं प्रकाशकृता प्रयुक्तमासीत्। उक्तपाठः प्रकृतग्रन्थे जागदीशीमूले द्रष्टव्यः, पृ. १४

३. तत्त्वालोकः।

भावसाध्यकस्थलमपि अभावाभावसाध्यकमेव, तादृशे सर्वत्रैव द्वितीयाभावस्य प्रतियोगितावच्छेदकः सम्बन्धः कालिकः, साध्यतावच्छेदकसम्बन्धस्तु स्वरूप इत्यावेदयितुं 'घटत्वाभावस्य कालिकेन योऽभाव इत्युपलक्षणमि'त्युपन्यस्तम्, तादृशेऽभावाभावसाध्यके सर्वत्रैव गगनत्वादिहेतावव्याप्तेरनुद्धारे ग्रन्थकृतस्तर्कालङ्कारस्य तात्पर्यात्।

तदनन्तरं 'घटत्वाभावश्च (प्रथमाभावश्च) स्वरूपादिसम्बन्धावच्छिन्नप्रतियोगिताकः, समवायादिसम्बन्धावच्छिन्नप्रतियोगिताकस्य कालिकादिनाऽव्याप्यवृत्तितया तदभावसाध्यकस्थलस्याव्याप्यवृत्तिसाध्यकस्थलत्वादि'त्युपन्यस्तम्।

तस्यायमाशयो यत् समवायसम्बन्धावच्छिन्नप्रतियोगिताको घटत्वाभावः कालिकेनाव्याप्यवृत्तिः, यतो हि काले समवायसम्बन्धावच्छिन्नप्रतियोगिताको घटत्वाभावो घटातिरिक्तपटाद्यवच्छेदेनैव तिष्ठति, घटावच्छेदेन तु न काले समवायसम्बन्धावच्छिन्नप्रतियोगिताको घटत्वाभावः कालिकेन, किन्तु तादृशघटत्वाभावस्याभाव एव। अतः सोऽभावोऽव्याप्यवृत्तिरेव, तदभावसाध्यकस्थलस्याव्याप्यवृत्तिसाध्यकस्थलत्वात्, व्याप्यवृत्तिसाध्यकस्थलस्यैव तादृशस्थले प्रतियोगिवैयधिकरण्याप्रवेशे दोषवत्तयोपक्रान्तत्वात्।

स्वरूपसम्बन्धावच्छिन्नप्रतियोगिताको घटत्वाभावस्तु कालिकेन नाव्याप्यवृत्तिः, स्वरूपेण घटत्वस्य कुत्रापि सत्त्वविरहेण व्यधिकरणतादृश = स्वरूपसम्बन्धावच्छिन्नप्रतियोगिताक, - घटत्वाभावस्य काले कालिकेन व्याप्यवृत्तित्वात्, निरवच्छिन्नतयैव काले सत्त्वात्। तस्मात् स्वरूपसम्बन्धावच्छिन्नप्रतियोगिताकघटत्वाभावस्य कालिकेन व्याप्यवृत्तित्वात्तादृशघटत्वाभावाभावस्यापि व्याप्यवृत्तितैव, ततश्च तत्र न दोषदानासङ्गतिरिति तदाशयः।

अनन्तरम् 'तथापि साध्यतावच्छेदकसम्बन्धेने'त्यादि। व्याप्यवृत्तिसाध्यकस्थले निर्दुष्टमभावे हेत्वधिकरणवृत्तितानियामकसम्बन्धं परिचार[य]यितुं 'साध्यतावच्छेदकसम्बन्धेन स्वप्रतियोगिमत्ताबुद्धेर्विषयविधया प्रतिबन्धकतावच्छेदको यः सम्बन्धस्तेन सम्बन्धेन हेत्वधिकरणवृत्तित्वमभावस्य विवक्षितमि'ति तर्कालङ्कारैर्यदुक्तम्[१], तदाशयस्तत्त्वालोककृद्भिः 'प्रतियोगिताविशिष्टप्रतियोगितानवच्छेदकत्वमनवच्छेदकत्वान्तार्थ' इत्युपन्यस्य सूचितः। तत्र द्वितीयप्रतियोगितायां प्रथमप्रतियोगितावैशिष्ट्यनियामकतया स्वतादात्म्य, - स्वविशिष्टप्रकारताशालिग्रहत्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकप्रकारतावच्छेदकसम्बन्धावच्छिन्नहेत्वधिकरण- निरूपित-

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. १४

वृत्तितावदभावीयत्वैतत्सम्बन्धद्वयं दर्शितम्। तत्र द्वितीयसम्बन्धघटकप्रथमप्रकारतायां 'स्व'पदग्राह्यप्रतियोगितावैशिष्ट्यनियामकसम्बन्धौ स्वावच्छेदकधर्मावच्छिन्नत्वस्वावच्छेदकसम्बन्धावच्छिन्नत्वरूपौ द्वावुक्तौ।

उक्तपरिष्कारफलं सूचितम् 'एवञ्च साध्याभावस्योक्तस्थले घटत्वाभावरूपतया तदीयघटत्वनिष्ठप्रतियोगितावच्छेदकावच्छिन्नग्रहविरोधितावच्छेदकसम्बन्धत्वस्य स्वरूपे सत्त्वेऽपि न क्षतिरि'त्युल्लिख्य। घटत्वाभावस्य कालिकेन योऽभावस्तस्य स्वरूपसम्बन्धेन साध्यतायां गगनत्वे सद्धेतौ उपरि उपपादितदिशा स्वरूपसम्बन्धस्य लक्षणघटकाभावीयहेत्वधिकरणवृत्तितानियामकसम्बन्धताप्राप्तौ घटत्वाभावरूपतृतीयाभावात्मकसाध्याभावस्य तादृशेन स्वरूपसम्बन्धेन हेत्वधिकरणवृत्तित्वात्तदीयप्रतियोगितावच्छेदकत्वस्य साध्यतावच्छेदके घटत्वाभावाभावत्वे द्वितीयाभावत्वे सत्त्वादव्याप्तिः स्यात्, प्रतियोगिताविशिष्टप्रतियोगितानवच्छेदकत्वस्यानवच्छेदकत्वान्तार्थत्वे तु नाव्याप्तिः, तत्र घटत्वाभावात्मकसाध्याभावीयघटत्वनिष्ठप्रतियोगिताविशिष्टत्वस्य स्वतादात्म्यविरहेण द्वितीयाभावात्मकसाध्यनिष्ठप्रतियोगितायामभावात्।

प्रतियोगितायां प्रतियोगितावैशिष्ट्यनियामकद्वितीयसम्बन्धघटकस्य प्रथमप्रकारतायां स्ववैशिष्ट्यनियामकस्य स्वावच्छेदकधर्मावच्छिन्नत्वस्य स्थाने स्व(प्रतियोगिता)सामानाधिकरण्यस्य प्रवेशे वह्न्यधिकरणत्व-कालिकसम्बन्धावच्छिन्नप्रतियोगिताकप्रमेयाभाव — एतदन्यतरस्य स्वरूपसम्बन्धेन साध्यतायां धूमे सद्धेतावव्याप्तिः स्यात्, उक्तान्यतराभावात्मकसाध्याभावीया या कालिकसम्बन्धप्रतियोगिताकप्रमेयाभावनिष्ठा प्रतियोगिता, तादृशप्रतियोगिताया स्वसमानाधिकरणत्वरूपवैशिष्ट्यस्य कालिकसम्बन्धावच्छिन्नप्रतियोगिताकप्रमेयाभावत्वावच्छिन्नप्रकारतायां सत्त्वेन तादृशप्रकारताकग्रहविरोधितावच्छेदकसम्बन्धत्वस्य कालिकसम्बन्धे सम्भवात्, तेन कालिकसम्बन्धेन हेत्वधिकरणवृत्तिसाध्याभावप्रतियोगितावच्छेदकत्वस्य साध्यतावच्छेदके सत्त्वात्।

स्वावच्छेदकधर्मावच्छिन्नत्वोपादाने तु दोषासम्भवः, तादृशप्रमेयाभावत्वावच्छिन्नप्रकारतायां स्वसामानाधिकरण्यसत्त्वेऽपि साध्याभावप्रतियोगितावच्छेदकोक्तान्यतरत्वधर्मावच्छिन्नत्वविरहात्। तादृशान्यतरत्वधर्मावच्छिन्ना स्वावच्छेदकस्वरूपसम्बन्धावच्छिन्ना च या प्रकारता, तादृशप्रकारताकग्रहविरोधितावच्छेदकसम्बन्धत्वस्य स्वरूप एव सत्त्वात्, तेन सम्बन्धेन तत्र साध्याभावस्य हेत्वधिकरणवृत्तित्वविरहात्, धूमाधिकरणे उक्तान्यतरान्तर्गतवह्न्यधिकरणत्वस्य स्वरूपसम्बन्धेन सत्त्वेनोक्तान्यतरत्वावच्छिन्नाभावविरहात्।

अनन्तरं शङ्कितं यत्प्रतियोगिताविशिष्टप्रतियोगिताघटितोक्तपरिष्कारे वैशिष्ट्यनियामकद्वितीयसम्बन्धघटकं तद्घटकप्रतिबध्यतायां प्रतियोगिताविशिष्टप्रकारताशालिग्रहत्वव्यापकत्वमप्रसिद्धम्। तादृशग्रहत्वस्य = प्रतियोगिताविशिष्टप्रकारताशालिग्रहत्वस्य, निर्धर्मितावच्छेदकताकतादृशग्रहेऽपि सत्त्वेन तत्र कस्यापि प्रतिबध्यत्वविरहाद् निर्धर्मितावच्छेदकज्ञानस्य प्रतिबध्यत्वप्रतिबन्धकत्वयोरभावादिति।

अत्र समाहितम्। तादृशग्रहत्वव्यापकप्रतिबध्यताप्रसिद्ध्यर्थं तत्र किञ्चिद्धर्मावच्छिन्नविशेष्यतानिरूपित-स्व(प्रतियोगिता)विशिष्टप्रकारतासमानाधिकरणभेदप्रतियोगितावच्छेदकत्वन्नास्तीति प्रतीतिसिद्धाभावरूपस्यैव व्यापकत्वस्य प्रवेश्यत्वात्, उक्ते भेदे स्वविशिष्टप्रकारतासमानाधिकरणत्वं स्वविशिष्टप्रकारताकग्रहत्वसमानाधिकरणत्वरूपम्। अथवा विषयित्वसम्बन्धेन तादृशप्रकारतासमानाधिकरणत्वं विवक्षितम्। तेन निर्धर्मितावच्छेदकताके स्वविशिष्टप्रकारताशालिग्रहे प्रतिबध्यत्वविरहेऽपि विवक्षितव्यापकत्वाक्षतिः। विवक्षितव्यापकत्वस्य स्वविशिष्टप्रकारताशालिसधर्मितावच्छेदकताकाशेषग्रहवृत्तित्वमात्रेणैवोपपत्तेः तादृशप्रकारतासमानाधिकरणभेद = प्रतिबध्यतावान्नेति प्रतीतिसिद्धभेद, - प्रतियोगितावच्छेदकत्वाभावरूपव्यापकत्वस्य तावतैवोपपन्नत्वात्।

उक्तपरिष्कारान्तर्गतप्रतियोगितावैशिष्ट्यनियामकद्वितीयसम्बन्धान्तर्गतस्ववैशिष्ट्यनियामकप्रथमसम्बन्धात्मकस्वावच्छेदकधर्मावच्छिन्नत्वं यादृशं विवक्षितं तद्दर्शयति। स्वावच्छेदकावच्छिन्नत्वञ्च स्वावच्छेदकतात्वावच्छिन्नप्रतियोगिताका या पर्याप्तिस्तादृशपर्याप्त्यनुयोगितावच्छेदकं यद्रूपं, तादृशरूपावच्छिन्नानुयोगिताकपर्याप्तिकावच्छेदकताकत्वमेव प्रकारतायां स्वा(प्रतियोगिता)वच्छेदकधर्मावच्छिन्नत्वरूपं प्रथमवैशिष्ट्यम्।

उक्तस्वरूपस्य स्वावच्छेदकावच्छिन्नत्वस्य विवक्षाविरहे विषयितासम्बन्धेन वह्निधूमोभयसाध्यकव्यभिचारिणि ज्ञानत्वादिहेतावतिव्याप्तिर्दर्शिता तत्त्वालोककृद्भिः। तत्र विषयितायाः साध्यतावच्छेदकसम्बन्धतयोपन्यासस्य तात्पर्यमिदं यत्संयोगसम्बन्धेन वह्निधूमोभयसाध्यकव्यभिचारिधूमादिहेतुकस्थलं नो व्याप्यवृत्तिसाध्यकमपि तु अव्याप्यवृत्तिसाध्यकमेव। प्रसङ्गानुसारमव्याप्यवृत्तिसाध्यकस्थले दोषदानौचित्यविरहादिति। विषयितासम्बन्धेन तु वह्निधूमोभयं व्याप्यवृत्त्येव।

उक्तस्वरूपस्वावच्छेदकावच्छिन्नत्वानिवेशे उक्तस्थले वह्निधूमोभयाभावात्मकसाध्याभावीयप्रतियोगिताया वह्निधूमात्मकप्रतियोगिभेदेन भिन्नत्वाद् वह्निनिष्ठप्रतियो-

गिताविशिष्टता केवलवह्निनिष्ठप्रकारतायामेव एवं धूमनिष्ठप्रतियोगिताविशिष्टता केवलधूमनिष्ठप्रकारतायामेव। तथासति तथाविधप्रकारताशालिग्रहत्वस्य केवलवह्निकेवलधूमप्रकारकज्ञानयोः सत्त्वेन तत्रोक्तसाध्याभावप्रकारकज्ञानप्रतिबध्यत्वविरहात्, तादृशग्रहत्वव्यापकप्रतिबध्यत्वाप्रसिद्ध्या साध्याभावपरिग्रहासम्भवादभावान्तरमादाय साध्यतावच्छेदके प्रतियोगितानवच्छेदकत्वसत्त्वादतिव्याप्तिः स्यात्।

दर्शितस्वरूपस्वावच्छेदकावच्छिन्नत्वनिवेशे तु प्रतियोगितावच्छेदकतापर्याप्त्यनुयोगितावच्छेदकवह्नित्वधूमत्वगतद्वित्वावच्छिन्नानुयोगिताकपर्याप्तिकावच्छेदकताकत्वस्य वह्निधूमोभयवज्ज्ञानमित्याकारकज्ञानीयप्रकारतायामेव सत्त्वेन केवलवह्निप्रकारकज्ञानीयप्रकारतायां केवलधूमप्रकारकज्ञानीयप्रकारतायाञ्चासत्त्वात् तादृशग्रहत्वव्यापकप्रतिबध्यत्वप्रसिद्ध्या साध्याभावस्य परिग्रहसम्भवान्नातिव्याप्तिः।

अनन्तरं शङ्कितं यत्प्रतियोगिताविशिष्टप्रकारताशालिग्रहत्वव्यापकत्वमनिवेश्य तादृशप्रकारताशालिग्रहत्वावच्छिन्नत्वमेव प्रतिबध्यतायां विवक्षणीयम्, तावतैव विषयितासम्बन्धेन वह्निधूमोभयसाध्यकव्यभिचारिणि पूर्वोक्तेऽतिव्याप्ति र्न स्यात्। प्रतियोगिताविशिष्टप्रकारताकग्रहत्वव्यापकप्रतिबध्यत्वस्य तत्राप्रसिद्धत्वेऽपि प्रतियोगिताविशिष्टप्रकारत्वावच्छिन्नप्रतिबध्यत्वस्य प्रसिद्धत्वात्, स्वावच्छेदकावच्छिन्नत्वस्य स्वावच्छेदकताप्रतियोगिकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगिताकपर्याप्तिकावच्छेदकताकत्वपर्यन्तार्थकत्वविवक्षाया आवश्यकताविरहात् इति।

अत्र समाहितं यत्प्रतियोगिताविशिष्टप्रकारत्वावच्छिन्नप्रतिबध्यताया निवेशे कालिकसम्बन्धावच्छिन्नप्रतियोगिताकप्रमेयाभावसाध्यकात्मत्वसद्धेतावव्याप्तिः स्यात्। तत्र प्रमेयाभावाभावात्मकसाध्याभावीया या प्रमेयाभावात्मकसाध्यनिष्ठा प्रतियोगिता, तादृशप्रतियोगितया स्वतादात्म्य, - स्वविशिष्टप्रकारत्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकप्रकारतावच्छेदकसम्बन्धावच्छिन्नहेत्वधिकरणनिरूपितवृत्तितावदभावीयत्वोभयसम्बन्धेन विशिष्टा प्रतियोगिता साध्यनिष्ठैव प्रतियोगिता, तदवच्छेदकत्वस्यैव साध्यतावच्छेदके सत्त्वात्।

तदुपपादयति — प्रमेयाभाव = कालिकसम्बन्धावच्छिन्नप्रतियोगिताकप्रमेयाभाव, - ज्ञानाधिकरणत्वोभयाभावत्वावच्छिन्नस्वरूपसम्बन्धावच्छिन्ना या प्रकारता, प्रमेयाभावज्ञानाधिकरणत्वोभयाभाववानात्मेतरो घटादिरित्याकारकज्ञानीया प्रकारता[१],

---

१. घटादौ अनित्ये कालिकसम्बन्धावच्छिन्नप्रतियोगिताकप्रमेयाभावज्ञानाधिकरणत्वोभयासत्त्वेन तदुभयाभाववत्तायाः प्रसिद्धत्वात्।

तादृशप्रकारत्वावच्छिन्ना या प्रतिबन्धकता, तादृशप्रतिबन्धकतानिरूपिता या प्रतिबध्यता, सा साध्याभाव = प्रमेयाभावाभाव, - प्रतियोगितावच्छेदक(प्रमेयाभावत्व) धर्मावच्छिन्ना, उभयवत्ताज्ञान = प्रमेयाभावज्ञानाधिकरणत्वोभयवान् [इति ज्ञान], साधारण[प्रति]बध्यता[१], ततश्च साध्याभावीयप्रतियोगिताविशिष्टप्रकारत्वावच्छिन्न-प्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकप्रकारतावच्छेदकस्वरूपसम्बन्धावच्छिन्न-हेत्वधिकरणनिरूपितवृत्तितावानभावः प्रमेयरूपः, प्रमेयाभावात्मकसाध्यस्याभावः, तादृशाभावीयत्वस्यापि साध्यनिष्ठप्रतियोगितायां सत्त्वाद्दर्शितसम्बन्धद्वयेन प्रतियोगिता-विशिष्टत्वात्तदवच्छेदकत्वस्य साध्यतावच्छेदके सत्त्वादव्याप्तिः प्रसज्येत इति।

तादृशग्रहत्वव्यापकप्रतिबध्यत्वनिवेशे तु नोक्ताव्याप्तिसम्भवः, केवलप्रमेयनिष्ठ-तादृशप्रकारताकग्रहत्ववति तत्प्रतिबध्यत्वविरहात्। प्रतियोगिताविशिष्टप्रतियोगितान-वच्छेदकत्वस्य अनवच्छेदकत्वान्तार्थतायां हेत्वधिकरणवृत्तित्वमभावे पृथक्कृत्य नैव निवेशितमस्ति, तेन 'प्रमेयाभावज्ञानाधिकरणत्वोभयाभावत्वावच्छिन्नस्वरूपसम्बन्धा-वच्छिन्ने'ति तत्त्वालोकशुद्धपाठस्थाने 'ज्ञानानधिकरणत्व'घटितस्योल्लेखं[२] सरलासुबो-धनीकृतां समीचीनन्नैव विद्मः।

अनन्तरं तत्त्वालोककृद्भिः द्वितीयसम्बन्धघटकप्रथमप्रकारतायां प्रतियोगितावै-शिष्ट्यनियामकद्वितीयसम्बन्धस्य स्वावच्छेदकसम्बन्धावच्छिन्नत्वस्य व्यावर्त्यम् 'स्वावच्छेदकसम्बन्धावच्छिन्नत्वनिवेशादि'त्यादिना दर्श्यते— स्वावच्छेदकसम्ब-न्धावच्छिन्नत्वानिवेशे प्रमेयाभाव = कालिकसम्बन्धावच्छिन्नप्रतियोगिताकप्रमेयाभाव, - साध्यकस्थले तादृशप्रमेयाभावसाध्यकात्मत्वसंद्धेतुस्थलेऽव्याप्तिः स्यात्, यतो हि स्वावच्छेदकसम्बन्धावच्छिन्नत्ववैशिष्ट्यविरहे स्वावच्छेदकधर्मावच्छिन्नत्वमात्रवैशि-ष्ट्यसत्त्वे उक्तस्थले प्रतियोगिताविशिष्टप्रकारताकग्रहत्वव्यापकप्रतिबध्यतानिरूपितप्र-तिबन्धकतावच्छेदकप्रकारतावच्छेदकः सम्बन्धः स्वरूपसम्बन्धः स्यात्, तादृशस्वरूप-सम्बन्धावच्छिन्नहेत्वधिकरणनिरूपितवृत्तितावानभावः = साध्यस्य प्रमेयाभावस्याभा-वः, प्रमेयरूपो भवेत्, तादृशप्रमेयाभावात्मकसाध्यनिष्ठप्रतियोगितायां दर्शितसम्बन्धाव-च्छिन्नहेत्वधिकरणनिरूपितवृत्तितावदभावीयत्वस्यापि सत्त्वात् तदवच्छेदकत्वस्यैव साध्यतावच्छेदके सत्त्वादनवच्छेदकत्वविरहादव्याप्त्यापत्तिः स्यात्।

---

१. दर्शितोभयवत्ताज्ञानस्य प्रमेयाभावत्वावच्छिन्नप्रकारताविषयकत्वादिति भावः।

२. सिद्धान्तलक्षणसुबोधनी, पृ. ३७२

स्वावच्छेदकसम्बन्धावच्छिन्नत्वोपादाने तु नाव्याप्तिसम्भवः, कालिकसम्बन्धावच्छिन्नायां प्रमेयाभावनिष्ठप्रकारतायां साध्याभावीयसाध्यनिष्ठस्वरूपसम्बन्धावच्छिन्नप्रतियोगितावच्छेदकस्वरूपसम्बन्धावच्छिन्नत्वविरहात्, स्वरूपसम्बन्धस्य प्रतियोगिताविशिष्टप्रकारताकग्रहत्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकप्रकारतावच्छेदकसम्बन्धत्वाभावादिति।[२२२]

तत्त्वालोकः – **अथ घटभिन्नं कपालत्वादित्यत्र घटभेदाभावस्य घटत्वघटोभयात्मकत्वे उक्तविरोधिताघटकसमवायेन घटात्मकसाध्याभावाधिकरणे कपाले हेतोर्वृत्तित्वेनाव्याप्तिरिति चेत्, घटभेदाभावस्य घटत्वमात्ररूपत्वाभ्युपगमादाधाराधेयभावानुरोधात्, उभयरूपत्वेऽपि समवायेन घटत्वावगाहिन एव तादात्म्येन च घटावगाहिन एव घटभेदाभावविषयकज्ञानस्य विरोधितया विरोधितावच्छेदकप्रकारतावैशिष्ट्यस्य वृत्तितायां विवक्षितत्वाद्वा दोषासम्भवात्।**

वैशिष्ट्यञ्च स्वसामानाधिकरण्य, -स्वावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेनेति।

ननु कालिकसम्बन्धावच्छिन्नप्रतियोगिताकघटाभावसाध्यकपटाभावत्वे सद्धेतौ घटाभावाभावो घटाभाववानिति बुद्धिम्प्रति घटाभावाभावे कालिकेन घटाभावाभाव इति बुद्धेः प्रतिबन्धकतया तदवच्छेदकप्रकारतावच्छेदककालिकसम्बन्धावच्छिन्नाधेयतासम्बन्धेन साध्याभावस्य हेत्वधिकरणवृत्तितयाऽव्याप्तिरिति चेद्। न।

तादृशप्रतिबध्यताविशिष्टप्रकारताविशिष्टवृत्तित्वस्य विवक्षणीयत्वात्।

प्रतिबध्यतावैशिष्ट्यञ्च स्वावच्छेदकविशेष्यतावच्छेदकासामानाधिकरण्य, -स्वनिरूपितप्रतिबन्धकतावच्छेदकत्वोभयसम्बन्धेन। प्रकारतावैशिष्ट्यञ्च प्रागुक्तसम्बन्धेन।

न च कालिकेनाभाववान् वह्न्यभाववान् कालिकेनाभाववान् ह्रद इत्यस्यापि प्रतिबन्धकतया तदवच्छेदकप्रकारतामादाय वह्निमान् धूमादित्यादावव्याप्तिरिति वाच्यम्, ज्ञानवैशिष्ट्यानवच्छिन्नत्वेन प्रतिबन्धकत्वस्य विशेषणीयत्वात्।

न चैवमपि वह्न्यभावस्य कालिकेन यद् व्याप्यङ्कालिकेन तद्वत्ताबुद्धेरपि प्रतिबन्धकतया तदवच्छेदकवह्न्यभावनिष्ठप्रकारताविशिष्टवृत्तित्वमादायाव्या-

प्तितादवस्थ्यमिति वाच्यम्, भ्रमानिरूपितत्वस्य प्रकारताविशेषणत्वात्।

यदि चोक्तदोषवारणाय सामानाधिकरण्यं विहाय स्वावच्छेदकधर्मावच्छिन्नत्वस्य संसर्गत्वमुच्यते तदा प्रतियोगिताविशिष्टप्रकारत्वावच्छिन्नत्वमेव वाच्यम्, न तु व्यापकत्वम्, प्रयोजनाभावात्।

न च साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रकारत्वावच्छिन्नत्वमात्रम्वाच्यमिति वाच्यम्, स्वरूपेण वह्न्यधिकरणत्वसाध्यके वह्न्यधिकरणत्वाभावस्य कालिकेन योऽभावः स्वरूपेण तद्वानिति बुद्धिम्प्रति कालिकेन वह्न्यधिकरणत्वाभाववानिति बुद्धेः प्रतिबन्धकतयाऽव्याप्तेः।

प्रतियोगितासामानाधिकरण्यप्रवेशेन तद्वारणसम्भवेऽप्युक्तयुक्त्या प्रमेयस्य घटाद्यनुयोगिकस्वरूपेण साध्यतायां सद्धेतावव्याप्तिः स्यात्।

स्वावच्छेदकधर्मावच्छिन्नत्वप्रवेशेन तस्य वारणेऽप्यभावस्य घटानुयोगिकस्वरूपेण साध्यतायां सद्धेतावभावाभावस्य कालिकेनाभाववत्ताबुद्धिप्रकारतायां प्रतियोगितावच्छेदकधर्मावच्छिन्नत्वसत्त्वेनाव्याप्तिः स्यादिति प्रतियोगितावच्छेदकधर्मातिरिक्तधर्मानवच्छिन्नत्वस्यापि निवेश्यत्वात्।

स्वावच्छेदकसम्बन्धावच्छिन्नत्वञ्च पर्याप्त्यघटितमेवोपादेयम्, प्रयोजनविरहादिति प्रकारतावैशिष्ट्यघटकस्वावच्छेदकसम्बन्धावच्छिन्नत्वञ्च स्वनिरूपितसंसर्गतावच्छेदकतापर्याप्त्यधिकरणधर्मनिष्ठावच्छेदकताकसंसर्गताकत्वम्। तेन स्वरूपकालिकोभयसम्बन्धेन वह्न्यभाववत्ताबुद्धेः प्रतिबन्धकत्वेन प्रकारतानिरूपितसंसर्गतावच्छेदककालिकत्वावच्छिन्नसंसर्गताकवृत्तिताया हेत्वधिकरणनिरूपिताया वह्न्यभावे सत्त्वेन न वह्निमान्धूमादित्यत्राव्याप्तिः। वृत्तितानिरूपितसंसर्गतावच्छेदकतापर्याप्तिश्च न निवेश्या, प्रयोजनाभावादिति।[२२३]

प्रकाशः – प्रतियोगिताविशिष्टप्रतियोगितानवच्छेदकत्वस्य अनवच्छेदकत्वान्तार्थतायां घटभिन्नं कपालत्वादित्यत्र 'अथे'त्यादिनाऽव्याप्तिं शङ्कते। भेदाभावस्य प्रतियोगितावच्छेदकप्रतियोग्युभयस्वरूपत्वे घटभेदाभावस्य घटत्वघटोभयात्मकत्वेन घटभेदात्मकसाध्याभावीयसाध्यनिष्ठप्रतियोगिताविशिष्टा या साध्यनिष्ठा प्रकारता, तादृशप्रकारताशालिग्रहत्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकप्रकारता यथा तादात्म्यसम्बन्धावच्छिन्ना घटनिष्ठा तथा समवायसम्बन्धावच्छिन्ना घटत्वनिष्ठापि, तथासति तथाविधप्रतिबन्धकतावच्छेदकप्रकारतावच्छेदकसमवायसम्बन्धावच्छिन्नहेत्वधिकरणनिरूपितवृत्तितावानभावो घटात्मको घटभेदाभावः साध्याभावः,

कपालात्मके हेत्वधिकरणे घटस्य समवायेन सत्त्वात्, घटभेदात्मकसाध्यनिष्ठप्रतियोगिताया स्वतादात्म्यतादृशाभावीयत्वोभयसम्बन्धेन प्रतियोगिताविशिष्टत्वात्तदवच्छेदकत्वस्यैव साध्यतावच्छेदके सत्त्वादव्याप्तिः प्रसज्यतीति।

अत्र समाधीयते। आधाराधेयभावानुरोधेन घटभेदाभावस्य घटत्वमात्रस्वरूपत्वाभ्युपगमाद् घटो घटत्वान्[घटत्ववान्] घटो घटभेदाभाववानिव घटो घटवानित्येवं प्रतीतेरभावात् तादात्म्येन घटे घटसम्बन्धितासत्त्वेऽपि आधारत्वाभावात् ततश्चोक्ताव्याप्तेरभावात्, घटभेदाभावस्य घटत्वघटोभयरूपतापक्षे प्रतियोगितायां प्रतियोगितावैशिष्ट्यनियामकद्वितीयसम्बन्धघटकहेत्वधिकरणनिरूपितवृत्तितायां प्रतिबन्धकतावच्छेदकप्रकारतावच्छेदकसम्बन्धावच्छिन्नत्वस्थाने स्वसामानाधिकरण्य, - स्वावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेन तादृशप्रतिबन्धकतावच्छेदकप्रकारताविशिष्टत्वस्य तत्र वृत्तितायान्निवेशे उक्ताव्याप्त्यसम्भवात्।

समवायेन घटत्वावगाहिन एव तादात्म्येन घटावगाहिन एव घटभेदाभावविषयकज्ञानस्य घटभेदबुद्धिम्प्रति विरोधित्वेन समवायेन घटावगाहिनो घटभेदाभावविषयकज्ञानस्य घटभेदबुद्धिविरोधित्वविरहात्, प्रतियोगिताविशिष्टप्रकारताकग्रहत्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकघटत्वनिष्ठप्रकारतायाः स्वसामानाधिकरण्यस्वावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेन वैशिष्ट्यस्य घटात्मकघटभेदाभावनिष्ठायां हेत्वधिकरणकपालनिरूपितवृत्तितायामभावात्, घटत्वप्रकारतासामानाधिकरण्यस्य घटनिष्ठवृत्तितायामसत्त्वात् तादृशघटनिष्ठप्रकारतासामानाधिकरण्यस्य घटनिष्ठवृत्तितायां सत्त्वेऽपि स्वावच्छेदकतादात्म्यसम्बन्धावच्छिन्नत्वविरहात् समवायेनैव घटस्य कपाले सत्त्वाद्दोषासम्भवात्।

अनन्तरं पुनरपि प्रतियोगिताविशिष्टप्रतियोगितानवच्छेदकत्वपरिष्कारे दोषान्तरं 'ननु कालिकसम्बन्धावच्छिन्ने'त्यादिना शङ्कते। कालिकसम्बन्धावच्छिन्नप्रतियोगिताकघटाभावस्य स्वरूपेण साध्यत्वे पटाभावत्वस्य स्वरूपेण हेतुतायामव्याप्तिः स्यात्, पटाभावत्वात्मकहेत्वधिकरणे नित्ये पटात्यन्ताभावे नित्ये कालिकायोगात् कालिकेन घटस्यासत्त्वात्, कालिकसम्बन्धावच्छिन्नप्रतियोगिताकघटाभावस्य स्वरूपेण सत्त्वादुक्तहेतोः सद्धेतुता तत्र कालिकसम्बन्धावच्छिन्नाधेयत्वसम्बन्धेन साध्याभावस्य घटाभावाभावस्य घटात्मकस्य हेत्वधिकरण = पटाभाव, - वृत्तितया[१] साध्यनिष्ठप्रतियोगिता-

१. पटात्यन्ताभावस्य नित्यत्वेन तदनुयोगिककालिकायोगेऽपि तत्प्रतियोगिककालिकस्याबाधितत्वात् कालिकसम्बन्धावच्छिन्नाधेयत्वस्य पटात्यन्ताभावे सत्त्वेन तदात्मकसम्बन्धेन स्वाधेये घटात्मकघटाभावाभावस्य साध्याभावस्य हेत्वधिकरणवृत्तित्वात्।

विशिष्टप्रतियोगितावच्छेदकत्वस्यैव साध्यतावच्छेदके सत्त्वादव्याप्तिः प्रसज्यति।

कालिकसम्बन्धावच्छिन्नाधेयत्वस्य तत्र यथा प्रतियोगितायां प्रतियोगितावैशिष्ट्यनियामकद्वितीयसम्बन्धकप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदक- प्रकारताविशिष्टता तथोपपादयति स्वयं तत्त्वालोककृत्— घटाभावाभावो घटाभाववानिति बुद्धिम्प्रति घटाभावाभावे कालिकेन घटाभावाभाव इति बुद्धेः प्रतिबन्धकतया[१] तदवच्छेदक = प्रतिबन्धकतावच्छेदक, - प्रकारतावच्छेदककालिकसम्बन्धावच्छिन्नाधेयत्वसम्बन्धेन साध्याभावस्य हेत्वधिकरणवृत्तितयाऽव्याप्तिरितीति।

प्रतिबन्धकीभूते घटाभावाभावे कालिकेन घटाभावाभाव इति ज्ञाने घटाभावाभावनिष्ठा तादृशप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकताया प्रकारता, स्वसामानाधिकरण्यस्वावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेन तादृशप्रकारतावैशिष्ट्यस्य घटाभावाभावनिष्ठायामाधेयत्वरूपायां वृत्तितायां सत्त्वात्, हेत्वधिकरणनिरूपिततादृशवृत्तितावदभावीयत्वस्य साध्यनिष्ठसाध्याभावीयप्रतियोगितायां प्रसक्त्याऽव्याप्तिः स्यादिति तदाशयात्।

अत्र समाधीयते— 'तादृशप्रतिबध्यताविशिष्टप्रकारताविशिष्टवृत्तित्वस्य = हेत्वधिकरणनिरूपितवृत्तित्वस्य, विवक्षणीयत्वादि'त्युपन्यासेन।

तत्र प्रकारतायां प्रतिबध्यतावैशिष्ट्यं स्वावच्छेदकविशेष्यतावच्छेदकासामानाधिकरण्य, - स्वनिरूपितप्रतिबन्धकतावच्छेदकत्वोभयसम्बन्धेन। वृत्तित्वे तादृशप्रकारतावैशिष्ट्यन्तु पूर्वोक्तेनैव स्वसामानाधिकरण्य, - स्वावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेन।

एवंसति प्रकृते तादृशघटाभावसाध्यकपटाभावत्वसद्धेतुस्थले घटाभावाभावो घटाभाववानिति बुद्धिनिष्ठप्रतिबध्यताविशिष्टत्वस्य घटाभावाभावे कालिकेन घटाभावाभावः प्रतिबन्धकीभूतैतज्ज्ञानीयप्रकारतायां स्वावच्छेदकं = प्रतिबध्यतावच्छेदकं, घटाभावाभावो घटाभाववानित्येतद्बुद्धीयविशेष्यतावच्छेदकं यद् घटाभावाभावत्वं, तत्सामानाधिकरण्यस्यैव सत्त्वेन अपेक्षिततादृशविशेष्यतावच्छेदकासामानाधिकरण्यविरहात्, तादृशप्रतिबध्यताविशिष्टत्वाभावात्तदादायाव्याप्तिदानासम्भवात्।

---

१. भूतलं घटवदिति बुद्धिम्प्रति भूतलं घटाभाववदिति बुद्धेरिव भूतले घटाभाव इति बुद्धेरपि प्रतिबन्धकत्ववत् असमानप्रकारविशेष्यकस्यापि समानविषयकस्य अनुभवबलात् प्रतिबन्धकत्वस्वीकारात्।

अनन्तरमपि शङ्कते। न च कालिकेनाभाववान् वह्न्यभाववान् कालिकेनाभाववान् ह्रद इत्यस्यापि ज्ञानविशिष्टज्ञानस्य वह्निमान् ह्रद इत्येतज्ज्ञानम्प्रति प्रतिबन्धकतया, तदवच्छेदक = प्रतिबन्धकतावच्छेदक, - प्रकारतामादाय वह्निमान् धूमादित्यत्र कालिकेन हेत्वधिकरणवृत्तिवह्न्यभावप्रतियोगितामादायाव्याप्तिः स्यादिति।

अत्र 'प्रतिबन्धकत्वस्य = प्रकारतायां प्रतिबध्यतावैशिष्ट्यनियामकद्वितीयसम्बन्धस्वनिरूपितप्रतिबन्धकतावच्छेदकत्वघटकस्य, ज्ञानवैशिष्ट्यानवच्छिन्नत्वेन विशेषणीयत्वादि'त्युक्त्या समाहितम्। आपादकतया दर्शितप्रतिबन्धकत्वे ज्ञानवैशिष्ट्यावच्छिन्नत्वस्यैव सत्त्वेनोक्तप्रतिबन्धकतामादायाव्याप्तेरभावादिति।

अनन्तरं 'न चैवमपी'त्यादिना पुनः शङ्कते यत्प्रतिबन्धकत्वस्य ज्ञानवैशिष्ट्यानवच्छिन्नत्वेन विशेषितत्वेऽपि वह्न्यभावस्य कालिकेन यद्व्याप्यं कालिकेन तद्वत्ताबुद्धेरपि वह्न्यभावबुद्धेरिव वह्निमत्ताबुद्धिम्प्रति प्रतिबन्धकतया[१] तदवच्छेदक = प्रतिबन्धकतावच्छेदक, - वह्न्यभावनिष्ठप्रकारताविशिष्टवृत्तित्वमादाय = कालिकसम्बन्धावच्छिन्नवृत्तित्वमादाय, वह्निमान् धूमादित्यत्र पूर्वदर्शितस्थलेऽव्याप्तितादवस्थ्यमिति।

अत्र = पूर्वपक्षोपपादने, 'वह्न्यभावस्य कालिकेन यद्व्याप्यङ्कालिकेन तद्वत्ताबुद्धेरपि प्रतिबन्धकतया तदवच्छेदकवह्न्यभावनिष्ठप्रकारते'त्यस्योपपत्तिः। प्रतिबन्धकतावच्छेदकत्वेन प्रतिबन्धकतावच्छेदकवह्न्यभावव्याप्यनिष्ठप्रकारतावह्न्यभावनिष्ठप्रकारतयोरैक्यमादाय अथ वा वह्न्यभावव्याप्यनिष्ठप्रकारतां वह्न्यभावव्याप्यघटकवह्न्यभावेऽपि स्वीकृत्य, अन्यथा वह्न्यभावव्याप्यनिष्ठप्रकारताया वह्न्यभावनिष्ठप्रकारतातो भिन्नत्वे 'तदवच्छेदकवह्न्यभावनिष्ठप्रकारताविशिष्टवृत्तित्वमादाये'त्युक्तेः सङ्गतिर्न स्यादिति प्रतीमः।

उक्ताशङ्कायाः समाधानाय 'भ्रमानिरूपितत्वस्य प्रकारताविशेषणत्वादि'त्युक्तं तत्त्वालोककृद्भिः, उक्तायामापादकप्रकारतायां भ्रमनिरूपितत्वस्यैव सत्त्वेनाव्याप्तितादवस्थ्यापत्तेरसम्भवात्। वस्तुतः कालिकेन घटादेः कस्यापि वह्न्यभावव्याप्यत्वविरहात् कालिकेन घटादिमति महानसपर्वतादौ वह्न्यभावासत्त्वात् पर्वतादौ वह्न्यभावव्याप्यतया कालिकेन घटादिमत्ताज्ञानस्य भ्रमत्वात्तदीयप्रकारताया भ्रमनिरूपितत्वेन भ्रमानिरूपितत्वविरहात्।

---

१. तद्वत्ताबुद्धिम्प्रति तदभाववत्ताबुद्धेस्तदभावव्याप्यवत्ताबुद्धेश्च प्रतिबन्धकत्वात्।

अनन्तरमुच्यते यदुक्तदोष = घटभिन्नं कपालत्वादित्यत्र घटभेदाभावस्य घटत्वघटोभयात्मकत्वेन पूर्वापादितदोष, - वारणाय द्वितीयसम्बन्धघटकवृत्तितायां तद्घटकविरोधितावच्छेदकप्रकारतावैशिष्ट्यनियामकसम्बन्धद्वयान्तर्गतप्रथमस्य स्वसामानाधिकरण्यस्य सम्बन्धस्य स्थाने स्वावच्छेदकधर्मावच्छिन्नत्वसम्बन्धस्यैव यदि प्रवेशस्तदा प्रयोजना[भावा]द् द्वितीयसम्बन्धघटकप्रतिबध्यतायां स्व = प्रतियोगिता, - विशिष्टप्रकारताकग्रहत्वव्यापकत्वन्नैव निवेश्यं, किन्तु प्रतियोगिताविशिष्टप्रकारत्वावच्छिन्नत्वमेव वाच्यमिति।

घटभिन्नं कपालत्वादित्यत्र समवायेन घटत्वावगाहिन एव तादात्म्येन घटावगाहिन एव घटभेदाभावविषयकज्ञानस्य घटभेदविषयकज्ञानम्प्रति विरोधितया घटभेदाभावस्य घटत्वघटोभयरूपत्वेऽपि वृत्तितायामुक्तोभयसम्बन्धेन विरोधितावच्छेदकप्रकारताविशिष्टत्वनिवेशे विरोधितावच्छेदकघटत्वनिष्ठप्रकारतासामानाधिकरण्यस्य घटनिष्ठतादात्म्यसम्बन्धावच्छिन्नवृत्तितायां विरहस्येव स्वावच्छेदकधर्मा(घटत्वत्वा)वच्छिन्नत्वस्यापि विरहाद्[इति] 'यदि चोक्तदोषवारणाय सामानाधिकरण्यं (स्वसामानाधिकरण्यं) विहाय स्वावच्छेदकधर्मावच्छिन्नत्वस्य संसर्गत्वमुच्यते' इत्युक्तेरभिप्रायः।

'तदा = स्वसामानाधिकरण्यं विहाय स्वावच्छेदकधर्मावच्छिन्नत्वस्य संसर्गत्वोक्तौ, प्रतियोगित्वविशिष्टप्रकारत्वावच्छिन्नत्वमेव वाच्यम्, न तु व्यापकत्वमित्युक्ते-'राशयस्तु पूर्वं व्यापकत्वनिवेशस्य फलं 'न च प्रतियोगिताविशिष्टप्रकारत्वावच्छिन्नत्वमेव विवक्षणीयमि'त्याशङ्क्य कालिकसम्बन्धावच्छिन्नप्रतियोगिताकप्रमेयाभावसाध्यकात्मत्वहेतुके प्रमेयाभावज्ञानाधिकरणत्वोभयाभावत्वावच्छिन्नस्वरूपसम्बन्धावच्छिन्नप्रकारत्वावच्छिन्नप्रतिबन्धकतानिरूपितां साध्याभावप्रतियोगितावच्छेदकधर्मावच्छिन्नप्रकारत्वावच्छिन्नामुभयवत्ताज्ञानसाधारणप्रतिबध्यतामादाय प्रसक्ताव्याप्तिवारणं यदुक्तं तस्य = उक्ताव्याप्तिवारणात्मकफलस्य, उपपत्तिः स्वसामानाधिकरण्यं विहाय स्वावच्छेदकधर्मावच्छिन्नत्वस्य तत्र संसर्गत्वेनैव सम्भवात्, हेत्वधिकरणनिरूपितायां प्रमेयात्मकसाध्याभावनिष्ठस्वरूपसम्बन्धावच्छिन्नवृत्तितायां स्वसामानाधिकरण्यसत्त्वेऽपि स्वावच्छेदकोभयाभावत्वावच्छिन्नत्वस्य विरहात् उक्तोभयाभावान्तर्गतप्रमेयस्य स्वरूपेण आत्मवृत्तित्वेऽपि ज्ञानाधिकरणत्वाभावस्यात्मवृत्तित्वविरहादिति।

अनन्तरम् प्रतियोगिताविशिष्टप्रतियोगितानवच्छेदकत्वस्य अनवच्छेदकत्वान्तार्थतायां द्वितीयप्रतियोगितायां प्रथमप्रतियोगितावैशिष्ट्यनियामकतयोक्तसम्बन्धद्वयान्तर्गतद्वितीयसम्बन्धघटकप्रथमप्रकारतायां प्रतियोगितावैशिष्ट्यनियामक'स्वावच्छेदकधर्मावच्छिन्नत्व'सम्बन्धस्थाने 'स्वावच्छेदकधर्मावच्छिन्नत्वस्वावच्छेदक(प्रतियोगि-

तावच्छेदक)धर्मातिरिक्तधर्मानवच्छिन्नत्वोभय'निवेशावश्यकताबोधनायोपक्रम्यते 'न च साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रकारत्वावच्छिन्नत्वमात्रम्वाच्यमि'त्यादिना।

स्वावच्छेदकधर्मावच्छिन्नत्व, - स्वावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेन प्रतियोगिताविशिष्टप्रकारत्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकप्रकारताविशिष्ट[1] हेत्वधिकरणनिरूपितवृत्तितावदभावीयत्वरूपद्वितीयसम्बन्धस्थाने साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रकारत्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकप्रकारताविशिष्ट[2] हेत्वधिकरणनिरूपितवृत्तितावदभावीयत्वमेव द्वितीयप्रतियोगितायां प्रथमप्रतियोगितावैशिष्ट्यनियामकद्वितीयसम्बन्धतया प्रवेश्यमिति 'न च साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रकारत्वावच्छिन्नत्वमात्रम्वाच्यमि'ति पूर्वपक्षस्याशयः।

अत्र समाधीयते। स्वरूपेण वह्न्यधिकरणत्वसाध्यके, धूमे धूमाधिकरणत्वे वा सद्धेतौ, वह्न्यधिकरणत्वाभावस्य कालिकेन योऽभावः स्वरूपेण तद्वानिति बुद्धिम्प्रति कालिकेन वह्न्यधिकरणत्वाभाववानिति बुद्धेः प्रतिबन्धकतयाऽव्याप्तेरिति कालिकेन वह्न्यधिकरणत्वाभावीयप्रतियोगिताया उक्तोभयसम्बन्धेन प्रतियोगिताविशिष्टत्वात्तदीयावच्छेदकत्वस्यैव साध्यतावच्छेदके सत्त्वादव्याप्तिः स्यात्। हेत्वधिकरणनिरूपितकालिकसम्बन्धावच्छिन्नवह्न्यधिकरणत्वाभावनिष्ठवृत्तितायाः साध्यतावच्छेदकस्वरूपसम्बन्धावच्छिन्नप्रकारत्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकप्रकारताविशिष्टत्वात्तादृशवृत्तितावदभावीयत्वस्य स्व(प्रतियोगिता)तादात्म्यस्य च तत्र प्रतियोगितायां सत्त्वात्।

साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रकारतायां प्रतियोगितासामानाधिकरण्यप्रवेशेनोक्ताव्याप्तिवारणसम्भवेऽपि[3] उक्तयुक्त्या प्रमेयस्य घटाद्यनुयोगिकस्वरूपेण साध्यतायां सद्धेतावव्याप्तिः स्यात्[4], प्रमेयाभावस्य कालिकेन योऽभावः स्वरूपेण तद्वत्ताबुद्धिम्प्रति कालिकेन प्रमेयाभाववानिति बुद्धेः प्रतिबन्धकत्वात्तत्र प्रकारतायां प्रतियोगितासामानाधिकरण्यस्यापि सत्त्वात्।

---

१. स्वावच्छेदकधर्मावच्छिन्नत्वस्वावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेनात्र वैशिष्ट्यं विवक्षितम्।

२. वृत्तितायां प्रकारतावैशिष्ट्यं स्वावच्छेदकधर्मावच्छिन्नत्वस्वावच्छेदकसम्बन्धावच्छिन्नत्वात्मकदर्शितोभयसम्बन्धेनैव।

३. अवच्छेदकभेदेन प्रतियोगिताभेदाद् वह्न्यधिकरणत्वाभावस्य कालिकेन योऽभावः स्वरूपेण तद्वानिति बुद्धीयवह्न्यधिकरणत्वाभावाभावनिष्ठप्रकारतायाः साध्याभावीयसाध्यनिष्ठप्रतियोगितासामानाधिकरण्यविरहात्।

४. घटो घटानुयोगिकस्वरूपेण प्रमेयत्ववान् घटत्वादित्यादावव्याप्तिः स्यात्।

स्वावच्छेदकधर्मावच्छिन्नत्व = प्रतियोगितावच्छेदकधर्मावच्छिन्नत्व, - प्रवेशेन = प्रतिबध्यतावच्छेदकप्रकारतायां विशेषणेन, तस्य = प्रमेयस्य, घटाद्यनुयोगिकस्वरूपेण साध्यतायां सद्धेतावव्याप्तेर्वारणे = प्रमेयाभावस्य कालिकेन योऽभावः स्वरूपेण तद्वत्ताज्ञानीयप्रकारतायां प्रतियोगितावच्छेदकप्रमेयत्वधर्मावच्छिन्नत्वविरहेण वारणे, अभावस्य घटाद्यनुयोगिकस्वरूपेण साध्यतायां घटत्वादिसद्धेतावव्याप्तिः स्यात्, अभावस्य कालिकेन योऽभावः स्वरूपेण तद्वत्ताबुद्धीयप्रकारतायां प्रतियोगितावच्छेदकाभावत्वधर्मावच्छिन्नत्वसत्त्वात्, अतः प्रथमप्रकारतायां = प्रतिबध्यतावच्छेदकप्रकारतायां, स्वावच्छेदक = प्रतियोगितावच्छेदक, - धर्मातिरिक्तधर्मानवच्छिन्नत्वमपि निवेश्यम्। 'अपि' पदं प्रतियोगितावच्छेदकधर्मावच्छिन्नत्वप्रतियोगितावच्छेदकधर्मातिरिक्तधर्मानवच्छिन्नत्वोभयनिवेशबोधकम्। उक्तायामापादकप्रकारतायां प्रतियोगितावच्छेदकधर्मातिरिक्तधर्मावच्छिन्नत्वस्यैव सत्त्वेन प्रतियोगितावच्छेदकधर्मातिरिक्तधर्मानवच्छिन्नत्वविरहात्तदादाय दोषासम्भवात्।

द्वितीयसम्बन्धघटकप्रतिबध्यताविशेषकप्रकारतायां प्रतियोगितावैशिष्ट्यनियामकद्वितीयसम्बन्धात्मकस्वावच्छेदकसम्बन्धावच्छिन्नत्वं पर्याप्त्यघटितमेव, न तु पर्याप्तिघटितं, प्रयोजनविरहात्।

किन्तु द्वितीयप्रतियोगितायां प्रथमप्रतियोगितावैशिष्ट्यनियामकद्वितीयसम्बन्धघटकहेत्वधिकरणनिरूपितवृत्तितायां प्रतिबन्धकतावच्छेदकप्रकारतावैशिष्ट्यनियामकस्वावच्छेदकसम्बन्धावच्छिन्नत्वात्मको द्वितीयः सम्बन्धः पर्याप्तिघटित एव, स्वनिरूपितसंसर्गतावच्छेदकतापर्याप्त्यधिकरणधर्मनिष्ठावच्छेदकताकसंसर्गताकत्वरूपो विवक्षितः। अन्यथा वह्निमान् धूमादित्यत्राव्याप्तिः स्यात्। संयोगेन वह्निमत्ताबुद्धिम्प्रति स्वरूपकालिकोभयसम्बन्धेन वह्न्यभाववत्ताबुद्धेः प्रतिबन्धकत्वेन हेत्वधिकरणनिरूपितकालिकसम्बन्धावच्छिन्नायां वह्न्यभावनिष्ठवृत्तितायां प्रतिबन्धकतावच्छेदकवह्न्यभावनिष्ठप्रकारताविशिष्टत्वसत्त्वात्, तत्र स्वावच्छेदकधर्मावच्छिन्नत्व, - स्वावच्छेदकसम्बन्धावच्छिन्नत्वयोः सम्बन्धयोः सत्त्वात्।

प्रतिबन्धकतावच्छेदकप्रकारताविशिष्टाधेयत्वरूपवृत्तिता[निरूपित]संसर्गतावच्छेदकतापर्याप्तिनिवेशो नावश्यकः प्रयोजनाभा[वा]दिति।

अस्य प्रकरणस्य प्रतियोगिवैयधिकरण्याघटितव्याप्यवृत्तिसाध्यकस्थलीयदोषरहितव्याप्तिविचारपरकतया संयोगेन वह्निसाध्यकधूमहेतुकस्थलस्य अव्याप्यवृत्तिसाध्यकस्थलत्वेन तत्राव्याप्त्यापादनस्य तद्वारकनिवेशविशेषस्य च कथं युक्तत्वमिति

विचारणीयम्, एतत्खण्डाव्यवहितपूर्वखण्डादिभागे घटत्वाभावश्च स्वरूपादिसम्बन्धावच्छिन्नप्रतियोगिताकः समवायादिसम्बन्धावच्छिन्नप्रतियोगिताकस्य कालिकादिनाऽव्याप्यवृत्तिकतया तदभावसाध्यकस्थलस्याप्यवृत्तिकतया तदभावसाध्यकस्थलस्याप्यव्याप्यवृत्तिसाध्यकस्थलत्वादित्युक्तत्वादिति।[२२३]

तत्त्वालोकः – 'वस्तुतो व्याप्यवृत्तित्वमत्रे'त्यादि[1]। अत्र 'स्व'पदं साध्यतावच्छेदकावच्छिन्नपरम्। तेनात्मवृत्तित्वविशिष्टसत्तासाध्यकस्य न व्याप्यवृत्तित्वहानिः।

साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वञ्च साध्यतानिरूपितसंसर्गतावच्छेदकतात्वावच्छिन्नपर्य्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगिताकपर्य्याप्तिकावच्छेदकताकसंसर्गताकत्वम्। तेनात्मत्वस्य समवायस्वकालीनद्रव्यत्वोभयसम्बन्धेन साध्यतायामात्मानुयोगिकसमवायेन द्रव्यत्वस्य साध्यतायाञ्च न व्याप्यवृत्तित्वहानिः।

अथात्र हेत्वधिकरणवृत्तित्वं सम्बन्धसामान्येनैवाभिमतम्, कथमन्यथा सत्तावान् जातेरित्यत्र प्रतियोगिवैयधिकरण्योपादानमुक्तम्? एवञ्च हेत्वधिकरणसम्बन्धित्वप्रवेशे व्याप्यवृत्तिसाध्यकेऽसम्भवापत्त्या वृत्तित्वस्यैव प्रवेशनीयतया विषयितया गगनवद्भेदसाध्यकव्यभिचारिणि गगनस्वरूपसाध्याभावस्य हेत्वधिकरणवृत्तित्वविरहेणाभावान्तरमादायातिव्याप्तिः। न च साध्यतावच्छेदककतदन्यकिञ्चिदन्यतरविशिष्टाभावमादाय दोषवारणसम्भव इति वाच्यम्, उक्तभेदस्य स्वरूपताहृशभेदत्वावच्छिन्नाप्रतियोगिकस्ववृत्तिवाच्यत्वान्यतरसम्बन्धेन साध्यतायां व्यभिचारिणि तत्सम्भवादिति चेद्।

न। हेत्वधिकरणनिरूपितसम्बन्धित्वे साध्याधिकरणनिरूपितत्ववृत्त्यनियामकसम्बन्धावच्छिन्नत्वोभयाभाववत्त्वस्य विशेषणीयत्वादुक्तव्यभिचारिणि हेत्वधिकरणनिरूपितसाध्याभावनिष्ठसम्बन्धितायां साध्यवन्निरूपितत्वविरहेणोभयाभावसत्त्वान्नातिव्याप्तिः। सद्धेतौ च हेत्वधिकरणनिरूपितवृत्त्यनियामकसम्बन्धावच्छिन्नसम्बन्धितायामुभयस्यैव सत्त्वेन नाव्याप्तिरिति।[२२४]

प्रकाशः – 'वस्तुतो व्याप्यवृत्तित्वमत्र साध्यतावच्छेदकसम्बन्धेन [यत्] स्वाधिकरणं, तद्वृत्त्यभावस्य तादृशसम्बन्धावच्छिन्नप्रतियोगित्वाभावरूपं ग्रन्थकृतोऽ-

---

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. १४

भिप्रेतम्, तादृशसाध्यकञ्च समवायादिना आत्मत्वसाध्यकज्ञानवत्त्वादिकम्, समवाये-नात्मत्ववति समवायेना [समवायावच्छिन्ना]त्मत्वाभावस्य केनापि सम्बन्धेनावृत्तेरि'ति[१] जागदीशीं विवेचयितुमुपर्युक्तस्तत्त्वालोकखण्डः।

अत्र = उक्तजागदीश्यां, 'साध्यतावच्छेदकसम्बन्धेन यत्स्वाधिकरणमि'त्येतद्घ-टक'स्व'पदं 'साध्यतावच्छेदकावच्छिन्न'परम्, न तु केवलसाध्यपरम्। तेन आत्मवृ-त्तित्वविशिष्टसत्तासाध्यकस्य न व्याप्यवृत्तिसाध्यकत्वानुपपत्तिः।

तत्र स्वपदस्य साध्यतावच्छेदकाविशेषितकेवलसाध्यपरत्वे विशिष्टस्य शुद्धान-तिरिक्तत्वेन सत्तावान् जातेरित्यस्येव आत्मत्वविशिष्टसत्तावान् ज्ञानादित्यस्य विशिष्टा-नतिरिक्तसत्तात्मकस्वाधिकरणे घटादौ समवायसम्बन्धावच्छिन्नप्रतियोगिकस्वाभावस्य कालिकेन वृत्तित्वेन तादृशाभावप्रतियोगित्वस्यैव स्वस्मिन् सत्त्वेन व्याप्यवृत्तित्वन्न स्यात्।

उक्तजागदीश्यां 'तादृशसम्बन्धावच्छिन्नप्रतियोगित्वाभावरूपमि'त्यत्र स्वस्मिन् विवक्षितसाध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगित्वाभावप्रतियोगिनि प्रतियोगित्वे साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वं पर्याप्तिघटितं = साध्यतानिरूपितसंसर्गतावच्छेद-कतात्वावच्छिन्नपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगितावच्छेदकरूपावच्छि-न्नानुयोगिताकपर्याप्तिकावच्छेदकताकसंसर्गताकत्वमेव, विवक्षितम्। अर्थात् साध्यता-निरूपितसंसर्गतावच्छेदकताप्रतियोगिकपर्याप्त्यनुयोगितावच्छेदकं यद्रूपम्, तदेव प्रतियोगितानिरूपितसंसर्गतावच्छेदकताप्रतियोगिकपर्याप्त्यनुयोगितावच्छेदकतया विवक्षितम्। तेनात्मत्वस्य समवाय, - स्वकालीनद्रव्यत्वोभयसम्बन्धेन साध्यतायामा-त्मानुयोगिकसमवायेन द्रव्यत्वस्य साध्यतायाञ्च न व्याप्यवृत्तित्वानुपपत्तिः।

अन्यथा उक्तोभयसम्बन्धेनात्मकसाध्यकस्थले स्वकालीनद्रव्यत्वरूपं साध्यता-वच्छेदकसम्बन्धमादाय तेन सम्बन्धेन स्वाधिकरणं घटादिकमादाय तत्र तत्सम्बन्धाव-च्छिन्नप्रतियोगिताकसाध्याभावस्य कालिकेन वृत्तित्वेन साध्यतावच्छेदकसम्बन्ध[धा-वच्छिन्न] = स्वकालीनद्रव्यत्वसम्बन्धावच्छिन्न, - प्रतियोगित्वस्यैवोक्तसाध्ये सत्त्वेन विवक्षितप्रतियोगित्वाभावविरहाद् व्याप्यवृत्तित्वन्न स्यात्।

एवमेव आत्मानुयोगिकसमवायेन द्रव्यत्वसाध्यकस्थलेऽपि समवायस्य आत्मानुयोगिकसमवायानतिरिक्तत्वेन समवायेन द्रव्यत्वाधिकरणघटादिकमादाय

---

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. १४

व्याप्यवृत्तित्वानुपपत्तिः स्यात्।

पर्याप्तिघटितसाध्यतावच्छेदकसम्बन्धावच्छिन्नत्वविवक्षणे तु तत्र तत्र घटादेः पर्याप्तिघटितसाध्यतावच्छेदकसम्बन्धेन स्वाधिकरणत्वविरहात् तादृशसम्बन्धेन केवलमात्मन एव स्वाधिकरणत्वात् तत्र तादृशसम्बन्धावच्छिन्नप्रतियोगिताकस्वाभावस्य केनापि सम्बन्धेन वृत्तित्वविरहान्न व्याप्यवृत्तित्वानुपपत्तिः।

अनन्तरम् 'अथात्रे'त्यादिनाऽत्र शङ्कते यदत्र हेत्वधिकरणवृत्तित्वं सम्बन्धसामान्येनाभिमतं कथमन्यथा सत्तावान् जातेरित्यत्र प्रतियोगिवैयधिकरण्य[योपादान]मुक्तम्[१] [इति]।

यद्यपि दर्शिते वस्तुतो व्याप्यवृत्तित्वलक्षणे हेत्वधिकरणवृत्तित्वं प्रविष्टन्नास्ति, येनात्र हेत्वधिकरणवृत्तित्वस्य सम्बन्धसामान्येनैवाभिमतत्वकथनं सङ्गतं स्यात्, तथापि व्याप्तिलक्षणघटकं यद् हेत्वधिकरणवृत्तित्वमभिप्रेत्य वस्तुतो व्याप्यवृत्तित्वं लक्षितं तद् हेत्वधिकरणवृत्तित्वं सम्बन्धसामान्येनैवाभिमतमित्यत्र तत्तात्पर्यम्।

तथा च व्याप्तिलक्षणघटकहेत्वधिकरणवृत्तित्वस्य सम्बन्धसामान्येनानभिमतत्वे सत्तावान् जातेरित्यत्र प्रतियोगिवैयधिकरण्यस्योपादेयत्वकथनासङ्गतिः स्यात्, तत्र हेत्वधिकरणे स्पन्दादौ सत्तात्मकसाध्याभावस्य सम्बन्धविशेषस्वरूपेण वृत्तित्वविरहेण प्रतियोगिवैयधिकरण्यघटितलक्षणाव्याप्त्यसम्भवात्।

एवञ्च उक्तयुक्त्या तत्र हेत्वधिकरणवृत्तित्वस्य सम्बन्धसामान्येनैवाभिमतत्वे च, व्याप्यवृत्ति(आत्मत्वादि)साध्यके असम्भवापत्त्या = आत्मत्वादिव्याप्यवृत्तिसाध्याभावस्य स्ववृत्तिवाच्यत्वत्वादिसम्बन्धसम्बन्धितया तादृशाभावप्रतियोगितावच्छेदकत्वस्यैव साध्यतावच्छेदके सत्त्वेनासम्भवापत्त्या, हेत्वधिकरणवृत्तित्वस्यैव, न तु हेत्वधिकरणसम्बन्धित्वस्य, प्रवेशनीयतया व्याप्तिलक्षणेऽभावविशेषणत्वेन प्रवेशनीयतया, विषयितया गगनवद्भेदसाध्यकव्यभिचारिणि ज्ञानं विषयितया गगनवद्भिन्नं ज्ञानत्वादित्यत्र भेदाभावस्य प्रतियोगितावच्छेदकस्वरूपत्वेन गगनात्मकसाध्याभावस्य विषयितया गगनवद्भेदाभावस्य गगनस्यावृत्तित्वेन हेत्वधिकरणज्ञानवृत्तित्वासम्भवादभावान्तरमादायातिव्याप्तिः स्यादिति पूर्वपक्षः।

---

१. तथा च 'तादृशसाध्यक एव = दर्शितवास्तविकव्याप्यवृत्तिसाध्यक एव, नोपादेयम् = प्रतियोगिवैयधिकरण्यन्नोपादेयं, सत्तावान् जातेरित्यादौ तु पुनरुपादेयमेव' इत्युक्तत्वात्। —जागदीशी, पृ. १४

न चोक्ते विषयितया गगनवद्भेदसाध्यकव्यभिचारिज्ञानत्वहेतुकस्थले साध्याभावस्य गगनात्मकतया हेत्वधिकरणवृत्तित्वविरहेऽपि साध्यतावच्छेदकतादृशगगनवद्भेदत्वतदन्यकिञ्चिद(घटत्वा)न्यतरविशिष्टाभावमादायोक्तदोषवारणं स्यात्। उक्तान्यतरविशिष्टाभावस्य गगनात्मकत्वविरहेण हेत्वधिकरणवृत्तित्वात् तत्प्रतियोगिनो विशिष्टस्य = विषयितया गगनवद्भेदत्वरूपसाध्यतावच्छेदकतदन्यघटत्वान्यतरविशिष्टस्य विषयितया गगनवद्भेदस्य घटस्य च कस्यापि, साध्यतावच्छेदकस्वरूपसम्बन्धेन हेत्वधिकरणे गगनविषयकज्ञानेऽसत्त्वेन प्रतियोगिव्यधिकरणत्वात्तत्प्रतियोगितावच्छेदकत्वस्य साध्यतावच्छेदके सत्त्वादिति वाच्यम्।

उक्तविशिष्टाभावमादाय स्वरूपसम्बन्धेन उक्तभेदसाध्यकव्यभिचारिणि दोषवारणेऽपि उक्तभेदस्य = विषयितया गगनवद्भेदस्य, स्वरूपतादृशभेदत्वावच्छिन्नाप्रतियोगिकस्ववृत्तिवाच्यत्वान्यतरसम्बन्धेन साध्यतायां व्यभिचारिणि उक्तान्यतरविशिष्टाभावस्य प्रतियोगिव्यधिकरणत्वविरहेण लक्षणघटकत्वासम्भवादतिव्याप्त्यापत्तेः, तत्र साध्यतावच्छेदकोक्तान्यतरसम्बन्धान्तर्गततादृशभेदत्वावच्छिन्नाप्रतियोगिकस्ववृत्तिवाच्यत्वरूपसाध्यतावच्छेदकसम्बन्धेन साध्यतावच्छेदकविशिष्टस्यासत्त्वेऽपि तदन्यघटत्वविशिष्टस्य घटात्मकप्रतियोगिनः सत्त्वात्।

अत्र समाधीयते। हेत्वधिकरणनिरूपितायामभावनिष्ठसम्बन्धितायां साध्याधिकरणनिरूपितत्ववृत्त्यनियामकसम्बन्धावच्छिन्नत्वोभयाभाववत्त्वस्य विशेषणीयत्वादिति। उक्तव्यभिचारिणि = विषयितया गगनवद्भेदसाध्यकज्ञानत्वहेतुकस्थले, हेत्वधिकरण = गगनविषयकज्ञान, - निरूपितसाध्याभाव = गगनात्मकगगनवद्भेदाभाव, - निष्ठसम्बन्धितायां साध्यवद् = गगनाविषयकज्ञान, - निरूपितत्वविरहेण साध्यवन्निरूपितत्ववृत्त्यनियामकसम्बन्धावच्छिन्नत्वोभयाभावसत्त्वादतिव्याप्त्यसम्भवात्, सद्धेतौ आत्मत्वसाध्यकज्ञानात्मकहेतुकस्थले साध्याभावनिष्ठहेत्वधिकरणनिरूपितसम्बन्धितायां साध्याधिकरणनिरूपितत्ववृत्त्यनियामकसम्बन्धावच्छिन्नत्वोभयस्यैव सत्त्वेन साध्याभावस्य परिग्रहासम्भवादभावान्तरमादायाव्याप्त्यसम्भवात्।

तथा च साध्याधिकरणनिरूपितत्ववृत्त्यनियामकसम्बन्धावच्छिन्नत्वोभयाभाववत्त्वविशेषितं हेत्वधिकरणनिरूपितसम्बन्धित्वमेव व्याप्तिलक्षणघटकाभावविशेषणतया विवक्षितमिति सारांशः।[२२४]

तत्त्वालोकः – 'तस्य सम्बन्धविशेषानियन्त्रितत्वादि'ति[1]। तस्य = सर्व-

---

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. १४

थाव्याप्यवृत्तित्वस्येत्यर्थः। इदञ्च तल्लाभार्थतायां हेतुः। तथा च स्वाधिकरणे यस्याभावः कथञ्चिदपि न वर्त्तते स एव यतः सर्वथा व्याप्यवृत्तित्वेन व्यवह्रियतेऽतस्सर्वथेति पदसमभिव्याहृतव्याप्यवृत्तिपदानुपदोक्तताद्दशाप्रतियोगित्वमेव व्याप्यवृत्तित्वम्बोध्यत इति भावः।

यद्वोक्तपञ्चम्यन्तस्य 'तेने'[२]त्यत्रान्वयः। तथा च यत उक्तव्याप्यवृत्तित्वस्य वृत्तित्वांशेन सम्बन्धविशेषावच्छिन्नत्वम्, अतो व्यभिचारित्वादीनां वृत्त्यनियामकत्वेनैव नात्मत्वादेर्व्याप्यवृत्तित्वहानिः, अन्यथा तत्सम्बन्धानां वृत्तिनियामकत्वेऽप्यात्मत्वादीनां व्याप्यवृत्तित्वं स्यादेवेति भावः।

अथवा न वृत्तिनियामकः = न वृत्तिनियामकोऽभ्युपेयः। अत्रैवोक्तपञ्चम्यन्तस्यान्वयः। न चोक्तसम्बन्धस्य वृत्तिनियामकत्व एव तत्प्रतिषेधो युज्यत इति वाच्यम्, इह हेतावुपाधिरित्यादिना व्यवहारेण व्यभिचारित्वस्य वृत्तिनियामकत्वस्याभ्युपेतत्वात्। न चोक्तव्यवहारस्य का गतिरिति वाच्यम्, षष्ठ्यर्थेऽपि सप्तमीप्रयोगस्य शास्त्रे स्वीकरणीयत्वाद्। दृश्यते चैवमन्यत्रापि 'भ्रमति गगने रात्रौ रात्रावखण्डकलश्शशी'त्यादौ। अत एव 'न वृत्तिनियामक'इत्यस्यानुवादत्वे वृत्त्यनियामकघटितस्यैव व्यभिचारित्वस्य वृत्तिनियामकत्वप्राप्त्या जन्यत्वाभावादीनां व्याप्यवृत्तित्वमनुभवसिद्धमवलुप्यते[लुप्येते]त्यपि निरस्तमिति।

क्वचिच्च 'तस्य सम्बन्धविशेषनियन्त्रितत्वादि'ति पाठः। तत्र स्वाधिकरणत्वांश इति शेषः। पञ्चम्यन्तस्य न व्याप्यवृत्तित्वहानिरित्यत्रान्वयः। तेनादिपदग्राह्यनित्यज्ञानादीनां विषयितयाधिकरणे कालिकेनात्मत्वाधिकरणे स्वाभावस्य सत्त्वेऽपि न व्याप्यवृत्तित्वहानिरित्यर्थ इति।[२२५]

प्रकाशः– 'तथा च तादृशसाध्यक एव नोपादेयम्, सत्तावान् जातेरित्यादौ तु पुनरुपादेयमेव' इति पूर्वदर्शितजागदीश्यनन्तरं 'सत्त्ववति स्पन्दादौ समवायावच्छिन्नसत्ताभावस्य कालिकसम्बन्धेन वर्तमानतया सत्तादेर्निरुक्तव्याप्यवृत्तित्वाभावाद् व्याप्यवृत्तित्वघटक[स्य] स्वाधिकरणवृत्तित्वस्य सम्बन्धसामान्येन प्रविष्टत्वात्। एतल्लाभार्थमेव 'सर्वथैव व्याप्यवृत्तिसाध्यक'इत्युक्तं, तस्य सम्बन्धविशेषानियन्त्रितत्वात्, व्यभिचारादिस्तु सम्बन्धो न वृत्तिनियामकः, तेनात्मत्वादेरपि न व्याप्यवृत्तित्वहानिरिति ध्येयमि'ति[२] जागदीशी।

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. १४
२. तदेव, जागदीशीमूलम्, पृ. १४

तद्घटक'तस्ये'त्यादिपरिगृह्य विवेचयितुमुपर्युक्तस्तत्त्वालोकखण्डः। तत्र 'तस्ये'ति 'सर्वथा व्याप्यवृत्तित्वस्ये'त्यर्थकम्। इदञ्च = सम्बन्धविशेषानियन्त्रितत्वादिति च, तल्लाभार्थतायां = सर्वथा व्याप्यवृत्तित्वलाभार्थतायां हेतुः। तथा च साध्यतावच्छेदकसम्बन्धेन स्वाधिकरणे यस्याभावः कथञ्चिदपि न वर्तते स एव यतः सर्वथा व्याप्यवृत्तित्वेन व्यवह्रियते, अतः 'सर्वथे'ति पदसमभिव्याहृतव्याप्यवृत्तिपदादनुपदोक्त – तादृशाप्रतियोगित्वमेव = साध्यतावच्छेदकसम्बन्धेन यत्स्वाधिकरणं तद्वृत्त्यभावस्य तादृशसम्बन्धावच्छिन्नाप्रतियोगित्वमेव, व्याप्यवृत्तित्वं बोध्यत इत्यर्थः।

यद्वा 'तस्य सम्बन्धविशेषानियन्त्रितत्वादि'ति पञ्चम्यन्तस्य, तेन = तेनात्मत्वादेरपि न व्याप्यवृत्तित्वहानिरित्येतद्घटकेन 'तेन' इत्यत्रान्वयः। ततश्च यत उक्तव्याप्यवृत्तित्वस्य वृत्तित्वांशे न सम्बन्धविशेषावच्छिन्नत्वं = न सम्बन्धविशेषनियन्त्रितत्वम्, अतो व्यभिचारित्वादिसम्बन्धानां वृत्त्यनियामकत्वेनैव न आत्मत्वादेर्व्याप्यवृत्तित्वहानिः।

अन्यथा = उक्तव्याप्यवृत्तित्वघटकवृत्तित्वांशे सम्बन्धविशेषावच्छिन्नत्वे, उक्तव्याप्यवृत्तित्वघटकवृत्तित्वस्य सम्बन्धनियन्त्रितत्वे, व्यभिचारित्वादिसम्बन्धानां वृत्तिनियामकत्वेऽपि आत्मत्वादीनां व्याप्यवृत्तित्वं स्यादेव, वृत्तिनियामकव्यभिचारादिसम्बन्धेन आत्मत्वाभावस्य साध्यतावच्छेदकसमवायेनात्मत्वाधिकरणे वृत्तित्वेऽपि उक्तव्याप्यवृत्तित्वघटकवृत्तित्वनियन्त्रकसम्बन्धविशेषेणात्मत्वाभावस्य तत्रावृत्तेरिति भावः।

अथवा 'व्यभिचारादिस्तु सम्बन्धो न वृत्तिनियामकः'[१] एतज्जागदीशीघटकः 'न वृत्तिनियामक'इति 'न वृत्तिनियामकोऽभ्युपेय'इत्यर्थकः। अत्रैव 'तस्य सम्बन्धविशेषानियन्त्रितत्वादि'ति पञ्चम्यन्तस्यान्वयः, यतो व्याप्यवृत्तित्वघटकवृत्तित्वं सम्बन्धविशेषनियन्त्रितं न, अतो व्यभिचारादिः सम्बन्धो वृत्तिनियामको नाभ्युपेयः, व्याप्यवृत्तित्वघटकवृत्तित्वस्य सम्बन्धनियन्त्रितत्वे व्यभिचारादेः सम्बन्धस्य वृत्तिनियामकत्वेनाभ्युपेतत्वेऽपि आत्मत्वादेर्व्याप्यवृत्तित्वानुपपत्तिर्न स्यात्, आत्मत्वाभावस्य समवायेन आत्मत्वाधिकरणे वृत्तिनियामकत्वेनाभ्युपेतव्यभिचारादिसम्बन्धेन वृत्तित्वेऽपि व्याप्यवृत्तित्वघटकवृत्तित्वनियन्त्रकसम्बन्धविशेषणा(स्वरूपेणा)वृत्तेः। तत्र वृत्तित्वस्य सम्बन्धविशेषानियन्त्रित्वे व्यभिचारादेः सम्बन्धस्य वृत्तिनियामकतयाभ्युपेतत्वे तु आत्मत्वादेर्व्याप्यवृत्तित्वन्न स्यात्।

---

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. १४

न चोक्तसम्बन्धस्य = व्यभिचारादिसम्बन्धस्य, वृत्तिनियामकत्व एव 'प्राप्तस्य प्रतिषेध' इति न्यायात् तत्प्रतिषेधः = वृत्तिनियामकत्वप्रतिषेधः[१] युज्यत इति वाच्यम्, 'इह हेतावुपाधिरि'ति व्यवहारान्यथानुपपत्त्या व्यभिचारित्वसम्बन्धस्य वृत्तिनियामकत्वाभ्युपेतत्वात्, उपाधौ एतद्धेतुवृत्तित्ववृत्तिनियामकतयाभ्युपेतव्यभिचारित्वसम्बन्धेनैव सम्भवात्।

न च व्यभिचारादिसम्बन्धस्य वृत्तिनियामकत्वेनाभ्युपेतत्वप्रतिषेधे = 'अथवा न वृत्तिनियामकः = न वृत्तिनियामकोऽभ्युपेयः' इत्युक्त्या प्रतिषेधे, इह हेतावुपाधिरितिव्यवहारस्य का गतिः = कथमुपपत्तिरिति वाच्यम्, षष्ठ्यर्थेऽपि सप्तमीप्रयोगस्य शास्त्रे स्वीकरणीयत्वात्, 'इह हेतावुपाधिरि'त्यस्य 'अस्य हेतोरुपाधिरि'त्यर्थकतया व्यभिचारित्वस्य वृत्तिनियामकतयाभ्युपेतत्वविरहेऽप्युपपत्तिसम्भवात्। अन्यत्रापि 'भ्रमति गगने रात्रौ रात्राववखण्डकलः शशी'त्यादौ अन्यत्रापि षष्ठ्यर्थे सप्तमीप्रयोगदर्शनात् गगनसम्बन्धी अखण्डकलः शशी रात्रौ रात्रौ प्रतिरात्रं भ्रमतीति तदर्थात्। अत एव = षष्ठ्यर्थे सप्तमीं स्वीकृत्य इह हेतावुपाधिरिति व्यवहारस्योपपत्त्या तद्व्यवहारार्थं व्यभिचारित्वस्य वृत्तिनियामकतयाभ्युपेतत्वविरहादेव, न वृत्तिनियामक इत्यस्यानुवादत्वे = पूर्वतः सिद्धस्यार्थस्य बोधकत्वे, वृत्त्यनियामकव्यभिचारात्मकसम्बन्धघटितस्यैव व्यभिचारित्वसम्बन्धस्य षष्ठ्यर्थे सप्तम्यस्वीकारे 'इह हेतावुपाधिरि'ति व्यवहारेण प्राप्त्या जन्यत्वाभावादीनाम् = आत्मादि(निष्ठ ?)निष्ठानां, व्याप्यवृत्तित्वमनुभवसिद्धमवलुप्येत इत्यपि निरस्तम्।

षष्ठ्यर्थे सप्तमीस्वीकारेणोक्तव्यवहारस्योपपत्त्या तदर्थं व्यभिचारित्वे वृत्तिनियामकतायाः सिद्धत्वविरहात्, व्यभिचारित्वसम्बन्धे वृत्तिनियामकत्वस्य सिद्धत्वे जन्यत्वाभावादेः स्वाधिकरणात्मादिनिष्ठस्य स्वाधिकरणवृत्त्यभाव = व्यभिचारित्वात्मकवृत्तिनियामकसम्बन्धेन स्वाधिकरणवृत्तिस्वाभाव, - प्रतियोगित्वेनानुभवं व्याप्यवृत्तित्वन्न स्यात्, व्याप्यवृत्तित्वघटकवृत्तित्वस्य सम्बन्धविशेषानियन्त्रित्वात्।

क्वचित्पुस्तके 'तस्य सम्बन्धविशेषनियन्त्रितत्वादि'त्येवं पाठोऽस्ति। तथापाठे तदुत्तरं 'स्वाधिकरणत्वांशे' इति शेषः पूरयितव्यः। पञ्चम्यन्तस्य सम्बन्धविशेषनियन्त्रितत्वादित्यस्य 'तेनात्मत्वादेर्न व्याप्यवृत्तिहानिरि'त्यत्रान्वयः। तेन = स्वाधिकरणत्वस्य सम्बन्धविशेषनियन्त्रितत्वेन, आत्मत्वादेरित्यत्रादिपदग्राह्यनित्यज्ञानादीनां[२] विषयित-

---

१. 'अथवा न वृत्तिनियामकः = न वृत्तिनियामकोऽभ्युपेयः' इत्यनेन बोधितः।

२. समवायेन साध्यतास्थले

याधिकरणे[1] कालिकेनात्मत्वाधिकरणे स्वाभावस्य = क्रमशः नित्यज्ञानाद्यभावस्य आत्मत्वाभावस्य च, सत्त्वेऽपि न व्याप्यवृत्तित्वहानिरित्यर्थ इति प्रकाशः।[२२५]

तत्त्वालोकः – 'न च विशिष्टसत्त्वस्ये'त्यादि[2]। ननु व्यभिचारिणस्सर्वलक्षणालक्ष्यतया कथन्नातिव्याप्तिरिति चेदत्र केचिदव्याप्यवृत्तिसाध्यकस्थलीयलक्षणे साध्यतावच्छेदकेऽव्याप्यवृत्तितावच्छेदकत्वस्य विशेषणतया विशिष्टसत्तात्वे तद्विरहेण नातिव्याप्तिरित्याशय इति वदन्ति।

तन्नाति चारु। अभ्रान्तस्य व्यभिचारिलिङ्गकानुमितिप्रसङ्गरूपवक्ष्यमाणदोषस्यासङ्गतेस्साध्यतावच्छेदकस्याव्याप्यवृत्तितानवच्छेदकत्वाद् व्यभिचारग्रहकालेऽनुमितिप्रसङ्गमात्रस्य वक्ष्यमाणतात्पर्य्यविषयत्वे तूक्तोत्तरस्यापि सम्भव एवेति।

वस्तुतस्तु प्रकृतसाध्यहेत्वादेरननुगत[3]त्वेनाननुगत एव व्याप्यत्वव्यवहारप्रयोजकः। तत्र व्याप्यवृत्तितत्तत्साध्यनिरूपितव्याप्यत्वव्यवहारे लाघवेन प्रतियोगिवैयधिकरण्याविशेषितस्वोद्देश्यतावच्छेदकावच्छिन्नसमानाधिकरणाभावप्रतियोगितानवच्छेदकतत्तद्धर्म्मावच्छिन्नसामानाधिकरण्यमेव प्रयोजकमिति न जातित्वावच्छिन्ने द्रव्यत्वत्वावच्छिन्न इव विशिष्टसत्त्वनिरूपितो व्याप्यत्वव्यवहारः, प्रयोजकस्योक्तसामानाधिकरण्यस्य तत्रा[4]सत्त्वात्, सतश्च प्रतियोगिवैयधिकरण्यघटितसामानाधिकरण्यस्य तदप्रयोजकत्वादित्यत्र तात्पर्यम्।[२२६]

प्रकाशः – प्रतियोग्यसामानाधिकरण्यघटितव्याप्तिलक्षणघटकप्रतियोग्यसामानाधिकरण्यपदस्य प्रतियोगित्वाश्रयाधिकरणावृत्तित्वरूपोऽर्थो न विवक्षितः किन्तु प्रतियोगितावच्छेदकावच्छिन्नासामानाधिकरण्यरूप एवार्थो विवक्षितः, यतो हि प्रतियोगित्वाश्रयाधिकरणावृत्तित्वस्य तदर्थतया विवक्षासत्त्वे गुणकर्मान्यत्वविशिष्टसत्तासाध्यकव्यभिचारिणि जातिहेतौ तथा भूतत्वमूर्तव्यो[त्वो]भयसाध्यकव्यभिचारिणि मूर्तव्य[त्व]हेतौ चातिव्याप्तिः स्यात्, पूर्वत्र गुणकर्मान्यत्वविशिष्टसत्ताभावरूपसाध्याभावस्य उत्तरत्र भूतत्वमूर्तत्वोभयाभावरूपसाध्याभावस्य लक्षणघटकत्वासम्भवात्, पूर्वत्र जात्यात्मकहेत्वधिकरणे गुणकर्मादौ गुणकर्मान्यत्वविशिष्टसत्ताभावप्रतियोगित्वा-

---

१. नित्यज्ञानविषयकज्ञाने नित्यज्ञानस्य विषयितया सत्त्वात्।
२. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. १५
३. 'हेत्वादेरनुगते'ति पाठः प्राचीनमुद्रितपुस्तके।
४. 'तत्र सत्त्वादि'ति मुद्रितप्राचीनपुस्तके पाठः।

श्रयीभूतायाः सत्तायाः सत्त्वात्, उत्तरत्र मूर्तव्य[त्व]रूपहेत्वधिकरणे मनसि भूतत्व-मूर्तत्वोभयाभावप्रतियोगित्वाश्रयीभूतस्य मूर्तत्वस्य सत्त्वात्। प्रतियोगितावच्छेदकावच्छिन्नासामानाधिकरण्यस्य प्रतियोगितावच्छेदकावच्छिन्नाधिकरणावृत्तित्वरूपार्थस्य विवक्षासत्त्वे तु नोक्तातिव्याप्तिद्वयी, पूर्वत्र विशिष्टसत्ताभावप्रतियोगितावच्छेदकीभूतवैशिष्ट्य(गुणकर्मान्यत्ववैशिष्ट्य)सत्तात्वावच्छिन्नाधिकरणे द्रव्ये विशिष्टसत्ताभावस्य वृत्तित्वविरहात्, उत्तरत्र भूतत्वमूर्तत्वोभयाभावप्रतियोगितावच्छेदकभूतत्वमूर्तत्वोभयत्वावच्छिन्नाधिकरणपृथिव्यादिचतुष्टये भूतत्वमूर्तत्वोभयाभावस्य वृत्तित्वविरहादिति 'प्रतियोग्यसामानाधिकरण्यञ्चे'त्यादि 'नातिव्याप्तिरि'त्यन्तदीधितिग्रन्थेन[1] पूर्वमुक्तम्।

उक्तदीधित्योक्तकथनोपरि जगदीशेनासङ्गतिः पूर्वमाक्षिप्ता 'न च विशिष्टसत्त्वस्य व्याप्यवृत्तितया तत्साध्यके प्रतियोग्यसामानाधिकरण्यस्याप्रवेशादि'ति जागदीशी ग्रन्थेन।[2] व्याप्यवृत्तिविशिष्टसत्तासाध्यकस्थले प्रतियोगित्वाश्रयाधिकरणावृत्तित्वार्थकस्य प्रतियोगितावच्छेदकावच्छिन्नाधिकरणावृत्तित्वार्थकस्य वा प्रतियोग्यसामानाधिकरण्यस्य प्रवेशाभावाज्जातिरूपहेत्वधिकरणे गुणे विशिष्टसत्ताभावस्य सत्त्वेन लक्षणघटकत्वसम्भवाद् विशिष्टसत्तावान् जातेरित्यत्र नातिव्याप्तिसम्भव इति तदाशयाद्दीधित्युक्तासङ्गतिः।

उक्तदीधित्यसङ्गतिं पूर्वमुपपाद्य पश्चात् प्रकारद्वयेन स्वेनैव निरस्ता 'जातौ विशिष्टसत्त्वव्यभिचारज्ञानदशायामपि विशिष्टसत्त्वधर्मिकजातिमन्निष्ठप्रतियोग्यसमानाधिकरणाभावाप्रतियोगित्वज्ञानाद् विशिष्टसत्त्वसाध्यकानुमितिप्रसङ्गस्यैव प्रकृतेऽतिप्रसङ्गपदार्थत्वात्, प्रागुक्तरीत्या विशिष्टसत्त्वस्य व्याप्यवृत्तित्वविरहाच्चे'ति[3] जागदीशीग्रन्थेन।

जातौ विशिष्टसत्त्वव्यभिचारज्ञानस्य प्रतियोगित्वाश्रयाधिकरणावृत्तित्वार्थकप्रतियोग्यसमानाधिकरणाभावाप्रतियोगित्वज्ञानविरोधित्वविरहेणोक्तव्यभिचारज्ञानदशायामपि उक्तज्ञानसम्भवेन तादृशज्ञानाद् विशिष्टसत्त्वसाध्यकानुमितिप्रसक्तिः स्यादिति प्रथमप्रकाराशयः। विशिष्टसत्ताधिकरणे घटे कालिकसम्बन्धेन विशिष्टसत्ताभावस्य सत्त्वेन विशिष्टसत्तायां पूर्वदर्शित 'वस्तुतो व्याप्यवृत्तित्वविरहाच्चे'ति द्वितीयप्रकारस्याशयः।

---

१. प्रकृतग्रन्थः (प्रथमो भागः), दीधितिमूलम्, पृ. १४
२. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. १५
३. तदेव, जागदीशीमूलम्, पृ. १५

अत्र तत्त्वालोककारः 'न च विशिष्टसत्त्वस्य व्याप्यवृत्तितये'ति जागदीशीं परिगृह्य 'न च व्यभिचारिणस्सर्वलक्षणालक्ष्यतये'त्यादिना शङ्कते यद् व्यभिचारिणः विशिष्टसत्त्वसाध्यकजात्यात्मकहेतोः प्रतियोग्यसामानाधिकरण्यघटिताव्याप्यवृत्तिसाध्यकस्थलीयव्याप्तिलक्षणस्याप्यलक्ष्यतया विशिष्टसत्ताभावरूपसाध्याभावस्य प्रतियोगित्वाश्रयाधिकरणावृत्तित्वविरहेण लक्षणघटकत्वासम्भवात्कथन्नातिव्याप्तिरिति।

अत्र 'केचिदि'त्यादिना केषाञ्चिन्मतेन स्वोपपादितातिव्याप्तिशङ्कान्निरस्यति। केचित् कथयन्ति यद् व्याप्यवृत्तिसाध्यकलक्षणे साध्यतावच्छेदकेऽव्याप्यवृत्तितावच्छेदकत्वरूपविशेषणस्य सत्त्वाद् विशिष्टसत्तात्वरूपसाध्यतावच्छेदके तद्विरहेण विशिष्टसत्ताभावसाध्याभावस्य लक्षणघटकत्वासम्भवेऽपि नोऽव्याप्यवृत्तिसाध्यकप्रतियोग्यसामानाधिकरण्यघटितव्याप्तिलक्षणस्यातिप्रसङ्गसम्भव इति।

'तन्नाति चारु' इत्यादिना 'केचित्तु' इत्यादिनोपपादितं मतं खण्डयति यद् व्याप्यवृत्तिसाध्यकस्थलीयव्याप्तिलक्षणे साध्यतावच्छेदकत्वेऽव्याप्यवृत्तितावच्छेदकत्वविशेषणस्य सत्त्वेऽभ्रान्तस्य व्यभिचारिलिङ्गकानुमितिप्रसङ्गरूपस्य जागदीश्यां वक्ष्यमाणदोषस्यासङ्गतिः स्यात्, साध्यतावच्छेदकस्य विशिष्टसत्तात्वस्याव्याप्यवृत्तितावच्छेदकत्वविरहादित्युपपादनेन।

व्यभिचारग्रहकाले जातौ विशिष्टसत्ताव्यभिचारज्ञानदशायां विशिष्टसत्ताधर्मिकजातिमन्निष्ठप्रतियोग्यसमानाधिकरणाभावाप्रतियोगित्वज्ञानात् साध्यतावच्छेदकेऽव्याप्यवृत्तितावच्छेदकत्वज्ञानरहिताद् विशिष्टसाध्यकानुमितिप्रसङ्गस्यैव जाति[जाग]दीश्यां वक्ष्यमाणातिप्रसङ्गपदार्थतया विवक्षिततत्वे तु 'केचित्तु' इत्यादिनोक्तप्रकारस्यापि अर्थाद् व्याप्यवृत्तिसाध्यकस्थलीयव्याप्तिलक्षणे साध्यतावच्छेदकेऽव्याप्यवृत्तितावच्छेदकत्वविशेषणस्य सम्भवदुक्तिकतैवेति।

तत्त्वालोककृता 'वस्तुतस्तु' इत्यादिनोच्यते यत् प्रकृतसाध्यहेत्वादेरनुगतत्वेन व्याप्यत्वव्यवहारप्रयोजकोऽपि अननुगत एव तत्र व्याप्यवृत्तितत्तत्साध्यनिरूपितव्यवहारे लाघवेन प्रतियोग्यसमानाधिकरणाविशेषितस्वोद्देश्यतावच्छेदका = व्याप्यवृत्ति तत्तत्साध्यनिरूपितव्याप्यत्वव्यवहारोद्देश्यतावच्छेदका,- वच्छिन्नसमानाधिकरणाभावप्रतियोगितानवच्छेदकतत्तद्धर्मावच्छिन्नसामानाधिकरण्यमेव प्रयोजकम्। अतो द्रव्यत्वत्वावच्छिन्ने यथा विशिष्टसत्तानिरूपितव्याप्यत्वव्यवहारो भवति, तथा न जातित्वावच्छिन्ने विशिष्टसत्तानिरूपितव्याप्यत्वव्यवहारः। प्रयोजकस्य = जातित्वावच्छिन्ने विशिष्टसत्तानिरूपितव्याप्यत्वव्यवहारप्रयोजकस्य, उक्तसामानाधिकरण्यस्य = प्रतियोग्यसामाना-

धिकरण्याविशेषितस्वोद्देश्यतावच्छेदकावच्छिन्नसमानाधिकरणाभावप्रतियोगितानवच्छेदकतत्तद्धर्मावच्छिन्नसामानाधिकरण्यस्य, तत्र = जातित्वावच्छिन्ने, असत्त्वात् जातित्वावच्छिन्नसमानाधिकरणप्रतियोग्यसमानाधिकरणाविशेषिताभाव (विशिष्टसत्ताभाव) प्रतियोगितावच्छेदकत्वस्य विशिष्टसत्तात्वे साध्यतावच्छेदके सत्त्वेन तादृशाभावप्रतियोगितानवच्छेदकसाध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यस्यासत्त्वात्।

सतश्च = जातित्वावच्छिन्ने सतश्च, जातित्वावच्छिन्नसमानाधिकरणप्रतियोग्यसमानाधिकरणाभावप्रतियोगितानवच्छेदकविशिष्टसत्तात्वावच्छिन्नसामानाधिकरण्यस्य तदप्रयोजकत्वात् = जातौ विशिष्टसत्ताव्याप्यत्वव्यवहारप्रयोजकत्वविरहादित्यत्र तात्पर्यात्।[२२६]

तत्त्वालोकः – 'जातौ विशिष्टसत्त्वव्यभिचारग्रहे'ति।[1] विशिष्टसत्तात्ववृत्तिस्वप्रतियोगितावच्छेदकावच्छिन्नानधिकरणजातिमद्वृत्त्यभावप्रतियोगितावच्छेदकत्वघटकत्वग्रह इत्यर्थः। इदञ्चेष्टापत्तिवारणायोक्तम्। दोषता चास्य [चाभ्रान्तस्य][2] व्यभिचारिलिङ्गकानुमितित्वेनैवेति बोध्यम्।

न च [अथ][3] व्याप्यत्वव्यवहार इव व्याप्यवृत्तिसाध्यकानुमितावपि प्रतियोगिवैयधिकरण्याघटितव्याप्तिज्ञानस्यैव लाघवेन कारणत्वकल्पना कथम्प्रतियोगिवैयधिकरण्यघटितव्याप्तिज्ञानादनुमितिप्रसङ्ग इति चेन्न, व्याप्यवृत्तिसाध्यकस्थलेऽव्याप्यवृत्तित्वग्रहदशायामनुमित्युपपत्तये प्रतियोगिवैयधिकरण्यघटितव्याप्तिज्ञानहेतुताया व्याप्तिग्रहग्रन्थे वक्ष्यमाणतया तत्काल आपत्तिसम्भवात्।

न चैवं 'नोपादेयञ्चे'त्यादि[4] ग्रन्थासङ्गतिरिति वाच्यम्, यथा सल्लिङ्गकानुमितेर्भ्रान्तमात्रपुरुषीयताया असिद्धान्ततया तद्वारणाय व्याप्यवृत्तिसाध्यकानुमितौ प्रतियोगिवैयधिकरण्यघटितव्याप्तिज्ञानस्यैव हेतुत्वन्न तथा व्याप्यवृत्तिसाध्यके तत्र प्रतियोगिवैयधिकरण्याघटितव्याप्तिज्ञानस्यापि प्रमात्वसम्भवादित्याशयाद् व्यवहारप्रयोजकनिर्वचनपरत्वाद्वेति।[२२७]

---

१. 'व्यभिचारज्ञाने'ति उपलब्धजागदीशीग्रन्थेषु।
   –प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. १५

२. मुद्रितपुस्तकस्थोऽयं पाठः

३. 'न चे'त्यस्य स्थाने 'अथे'ति पाठः मुद्रितपुस्तके।

४. प्रकृतग्रन्थः (प्रथमो भागः), दीधितिमूलम्, पृ. १२

प्रकाशः—जागदीश्यन्तर्गतस्य 'जातौ विशिष्टसत्त्वव्यभिचारग्रहदशायामि'त्यस्यार्थं तत्त्वालोककृद् विशिष्य स्पष्टयति 'विशिष्टसत्तात्ववृत्तिस्वप्रतियोगितावच्छेदकावच्छिन्नानधिकरणजातिमद्वृत्त्यभावप्रतियोगितावच्छेदकत्वग्रहस्य विशिष्टसत्त्वव्यभिचारग्रहार्थत्व' प्रदर्शनेन। इदञ्च = जातौ विशिष्टसत्त्वव्यभिचारग्रहदशायामिति कथनञ्च, इष्टापत्तिवारणाय = आपादिताया जातिलिङ्गकविशिष्टसत्त्वसाध्यकानुमितेरिष्टत्ववारणाय इत्यर्थः। उक्तव्यभिचारग्रहकाले आपादितानुमित[तेः] कथञ्चिदपीष्टत्वासम्भवात्। दोषता चास्य अभ्रान्तस्य व्यभिचारिलिङ्गकानुमितित्वेनैव, अभ्रान्तस्य विशिष्टसत्तात्ववृत्तिस्वप्रतियोगितावच्छेदकावच्छिन्नानधिकरणजातिमद्वृत्त्यभावप्रतियोगितावच्छेदकत्वग्रहरूपव्यभिचारग्रहकाले उक्तार्थक = स्वप्रतियोगित्वाश्रयाधिकरणावृत्तित्वार्थक प्रतियोगिवैयधिकरण्यघटितव्याप्तिज्ञानादनुमितिरभ्रान्तस्य व्यभिचारिलिङ्गेन या सर्वथैव नेष्टा सा आपद्येत इत्याशयात्।

अत्र तत्त्वालोककृच्छङ्कते यद् व्याप्यवृत्तिसाध्यनिरूपितव्याप्यत्वव्यवहारे यथा लाघवेन प्रतियोगिवैयधिकरण्याविशेषितस्वोद्देश्यतावच्छिन्नसमानाधिकरणाभावप्रतियोगितानवच्छेदकतत्तद्धर्मावच्छिन्नसामानाधिकरण्यरूपव्याप्तिज्ञानस्यैव प्रयोज[क]ता उक्ता तथैव व्याप्यवृत्तिसाध्यकानुमितावपि प्रतियोगिवैयधिकरण्याघटितव्याप्तिज्ञानस्यैव लाघवेन कारणत्वमुचितं, ततश्च कथं प्रतियोगिवैयधिकरण्यघटितव्याप्तिज्ञानादनुमितिप्रसङ्ग इति।

अत्र समाधानं करोति यद् व्याप्तिग्रहग्रन्थे व्याप्यवृत्तिसाध्यकस्थलेऽव्याप्यवृत्तित्वग्रहदशायां प्रतियोगिवैयधिकरण्यघटितव्याप्तिज्ञानादनुमित्युत्पत्तये प्रतियोगिवैयधिकरण्यघटितव्याप्तिज्ञानस्य हेतुता वक्ष्यमाणास्ति, अतः तत्काले = प्रतियोगिवैयधिकरण्यघटितव्याप्तिज्ञानकाले, उक्तानुमित्यापत्तेः सम्भवादिति।

पुनरत्राक्षिपति यदुक्तदिशोक्तापत्तेः सम्भवेऽपि 'नोपादेयञ्च सर्वथैव व्याप्यवृत्तिसाध्यके' इत्यादिग्रन्थासङ्गतिः स्यादेवेति। अस्याक्षेपस्य समाधानं यथाऽसल्लिङ्गकानुमितेरित्यादिना कर्तुमारभते। असल्लिङ्गकानुमितेर्भ्रान्तमात्रपुरुषीयताया असिद्धान्त[त]या तद्वारणाय अर्थाद् भ्रान्तपुरुषस्यापि असल्लिङ्गकानुमित्यर्थं यथा अव्याप्यवृत्तिसाध्यकानुमितौ प्रतियोगिवैयधिकरण्यघटितव्याप्तिज्ञानस्यैव हेतुत्वन्न तथा व्याप्यवृत्तिसाध्यकेऽपि तत्र व्याप्ति[व्याप्य]वृत्तिसाध्यके प्रतियोगिवैयधिकरण्याघटितव्याप्तिज्ञानस्यापि, 'अपिना' प्रतियोगिवैयधिकरण्यघटितस्यापि प्रमात्वसम्भवात्।

ततश्च व्याप्यवृत्तिसाध्यके = विशिष्टसत्तासाध्यकस्थले प्रतियोगिवैयधिकरण्य-

घटितप्रमात्मकव्याप्तिज्ञानादभ्रान्तस्य जात्यात्मकासल्लिङ्गकानुमितिसम्भवेन असल्लिङ्ग-कानुमितेर्भ्रान्तमात्रपुरुषीयतारूपासिद्धान्ततादोषो न। अथवा 'नोपादेयञ्चे'त्यादिग्रन्थो व्यवहारप्रयोजकनिर्वचनपर एव, न तूक्तस्थले प्रतियोगिवैयधिकरण्यघटितव्याप्तिज्ञाना-दनुमितिप्रतिषेधपर इति उक्ततत्त्वालोकस्याशयः।[२२७]

तत्त्वालोकः– व्याप्यत्वव्यवहारप्रसङ्गरूपसार्वत्रिकातिप्रसङ्गपदार्थम्प्रकृते सङ्गमयितुमाह[1] 'विशिष्टसत्त्वस्याप्युक्ते'ति।[2] 'विशिष्टस्यातिरिक्ततामते'[3] इति विशेष्यसम्बन्धविशेषणावगाहित्वरूपप्रमात्वस्यापारिभाषिकत्वसम्पत्त्यर्थम्वि-शिष्टातिरिक्ततादरः। यद्वातिरिक्ताधिकरणत्वकल्पनापेक्षया विशिष्टातिरिक्तता-कल्पनाया युक्तत्वात्तदादरः। न च तत्राधिकरणत्वस्य क्लृप्तद्रव्यत्वाधिकरणता-रूपत्वन्न गौरवमिति वाच्यम्, निरूपकत्वस्योभयधर्मावच्छिन्नस्यातिरिक्तस्य तथापि प्रसङ्गात्। तत्तत्क्षणविशिष्टसत्त्वनिरूपितानन्ताधिकरणत्वस्याप्यतिरि-क्तस्यैव कल्पनीयतया गौरवाच्चेति बोध्यम्।[२२८]

प्रकाशः– 'विशिष्टसत्त्वस्याप्युक्त[रीत्या] व्याप्यवृत्तित्वविरहाच्चे'ति जागदी-श्यं[शीं] व्याख्यातुं तदवतरणिकारूपेण तत्त्वालोककृतोपन्यस्तं 'व्याप्यत्वव्यवहारप्रस-ङ्गस्य सार्वत्रिकातिप्रसङ्गपदार्थत्वम्प्रकृते सङ्गमयितुमाह विशिष्टसत्वस्याप्युक्ते'ति। व्याप्यवृत्तितया विशिष्टसत्त्वं विजानते, विशिष्टसत्त्वे व्याप्यवृत्तित्वव्यवहारस्य रूपस्या-तिप्रसङ्गस्यौचित्यविरहात्तस्य व्याप्यवृत्तित्वव्यवहारस्य तत्र तज्जानते, इष्टत्वात्। तस्माज्जगदीशेनोक्तम् 'विशिष्टसत्त्वस्याप्युक्तव्याप्यवृत्तित्वविरहाच्चे'ति। विशिष्टसत्ता-धिकरणे घटे कालिकसम्बन्धेन विशिष्टसत्ताभावस्य सत्त्वेन उक्तव्याप्यवृत्तित्वस्य = साध्यतावच्छेदकसम्बन्धेन यत्स्वाधिकरणं तद्वृत्त्यभावस्य तादृशसम्बन्धावच्छिन्नप्रति-योगित्वाभावस्य विरहाच्चेति तदाशयः। ततश्च तत्र वस्तुतो व्याप्यवृत्तित्वविरहेण व्याप्यवृत्तित्वव्यवहारूपोऽतिप्रसक्तोऽपि प्रकृते सम्भव एवेति तदाशयात्।

अग्रे ननु 'विशिष्टसत्त्वस्यातिरिक्तता[मते] तत्रातिव्याप्त्यसम्भव' इति जगदी-शेन यदुक्तं तद् व्याख्यातुं तत्त्वालोके 'विशिष्टस्य अतिरिक्ततामते' इति परिगृहीतम्। विशेष्यसम्बन्धविशेषणावगाहित्वरूपप्रमात्वस्यापारभाषिकत्वसम्पत्तये 'विशिष्टाति-

---

१. 'सङ्गमतुमाहे'ति प्राचीनमुद्रितपुस्तके पाठः।

२. प्रकृतग्रन्थे सिद्धान्तलक्षणजागदीशीमूलम्, पृ. १५

३. (क) तदेव, पृ. १५

(ख) 'अतिरिक्ततामते' इत्येव प्राचीनमुद्रितपुस्तके पाठः।

रिक्ततादर' इति व्याख्यातम्। विशिष्टस्यानतिरिक्तत्वे विशेष्य-सम्बन्ध-विशेषण-त्रितयान्तर्गतसम्बन्धस्य प्रकारत्वाभावेन तद्वति तत्प्रकारत्वरूपम्प्रमात्वन्नोपपद्येत, अतो विशिष्टादर इति तदाशयः। तद्वति तत्प्रकारत्वस्यैव अपारिभाषिकप्रमात्वात्।

यद्वा विशिष्टातिरिक्तत्वेऽपरो हेतुः 'अतिरिक्ताधिकरणत्वापेक्षया विशिष्टस्यैवातिरिक्तता युक्ते'ति। विशिष्टस्यानतिरिक्तत्वे विशिष्टस्याधिकरणता अतिरिक्ता कल्पनीया भवति। तन्न युक्तम्, विशिष्टाधिकरणताया अतिरिक्तत्वकल्पनातो प्रथमोपस्थितस्य विशिष्टस्यैवातिरिक्तत्वकल्पनाया युक्तत्वादिति तदाशयः। न च सत्ताधिकरणतातोऽतिरिक्तस्य विशिष्टसत्ताधिकरणत्वस्य क्लृप्तद्रव्यत्वाधिकरणतारूपत्वान्न गौरवमिति वाच्यम्, तथापि उभयधर्मावच्छिन्नस्य द्रव्यत्वत्वविशिष्टसत्तात्वोभयधर्मावच्छिन्नस्य तदधिकरणतानिरूपकत्वस्य अतिरिक्तस्य कल्पनाप्रसङ्गस्स्यादेवेति तदाशयात्। तत्तत्क्षणविशिष्टसत्त्वनिरूपितानन्ताधिकरणत्वस्याप्यतिरिक्तस्यैव कल्पनीयतया गौरवाच्च।[२२८]

तत्त्वालोकः – 'विशिष्टसत्त्वसाध्यके'[१] इति। इदमुपलक्षणम्। भूतत्वमूर्तत्वयोरव्याप्यवृत्तिगुणात्मकत्वे[२] साङ्कर्येण तयोर्जातित्ववारणन्न घटते, स्वाश्रयेऽसार्वदिकवृत्तेर्जातित्वस्यैवाप्रसक्तेः। तस्मात् स्पर्शवदवृत्तित्वे शब्दवदवृत्तिधर्मशून्यत्वम्विशेषगुणवद्वृत्त्यात्मावृत्तिधर्मवत्त्वम्वा भूतत्वमवच्छिन्नपरिमाणवेगवदाद्यवृत्तिधर्मशून्यत्वं वेगवद्वृत्तिगगनावृत्तिधर्मसमवायित्वम्वा मूर्त्तत्वमित्यवश्यमभ्युपेयमिति भूतत्वमूर्तत्वयोरपि न व्याप्यवृत्तित्वासम्भव[३] इति।[२२९]

प्रकाशः – अत्र प्रकरणे जागदीश्यां प्रथमत इदमुपन्यस्तं यद् विशिष्टस्यातिरिक्तत्वे तत्र विशिष्टसत्तावान् जातेरित्यत्रातिव्याप्त्यसम्भव इत्यत आह 'भूतत्वे'ति। विशिष्टस्यातिरिक्तत्वे विशिष्टसत्ताभावप्रतियोगित्वाश्रयीभूता विशिष्टसत्तैव, न तु सत्ता, तस्या विशिष्टसत्तातो भिन्नत्वादतः प्रतियोगित्वाश्रयाधिकरणावृत्तित्वरूपप्रतियोग्यसामानाधिकरण्यनिवेशेऽपि विशिष्टसत्तावान् जातेरित्यत्रातिव्याप्तिसम्भवो न, सत्तातोऽतिरिक्ताया विशिष्टसत्ताया गुणे कर्मणि च वृत्तित्वविरहादतः भूतत्वमूर्तत्वोभयवान् मूर्तत्वादित्यत्रातिव्याप्तिरुक्तेति।

---

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. १५

२. 'भूतत्वमूर्तत्वयोर्व्याप्यवृत्तिगुणात्मकत्वे' इति प्राचीनमुद्रितपुस्तके पाठः।

३. 'व्याप्यवृत्तित्वसम्भव' इति प्राचीनमुद्रितपुस्तके पाठः।

तत्रैव जागदीश्यां पश्चात्प्राचीनमतमनुसृत्योक्तम् यद् विशिष्टसत्त्वस्य व्याप्यवृत्तितया तत्साध्यके प्रतियोगिवैयधिकरण्याप्रवेशात् 'भूतत्वे'ति साध्यान्तरमिति। तत्र भूतत्वम् आत्मान्यत्वे सति विशेषगुणवत्त्वम्। मूर्तत्वञ्च अवच्छिन्नपरिमाणवत्त्वम्। तदुभयञ्चाव्याप्यवृत्त्येव, घटादावुत्पत्तिकालावच्छेदेन तदुभयाभावसत्त्वादिति।

तत्र तत्त्वालोककृता 'विशिष्टसत्त्वसाध्यके' इति परिगृह्योच्यते 'इदमुपलक्षणम्, भूतत्वमूर्तत्वयोरव्याप्यवृत्तिगुणात्मकत्वे साङ्कर्येण तयोः = भूतत्वमूर्तत्वयोः, जातित्ववारणन्न घटेत, स्वाश्रयेऽसार्वदिकवृत्तेर्जातित्वस्यैवाप्रसक्तेः, नित्यत्वघटितजातिलक्षणस्य तत्र प्रसक्त्यसम्भवात्। तस्मात् स्पर्शवदवृत्तित्वे सति शब्दवदवृत्तिधर्मशून्यत्वं भूतत्वम्। यद्वा विशेषगुणवद्वृत्त्या[त्मा]वृत्तिधर्मवत्त्वम् भूतत्वम्। मूर्तत्वञ्च अवच्छिन्नपरिमाणवेगवदाद्यवृत्तिधर्मशून्यत्वं, यद्वा वेगवद्वृत्तिगगनावृत्तिधर्मसमवायित्वम्। ततश्च भूतत्वमूर्तत्वयोरपि न व्याप्यवृत्तित्वासम्भव इति।

ततश्च विशिष्टसत्त्वस्य व्याप्यवृत्तितया तत्साध्यके यथा प्रतियोगिवैयधिकरण्याप्रवेशस्तथा भूतत्वमूर्तत्वोभयसाध्यकस्थलेऽपि भूतत्वमूर्तत्वयोरपि उक्तदिशा व्याप्यवृत्तितया तत्साध्यकस्थलेऽपि प्रतियोगिवैयधिकरण्याप्रवेश एवेत्यत उपलक्षणमुक्तम्।

स्पर्शवदवृत्तिशब्दवदवृत्तिधर्मशून्यत्वस्य विशेषगुणवद्वृत्त्यात्मावृत्तिधर्मवत्त्वञ्च उत्पत्तिकालेऽपि घटादौ सत्त्वेन न व्याप्यवृत्तित्वासम्भव इति तदाशयः।[२२९]

तत्त्वालोकः – **दीधितावुभयत्वन्न विशिष्टत्वादनतिरिक्तमिति**[1]**। न च नञ्द्वयोक्तिर्विफलेति वाच्यम्, तथासति 'उभयत्व' मात्रस्य विशिष्टत्वातिरिक्तत्वालाभात् तदुक्तौ चाभावान्वयस्यान्वयितावच्छेदकावच्छिन्नत्वनियमेन तल्लाभादिति।[२३०]**

प्रकाशः – प्रतियोग्यसामानाधिकरण्यस्य प्रतियोगितावच्छेदकावच्छिन्नासामानाधिकरण्यार्थकत्वविरहे भूतत्वमूर्तत्वोभयवान् मूर्तत्वादित्यत्रोक्तातिव्याप्तेरभावबोधनाय दीधितौ 'उभयत्वं हि न विशिष्टत्वादनतिरिक्तमि'ति यदुक्तन्तत्र 'उभयत्वं' 'विशिष्टातिरिक्तमि'त्येव कुतो नोक्तम्, नञ्द्वयाघटितत्वेन लाघवादित्याशङ्कितं तत्त्वालोककृता। समाहितञ्च पुनस्तेनैव 'तथासति' 'उभयत्वमात्रस्यातिरिक्तत्वालाभादि'त्युपन्यासेन। नञ्-द्वयोपादाने तु 'उभयत्व' मात्रस्य अतिरिक्तत्वलाभो भवत्येव,

---

१. प्रकृतग्रन्थः (प्रथमो भागः), दीधितिमूलम्, पृ. १४

अभावान्वयस्यान्वयितावच्छेदकावच्छिन्नत्वनियमात्। तथा च उभयत्वत्वावच्छेदेन विशिष्टानतिरिक्तत्वाभावबोधाय नञ्-द्वयोपादानं कृतमिति समाधानम्।[२३०]

तत्त्वालोकः – **'वृत्तिमती'ति[१]। गगनादिहेतोरव्याप्यत्वस्य साध्यसामानाधिकरण्याभावाधीनत्वादिदमुक्तम्[२]।[२३१]**

प्रकाशः –प्रतियोग्यसामानाधिकरण्यस्य प्रतियोगितावच्छेदकावच्छिन्नासामानाधिकरण्यार्थकत्वविरहे पूर्वं भूतत्वमूर्तत्वोभयवान् मूर्तत्वादित्यत्रातिव्याप्तिरुक्ता, तत्पश्चात् 'न च तत्र व्याप्तिरेवे'ति ग्रन्थेन भूतत्व-मूर्तत्वोभयत्वाश्रयस्य मूर्तत्वस्य मनसि सत्त्वात्तत्र व्याप्तिरेव, तथा च तत्रातिव्याप्तिवारणाय प्रकारो नोचित इति यदाक्षिप्तं तत्समाधानं 'तथात्वेऽप्युभयत्वेन रूपेण तत्रासत्त्वादि'त्युपन्यस्य कृतम्। हेतुमत्त्वावच्छेदेन साध्यतावच्छेदकावच्छिन्नवत्तास्थल एव व्याप्तिरतो नैतल्लक्ष्यमिति तदाशयात् तत्र दीधितौ 'नात्रोभयमिति प्रतीतेर्दुर्वारत्वादि'ति यदुक्तम् तदवतरणं "वृत्तिमति व्याप्त्यभावस्य व्यभिचारनियतत्वाद् व्यभिचारं ग्राहयति 'नात्रोभयमि''त्युपन्यस्य जगदीशेन कृतम्।[३] तत्र जागदीश्यां 'वृत्तिमती'त्युक्तिः 'गगनादिहेतोरव्याप्यत्वस्य साध्यसामानाधिकरण्याभावाधीनत्वबोधनाये'ति तत्त्वालोककृता स्पष्टीकृतम्।-[२३१]

तत्त्वालोकः– **'अनवस्थाभयेनेत्यादिरि'ति।[४] पटाभावभेदस्यातिरिक्तत्वे भेदभेदस्य तद्भेदस्याप्यतिरिक्तत्वमित्यनवस्थापत्तिरित्यर्थः। यद्यप्येवमपि प्रतियोगित्वादिकल्पनानवस्थितिस्तदवस्था, तथाप्यनन्तभेदाकल्पनालाघवं भवत्येवेति। न चैवं पटाभावेऽपि पटाभावभेदसत्त्वप्रसङ्गः, तदभिन्नस्य घटाभावस्य सत्त्वादिति वाच्यम्, घटाभावस्य तादात्म्येनैव पटाद्यभावभेदव्यवहारप्रयोजकत्वाभ्युपगमात्। अभावप्रतियोगिकाभावाधिकरणकाभावस्याधिकरणात्मकत्वेऽपि नाभावात्यन्ताभावोऽधिकरणात्मा, अनवस्थितेरभावात्, तथाहि समानाधिकरणसम्बन्धावच्छिन्नप्रतियोगिताकाभावस्य स्वरूपेणाभावः[५] प्रथमाभावप्रतियोग्यात्मा, तदभावश्च प्रथमाभावः, व्यधिकरणसम्बन्धावच्छिन्न-**

---

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. १६

२. 'साध्यासामानाधिकरण्याधीनत्वादिदमुक्तमि'ति प्राचीनमुद्रितपुस्तके पाठः।

३. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. १६

४. तदेव, पृ. १६

५. 'स्वरूपेणाभावः प्रथमाभावः' इति प्राचीनमुद्रितपुस्तके पाठः।

प्रतियोगिताकाभावस्य स्वरूपेणाभावोऽप्रसिद्ध[1] एवाभावस्य व्यधिकरण-सम्बन्धावच्छिन्नप्रतियोगिताकसर्वोऽप्यभावो गगनाभाव एव, नित्याभावस्य कालिकेन सर्वोऽभावः कालिकेन घटत्वाद्यभावात्मक एव, स्वरूपेण तदभावश्च तत्प्रतियोगिरूप एवम्विशेषरूपेण संसर्गता च न स्वीक्रियत इत्यधिकरणात्मकता चाभावभेदमात्रस्यैवेदानीं ग्रन्थकर्तुरभिमता। अत एवाभावाभावस्य प्रतियोगिरूपतामेवावलम्ब्य सम्प्रदाय इत्यस्वरस इत्यादिनात्रास्वरसम्वक्ष्यति।[२३२]

प्रकाशः – दर्शितप्रयोजनवशात् प्रतियोग्यसामानाधिकरण्यस्य प्रतियोगितावच्छेदकावच्छिन्नासामानाधिकरण्यार्थकत्वे अभावसाध्यकस्थले धूमाभाववान् वह्न्यभावादित्यादौ प्रतियोग्यसमानाधिकरणाभावाप्रसिद्ध्या लाघवात् सर्वस्यैवाभावस्य स्वसमानाधिकरणाभावान्तरभिन्नतया घटाभावस्य पटाभावभेदस्वरूपत्वेन स्वात्मकभेदप्रतियोगि यदभावान्तरं पटाभावस्तत्समानाधिकरणत्वाद् या अव्याप्तिरापतति तत्परिहारः 'अत्यन्तपदञ्च अत्यन्ताभावत्वनिरूपकप्रतियोग्यसामानाधिकरण्यस्य अत्यन्ताभावत्वनिरूपकप्रतियोगितायाश्च लाभाये'त्युपन्यस्य दीधितिकृता कृतः।[2]

तत्र दीधितिकृता स्वसमानाधिकरणाभावान्तरभेदस्य घटाभावसमानाधिकरणपटाभावादिभेदस्य स्व-स्वरूपता घटाभावस्वरूपता यदर्थं स्वीकृता तज्जगदीशतर्कालङ्कारेण जागदीश्यां 'अनवस्थाभयेनेत्यादिरि'त्युपन्यस्य स्पष्टीकृतम्। तद् व्याख्यातुं तत्त्वालोककृता उक्तखण्डे 'अनवस्थाभयेनेत्यादिरि'ति परिगृहीतम्। तत्रोच्यते पटाभावभेदस्य स्वाधिकरणीभूतघटाभावादितोऽतिरिक्तत्वे भेद-भेदस्य तद्भेदस्याप्यतिरिक्तत्वमित्यनवस्थापत्तिः स्यादिति। तत्र पुनरुच्यते यदेवमपि अभावाधिकरणकभेदस्य स्वाधिकरणीभूताभावस्वरूपत्वेऽपि प्रतियोगित्वादिकल्पनानवस्थितिस्तदवस्थैव, पटाभावादिभेदस्य स्वाधिकरणीभूतघटाभावादिरूपत्वे पटाभावभेदप्रतियोगित्वकल्पना घटादिष्वपि स्यात्। तथा पटाभावभेदप्रतियोगितावच्छेदकत्वकल्पना घटत्वादिषु तदवच्छेदकसम्बन्धत्वकल्पना समवायादिषु स्यात्ततश्चानवस्था तदवस्थैव स्यादिति शङ्का। 'तथाप्यनन्तभेदाकल्पनाप्रयुक्तलाघवमि'ति तत्समाधानम्।

पटाद्यभावभेदस्य स्वाधिकरणीभूतघटाद्यभावरूपत्वे शङ्कते। 'न चैवं पटाभावेऽपि पटाभावभेदसत्त्वप्रसङ्गः स्यात्, तदभिन्नस्य= पटाभावभेदाभिन्नस्य घटाभावस्य

---

१. 'स्वरूपेणाभावोऽसिद्ध' इति प्राचीनमुद्रितपुस्तके पाठः।

२. प्रकृतग्रन्थः (प्रथमो भागः), दीधितिमूलम्, पृ. १६

तत्र पटाभावे सत्त्वादि'ति।

अत्र समादधाति। घटाभावस्य तादात्म्येनैव, न तु सर्वथा पटाद्यभावभेद-व्यवहारप्रयोजकत्वाभ्युपगमात्, ततश्च न पटाभावे पटाभावभेदातिप्रसङ्ग इति घटाभावस्य पटाभावे सत्त्वेऽपि पटाभाववृत्तित्वेन तत्र घटाभावे पटाभावभेदव्यवहारप्र-योजकत्वानभ्युपगमात्, अत एव तादात्म्येनैव घटाभावस्य पटाभावभेदव्यवहारप्रयोज-कत्वाभ्युपगमादित्युक्तम्।

अनन्तरमुच्यते यदभावप्रतियोगिकाभावाधिकरणकाभावस्य = पटाभावादिभे-दस्य, अधिकरकरणस्वरूपत्वेऽपि नाभावात्यन्ताभावोऽधिकरणस्वरूपोऽनवस्थितेरभा-वात्, यथानवस्थितेरभावस्तथोपपाद्यते 'तथा ही'त्यादिना। समानाधिकरणसम्बन्धाव-च्छिन्नप्रतियोगिताकाभावस्य = संयोगादिसम्बन्धावच्छिन्नघटादिप्रतियोगिकाभावस्य, स्वरूपेणाभावः प्रथमाभावप्रतियोग्यात्मा = घटाद्यात्मा, तदभावश्च घटादेरभावस्य प्रथमाभावः।

व्यधिकरणसम्बन्धावच्छिन्नप्रतियोगि[ता]काभावस्य = घटत्वादेः संयोगसम्ब-न्धावच्छिन्नप्रतियोगि[ता]काभावस्य, स्वरूपेणाभावोऽप्रसिद्ध एव। येन सम्बन्धेन यः कुत्रापि न तिष्ठति स एव सम्बन्धस्तस्य व्यधिकरणसम्बन्धो भवति, यथा संयोगसम्बन्धः घटत्वादिजातेः व्यधिकरणसम्बन्धः, अभावस्य व्यधिकरणसम्बन्धाव-च्छिन्नप्रतियोगिताकः सर्वोऽप्यभावः गगनाभाव एव, संयोगसम्बन्धावच्छिन्नघटादिप्र-तियोगिकाभावस्य संयोगसम्बन्धावच्छिन्नप्रतियोगिकाभावः = अभावस्य व्यधिकरण-सम्बन्धावच्छिन्नप्रतियोगिकाभावः, संयोगेन घटादिप्रतियोगिकाभावस्य संयोगेन कुत्रापि वृत्तित्वविरहात्। तस्मात्तादृशाभावप्रतियोगिकाभावः = द्वितीयोऽभावः, गगनाभाव एव, यथा गगनं न कुत्रापि तिष्ठति अतो गगनाभावः सर्वत्रैव तिष्ठति तथैव संयोगसम्बन्धाव-च्छिन्नघटादिप्रतियोगिकाभावः संयोगेन न कुत्रापि तिष्ठति अतस्तादृशाभावस्य संयोगसम्बन्धावच्छिन्नप्रतियोगिताकोऽभावो गगनाभाव इव सर्वत्रैव तिष्ठति। अतस्ता-दृशः सर्वोऽप्यभावः गगनाभावस्वरूप एव।

अनन्तरमुच्यते नित्याभावस्य कालिकेन सर्वोऽभावः कालिकेन घटत्वाद्यभा-वात्मक एव, नित्यस्य पटत्वात्मत्वादिजातेः समवायसम्बन्धावच्छिन्नप्रतियोगिताकोऽ-भावस्तादृशाभावस्य कालिकेन योऽभावः स सर्वोऽप्यभावः कालिकेन घटत्वाद्यभावा-त्मक एव, समवायेन घटत्वं घटे तिष्ठति, समवायसम्बन्धावच्छिन्नघटत्वप्रतियोगिका-भावस्य कालिकसम्बन्धावच्छिन्नप्रतियोगिकाभावस्तु यत्र समवायसम्बन्धावच्छिन्नघ-

टत्वप्रतियोगिकाभावः कालिकेन न तिष्ठति यथा आत्मादौ नित्यपदार्थे 'नित्ये कालिकायोगादि'ति नियमात् समवायसम्बन्धावच्छिन्नघटत्वप्रतियोगिकाभावस्य कालिकसम्बन्धेन वृत्तित्वविरहात् तादृशाभावस्याभावस्तत्र तिष्ठति, तथैव नित्यस्य पटत्वादिजातेरभावस्य कालिकसम्बन्धावच्छिन्नप्रतियोगिताकाभावस्थलेऽपि।

नित्यस्य आत्मत्व-पटत्वादिजातेः समवायसम्बन्धावच्छिन्नप्रतियोगिकाभावस्य स्वरूपसम्बन्धावच्छिन्नप्रतियोगिताको द्वितीयाभावस्तु तत्तत्प्रतियोगिस्वरूपः = आत्मत्व-पटत्वादिजात्यात्मकनित्यप्रतियोगिस्वरूपः, यथा घटत्वाभावस्य समवायसम्बन्धावच्छिन्नप्रतियोगिताकस्य स्वरूपसम्बन्धावच्छिन्नप्रतियोगिताकाभावो घटत्वात्मकप्रथमाभावप्रतियोगिस्वरूपस्तथैव।

अनन्तरमुच्यते यद् 'विशेषरूपेण संसर्गता च न स्वीक्रियत इत्यधिकरणात्मकता चाभावभेदमात्रस्यैवेदानीं ग्रन्थकर्त्तुरभिमता, अत एव अभावाभावस्य प्रतियोगिरूपतामेवावलम्ब्य सम्प्रदाय इत्यस्वरस इत्यादिनात्रास्वरसं वक्ष्यति' इति।

जगदीशेन अग्रे विवक्षणीयस्य साध्यताघटकसम्बन्धेन प्रतियोग्यसामानाधिकरण्यस्य वह्निमान् धूमादित्यादौ घटाद्यभावे सत्त्वान्न सर्वत्राप्रसिद्धिः, किन्तु स्वरूपसम्बन्धेनाभावस्य साध्यतायामेव = धूमाभाववान् वह्न्यभावादित्यादौ, तत्र हेतुसमानाधिकरणघटत्वत्वाद्यभावादेः प्रतियोगित्वस्य तदात्मकपटाभावभेदप्रतियोगिनि पटाभावे सत्त्वात्तादृशपटाभावस्य स्वरूपेणाधिकरणेन जलह्रदादौ घटत्वत्वाभावस्य वृत्तेः, विशेषरूपेण संसर्गतास्वीकारे धूमाभावप्रतियोगिकस्वरूपसम्बन्धेन धूमाभावसाध्यकवह्न्यभावहेतुकस्थले पटाभावे घटत्वत्वाभावप्रतियोगित्वसत्त्वेऽपि वह्निमान् धूमादित्यत्र घटाद्यभावे साध्यताघटकसम्बन्धेन प्रतियोग्यसामानाधिकरण्यस्यैव पटाभावस्य वह्न्यभावाधिकरणे धूमाभावप्रतियोगिकस्वरूपसम्बन्धेन वृत्तित्वविरहात्, घटत्वत्वाभावे प्रतियोग्यसामानाधिकरण्यसम्भवात्तादृशाभावसाध्यकेऽपि नाप्रसिद्धिः स्यादित्यभिप्रायेणोक्तम् 'विशेषरूपेण संसर्गता च न स्वीक्रियते इति तथा अधिकरणात्मकता चाभावभेदमात्रस्यैव न तु अभावात्यन्ताभावस्यापि ग्रन्थकर्त्तुरभिमता अत एवाभावाभावस्य प्रतियोगिरूपतामेवावलम्ब्य सम्प्रदाय इत्यस्वरस इत्यादिनात्रास्वरसं वक्ष्यती'ति।[२३२]

तत्त्वालोकः – एवञ्च घटाभावस्य कालिकसम्बन्धावच्छिन्नपटाभावाभावात्मकतया[१]ऽत्यन्ताभावत्वनिरूपितपटाभावनिष्ठप्रतियोगितावच्छेदकावच्छिन्नसमानाधिकरणत्वादव्याप्तितादवस्थ्यमिति निरस्तम्। तादृशाभावस्य घटाभावानात्मकत्वात् सम्प्रदाय इत्यस्वरस इत्यादिना वक्ष्यमाणदोषतुल्यत्वेनेष्टत्वाच्चेति।[२३३]

प्रकाशः – उपर्युक्तखण्डघटकस्य 'एवञ्चे'त्यस्य अग्रिमेण 'निरस्तमि'त्यनेनान्वयः। प्रतियोग्यसामानाधिकरण्यघटकप्रतियोगितायामत्यन्ताभावत्वनिरूपकत्वविशेषणे दत्तेऽपि उक्तस्थले घटाभावः प्रतियोग्यसमानाधिकरणो न स्यात्। पटाभावस्य कालिकसम्बन्धावच्छिन्नप्रतियोगिताकाभावस्य घटाभावात्मकतया तस्य पटाभावनिष्ठा या अत्यन्ताभावत्वनिरूपिका प्रतियोगिता, तदाश्रयपटाभावाधिकरणवृत्तित्वादित्याशङ्का निरस्ता। उक्ताभावस्य कालिकसम्बन्धावच्छिन्नपटाभावाभावस्य घटाभावानात्मकत्वात्। नित्याभावस्य कालिकेन सर्वोऽभावः कालिकेन घटत्वाद्यभावात्मक एवेति पूर्वमुक्तत्वात् पटात्यन्ताभावस्य नित्यतया तस्य कालिकसम्बन्धावच्छिन्नप्रतियोगिकाभावस्य नित्याभावस्य कालिकेन सर्वाभावान्तर्गतत्वात् कालिकसम्बन्धावच्छिन्नप्रतियोगिताकपटाभावाभावस्य घटाभावात्मकत्वेऽपि 'तुष्यतु दुर्जन' न्यायेन समाहितं 'सम्प्रदाय इत्यस्वरस इत्यादिना वक्ष्यमाणदोषतुल्यत्वेनेष्टत्वाच्चे'ति।[२३३]

तत्त्वालोकः – परे तु कालिकसम्बन्धावच्छिन्नपटाभावाभावत्वनिरूपितप्रतियोगितावारणाय स्वप्रतियोगिमत्त्वग्रहविरोधिताघटकसम्बन्धावच्छिन्नहेत्वधिकरणनिरूपितवृत्तित्वावच्छेदकत्वमत्यन्ताभावत्वरूपानुयोगिताविशेषणन्देयन्तथा चोक्तात्यन्ताभावत्वस्य तादृशावच्छेदकत्वविरहान्न दोषः।

यत्त्वत्यन्ताभावत्वनिरूपितप्रतियोगितायां साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वम्विशेषणम्, न चैवमेव भेदत्वनिरूपितप्रतियोगितावारणेनात्यन्ताभावत्वनिरूपितत्वं व्यर्थमिति वाच्यम्, स्वरूपकालिकोभयसम्बन्धावच्छिन्नप्रतियोगिकाभावमादाय दोषवारणाय साध्यतावच्छेदकसम्बन्धातिरिक्तसम्बन्धानवच्छिन्नत्वरूपस्यैव तस्य वाच्यतया भेदत्वनिरूपितप्रतियोगितायां सम्बन्धानवच्छिन्नत्वपक्षे तत्सार्थक्यसम्भवादिति।

---

१. 'पटाभावात्मकतये'ति प्राचीनमुद्रितपुस्तके पाठः। 'पटाभावाभावात्मकतये'ति पाठस्तु पण्डितषष्ठीनाथमिश्रैः संशोधितः।

तत्तुच्छम्। कालिकेन घटसाध्यकतत्क्रियात्वे सद्धेतावव्याप्त्यापत्तेः तत्रात्यन्ताभावत्वनिरूपितप्रतियोगितायाः कालिकसम्बन्धावच्छिन्नाया गगनाभावनिष्ठायास्साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वादिति वदन्ति।[२३४]

प्रकाशः – 'परे तु' इत्यस्य अग्रिमेण 'वदन्ति' इत्यनेनान्वयः। परे कथयन्ति यत् कालिकसम्बन्धावच्छिन्नपटाभावाभावत्वनिरूपितप्रतियोगितामत्यन्ताभावत्वनिरूपिकामादाय यो दोषो दर्शितस्तस्य वारणाय प्रतियोगितानिरूपकत्वेन विवक्षिते अनुयोगिताविशेषरूपे अत्यन्ताभावत्वे स्वप्रतियो[गि] मत्ताग्रहविरोधिताघटकसम्बन्धावच्छिन्नहेत्वधिकरणनिरूपितवृत्तितावच्छेदकत्वं विशेषणं देयम्। कालिकसम्बन्धावच्छिन्नपटाभावाभावत्वस्य तादृशावच्छेदकत्वविरहान्न दोषः। हेत्वधिकरणे = धूमाभाववान् वह्न्यभावादित्यादौ वह्न्यभावाधिकरणे जलादौ, कालिकसम्बन्धेन पटाभावात्मकस्य स्वप्रतियोगिन एव सत्त्वेन स्वप्रतियोगिमत्ताग्रहविरोधिताघटकसम्बन्धेन स्वरूपेण कालिकसम्बन्धावच्छिन्नपटाभावाभावस्यासत्त्वात् तादृशाभावाभावत्वरूपात्यन्ताभावत्वरूपानुयोगित्वस्य तादृशसम्बन्धेन हेत्वधिकरणनिरूपितवृत्तितावच्छेदकत्वविरहादिति।

अत्र 'यत्तु' कथयति। अत्यन्ताभावत्वनिरूपितप्रतियोगितायां साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वमेव विशेषणं देयम्। कालिकसम्बन्धावच्छिन्नपटाभावाभावत्वनिरूपितप्रतियोगितायां पटाभावनिष्ठायां कालिकसम्बन्धावच्छिन्नत्वसत्त्वेन साध्यतावच्छेदकस्वरूपसम्बन्धावच्छिन्नत्वविरहान्न तादृशप्रतियोगितां परिगृह्य दोषसम्भवः।

न चैवं पटाभावभेदीयप्रतियोगितायां साध्यतावच्छेदकस्वरूपसम्बन्धावच्छिन्नत्वविरहादेव भेदत्वनिरूपकप्रतियोगितावारणसम्भवाद्भेदत्वनिरूपकप्रतियोगितावारणायात्यन्ताभावत्वनिरूपकत्वं प्रतियोगिताविशेषणं व्यर्थमिति वाच्यम्, स्वरूपकालिकोभयसम्बन्धावच्छिन्नप्रतियोगिकाभावमादाय दोषवारणाय साध्यतावच्छेदकसम्बन्धातिरिक्तसम्बन्धानवच्छिन्नत्वरूपस्य साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वस्य विवक्षाया आवश्यकतया भेदत्वनिरूपितप्रतियोगितायां सम्बन्धानवच्छिन्नत्वस्वीकारपक्षे विवक्षितोक्तसाध्यतावच्छेदकसम्बन्धावच्छिन्नत्वसम्भवेन तद्वारणाय अत्यन्ताभावत्वनिरूपकत्वरूपस्य प्रतियोगिताविशेषणस्य सार्थक्यसम्भवात्। इति 'यत्तु' मतम्।

तन्न साधु। कालिकेन घटसाध्यकतत्क्रियात्वे सद्धेतावव्याप्त्यापत्तेः, तत्र गगनाभावस्य कालिकसम्बन्धेन आत्मादिनित्यपदार्थे वृत्तित्वविरहात्, गगनाभावस्य कालिकसम्बन्धावच्छिन्नप्रतियोगिताको योऽभावस्तदीयप्रतियोगितायां साध्यतावच्छे-

दकीभूतकालिकसम्बन्धावच्छिन्नत्वस्य अत्यन्ताभावत्वनिरूपकत्वस्य सम्भवात्, तादृशप्रतियोगिताश्रयगगनाभावात्मकप्रतियोगिसामानाधिकरण्यस्यैव सर्वत्राभावे सत्त्वेन तत्र प्रतियोग्यसमानाधिकरणाभावाप्रसिद्ध्याऽव्याप्तिः स्यादिति 'परे तु' वदन्ति।[२३४]

तत्त्वालोकः – तन्न। घटभिन्नं नित्यत्वादित्यत्राव्याप्तितादवस्थ्यादेवं घटाभावस्य पूर्वक्षणवृत्तित्वविशिष्टपटाभावाभावस्य चैकतया घटाभावनिरूपिताया हेत्वधिकरणनिरूपितवृत्तितावच्छेदकतादृशाभावत्वनिरूपितायाः प्रतियोगितायाः अवच्छेदकीभूतधर्मावच्छिन्नाधिकरणत्वस्यैव हेत्वधिकरणे सत्त्वेनाव्याप्तितादवस्थ्यात्। न चापरक्षणावच्छिन्नमात्रवृत्तेरुक्ताभावस्य घटाभावनिष्ठस्य कथं घटाभावात्मकतेति वाच्यम्, घटभेदस्य स्वरूपपटत्वावच्छिन्नप्रतियोगित्वान्यतरसम्बन्धेन साध्यतायां सद्धेतौ पटाभावत्वेऽव्याप्तेः, पटाभावान्याभावस्यैव प्रतियोगिव्यधिकरणतया तस्य च पूर्वक्षणावच्छिन्नपटाभावत्वाभावेन स्वनिष्ठेनाभिन्नतया तादृशाभावत्वस्य च हेत्वधिकरणनिरूपितवृत्तितावच्छेदकत्वेन तन्निरूपितप्रतियोगित्वमादायाव्याप्तेरुद्धारासम्भवादिति।[२३५]

प्रकाशः – पूर्वखण्डेनोपपादितं परेषाम्मतं 'तन्ने'त्यादिना खण्डयितुमपक्रमते तत्त्वालोककृत्। उक्तमते प्रतियोग्यसामानाधिकरण्यघटकप्रतियोगिताविशेषणीभूतानुयोगिताविशेषरूपात्यन्ताभावत्वस्य स्वप्रतियोगिमत्ताग्रहविरोधितावच्छेदकसम्बन्धेन हेत्वधिकरणनिरूपितवृत्तितावच्छेदकत्वविशेषणे प्रदत्तेऽपि घटभिन्नं नित्यत्वादित्यत्र सद्धेतावव्याप्तिस्तदवस्थैव स्यात्, तत्र घटाभावाधिकरणक-कालिकसम्बन्धावच्छिन्न-पटाभावाभावत्वस्य स्वप्रतियोगिमत्ताग्रहविरोधिघटकसम्बन्धेन स्वरूपेण नित्यत्वरूप-हेत्वधिकरणनिरूपितवृत्तितावच्छेदकत्वात् गगने कालिकेन तत्प्रतियोगिनः पटाभावस्यासत्त्वात्।

तथा धूमाभाववान् वह्न्यभावादित्यादावपि पूर्वदर्शितस्थलेऽपि घटाभावस्य पूर्वक्षणवृत्तित्वविशिष्टपटाभावाभावस्य चैकतया घटाभावनिरूपिताया हेत्वधिकरणनिरूपितवृत्तितावच्छेदकतादृशाभावत्वनिरूपितायाः अवच्छेदकीभूतधर्म = पूर्वक्षणवृत्तित्वविशिष्टपटाभावत्वा, - वच्छिन्नाधिकरणत्वस्यैव हेत्वधिकरणे सत्त्वेनाव्याप्तितादवस्थ्यात् पूर्वक्षणे पूर्वक्षणवृत्तित्वविशिष्टपटाभावस्य उत्तरक्षणे पूर्वक्षणवृत्तित्वविशिष्टपटाभावाभावस्य तत्र हेत्वधिकरणे सत्त्वेनाव्याप्तेस्तदवस्थतेति भावः।

अनन्तरमुच्यते 'न चापरक्षणावच्छिन्नमात्रवृत्तेरुक्ताभावस्य कथं घटाभावात्मकतेति वाच्यम्, घटाभावस्य पूर्वक्षणेऽपि सत्त्वात्तदा तत्र पूर्वक्षणावच्छिन्नपटाभावाभा-

वस्यासत्त्वात् कथं घटाभावस्य पूर्वक्षणविशिष्टपटाभावाभावात्मकतेति चेत्तदा घटभेदस्य स्वरूप-पटत्वावच्छिन्नप्रतियोगित्वान्यतरसम्बन्धेन साध्यतायां पटाभावत्वे सद्धेतावव्याप्तिः स्यात्, तत्र पटाभावान्याभाव एव मठाभावादिप्रतियोगिव्यधिकरणतया सम्भावनार्थो न तु पटाभावः, तस्य = पटाभावस्य साध्यताघटकसम्बन्धतयोक्तान्यतरसम्बन्धान्तर्गतपटत्वावच्छिन्नप्रतियोगित्व-पटत्वावच्छिन्नप्रतियोगित्वनिरूपकत्व-सम्बन्धेन पटाभावत्वरूपहेत्वधिकरणे पटाभावे स्वप्रतियोगिना पटेन सामानाधिकरण्यस्यैव सत्त्वेन प्रतियोगिव्यधिकरणत्वासम्भवात्। तस्य च = पटाभावान्याभावस्य मठाभावादेः, स्वनिष्ठेन पूर्वक्षणावच्छिन्नपटाभावत्वाभावेनाभिन्नतया तादृशाभावत्वस्य च पूर्वक्षणावच्छिन्नपटाभावत्वाभावत्वस्य हेत्वधिकरण = पटाभाव, -निरूपितवृत्तितावच्छेदकत्वेन तन्निरूपितप्रतियोगित्वमादायाव्याप्तेरुद्धारासम्भवात्, हेत्वधिकरणे पटाभावे मठाभावादेः स्वप्रतियोगिनः विशेषितप्रतियोगित्वाश्रयस्य पूर्वक्षणावच्छिन्नपटाभावत्वरूपस्य सत्त्वेन प्रतियोगिव्यधिकरणत्वासम्भवात्प्रतियोगिव्यधिकरणाभावाप्रसिद्ध्याऽव्याप्तिर्दुरुद्धरैवेत्यतः परेषां मतन्नैव युक्तमि'ति।

इदमत्रावधेयम् यत्पूर्वमुक्ताभावस्य = पूर्वक्षणावच्छिन्नपटाभावाभावस्य घटाभावनिष्ठस्य, कथं घटाभावात्मकतेति शङ्कितम्। अत्र तथाशङ्काभवितुन्नार्हति, मठाद्यभावे पटाभावत्वस्य कदाप्यसत्त्वेन पूर्वक्षणावच्छिन्नपटाभावत्वाभावस्य सर्वदैव सत्त्वेन मठाद्यभावनिष्ठस्य पूर्वक्षणावच्छिन्नपटाभावत्वाभावस्याभावाधिकरणकस्य तत्स्वरूपत्वसम्भवात्, पूर्वक्षणे मठाद्यभावे न विशेषणाभावप्रयुक्तो विशिष्टाभावः = पूर्वक्षणावच्छिन्नपटाभावत्वाभावः, किन्तु विशेष्यीभूतपटाभावत्वविरहप्रयुक्त एवेति।-
[२३५]

तत्त्वालोकः– अग्रे विवक्षणीयस्येति[१]। ननु वह्निमान् धूमादित्यत्राप्यव्याप्तिः सम्भवत्येव, घटाभावस्य स्वनिष्ठेन वह्नि-तदभावाऽननुयोगिकस्वरूपेण पटाभाववद्भिन्नभेदेन घटाभावत्ववद्भिन्नभेदेन चैकतया तत्प्रतियोगितावच्छेदकावच्छिन्नस्य वह्नेस्संयोगेनाधिकरणत्वस्य पर्वते सत्त्वादिति चेन्नाभावमात्र प्रतियोगिकाभावस्याधिकरणत्वस्वरूपत्वाभ्युपगमात्। विशेषरूपत्वेन संसर्गत्वानभ्युपगमाच्च[२]।

यद्वा विषयितया रूपत्ववदभावमादायाव्याप्तिवारणाय साध्यतावच्छेद-

---

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. १७

२. 'संसर्गत्वाभ्युपगमाच्चे'ति प्राचीनमुद्रितपुस्तके पाठः। संशोधित उपर्युक्तपाठस्तु पण्डितषष्ठीनाथमिश्रैः।

कताघटकसम्बन्धावच्छिन्नप्रतियोगितावच्छेदकनिष्ठावच्छेदकताकनिरूपकताकाधिकरणतावदन्यत्वस्यैव वाच्यतया न दोषसम्भवः। न च वह्नित्वप्रतियोगिकसमवायस्य साध्यतावच्छेदकताघटकसम्बन्धत्वेऽव्याप्तिवारणाय पारिभाषिकस्यैव साध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नत्वस्य वाच्यतयोक्तदोषतादवस्थ्यमिति वाच्यम्, साध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नावच्छेदकताकनिरूपकताकाधिकरणत्वीय-स्वरूपसम्बन्धावच्छिन्नप्रतियोगितावच्छेदकावच्छिन्नाधिकरणत्वाभावस्यैव विवक्षितत्वात् पारिभाषिकतद्विवक्षायां प्रयोजनाभावात्।

न चैवमपि वह्नित्वाधिकरणत्वविशिष्टस्य साध्यतायां तथाप्यव्याप्तिरिति वाच्यम्। प्रतियोगितायां साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वे स्वप्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगिवैयधिकरण्यस्य साध्यतावच्छेदकसम्बन्धेन प्रतियोगिवैयधिकरण्यपर्यवसायितया 'अग्रे विवक्षणीयस्ये'त्यादेरत्रैव तात्पर्येण संयोगेन साध्यतास्थले प्रतियोगितायां भेदत्वनिरूपितायां साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वविरहेण दोषासम्भवादित्यन्ये प्रलपन्ति।[२३६]

प्रकाशः—जगदीशेन 'अत्यन्तपदञ्चे'त्यादिदीधितिव्याख्यावसरे यदुक्तं साध्यतावच्छेदकसम्बन्धेनैव प्रतियोगिवैयधिकरण्यस्याग्रे विवक्षणीयतया घटाभावाधिकरणकपटाभावस्य घटाभावरूपत्वेऽपि पटाभावात्मकघटाभावप्रतियोगिनः हेत्वधिकरणे पर्वतादौ साध्यतावच्छेदकसंयोगसम्बन्धेन वृत्तित्वविरहाद् घटाभावस्य तत्र प्रतियोगिवैयधिकरण्यसम्भवात् प्रतियोगिव्यधिकरणाभावाप्रसिद्ध्या वह्निमान् धूमादित्यत्र नाव्याप्तिसम्भवोऽतोऽभावसाध्यकेऽव्याप्तिरुक्तेति, तत्र शङ्कते तत्त्वालोककृद् यद् वह्निमान् धूमादित्यत्रापि अव्याप्तिः सम्भवेदेवेति। तथाहि घटाभावनिष्ठस्य वह्नितदभावाऽननुयोगिकस्वरूपसम्बन्धेन पटाभाववद्भिन्नभेदस्य घटाभावत्ववद्भिन्नभेदस्य चैकतया तत्प्रतियोगितावच्छेदकावच्छिन्नस्य = वह्न्यननुयोगिकस्वरूपसम्बन्धेन पटाभाववत्त्वस्य घटत्वाभाववत्त्वस्य च, वह्नौ विरहात्पटाभाववद्भिन्नत्वस्य घटत्वाभाववद्भिन्नत्वस्य च प्रतियोगितावच्छेदकस्य वह्नौ सत्त्वात् स्वप्रतियोगितावच्छेदकावच्छिन्नस्य वह्नेः संयोगेनाधिकरणत्वस्यैव पर्वते सत्त्वात्तत्र घटाभावस्य साध्यतावच्छेदकसंयोगसम्बन्धेनापि प्रतियोगिव्यधिकरणत्वासम्भवाद् व्याप्तिः सम्भवेदेवेति।

अत्र समादधाति यदभावमात्रप्रतियोगिकाभावस्यैवाधिकरणस्वरूपत्वादुक्ताभावस्य भावाभावोभयप्रतियोगिकत्वेन दोषासम्भवाद् विशेषरूपेण संसर्गत्वानभ्युपगमाच्च विशेषरूपेण संसर्गतामभ्युपगम्य प्रदत्तदोषस्यौचित्यविरहात्।

यद्वा रूपवान् पृथिवीत्वादित्यत्र विषयितया रूपत्वविशिष्टाभावमादाय प्रसक्ताव्याप्तिवारणाय साध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नप्रतियोगितावच्छेदकनिष्ठावच्छेदकताकनिरूपकताकाधिकरणतावदन्यत्वस्य हेत्वधिकरणे वाच्यतया नोक्तदोषसम्भवः, तत्र पटाभाववद्भिन्नत्व-घटाभावत्ववद्भिन्नत्वरूपप्रतियोगितावच्छेदकनिष्ठावच्छेदकतायाः स्वरूपसम्बन्धावच्छिन्नत्वेन साध्यतावच्छेदकताघटकसमवायसम्बन्धावच्छिन्नत्वविरहात्।

न च तथाविवक्षासत्त्वे वह्नित्वप्रतियोगिकसमवायस्य साध्यतावच्छेदकताघटकसम्बन्धात्मस्थलेऽव्याप्तिः स्यात्तत्र घटाभावादेरुक्तप्रतियोगिव्यधिकरणत्वासम्भवात्तस्मात्तत्राव्याप्तिवारणाय पारिभाषिकमेव साध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नत्वं वाच्यम्, पारिभाषाषिकञ्च तत् साध्यतावच्छेदकताघटकसम्बन्धेतरसम्बन्धावच्छिन्नावच्छिन्नत्वसाध्यतावच्छेदकतासामानाधिकरण्योभयसम्बन्धेन साध्यतावच्छेदकताविशिष्टान्यत्वरूपम् विषयितया रूपत्वविशिष्टाभावीयावच्छेदकतायां साध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नत्व[विरहेण], साध्यतावच्छेदकतासामानाधिकरण्यस्य च सत्त्वेन न साध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नत्वम्, साध्यतावच्छेदकताघटकसम्बन्धेतरविषयित्वसम्बन्धावच्छिन्नत्वात्।

तथा च पटाभाववद्भिन्नत्व-घटाभावत्ववद्भिन्नत्वरूपोक्ताभावप्रतियोगितावच्छेदकनिष्ठावच्छेदकतायाः साध्यतावच्छेदकताघटकसमवायेतरस्वरूपसम्बन्धावच्छिन्नत्वेऽपि साध्यतावच्छेदकतासामानाधिकरण्यविरहात् पारिभाषिकस्य उक्तस्य साध्यतावच्छेदकताविशिष्टान्यत्वरूपस्यो[प]पत्त्योक्तदोषसम्भवात्। वह्नित्वप्रतियोगिकसमवायसम्बन्धेन वह्नित्वविशिष्टस्य साध्यतास्थले घटत्वनिष्ठावच्छेदकताया साध्यतावच्छेदकतासामानाधिकरण्यविरहेण साध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नत्वस्योक्तविशिष्टान्यत्वरूपस्यो[प]पत्त्या तत्र घटाद्यभावस्य प्रतियोगिव्यधिकरणत्वो[प]पत्त्या नाव्याप्तिसम्भवः।

अत्रोच्यते। साध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नावच्छेदकताकनिरूपकताकाधिकरणत्वीय-स्वरूपसम्बन्धावच्छिन्नप्रतियोगितावच्छेदकावच्छिन्नाधिकरणत्वाभावस्यैव विवक्षितत्वात् पारिभाषिक-तद्विवक्षायाः प्रयोजनाभावात्।

वह्नित्वप्रतियोगिकसमवायेन वह्नित्वविशिष्टस्य साध्यतास्थले उक्तसम्बन्धेन अधिकरणत्वस्य प्रसिद्ध्या घटाद्यभावप्रतियोगितावच्छेदकावच्छिन्नाधिकरणत्वस्य तादृशसम्बन्धेन हेत्वधिकरणे पर्वतादौ विरहान्नानुपपत्तिः।

साध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नत्वस्य पारिभाषिकस्य विवक्षाविरहेऽपि साध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नप्रतियोगितावच्छेदकनिष्ठावच्छेदकताकनिरूपकताकाधिकरणत्वाभावस्यैव प्रतियोगिवैयधिकरण्यघटकतया निवेशेऽपि वह्नित्वाधिकरणत्वविशिष्टस्य साध्यतास्थले स्वरूपसम्बन्धस्य साध्यतावच्छेदकताघटकसम्बन्धतया तत्र घटाभावनिष्ठपटाभाववद्भिन्नभेदस्य घटाभावत्ववद्भिन्नभेदस्य चैकतया तदीयप्रतियोगितावच्छेदकतायां साध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नत्वस्य सत्त्वेनाव्याप्तिः स्यादिति।

अत्रान्ये प्रलपन्ति यत् प्रतियोगितायां साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वे स्वप्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगिवैयधिकरण्यस्य साध्यतावच्छेदकसम्बन्धेन प्रतियोगिवैयधिकरण्यपर्यवसायितयाऽग्रे विवक्षणीयेत्यादेरत्रैव तात्पर्येण संयोगेन साध्यतास्थले प्रतियोगितायां भेदत्वनिरूपितायां साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वविरहेण दोषासम्भवादिति।[२३६]

तत्त्वालोकः – तन्न साधु। साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वस्य भावरूपत्वे भेदत्वनिरूपितप्रतियोगित्वमादाय दोषासम्भवेन अत्यन्ताभावत्वनिरूपितत्वस्य वैयर्थ्यापत्तेः, अभावरूपत्वे च वह्नित्वाधिकरणत्वविशिष्टसाध्यकेऽपि दोषतादवस्थ्यात्।

अव्याप्यवृत्त्यधिकरणताया अव्याप्यवृत्तित्वे तादृशाधिकरणत्वाभावस्य विवक्षितुमशक्यत्वाद् भेदस्य वह्नित्वप्रतियोगिकसमवायेन वह्नित्वविशिष्टसाध्यकस्थलेऽप्रसिद्धत्वात्।

अवच्छेदकतायां साध्यतावच्छेदकनिष्ठत्वस्य निरूपकत्वे साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वस्य विशेषणत्वे घटभिन्नं कपालत्वादित्यादावपि घटभेदमादाय लक्षणसम्भवाच्चेति।[२३७]

प्रकाशः – पूर्वखण्डेनोपपादितोऽन्येषां प्रलापः 'तन्न साधु' इत्यादिना निरस्यते।

साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वस्य भावरूपत्वे = साध्यतावच्छेदकसम्बन्धातिरिक्तसम्बन्धानवच्छिन्नत्वरूपत्वविरहे, भेदत्वनिरूपितप्रतियोगितायां साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वविरहेण भेदत्वनिरूपितप्रतियोगितामादाय दोषासम्भवेन प्रतियोगितायामत्यन्ताभावत्वनिरूपितत्वविशेषणस्य वैयर्थ्यं स्यात्, साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वस्याभावरूपत्वे = साध्यतावच्छेदकसम्बन्धातिरिक्तसम्बन्धानवच्छिन्नत्वरूपत्वे, भेदत्वनिरूपितप्रतियोगितायां सम्बन्धानवच्छिन्नत्वस्वीकारपक्षे प्रति-

योगितायामत्यन्ताभावत्वनिरूपितत्वविशेषणसार्थक्यसम्भवेऽपि वह्नित्वाधिकरणत्वविशिष्टसाध्यके पूर्वोपपादितदिशा = घटाभावनिष्ठपटाभाववद्भिन्नभेदं घटाभावत्ववद्भिन्नभेदञ्चादाय, दोषतादवस्थ्यात् तदीयप्रतियोगितावच्छेदकनिष्ठावच्छेदकतायाः साध्यतावच्छेदकताघटकस्वरूपसम्बन्धावच्छिन्नत्वाद् वह्नित्वाधिकरणत्वविशिष्टस्य साध्यतास्थले वह्नित्वाधिकरणत्वस्यापि साध्यतावच्छेदकतया तदवच्छेदकताघटकसम्बन्धत्वस्य स्वरूपसम्बन्धे सत्त्वात्।

अपरोऽपि दोष उपस्थाप्यते। अव्याप्यवृत्त्यधिकरणताया अव्याप्यवृत्तित्वे = यो हि वह्न्यादिरव्याप्यवृत्तिस्तदधिकरणताऽपि अव्याप्यवृत्तिरेव तादृशस्थितौ, तादृशाधिकरणत्वाभावस्य = साध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नावच्छेदकताकनिरूपकताकाधिकरणत्वीय-स्वरूपसम्बन्धावच्छिन्नप्रतियोगितावच्छेदकावच्छिन्नाधिकरणत्वाभावस्य, हेत्वधिकरणे प्रतियोगिवैयधिकरण्यघटकताया विवक्षितुमशक्यत्वात्।

अव्याप्यवृत्त्यधिकरणताया अपि अव्याप्यवृत्तित्वेन तादृशाधिकरणत्वाभावस्य हेत्वधिकरणे प्रतियोगिवैयधिकरण्यघटकतया विवक्षितुमशक्यत्वेऽपि तादृशाधिकरणत्ववद्भेदस्यैव हेत्वधिकरणे प्रतियोगिवैयधिकरण्यघटकताविवक्षा स्यादिति चेदुच्येत।

तत्रोच्यते। भेदस्य वह्नित्वप्रतियोगिकसमवायेन वह्नित्वविशिष्टसाध्यकेऽप्रसिद्धत्वादिति। वह्नित्वप्रतियोगिकसमवायेन वह्नित्वविशिष्टसाध्यकस्थले साध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नावच्छेदकताकनिरूपकताकाधिकरणत्वीय-स्वरूपसम्बन्धेनाधिकरणत्ववद्भेदस्याप्रसिद्धत्वादिति तदर्थः। घटत्वादिनिष्ठावच्छेदकताकनिरूपकताकाधिकरणत्वीय-स्वरूपसम्बन्धावच्छिन्नाधिकरणत्ववद्भेदस्यातथात्वात्तत्र घटत्वादिनिष्ठावच्छेदकतायाः शुद्धसमवायादिसम्बन्धावच्छिन्नत्वेन साध्यतावच्छेदकताघटकवह्नित्वप्रतियोगिकसमवायानवच्छिन्नत्वादिति।

पुनरुच्यते अवच्छेदकतायां साध्यतावच्छेदकनिष्ठत्वस्य निरूपकत्वे साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वस्य विशेषणत्वे घटभिन्नं कपालत्वादित्यादावपि घटभेदमादाय लक्षणसम्भवाच्चेति।[२३७]

तत्त्वालोकः – 'अभावसाध्यकाव्याप्तितादवस्थ्यमि'[१]ति। यद्यपि पूर्वक्षणविशिष्टघटाभावाभावसाध्यकधूमे घटाभावस्य प्रतियोगिव्यधिकरणस्य

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. १७

साध्याभावात्मकत्वेन साध्यतावच्छेदकतत्प्रतियोगितावच्छेदकत्वनिबन्धनाप्यव्याप्तिः प्रदर्शयितुमुचिता, तथापि प्रतियोगिव्यधिकरणाभावा[1]प्रसिद्धावेवोक्तरीत्याऽव्याप्तिस्सम्भवति, तत्प्रसिद्धिश्च न कथञ्चिदप्येतत्कल्प इति तदुपेक्षा कृता।[२३८]

प्रकाशः—जगदीशेन 'सम्प्रदाय इत्यस्वरस' इत्युल्लिख्य तद्बीजन्तूक्तविवक्षायामपि सर्वेषां हेतुसमानाधिकरणात्यन्ताभावानामत्यन्ताभावत्वनिरूपकेण = पूर्वक्षणादिवृत्तित्वविशिष्टस्वाभावात्मकेन, प्रतियोगिना समं सामानाधिकरण्यादभावसाध्यकाव्याप्तेस्तादवस्थ्यमिति यदुपन्यस्तम्।

तत्र शङ्कते तत्त्वालोककृत् यत् पूर्वक्षणवृत्तित्व [विशिष्ट] घटाभावाभावसाध्यकधूमहेतुकस्थले घटाभावस्य प्रतियोगिव्यधिकरणस्य साध्याभावात्मकत्वेन साध्यतावच्छेदके तत्प्रतियोगितावच्छेदकत्वनिबन्धनाप्यव्याप्तिः प्रदर्शयितुमुचिता इति। अत्र स्वयं समाधानं करोति यत् तथापि प्रतियोगिव्यधिकरणाभावाप्रसिद्धावेवोक्तरीत्याऽव्याप्तिः सम्भवति तत्प्रसिद्धिश्च न कथञ्चिदपि इति तदुपेक्षा कृतेति।[२३८]

तत्त्वालोकः– 'न च दैशिके'त्यादि[2]। अथ दैशिकविशेषणतया गोध्वंसविरोधिनोः समवायसंयोगसम्बन्धावच्छिन्नप्रतियोगिताकाभावयोः साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकत्वविरहात्तादृशप्रतियोगिताकस्य कालिकसम्बन्धावच्छिन्नगवात्यन्ताभावस्य लक्षणघटकस्य प्राचां मते कालिकसम्बन्धावच्छिन्नध्वंसाद्यभावात्मकत्वेन स्वप्रतियोगितावच्छेदककालिकेन स्वप्रतियोगितावच्छेदकावच्छिन्नध्वंसविरोधित्वसम्भवात् साध्यतावच्छेदकसम्बन्धेन प्रतियोगिवैयधिकरण्यघटितकल्पे समवायसम्बन्धावच्छिन्नगवाभावस्य प्रतियोगिवैयधिकरण्यस्यैवासत्त्वेन तस्य कालावृत्तित्वसम्पत्तये स्वरूपेण गोध्वंससत्त्वोपपादानस्य व्यर्थत्वाच्चेदमसङ्गतमिति चेद्।

मैवम्। सामान्यतो हि स्वसत्ताया न स्वप्रतियोगितावच्छेदकसम्बन्धेन स्वप्रतियोगितावच्छेदकावच्छिन्नविरोधित्वम्, तथा सति गगनाभावस्य केवलान्वयित्वानुपपत्तेः, कालिकसम्बन्धावच्छिन्नस्वाभावस्यापि स्वप्रतियोगितावच्छेदकावच्छिन्नत्वादिति तत्तदभावत्वेन स्वसत्तायां तत्तदभावत्वनिरूपितप्रतियोगितावच्छेदकसम्बन्धेन तन्निरूपितप्रतियोगितावच्छेदकावच्छिन्नाधिकर-

---

१. 'भावप्रसिद्धावे' इत्यादिप्राचीनमुद्रितपुस्तके पाठः।

२. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. १८

णत्वस्यैव विरोधित्वं वाच्यम्, तथा च गवात्यन्ताभावत्वेन सत्तायां कालिकेन गोध्वंसवत्त्वस्य न विरोधित्वमुक्तविरोधितावच्छेदकरूपानाक्रान्तत्वात्।

तत्तत्प्रतियोगिकाभावत्वेन स्वसत्तायां तत्तत्प्रतियोगिकध्वंसत्वेनातिरिक्तविरोधित्वञ्च न कालिकेन, कपालेऽपि समवायेन गवात्यन्ताभावस्यासत्त्वप्रसङ्गादिति स्वरूपेणैव तस्य वाच्यतया दैशिकविशेषणतया काले तत्सत्त्व एव गवात्यन्ताभावस्यासत्त्वमुपपद्यत इति नासङ्गतिः।

न चोक्तविरोधितायां स्वरूपसम्बन्धावच्छिन्नगवात्यन्ताभावस्य गोध्वंसविरोधित्ववारणाय प्रतियोगितायां सम्बन्धविशेषावच्छिन्नत्वस्य प्रवेशनीयतया समवायादिसम्बन्धावच्छिन्नगवात्यन्ताभावस्वरूपेण तस्य विरोधित्वेऽपि कालिकसम्बन्धावच्छिन्नाभावे कालिकेन तस्य विरोधित्वे न क्षतिरिति वाच्यम्, लाघवानुरोधेन केवलान्वयिभिन्नत्वस्यैव तत्र प्रवेश्यत्वात्।

भट्टाचार्येण कालिकेन ध्वंसविरोधित्वप्रतिपादनञ्च तत्तत्प्रतियोगिकाभावत्वेन[1] स्वसत्तायास्तत्तत्प्रतियोगिनेव प्रतियोगितावच्छेदकसम्बन्धेन तत्तत्प्रतियोगिकध्वंसप्रागभावाभ्यामपि प्रतियोगिभ्यामनुभवानुरोधेन विरोधित्वमाहृत्येति बोध्यम्।[२३९]

प्रकाशः– व्याप्तिलक्षणे दर्शितप्रयोज[न]तोऽत्यन्ताभावस्य प्रवेशे सति दीधितिकृता 'अथे'त्यादिना कालिकसम्बन्धेन गोसाध्यकगोत्वहेतुकस्थले अतिव्याप्तिराशङ्किता। उपपादितञ्च 'प्रलयस्य गोध्वंसवत्त्वेन गवात्यन्ताभावानधिकरणत्वादि'-त्यनेन।[2] तत्र जगदीशेनाशङ्कितम् 'न च दैशिकविशेषणतया यद् गोध्वंसस्याधिकरणं तत्रैव गवात्यन्ताभावस्य विरोधात् [विरोधित्वात्] कालिकेन गोध्वंसवत्यपि काले गवात्यन्ताभावसत्त्वे विरोधाभावान्नातिव्याप्तिरि'ति। तत्समाधानञ्च तदग्रे जगदीशेन स्वेनैव कृतं 'प्राचां मते भूतलादिदेशस्येव कालस्यापि दैशिकविशेषणतया गवादिध्वंसवत्त्वादि'त्युल्लिख्य।[3]

तत्र तत्त्वालोककृता 'अथ दैशिकविशेष[ण]तये'त्यादिना 'व्यर्थत्वाच्चे'त्यन्तेनासङ्गतिः शङ्क्यते। तत्रोच्यते यद् दैशिकविशेषणतया गोध्वंसविरोधिनोः समवाय-

१. तत्तत्प्रतियोगिकत्वविशिष्टाभावत्वेने'ति प्राचीनमुद्रितपुस्तके पाठः।

२. प्रकृतग्रन्थः (प्रथमो भागः), दीधितिमूलम्, पृ. १७

३. तदेव, जागदीशीमूलम्, पृ. १८

संयोगसम्बन्धावच्छिन्नप्रतियोगिताकगवात्यन्ताभावयोः साध्यतावच्छेदककालिकसम्बन्धावच्छिन्नप्रतियोगिताकत्वविरहात् तादृशप्रतियोगिताक = साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताक, -कालिकसम्बन्धावच्छिन्नगवात्यन्ताभावस्य लक्षणघटकस्य प्राचां मते कालिकसम्बन्धावच्छिन्नध्वंसाद्यभावात्मकत्वेन[१] स्वप्रतियोगितावच्छेदककालिकसम्बन्धेन स्वप्रतियोगितावच्छेदकावच्छिन्नध्वंसविरोधित्वसम्भवात्, साध्यतावच्छेदकसम्बन्धेन प्रतियोगिवैयधिकरण्यघटितकल्पे समवायसम्बन्धावच्छिन्नप्रतियोगिताकगवात्यन्ताभावस्य प्रतियोगिवैयधिकरण्यस्यैव = साध्यतावच्छेदककालिकसम्बन्धेन प्रतियोगिवैयधिकरण्यस्यैव, अभावेन तस्य = समवायसम्बन्धावच्छिन्नप्रतियोगिताकगवात्यन्ताभावस्य, स्वरूपेण गवात्यन्ताभावस्येति फलितस्य, कालावृत्तित्वसम्पत्तये स्वरूपसम्बन्धेन काले गोध्वंस-सत्त्वोपपादनस्य व्यर्थत्वाच्चोक्तकथनं जगदीशस्यासङ्गतम्।

स्वरूपेण गवात्यन्ताभावस्य साध्यतावच्छेदकसम्बन्धेन प्रतियोगिवैयधिकरण्यघटितकल्पे प्रतियोगिवैयधिकरण्यविरहादेव न लक्षणघटकता। ततश्च तस्य लक्षणघटकत्वाभावाय स्वरूपेण गोध्वंसस्य काले सत्त्वोपपादनं व्यर्थम्। यश्चाभाव[:] = कालिकसम्बन्धावच्छिन्नप्रतियोगिताको गवात्यन्ताभावः, साध्यतावच्छेदकसम्बन्धेन प्रतियोगिवैयधिकरण्यघटितकल्पे प्रतियोगिव्यधिकरणो भवितुमर्हति, तस्य स्वप्रतियोगितावच्छेदकसम्बन्धेन स्वप्रतियोगितावच्छेदकावच्छिन्नेन ध्वंसेन विरोधादेव व्यावृत्तिरतोऽत्र जगदीशोक्ते शङ्कासमाधाने असङ्गते इत्याशयः।

अत्र समाहितम् 'मैवमि'त्यादिना। तत्रायमाशयो यदुक्तासङ्गतिस्तदैव भवेद् यदि सामान्यतः स्व(अभाव)सत्तायाः स्वप्रतियोगितावच्छेदकसम्बन्धेन स्वप्रतियोगितावच्छेदकावच्छिन्नविरोधित्वं भवेत्, किन्तु तथा विरोधित्वन्नास्ति, यतो हि तथा विरोधित्वस्वीकारे गगनाभावस्य केवलान्वयित्वन्नोपपद्येत, कालिकसम्बन्धावच्छिन्नस्वाभावस्यापि स्व = गगनाभाव, -प्रतियोगितावच्छेदकावच्छिन्नत्वात्, तृतीयाभावस्य प्रथमाभावात्मकतया तृतीयाभावप्रतियोगिनो द्वितीयाभावस्य कालिकसम्बन्धावच्छिन्नगगनाभावाभावस्य उक्तदिशा गगनाभावप्रतियोगिन[नो] गगनाभावविरोधिनश्च गगनाभावाधिकरणे सत्त्वात्।

१. कालिकसम्बन्धावच्छिन्नप्रतियोगिताको गवात्यन्ताभावः प्राचाम्मते कालिकसम्बन्धावच्छिन्नगोध्वंसप्रतियोगिताकाभावस्वरूप इत्याशयः।

अतो गगनाभावस्य केवलान्वयित्वानुपपत्तिभिया उक्तदिशा सामान्यतो नैव विरोधित्वम्, किन्तु तत्तदभावत्वेन स्वसत्तायां तत्तदभावत्वनिरूपितप्रतियोगितावच्छेदकसम्बन्धेन तन्निरूपितप्रतियोगितावच्छेदकावच्छिन्नाधिकरणत्वस्यैव विरोधित्वं वाच्यम्। एवं विरोधित्वे सति गवात्यन्ताभावस्य गवात्यन्ताभावत्वेन स्वसत्तायां कालिकेन गोध्वंसस्य उक्तविरोधितावच्छेदकरूपाक्रान्तत्वविरहान्न विरोधित्वम्।

तत्तत्प्रतियोगिकाभावत्वेन स्वसत्तायां तत्तत्प्रतियोगिकध्वंसस्यातिरिक्तविरोधित्वञ्च न कालिकेन, कपालेऽपि समवायसम्बन्धावच्छिन्नप्रतियोगिताकगवात्यन्ताभावस्य स्वरूपेणासत्त्वप्रसङ्गात्, कालिकेन गोध्वंसस्य तत्र सत्त्वादत उक्तस्य गवात्यन्ताभावस्य स्वसत्ताया स्वरूपसम्बन्धेनैव गोध्वंसस्य विरोधित्वस्य वाच्यतया ततश्च काले स्वरूपसम्बन्धेन गोध्वंसस्य सत्त्व एव तत्र गवात्यन्ताभावस्य स्वरूपेणासत्त्वमुपपद्यते। अतो नोक्तासङ्गतिः।

अत्र 'न चोक्तविरोधितायामि'त्यादिना पुनः शङ्कते यत् तत्तत्प्रतियोगिकाभावत्वेन स्वसत्तायां तत्तत्प्रतियोगिकध्वंसस्यातिरिक्तविरोधित्वं यदुक्तं तत्र स्वरूपसम्बन्धावच्छिन्नगवात्यन्ताभावस्य गोध्वंसविरोधित्ववारणाय = कालिकेन गोध्वंसविरोधित्ववारणाय, प्रतियोगितायां सम्बन्धविशेषावच्छिन्नत्वस्य प्रवेशनीयतया समवायादिसम्बन्धावच्छिन्नप्रतियोगिताकगवात्यन्ताभावे स्वरूपेण गोध्वंसस्य विरोधित्वेऽपि कालिकसम्बन्धावच्छिन्नाभावे साध्यतावच्छेदककालिकसम्बन्धावच्छिन्नप्रतियोगिताकगवात्यन्ताभावे कालिकेन गोध्वंसस्य विरोधित्वे न क्षतिरिति वाच्यम्।

तथा च यथा स्वरूपेण गवात्यन्ताभावसत्तायां स्वरूपेण गोध्वंसस्य विरोधित्वं तथा कालिकेन गवात्यन्ताभावसत्तायां कालिकेन गोध्वंसस्य विरोधित्वसम्भवात्, 'यद्यप्येवमपि नातिव्याप्तिसम्भवः, कालिकसम्बन्धावच्छिन्नगवात्यन्ताभावस्यैव प्रलये कालिकसम्बन्धेन वर्तमानत्वादि'ति[१] अग्रे गत्वा यदुक्तं जगदीशेन तदसङ्गतं स्यादिति शङ्काशयः।

अत्र समाधीयते 'लाघवानुरोधेन केवलान्वयिभिन्नत्वस्यैव तत्र (विरोधित्वे) प्रवेश्यत्वादि'त्यनेन। तथा च लाघवात् सामान्यत एव स्व(केवलान्वयि गगनाभावादिभिन्नाभाव)सत्तायाः स्वप्रतियोगितावच्छेदकसम्बन्धेन स्वप्रतियोगितावच्छेदकावच्छिन्नस्य विरोधित्वम्, न तु तत्तदभावत्वेन स्वसत्तायां तत्तदभावत्वनिरूपितप्रतियोगिता-

---

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. १८

वच्छेदकसम्बन्धेन तन्निरूपितप्रतियोगितावच्छेदकावच्छिन्नाधिकरणत्वस्य विरोधित्वम्, गौरवात्, नापि तत्तत्प्रतियोगिकाभावत्वेन स्वसत्तायां तत्तत्प्रतियोगिकध्वंसस्यातिरिक्तविरोधित्वमपि, गौरवादेव।

ततश्च कालिकसम्बन्धावच्छिन्नात्यन्ताभावे कालिकेन ध्वंस्य न विरोधित्वम्।

भट्टाचार्येण गदाधरेण स्वरूपेण कालिकेन वा गवात्यन्ताभावादिकम्प्रति कालिकेन गवादिध्वंसस्य विरोधित्वं प्रतिपादितम्[1] तत्तु तत्तत्प्रतियोगिकाभावत्वेन स्वसत्तायास्तत्तत्प्रतियोगिना इव प्रतियोगितावच्छेदकसम्बन्धेन तत्तत्प्रतियोगिकध्वंसप्रागभावाभ्यामपि प्रतियोगिभ्यामनुभवानुरोधेन विरोधित्वमादृत्येति बोध्यम्।[२३९]

तत्त्वालोकः – न च युज्यते चायमेव पक्षोऽन्यथा स्वरूपेण गो[2]ध्वंसासत्त्वानिबन्धनपूर्वपक्षस्य स्वरूपेण तत्सत्त्वप्रतिपादनेनैव समाहिततया समवायादिसम्बन्धावच्छिन्नप्रतियोगिताकस्य तेन सम्बन्धेन कालावृत्तिजन्याभावस्यापि कालावृत्तित्वप्रसङ्गादिति वाच्यम्, इदानीं तदाशङ्कनस्य कालिकसम्बन्धावच्छिन्नगवात्यन्ताभावस्य कालावृत्तित्वप्रसङ्गेनोत्तरग्रन्थप्रतिपाद्येन समानत्वात्, किञ्चिदग्रे स्वरूपेण ध्वंससत्त्वङ्काले प्रतिपादितवतो भट्टाचार्यग्रन्थेप्युक्तपर्यनुयोगस्य समानत्वाच्च।

न चैतदस्वरसेनैवाथवेत्यादिना प्रतियोगिवैयधिकरण्यघटितकल्पाभिप्रायकत्वं संसर्गाभावमात्रोक्तावपीत्यादिग्रन्थस्य वक्ष्यतीति वाच्यम्। अथवेत्यादावेव निर्भरत्ववर्णनेऽथ यदेत्यादिदीधितिशङ्काग्रन्थस्य दैशिकविशेषणतया वृत्तित्वघटितलक्षणाभिप्रायकताया वर्णिततया शङ्कोत्तरग्रन्थस्य भिन्नावलम्बनत्वापत्त्या न्यूनतापत्तेः।

अथ अथवेत्यादिग्रन्थस्य सम्यक् पर्यालोचने अथ यदेत्यादिपूर्वपक्षाशयस्य संसर्गाभावमात्रोक्तावपीति मध्यमपक्षाशयस्य च तत्रैव प्रकाशमानतया तस्य संसर्गाभावमात्रोक्तावपीति मध्यमपक्षव्याख्योक्तस्वरूपसम्बन्धेन ध्वंसवृत्तित्वकल्पापेक्षया न कल्पान्तरत्वमपित्वथ यदेत्यादिग्रन्थसमुदितव्याख्यापेक्षयैवेति न न्यूनतावसरः।

---

१. अनुमानगादाधरी (प्रथमो भागः), सिद्धान्तलक्षणप्रकरणम्, पृ. ३३६

२. 'गो' इति नास्ति प्राचीनमुद्रितपुस्तके।

अत एवाथ यदेत्याद्याशङ्कायां प्रतियोगिवैयधिकरण्याघटितकल्पाभिप्रायक उत्तरग्रन्थे तच्छून्ये चेत्यादिप्रतियोगिवैयधिकरण्यसद्भावप्रतिपादनग्रन्थासङ्गतिरपि नेति चेदस्त्वेतद्ग्रन्थस्यातिरमणीयत्वन्तथापि जगदीशग्रन्थस्यायुक्तता च न प्राप्ता, भवति च सैव परिहरणीयेति परिहृता, इदानीं तदाशङ्कनेत्यादिना अत एवेत्यादिनानुपदोक्तासङ्गतिश्च परिहरिष्यत इत्यलम्।[२४०]

प्रकाशः – अत्रोच्यते। न च, युज्यतेऽयमेव पक्षः = गदाधर पक्ष एव युक्तः, अन्यथा स्वरूपेण ध्वंसासत्त्वनिबन्धनपूर्वपक्षस्य स्वरूपेण तत्सत्त्वप्रतिपादनेनैव समाहिततया समवायादिसम्बन्धावच्छिन्नप्रतियोगिताकस्य तेन सम्बन्धेन = समवायादिसम्बन्धेन, कालावृत्तिगोघटादिजन्याभावस्यापि कालावृत्तित्वप्रसङ्गात्।

लाघवानुरोधाज्जगदीशसम्मततया दर्शितसामान्यतो विरोधित्वपक्षे तादृशाभाव = गोघटादिजन्याभाव, - सत्तायां तादृशाभावप्रतियोगिनो विरोधित्वसम्भवात्, भट्टाचार्यसम्मतपक्षे तु तत्तत्प्रतियोगिकाभावत्वेन विशिष्यैव विरोधित्वं न तु सामान्यतोऽतो नोक्ताभावस्य कालवृत्तित्वप्रसक्तिः।

अत्रोच्यते यदुक्ताभावस्य कालावृत्तित्वप्रसक्तितो भट्टाचार्यपक्षस्यैव युक्तता, जगदीशपक्षस्यायुक्तता वक्तुं नैव शक्या यतो हि इदानीं तदाशङ्कनस्य दर्शिताभावस्य कालावृत्तित्वप्रसक्तेराशङ्कनस्य उत्तरग्रन्थप्रतिपाद्येन कालिकसम्बन्धावच्छिन्नगवात्यन्ताभावस्य कालावृत्तित्वप्रसङ्गेन समानत्वात् तथा किञ्चिदग्रे स्वरूपेण गवादिध्वंससत्त्वं काले प्रतिपादितवतो भट्टाचार्यग्रन्थेऽप्युक्तपर्यनुयोगस्य समानत्वाच्च।

अनन्तरं पुनः शङ्कते 'न चे'त्यादिना यदेतदस्वरसेनैव उक्ताभावस्य कालावृत्तिप्रसङ्गरूपदोषस्य पूर्वोपपादितपक्षे सद्भावेनैव 'अथवे'त्यादिना 'संसर्गाभावमात्रोक्तावपी'त्यादिग्रन्थस्य प्रतियोगिवैयधिकरण्यघटितकल्पाभिप्रायकत्वं वक्ष्यतीति।

प्रतियोगिवैयधिकरण्याघटिते व्याप्यवृत्तिसाध्यकस्थलीयलक्षणेऽवश्यं दैशिकविशेषणतयाऽभावे हेतुसामानाधिकरण्यस्य प्रवेशसत्त्वात्तत्र कालिकसम्बन्धावच्छिन्नगवात्यन्ताभावस्य कालिकेन सत्त्वन्नातिव्याप्तिनिवारकं भवितुमर्हतीति जगदीशेन पूर्वमुक्तत्वादत्र प्रतियोगिवैयधिकरण्यघटितकल्पाभिप्रायकत्वं ससंसर्गाभावमात्रोक्तावपीत्याद्युत्तरग्रन्थस्योक्तमिति बोध्यम्।

अत्र समाधीयते यदथवेत्यादावेव निर्भरत्ववर्णनेऽथ यदेत्यादिदीधितिशङ्काग्रन्थस्य दैशिकविशेषणतया वृत्तित्वघटितलक्षणाभिप्रायकताया वर्णिततया शङ्कोत्तरग्रन्थस्य भिन्नावलम्बनतया न्यूनतापत्तेरिति।

'अथवे'त्यादिना संसर्गाभावमात्रोक्तावपीत्यादिग्रन्थस्य प्रतियोगिवैयधिकरण्यघटितकल्पाभिप्रायकत्वं वक्ष्यमाणम्। अथ यदेत्यादिदीधितिशङ्काग्रन्थस्य दैशिकविशेषणतया वृत्तित्वघटितलक्षणाभिप्रायकतोक्ता, अतः शङ्कोत्तरग्रन्थस्य भिन्नावलम्बनता ततश्च न्यूनता इति तदाशयः।

अत्र पुनः अथेत्यादिना शङ्कते। अथाथवेत्यादिग्रन्थस्य सम्यक्पर्यालोचने अथ यदेत्यादिदीधितिशङ्काशयस्य संसर्गाभावमात्रोक्तावपीति मध्यमपक्षाशयस्य च तत्रैव एकत्रैव प्रकाशमानतया तस्य संसर्गाभावमात्रोक्तावपीति मध्यमव्याख्यातुः स्वरूपसम्बन्धेन ध्वंसवृत्तित्वकल्पा[पेक्षया] न कल्पान्तरत्वम्, अपि तु अथ यदेत्यादिग्रन्थसमुदितव्याख्यापेक्षयैवेति न न्यूनता = न भिन्नावलम्बनता। ततश्च न न्यूनतेति भावः, उभयोः स्वरूपसम्बन्धेन वृत्तित्वघटितलक्षण एव तात्पर्यादिति शङ्का। अत एव न्यूनताया अवसराभावादेव अथ यदेत्याद्याशङ्काया प्रतियोगिवैयधिकरण्याघटितकल्पाभिप्रायक उत्तरग्रन्थे तच्छून्ये चेत्यादिप्रतियोगिवैयधिकरण्यसद्भावप्रतिपादनग्रन्थासङ्गतिरपि न।

'अथ यदा गोत्वं तदा गौरि'त्यादिशङ्काया उत्तरग्रन्थः 'प्रतियोगिमत इव ध्वंसादिमतोऽपि कालस्यात्यन्ताभाववत्त्वेऽविरोधात्, अन्यथाऽत्यन्ताभावस्य कालमात्रावृत्तित्वप्रसङ्गादि'त्यादिः 'तच्छून्ये च काले तदभावस्य प्रतियोगिव्यधिकरणत्वादि'त्यन्तो दीधितिग्रन्थः[१]। तन्मध्ये जगदीशेन 'नन्वेवं प्रतियोगिवैयधिकरण्यघटितस्याव्याप्यवृत्तिसाध्यकस्थलीयलक्षणस्य कालो गोमान् गोत्वादित्यादाव[ति]व्याप्तिरेव, सृष्टिकाले गवात्य[न्ता]भावस्य प्रतियोगिसमानाधिकरणतया लक्षणाघटकत्वादत आह– 'तच्छून्ये' इति यदुपन्यस्तम्[२], तेनेदमायातं यदथ यदेत्याद्याशङ्काः[शङ्कायाः] 'प्रतियोगिमत इव ध्वंसादिमतोऽपि, कालस्यात्यन्ताभाववत्त्वेऽविरोधादि'त्युत्तरग्रन्थः प्रतियोगिवैयधिकरण्याघटितकल्पाभिप्रायक एव, ततश्च तत्कल्पे 'तच्छून्ये चे'त्यादिप्रतियोगिवैयधिकरण्यसद्भावप्रतिपादनग्रन्थासङ्गतिर्या प्राप्ता साऽपि न, अथ यदेत्यादिग्रन्थसमुदितव्याख्यापेक्षया तथासद्भावेऽपि संसर्गाभावमात्रोक्तावपीति मध्यमपक्षव्याख्योक्तस्वरूपसम्बन्धेन ध्वंसवृत्तित्वकल्पापेक्षया उक्तासङ्गतेरभावादिति तदाशयः।

अत्रोच्यते 'अस्त्वेतद्ग्रन्थस्यातिरमणीयत्वन्तथापि जगदीशग्रन्थस्यायुक्तता न प्राप्ता, भवति च सैव परिहरणीयेति परिहृता, इदानीं तदाशङ्कनेत्यादिना[३], अत एवेत्यादिनानुपदोक्तासङ्गतिश्च परिहरिष्यत इत्यलमि'ति।[२४०]

---

१. प्रकृतग्रन्थः (प्रथमो भागः), दीधितिमूलम्, पृ. १७-१८
२. तदेव, जागदीशीमूलम्, पृ. २०
३. प्रकृतमूलतत्त्वालोकस्थेन

तत्त्वालोकः – **'विरोधाभावादि'ति[1]। ध्वंसस्य विशेषणतया प्रतियोगिसमवायिनियतत्वात्कालस्यातथात्वादिति भावः।[२४१]**

प्रकाशः – जगदीशेन 'न च दैशिकविशेषणतया यद्गोध्वंसस्याधिकरणन्तत्रैव गवात्यन्ताभावस्य विरोधात् कालिकसम्बन्धेन गोध्वंसवत्यपि प्रलये गवात्यन्ताभावसत्त्वे विरोधाभावादि'ति यदुपन्यस्तम्, तत् स्पष्टीक्रियते 'ध्वंसस्य विशेषणतया = स्वरूपसम्बन्धेन, प्रतियोगिसमवायिनियतत्वात् कालस्यातथात्वात् = प्रतियोग्यसमवायित्वात्तत्र स्वरूपेण गोध्वंसवत्त्वासम्भवादित्याशयात्।[२४१]

तत्त्वालोकः – **'भूतलादिदेशस्येवे'ति[2]। 'भूतले घटो नष्ट' इत्यादिप्रतीतेः कालिकविशेषणत्वावगाहित्वस्य 'जले घटो नष्ट' इत्यादिप्रतीत्यापत्तेर्वक्तुमशक्यत्वाद्विशेषणत्वस्य दैशिकस्य तद्विषयताया वाच्यतया प्रतियोग्यसमवायिनि भूतले यथा ध्वंसस्य दैशिकविशेषणत्वं संसर्गस्तथेत्यर्थः।[२४२]**

प्रकाशः – 'प्राचां मते भूतलादिदेशस्येव कालस्यापि दैशिकविशेषणतया = स्वरूपसम्बन्धेन, गवादिध्वंसवत्त्वादि'ति जगदीशेन यदुपन्यस्तन्तत्रोच्यते 'भूतले घटो नष्ट' इत्यादिप्रतीतेः कालिकविशेषणतावगाहित्वे जले घटो नष्ट इत्यादिप्रतीत्यापत्तेर्वक्तुमशक्य[त्वात्] तथा विशेषणत्वस्य दैशिकस्य दैशिकविशेषणतायाः स्वरूपसम्बन्धरूपायाः तद्विषयतायाः वाच्यतया प्रतियोग्यसमवायिनि भूतले यथा ध्वंसस्य दैशिकविशेषणत्वं संसर्गस्तथा कालस्यापीति तदाशयात्। तथा च न काले गवात्यन्ताभावस्य सम्भवस्ततश्च गोमान् गोत्वादित्यत्रातिव्याप्तिः स्यादेव।[२४२]

तत्त्वालोकः – **'कालस्यापी'ति[3]। न चेदानीं घट इत्यत्रेवेदानीं घटो नष्ट इत्यत्रापि कालिकविशेषणतैवास्तु संसर्गो दैशिकसम्बन्धस्वीकारे मानाभाव इति वाच्यम्, आश्रयनाशाधीनद्रव्यगुणादिनाशस्य प्रत्यक्षतोपपत्तये काले दैशिकविशेषणत्वस्यावश्यं स्वीकरणीयत्वादिन्द्रियसम्बद्धकालविशेषणतामात्रस्य तत्र संसर्गत्व[4] सम्भवान्नहि तत्र कालिकविशेषणत्वस्य सन्निकर्षत्वसम्भवस्तथासति कालपरिमाणाद्यभावस्यापि काले प्रत्यक्षापत्तेः।**

---

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. १८

२. तदेव, जागदीशीमूलम्, पृ. १८

३. तदेव, जागदीशीमूलम्, पृ. १८

४. 'सन्निकर्षत्व' इति प्राचीनमुद्रितपुस्तके पाठः।

अथ कालानुयोगिकविशेषणता कालिकीत्युच्यते, केयन्तदतिरिक्ता, कालानुयोगिक्यपि दैशिकविशेषणतेत्युच्यत इति चेदुच्यते, विशेषणता हि त्रयी, इदानीं घट इति प्रतीतौ भासमानोपाध्यवच्छिन्नकालानुयोगिकी कालिकी, प्राच्यां घट इत्यादिप्रतीतौ भासमानोपाधिविशेषावच्छिन्ना दिगनुयोगिकी दिक्कृता, स्वासाधारणधर्मावच्छिन्नानुयोगिकी दैशिकी, कालिकदैशिकविशेषणतयोश्च कालानुयोगिकयोरपि भेदः प्रतीयत एव, यदिदानीं समवायसम्बन्धावच्छिन्नकालपरिमाणाभाव इति जायते, काले तादृशाभाव इति तु न जायत इति।[२४३]

प्रकाशः – 'कालस्यापी'ति प्रतीकं परिगृह्य 'न चे'त्यादिना शङ्कते यदिदानीं घट इत्यत्र यथा कालिकविशेषणता संसर्गः, तथैव इदानीं घटो नष्ट इत्यत्रापि कालिकविशेषणतैव संसर्गोऽस्तु, इदानीं घटो नष्ट इत्यत्र दैशिकविशेषणतास्वीकारे मानाभाव इति वाच्यमिति।

अत्र समाधीयते। आश्रयनाशाधीनद्रव्यगुणादिनाशस्य काले प्रत्यक्षतोपपत्तये काले दैशिकविशेषणतासंसर्गस्यावश्यं स्वीकरणीयत्वादिति, इन्द्रियसम्बद्धविशेषणतामात्रस्य = इन्द्रियसम्बद्धदैशिकविशेषणमात्रस्य, तत्र संसर्गत्वसम्भवात्। न हि तत्र कालिकविशेषणत्वस्य संसर्गत्वसम्भवः, तथासति कालपरिमाणाद्यभावस्यापि काले प्रत्यक्षतापत्तेः, अन्यत्र वर्तिनि कालपरिमाणाद्यभावे काले कालिकविशेषणतया सत्त्वात्। तत्रेन्द्रियसम्बद्धदैशिकविशेषणताया एव संसर्गत्वे तु न साऽऽपत्तिः, तत्र काले दैशिकविशेषणतया कालपरिमाणाद्यभावविरहादित्याशयः।

अत्र सुस्पष्टयितुमथेत्यादिनोच्यते यत् कालानुयोगिकविशेषणता कालिकीत्युच्यते। केयन्तदतिरिक्ता, कालानुयोगिक्यपि दैशिकविशेष[ण]तेत्युच्यते, इति चेद्?

उच्यते। कालिकदैशिकविशेषणतयोर्भेदो नोचितः। उभे अपि विशेषणतात्वेन एकैव। कालानुयोगिकत्वेन सा विशेषणता कालिकीत्युच्यते कालानुयोगिक्यपि दैशिकविशेषणतेत्युच्यते इति प्रश्नाशयः।

तत्रोच्यते। विशेषणता त्रयी। इदानीं घटः इत्यादिप्रतीतौ भासमानोपाध्यवच्छिन्नकालानुयोगिकी कालिकीत्युच्यते। प्राच्यां घट इत्यादिप्रतीतौ भासमानोपाध्यवच्छिन्ना दिगनुयोगिकी दिक्-कृता विशेषणता। स्वासाधारणधर्मावच्छिन्नानुयोगिकी दैशिकी।

पुनश्च स्पष्टीकरोति। कालिक-दैशिकविशेषणतयोश्च कालानुयोगिकयोरपि

भेदः प्रतीयत एव, यदिदानीं समवायसम्बन्धावच्छिन्नकालपरिमाणाभाव इति प्रतीतिर्जायते। काले तादृशाभावः = समवायसम्बन्धावच्छिन्नकालपरिमाणाभाव, इति प्रतीतिर्न जायते इति।

इदानीं समवायसम्बन्धावच्छिन्नकालपरिमाणाभाव इति या प्रतीति र्जायते तत्र 'इदानीं घट' इत्यत्रेव भासमानोपाध्यवच्छिन्नकालानुयोगिकी कालिकविशेषणता, काले तादृशाभावः = समवायसम्बन्धावच्छिन्नकालपरिमाणाभावः, इति या प्रतीति र्न जायते तत्र स्वासाधारणधर्मावच्छिन्नानुयोगिकी दैशिकविशेषणता। ततश्च कालिकविशेषणतावती प्रतीतिर्जायते, दैशिकविशेषणतावती प्रतीतिर्न जायते, अतः कालानुयोगिकयोरपि कालिकदैशिकविशेषणतयोर्भेदः प्रतीयत एवेति कथनाशयः।-[२४३]

तत्त्वालोकः– 'शब्दानित्यतायामि'ति[१]। न च प्रतियोगियोग्यत्वस्य तन्त्रत्वे वायुस्पर्शध्वंसोऽपि प्रत्यक्षः स्यादिति वाच्यम्, आश्रयनाशजन्यस्य तस्य ग्राहकेन्द्रियसन्निकर्षाभावादिति शब्दानित्यताचिन्तामणेरालोके ग्राहके-त्युपलक्षणङ्काले गृह्यत एवेतीष्टापत्तिरपि द्रष्टव्या, न च समयेऽपि किञ्चिद्देशाव-च्छेदेन ग्राह्यः, अत्रेवासमवायिनोऽपि तद्देशत्वसम्भवादिति ग्रन्थेन पक्षधरमिश्रै-रुक्त इति द्रष्टव्यम्।[२४४]

प्रकाशः– 'कालस्यापि दैशिकविशेषणतया गवादिध्वंसवत्त्वादि'त्युपन्यस्य तत्र प्रमाणतया 'अत एव त्वक्संयुक्तकाले विशेषणतया वायुस्पर्शनाशस्य ग्रहः [साक्षात्कारः] शब्दानित्यतायां मिश्रैरुक्त' इति यदुपन्यस्तम्[२], ततस्तं ग्रन्थं तत्त्वालोक-कृदुक्तखण्डेन यथावदुपन्यस्ति[न्यस्यति]। तत्रेदमाशङ्कितं पूर्वं यत् प्रति[योगि]योग्य-त्वस्य ध्वंसप्रत्यक्षे तन्त्रत्वे वायुस्पर्शध्वंसोऽपि प्रत्यक्षः स्यादिति। तत्र समाहितमाश्रय-नाशजन्यस्य तस्य ग्राहकेन्द्रियसन्निकर्षा[भावा]दिति। यत्राश्रयनाशजन्यो ध्वंसस्तत्राश्र-यविरहाद् ग्राहकेन्द्रियसन्निकर्षो भवितुमशक्य इति समाधानाशयः।

तत्रैव पुनरुक्तम् 'ग्राहकेन्द्रियसन्निकर्षभावादि'त्युपलक्षणम् काले वायुस्पर्श-ध्वंसो गृह्यत एवेतीष्टापत्तिरपि द्रष्टव्ये'ति।

---

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. १८

२. तदेव, जागदीशीमूलम्, पृ. १८

तत्र पुनः शङ्कितम् 'न च समयेऽपि किञ्चिद्देशावच्छेदेन वायुस्पर्शनाशो ग्राह्य' इति। समाहितञ्चैतत् ''अत्रेवासमवायिनोऽपि तद्देशत्वसम्भवादि'ति ग्रन्थेन पक्षधर-मिश्रैरुक्तः'' इति।

शब्दध्वंसग्रहस्थले यथा प्रकोष्ठान्तरोत्पन्नशब्दस्य तदसमवायिपरप्रकोष्ठात्मक-देशावच्छेदेन ध्वंसग्रहो भवति तथैव कालस्यापि उपाधिविशेषावच्छिन्नस्य स्पर्शासम-वायिनः स्पर्शध्वंसग्रहावच्छेदकदेशत्वसम्भवादिति तदाशयं प्रतीमः।[२४४]

तत्त्वालोकः – 'तथापि प्रतियोगिवैयधिकरण्याघटितस्ये'ति[1]। इदञ्च न प्रतियोगिवैयधिकरण्यघटितेऽतिव्याप्त्यभावाभिप्रायकम्।

किन्तु 'प्रलयस्य गोध्वंसवत्त्वेन गवात्यन्ताभावानधिकरणत्वादि'ति[2] दीधितिग्रन्थसङ्गमनार्थं तस्य प्रतियोगिवैयधिकरण्यघटितातिव्याप्त्यभिप्रायकत्वे ध्वंसरूपप्रतियोगिसत्त्वमात्रमुच्यते, तद्धेतुकगवात्यन्ताभावानधिकरणत्वप्रति-पादनमफलं स्यात्तत्र, एवञ्च प्रतियोगिवैयधिकरण्यघटितेऽप्यतिव्याप्तिसम्भवे तदुपेक्षा निरर्थकेति निरस्तम्।

न च प्रतियोगिवैयधिकरण्यघटितेऽतिव्याप्तेः सम्भव एव नेति वाच्यम्, गवात्यन्ताभावप्रतियोगिध्वंसाधिकरणत्वस्यैव हेत्वधिकरणे सत्त्वात्। इत्थमे-वातिव्याप्तिरथवेत्यादिना ग्रन्थेन भट्टाचार्येण प्रतिपादिता ।

न च स्वप्रतियोग्यनधिकरणवृत्तित्वविशिष्टस्य हेत्वधिकरणवृत्तित्वघटिते प्रतियोगिवैयधिकरण्यघटितेऽपि गवात्यन्ताभावस्य प्रलयावृत्तित्वप्रयुक्त एवा-तिव्याप्तिसम्भवः, तस्य स्वप्रतियोग्यनधिकरणात्मादिवृत्तित्वात्।

अवश्यञ्चात्र हेत्वधिकरणवृत्तित्वं सम्बन्धविशेषेण वाच्यम्, अन्यथा गुणवृत्तेरपि कपिसंयोगाभावस्य कालिकेन वृक्षवृत्तित्वसम्भवादिति प्रतियोगि-वैयधिकरण्यघटितलक्षणातिव्याप्तिपरतापरित्यागो नोचित इति वाच्यम्, स्वयं प्रतियोग्यनधिकरणहेत्वधिकरणवृत्तित्वस्यैव निष्कर्षिततत्वेन तत्र वृत्तित्वे 'सम्ब-न्धविशेषावच्छिन्नत्व'निवेशस्य निष्प्रयोजनतयाऽतिव्याप्तिसम्पत्त्यर्थे गवात्य-न्ताभावानधिकरणत्वप्रतिपादनमफलं स्यादिति तत्परतापरित्यागस्यैवोचित-त्वात्।[२४५]

---

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. १८

२. तदेव, दीधितिमूलम्, पृ. १७

प्रकाशः – 'तथापि प्रतियोगिवैयधिकरण्याघटितस्य व्याप्यवृत्तिसाध्यकस्थलीयलक्षणस्यावश्यं दैशिकविशेषणतयाऽभावे हेतुसामानाधिकरण्यघटितत्वात्तस्यैवातिव्याप्तिर्बोध्ये'ति[1] जगदीशेन यदुपन्यस्तन्तत्र तत्त्वालोककृता विशेषविचारः कर्तुमारभ्यते।

'इदञ्च न प्रतियोगिवैयधिकरण्यघटितेऽतिव्याप्त्यभावाभिप्रायकमि'त्यादिना, 'किन्तु प्रलयस्य गोध्वंसवत्त्वेन गवात्यन्ताभावानधिकरणत्वादि'ति दीधितिसङ्गमनार्थं तस्य प्रतियोगिवैयधिकरण्यघटितातिव्याप्त्यभिप्रायकत्वे ध्वंसरूपप्रतियोगिसत्त्वमात्रमुच्यते, तद्धेतुकगवात्यन्ताभावानधिकरणत्वप्रतिपादनमफलं स्यात्तत्र, एवञ्च = तत्र गवात्यन्ताभावानधिकरणत्वप्रतिपादनस्याफलत्वे सति, प्रतियोगिवैयधिकरण्यघटितेऽप्यतिव्याप्तिसम्भवे तदुपेक्षा निरर्थकेति निरस्तम्, न च प्रतियोगिवैयधिकरण्यघटितेऽतिव्याप्तेः सम्भव एव नेति वाच्यम्, गवात्यन्ताभावप्रतियोगिध्वंसाधिकरणत्वस्यैव हेत्वधिकरणे सत्त्वात्, इत्थमेवातिव्याप्ति'रथवे'त्यादिना ग्रन्थेन भट्टाचार्येण प्रतिपादिता[2]।

अत्र पुनः शङ्कते 'न चे'त्यादिना। न च स्वप्रतियोग्यनधिकरणवृत्तित्वविशिष्टस्य हेत्वधिकरणवृत्तित्वघटिते प्रतियोगिवैयधिकरण्यघटितेऽपि गवात्यन्ताभावस्य प्रलयावृत्तित्वप्रयुक्त एवातिव्याप्तिसम्भवः, तथासति तत्र गवात्यन्ताभावानधिकरणत्वप्रतिपादनन्नाफलमित्यत्र तत्तात्पर्यात्। एवञ्चात्र हेत्वधिकरणवृत्तित्वं सम्बन्धविशेषेणैव वाच्यम्, अन्यथा गुणवृत्तेरपि कपिसंयोगाभावस्य कालिकेन वृक्षवृत्तित्वसम्भवात्। 'कपिसंयोगवानेतद्वृक्षत्वादि'त्यत्राव्याप्तिः स्यादित्याशयः। ततश्च प्रतियोगिवैयधिकरण्यघटितलक्षणातिव्याप्तिपरतापरित्यागो नोचित इति वाच्यम्।

प्रतियोग्यनधिकरणवृत्तित्वविशिष्टस्य हेत्वधिकरणवृत्तित्वघटितलक्षणे तथासम्भवेऽपि, स्वयं जगदीशेन प्रतियोग्यनधिकरणहेत्वधिकरणवृत्तित्वस्यैव निष्कर्षितत्वेन, तत्र वृत्तित्वे 'सम्बन्धविशेषावच्छिन्नत्व'निवेशस्य निष्प्रयोजनतयाऽतिव्याप्तिसम्पत्त्यर्थं गवात्यन्ताभावानधिकरणत्वप्रतिपादनमफलं स्यादिति तत्परतापरित्यागस्यैवोचितत्वात्।[२४५]

तत्त्वालोकः – यच्चापाततस्तदुक्तार्था[व]लम्बनेनापि तद्ग्रन्थव्याख्या भवत्युचिता, तदा प्रतियोगिवैयधिकरण्याघटितस्येत्याद्युक्तिरूपलक्षणविधेयेति बोध्यम्।

---

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. १८

२. अनुमानगादाधरी (प्रथमो भागः), सिद्धान्तलक्षणप्रकरणम्, पृ. ३३८

न च शङ्काग्रन्थस्य प्रतियोगिवैयधिकरण्याघटितकल्पाभिप्रायकत्वे 'तच्छून्ये'त्याद्युत्तरग्रन्थासङ्गतिरिति वाच्यम्, प्राचीनमतखण्डनेन व्याप्यवृत्तिसाध्यकस्थलीयलक्षणातिव्याप्तिवारणेऽपि प्रतियोग्यसामानाधिकरण्यघटितकल्पे कथं तद्वारणमित्याशङ्कायां तद्ग्रन्थावतारणस्य वक्ष्यमाणत्वात्।

वस्तुतस्तु काले तच्छून्ये सति प्रतियोग्यनधिकरणत्वादित्यर्थे हेतुसमानाधिकरणत्वमात्रपर्यवसायित्वात्, तथा हि कालस्य गोशून्यत्वे भवति प्रतियोग्यनधिकरणत्वं ध्वंसादीनामप्रतियोगित्वाद् यतः प्रतियोग्यनधिकरणत्वमतोऽभावो हेत्वधिकरणकालवृत्तिरित्येव व्याख्येयम्। अन्यथा प्रतियोगिवैधिकरण्यघटितकल्पातिव्याप्तिवारकाभिप्रायकत्वेऽपि कालस्य तदनधिकरणत्वादित्यस्यैव वक्तुमुचितत्वात्।

प्रतियोग्यसामानाधिकरण्यघटितकल्पाभिप्रायकत्वे प्रतियोग्यसमानाधिकरणत्वादित्येव ब्रूयादिति।[२४६]

प्रकाशः – अत्रेदमुच्यते 'यच्चे'त्यादिना यत्सामान्यतः उक्तार्थावलम्बनेनापि उक्तग्रन्थस्य 'अथ यदा गोत्वं तदा गौरि'त्यादिदीधितिव्याख्या उचिता भवत्येव।

सामान्यतया = विशेषविचारमन्तरैव, उक्तार्थावलम्बनेनापि = व्याप्ये वृत्तिसाध्यकस्थलीयदैशिकविशेषणतया हेत्वधिकरणवृत्तित्वघटितत्वघटितलक्षणावलम्बनेनापि, व्याख्या भवितुं शक्नोत्येवेति कथनस्येदं तात्पर्य्यं निर्गलितं भवति 'यत्प्रतियोगिवैयधिकरण्याघटिते'त्यादिजगदीशोक्तिरूपलक्षणतयैव, न तु प्रतियोगिवैयधिकरण्यघटितेऽतिव्याप्तिव्यावर्तकतयेति बोध्यम्। विशेषविचारे सति यदि प्रतियोगिवैयधिकरण्यघटितेऽपि लक्षणे 'अथ यदे'त्यादिदीधितिग्रन्थव्याख्या [भवितु]मर्हा, तदा तथापि भवतु, न तद्व्यावृत्तौ मम तात्पर्यमिति तदाशयः।

पुनरत्र शङ्कते 'न च शङ्काग्रन्थस्य प्रतियोगिवैयधिकरण्याघटितकल्पाभिप्रायकत्वे 'तच्छून्ये'त्याद्युत्तरग्रन्थासङ्गतिरुत्तरग्रन्थस्य प्रतियोगिवैयधिकरण्यघटितकल्पाभिप्रायकत्वस्य सुस्पष्टत्वादि'ति।

अत्र समाधीयते यत् प्राचीनमतखण्डनेन (ध्वंसप्रागभावाभ्यां सहात्यन्ताभावस्य विरोध इति प्राचीनमतम्, तत्खण्डनञ्च ध्वंसप्रागभावाभ्यान्नात्यन्ताभावस्य विरोधः, तथासत्यन्ताभावस्य कालावृत्तित्वप्रसङ्गादिति) व्याप्यवृत्तिसाध्यकस्थलीयलक्षणेऽतिव्याप्तिवारणेऽपि अव्याप्यवृत्तिसाध्यकस्थलीयप्रतियोग्यसामानाधिकरण्यघटितकल्पे कथं तद्वारणमित्याशङ्कायां तच्छून्येत्याद्युत्तरग्रन्थावतारस्य वक्ष्यमाणत्वादिति।

अत्र तत्त्वालोककृता 'वस्तुतस्तु' इत्युपन्यस्योच्यते यन्न तच्छून्येत्याद्युत्तर[ग्रन्थ]स्य अव्याप्यवृत्तिसाध्यकस्थलीयप्रतियोग्यसामानाधिकरण्यघटितकल्पाभिप्रायकत्वं, किन्तु काले तच्छून्ये सति प्रतियोग्यनधिकरत्वादित्यर्थेऽभावे हेतुसमानाधिकरणत्वपर्यवसायित्वात् कालस्य गोशून्यत्वे प्रतियोग्यनधिकरणत्वं ध्वंसादीनामप्रतियोगित्वाद् यतः प्रतियोग्यनधिकरणत्वमतोऽभावो हेत्वधिकरणकालवृत्तिरिति व्याख्येयम्। अन्यथा प्रतियोगिवैयधिकरण्यघटितकल्पातिव्याप्तिवारकाभिप्रायकत्वेऽपि 'कालस्यानधिकरणत्वादि'त्यस्यैव वक्तुमुचितत्वात्, प्रतियोग्यसामानाधिकरण्यघटितकल्पाभिप्रायकत्वे प्रतियोग्यसमानाधिकरणत्वादित्येव ब्रूयादिति।[२४६]

तत्त्वालोकः– केचित्तु स्वप्रतियोग्यधिकरणावृत्तित्वरूपप्रतियोग्यसामानाधिकरण्यघटिते घटाद्यभावस्य तादृशावृत्तित्वसम्पत्त्यर्थं वृत्तित्वस्य सम्बन्धविशेषेण वाच्यतया गवात्यन्ताभावस्य नासङ्ग्रह इति तत्कल्पोपेक्षा भवत्युचितेति प्रलपन्ति।

तन्न। संयोगसाध्यकातिव्याप्त्या तदर्थस्य परित्यक्तत्वेन तद्विषयत्वमुक्तग्रन्थस्याङ्गीकृत्य समाधानस्यानुचितत्वात्।

अन्ये तु प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोग्यनधिकरणत्वकल्पे नातिव्याप्तिः, अत्यन्ताभावनिरूपितध्वंस[निष्ठ]प्रतियोगितायां स्वरूपसम्बन्धावच्छिन्नत्वस्यैवानुमितिग्रन्थे प्रतिपादिततया ध्वंसनिष्ठप्रतियोगितायां साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वविरहादिति वदन्ति।

तदप्यसत्। प्रतियोगिवैयधिकरण्यघटिते कस्मिंश्चिदपि कल्पेऽतिव्याप्तिसम्भवे प्रतियोगिवैयधिकरण्यघटितकल्पातिव्याप्त्युपेक्षा कथं कृतेत्येवं पूर्वपक्षस्यासमाहितत्वात्, किमु साध्यतावच्छेदकसम्बन्धेन प्रतियोग्यनधिकरणत्वघटिते सिद्धान्तकल्पे।

यत्त्वभावाघटितस्यैव प्रतियोगिवैयधिकरण्यघटितस्य सर्वथा सिद्धान्ततया तत्र नातिव्याप्तिसम्भव इति तदुपेक्षा युज्यत इति। तदपि न मनोरमम्। 'यद्यपी'त्यादिग्रन्थालोचने कृतेऽभावघटितकल्पस्यैवेदानीमङ्गीकारविषयत्वप्रतिभासात्।

वस्तुतस्त्वभावघटितकल्पस्य स्वनिरूपितयादृशप्रतियोगितावच्छेदकावच्छिन्नानधिकरणहेत्वधिकरणवृत्त्यभावीयतादृशप्रतियोगितानवच्छेदकत्वघटितस्यैव निष्कृष्टतया तत्र नातिव्याप्तिः, गवात्यन्ताभावस्य लक्षणघटकत्वा-

दित्यत्रैव 'यद्यपी'त्यादेस्तात्पर्य्यान्न कोपि दोष इति।[२४७]

प्रकाशः – प्रतियोगिवैयधिकरण्यघटितलक्षणेऽतिव्याप्त्यपेक्षाप्रसङ्गे केचिदिदं कथयन्ति यत् स्वप्रतियोग्यधिकरणावृत्तित्वरूपप्रतियोग्यसामानाधिकरण्यघटिते घटाद्यभावस्य तादृशावृत्तित्व = प्रतियोग्यधिकरणावृत्तित्व, - सम्पत्त्यर्थं वृत्तित्वस्य सम्बन्धविशेषेण वाच्यतया[१] गवात्यन्ताभावस्य नासङ्ग्रहः, ध्वंसेन सहात्यन्ताभावस्य विरोधात् = ध्वंसवति काले गवात्यन्ताभावस्य स्वरूपेणासत्त्वात्, स्वप्रतियोग्यधिकरणावृत्तित्वसम्पत्त्या गवात्यन्ताभावस्य नासङ्ग्रहः, अतो भवति तत्कल्पोपेक्षोचितेति केषाञ्चिदाशयः।

उपर्युक्तं केषाञ्चिन्मतं खण्डयति 'तन्ने'त्यादिना 'संयोगसाध्यकातिव्याप्त्या तदर्थस्य परित्यक्तत्वेन तद्विषयत्वमुक्तग्रन्थस्याङ्गीकृत्य समाधानस्यानुचितत्वादि'-त्युपन्यस्य। संयोगसाध्यकसत्तादिहेतुकस्थले संयोगसंयोगाभावयोः द्रव्येऽव्याप्यवृत्तितया प्रतियोगिनः संयोगस्याधिकरणे स्वरूपेण संयोगाभावस्य सत्त्वेन प्रतियोग्यधिकरणावृत्तित्वविरहात्साध्याभावस्य लक्षणघटकत्वासम्भवादभावान्तरमादायातिव्याप्तिः स्यादतस्तदर्थस्य परित्याग इति तदाशयः।

अन्ये कथयन्ति यत् प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोग्यनधिकरणत्वकल्पेनातिव्याप्तिसम्भवः, गवात्यन्ताभावनिरूपितध्वंसनिष्ठप्रतियोगितायां स्वरूपसम्बन्धावच्छिन्नत्वस्यैवानुमितिग्रन्थे प्रतिपादिततया ध्वंसप्रतियोगितायां साध्यतावच्छेदककालिकसम्बन्धावच्छिन्नत्वविरहात्।

प्रलयवृत्तिगवात्यन्ताभावस्य कालिकसम्बन्धेन ध्वंसात्मकप्रतियोगिनोऽधिकरणे सत्त्वे स्वप्रतियोगितावच्छेदकस्वरूपसम्बन्धेन ध्वंसात्मकप्रतियोग्यधिकरणावृत्तित्वस्य तत्र साध्याभावे सद्भावान्नातिव्याप्तिसम्भवोऽतः प्रतियोगिवैयधिकरण्यघटितेऽतिव्याप्त्युपेक्षा कृतेति अन्येषां मतम्।

तत् 'तदप्यसदि'त्यादिना निरस्यति 'प्रतियोगिवैयधिकरण्यघटिते कस्मिंश्चिदपि कल्पेऽतिव्याप्तिसम्भवे प्रतियोगिवैयधिकरण्यघटितकल्पातिव्याप्त्युपेक्षा कथं कृतेत्येवं पूर्वपक्षस्यासमाहितत्वादि'त्यनेन।

'किमु साध्यतावच्छेदकसम्बन्धेन प्रतियोग्यनधिकरणत्वघटिते सिद्धान्तपक्षे' अतोपि हेतोरन्येषाम्मतमसङ्गतम् यत् सिद्धान्ते न प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोग्यनधिकरणत्वं प्रतियोगिवैयधिकरण्यघटकम्, किन्तु साध्यतावच्छेदकसम्बन्धे-

---

१. अन्यथा घटाद्यभावस्य प्रतियोग्यधिकरणे कालिकेन वृत्तितया प्रतियोग्यधिकरणावृत्तित्वन्न स्यात्।

नैव तत्प्रतियोग्यनधिकरणत्वं प्रतियोगिवैयधिकरण्यघटकमिति तदाशयः।

अत्रैव प्रसङ्गे 'यत्तु'मतमुपन्यस्यति। यत्तु अभावाघटितस्यैव प्रतियोगिवैयधिकरण्यघटितस्य सर्वथा सिद्धान्ततया तत्र नातिव्याप्तिसम्भवः इति तदुपेक्षा युज्यते इति। यदाऽभावः प्रतियोगिव्यधिकरणत्वेन प्रतियोग्यसमानाधिकरणत्वेन वा न विशिष्यते, किन्तु हेत्वधिकरणमेव प्रतियोग्यनधिकरणत्वेन विशिष्यते, तदा नातिव्याप्तिसम्भवः, गवात्यन्ताभावात्मकसाध्याभावस्य गवात्मकप्रतियोग्यनधिकरणप्रलयात्मककालवृत्तित्वादिति तदाशयः।

यत्तु 'मतमिदं' तदपि न मनोरमम्। 'यद्यपी'त्यादिग्रन्थालोचने कृतेऽभावघटित[कल्प]स्यैवेदानीमङ्गीकारविषयत्वप्रतिभासादि'त्युपन्यस्य निरस्तम्।

यद्यप्येवमपि नातिव्याप्तिसम्भवः, कालिकसम्बन्धावच्छिन्नगवात्यन्ताभावस्यैव प्रलये कालिकसम्बन्धेन वर्तमानत्वात्, ध्वंसादिमति दैशिकविशेषणतयैव अत्यन्ताभावानभ्युपगमादिति 'यद्यपी'त्यादिग्रन्थः, तस्य यदि पर्यालोचनं क्रियते तदा अभावघटितकल्प एवेदानीमङ्गीकारविषय इति प्रतिभासते, न तु अभावाघटितस्ततश्च 'यत्तु'मतमसङ्गतमेवेति तदाशयः।

अत्र समाधानान्तरं 'वस्तुतस्तु' इत्युपन्यस्य क्रियते। 'वस्तुतस्त्वभावघटितकल्पस्य = स्वनिरूपितयादृशप्रतियोगितावच्छेदकावच्छिन्नानधिकरणहेत्वधिकरणवृत्त्यभावीयतादृशप्रतियोगितानवच्छेदकत्वघटितस्यैव निष्कृष्टतया तत्र नातिव्याप्तिः, गवात्यन्ताभावस्य लक्षणघटकत्वादित्यत्रैव यद्यपीत्यादेस्तात्पर्यान्न कोपि दोष' इति, गवात्यन्ताभावीयगोनिष्ठगोत्वावच्छिन्नप्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वस्य गोत्वरूपहेत्वधिकरणे = प्रलये सत्त्वेन तादृशहेत्वधिकरणवृत्त्यभावीयतादृशप्रतियोगितावच्छेदकत्वस्यैव साध्यतावच्छेदके गोत्वे सत्त्वान्नातिव्याप्तिरित्याशयात्।[२४७]

तत्त्वालोकः– 'सृष्टिकालवृत्तित्वविशिष्टगोत्वात्यन्ताभावेऽति'।[१]

न च तत्प्रतियोगितायान्निरवच्छिन्नावच्छेदकताकत्वविरह इति वाच्यमेतन्मते सद्धेतावपि तादृशाभावस्यैव लक्षणघटकतया तत्प्रतियोगितायान्तत्सम्पत्त्यर्थं साध्यतावच्छेदकनिष्ठसावच्छिन्नावच्छेदकत्वानिरूपितत्वार्थकत्वस्य तस्य वाच्यत्वादिति।[२४८]

प्रकाशः–'न च कालिकसम्बन्धावच्छिन्नप्रतियोगिताकस्य दैशिकविशेषणता-

---

१. 'सृष्टिकालवृत्तित्वादिविशिष्टगोत्वादेरत्यन्ताभावस्यैवे'ति उपलब्धजागदीश्यां पाठः।
–प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. १८

सम्बन्धेन हेतुमन्निष्ठात्यन्ताभावस्याप्रसिद्ध्या तथापि नातिव्याप्तिरि'त्याशङ्कायां जगदीशेन 'सृष्टिकालवृत्तित्वविशिष्टगोत्वादेरत्यन्ताभावस्यैव तादृशस्य प्रसिद्धत्वादि'ति यत्समाधानमुपन्यस्तन्तत्र शङ्कते तत्त्वालोककृत् 'न चे'त्यादिना।

निरवच्छिन्नसाध्यतावच्छेदकस्थले वह्निमान् धूमादित्यादौ महानसीयवह्निवृत्तित्वविशिष्टजातिमान्नास्तीत्याकारकप्रतीतिसिद्धाभावमादाय प्रसक्ताव्याप्तिवारणाय तत्र प्रतियोगितायां निरवच्छिन्नावच्छेदकताकत्वनिवेशः कृतोस्ति, गोमान् गोत्वादित्यादेरपि निरवच्छिन्नसाध्यतावच्छेदकस्थलत्वात्तत्र प्रसिद्धतया दर्शितसृष्टिकालवृत्तित्वगोत्वाभावप्रतियोगितायान्न निरवच्छिन्नावच्छेदकताकत्वमिति शङ्का।

तत्र समाधीयते यदेतन्मते ध्वंसादिनाऽत्यन्ताभावस्य विरोधस्वीकर्तृमते सद्धेतुस्थलेऽपि तादृशाभावस्यैव सृष्टिकालवृत्तित्वविशिष्टगोत्वात्यन्ताभावस्यैव = सावच्छिन्नावच्छेदकताकप्रतियोगिताकाभावस्यैव, लक्षणघटकतया तत्प्रतियोगितायां तत्सम्पत्त्यर्थं साध्यतावच्छेदकनिष्ठसावच्छिन्नावच्छेदकत्वानिरूपितत्वार्थकत्वस्य तस्य वाच्यत्वादिति।

सृष्टिकालवृत्तित्वविशिष्टगोत्वात्यन्ताभावप्रतियोगितायां साध्यतावच्छेदकगोत्वनिष्ठसावच्छिन्नावच्छेदकत्वनिरूपितत्वविरहान्नानुपपत्तिः। वह्निमान् धूमादित्यत्र महानसीयवह्निवृत्तित्वविशिष्टजातिमदभावीयप्रतियोगितायां साध्यतावच्छेदकवह्नित्वनिष्ठसावच्छिन्नावच्छेदकत्वनिरूपितत्वस्यैव सत्त्वेन तद् व्यावृत्तिरिति तदाशयः।[२४८]

तत्त्वालोकः— 'गोत्वावच्छिन्नत्वस्वीकारेपी'ति।[1] यद्यपि ध्वंसस्य तद्व्यक्तिप्रतियोगिकत्वस्यैवानुभविकतया प्रतियोगितातिप्रसक्तस्य गोत्वस्य न प्रतियोगितावच्छेदकत्वसम्भवः। न च गौर्नास्तीति प्रतीतिरिव गौर्नष्ट इत्यादिप्रतीतिर्दृश्यते, तत्र सामान्यावच्छिन्नप्रतियोगिताकात्यन्ताभावविषयकत्वमिव सामान्यावच्छिन्नप्रतियोगिताकध्वंसविषयकत्वमत्रापि स्यादिति वाच्यम्, भवेदेतदेवं यदि हि प्रतियोग्यंशे भासमानधर्मस्य प्रतियोगितावच्छेदकत्वनियमोऽकारणकृतः स्यान्नास्त्येव तादृशः सः, अत्यन्ताभावस्य च तत्त्वं बाधबुद्धिविरोधित्वानुरोधेनाभ्युपेयते गौरस्तीति बुद्धिकालेप्यत्र गौर्नष्ट इति बुद्ध्युत्पत्तेर्ध्वंसस्य च तत्त्वं नाभ्युपेयन्तथापि एकजातीयेषु चरमव्यक्तिध्वंससमये तज्जातीयसामा-

---

१. 'गोत्वावच्छिन्नप्रतियोगिताकत्वस्वीकारेऽपी'ति उपलब्धजागदीशीपुस्तकेषु पाठः।
—प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. १८

न्यध्वंसप्रतीतेरानुभविकत्वे तस्य तज्जातीयव्यक्तिमात्रबुद्धावेव विरोधितया तदनुरोधेनैव सामान्यधर्मावच्छिन्न[1]प्रतियोगिताकत्वं ध्वंसेऽभ्युपेयन्ततत्प्रतियोगिताया अतीतनिखिलव्यक्तिसाधारणतया नागतस्य तज्जातीयस्याविद्यमानतया च सामान्यन्न तदतिप्रसक्तमित्याशयः।

अपिनोक्तसामान्यध्वंसप्रतीतेः प्रामाणिकत्वे विवादाभिव्यक्तिः कृतेति।-[२४९]

प्रकाशः – मूलोक्तात्यन्तपदेन पक्षधरमिश्रानुमतसंसर्गाभावमात्रोक्तौ उक्तस्थले गवात्यन्ताभावस्य ध्वंसेन सह विरोधाल्लक्षणघटकत्वासम्भवेऽपि प्रलये गोत्वावच्छिन्नसत्त्वादेव उक्तस्थले नातिव्याप्तिरित्युपन्यासानन्तरम् 'न च गोध्वंसस्य गोत्वावच्छिन्नप्रतियोगिताकत्वस्वीकारेऽपि ध्वंसप्रागभावादेः प्रतियोगितावच्छेदकसम्बन्धास्वीकारेण साध्यतावच्छेदकीभूतकालिक[विशेषणता]सम्बन्धावच्छिन्नप्रतियोगिताकत्वविरहात् कुतस्तमादायातिव्याप्तिव्युदास' इत्याशङ्काग्रन्थो यदुपन्यस्तस्तद्घटक'गोत्वावच्छिन्नप्रतियोगिताकत्वस्वीकारेऽपी'ति परिगृह्य तदाशयं वर्णयितुमुपक्रमते उक्तखण्डेन।

तत्रोच्यते 'यद्यपि ध्वंसस्य तद्व्यक्तिप्रतियोगिकत्वस्यानुभविकतया प्रतियोगितातिप्रसक्तस्य गोत्वस्य न प्रतियोगितावच्छेदकत्वसम्भवः' इति। अत्र शङ्कते 'न च गौर्नास्तीति प्रतीतिरिव गौर्नष्ट इत्यपि प्रतीतिर्दृश्यते। तत्र सामान्यधर्मावच्छिन्नप्रतियोगिताकात्यन्ताभावविषयकत्वमिव सामान्यधर्मावच्छिन्नप्रतियोगिताकध्वंसविषयकत्वमपि स्यादिति वाच्यम्' इति।

अत्र समाधीयते 'भवेदेतदेवं यदि प्रतियोग्यंशे भासमानधर्मस्य प्रतियोगितावच्छेदकत्वनियमोऽकारणमङ्गीकृतः स्यान्नास्त्येव तादृशः सः, अत्यन्ताभावस्य तत्त्वं = सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वं, बाधबुद्धिविरोधित्वानुरोधेनाभ्युपेयते, गोमत्ताबुद्धिम्प्रति यत्किञ्चिद्गवात्यन्ताभावबुद्धेर्विरोधित्वविरहात्। गौरस्तीति बुद्धिकालेऽप्यत्र गौर्नष्ट इति बुद्ध्युत्पत्तेर्ध्वंसस्य च तत्त्वन्नाभ्युपेयते, तथाप्येकजातीयेषु चरमव्यक्तिध्वंससमये तज्जातीयसामान्यध्वंसप्रतीतेरानुभविकत्वे तस्य तज्जातीयव्यक्तिमात्रबुद्धावेव विरोधितया तदनुरोधेनैव सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वं ध्वंसेऽभ्युपेयन्ततत्प्रतियोगिताया अतीतनिखिलव्यक्तिसाधारणतयाऽनागतस्य तज्जातीयस्याविद्यमानतया च सामान्यन्न तदतिप्रसक्तामित्याशयः।

---

१. 'सामान्यावच्छिन्ने'ति प्राचीनमुद्रितपुस्तके पाठः।

अपिना उक्तसामान्यध्वंसप्रतीतेः प्रामाणिकत्वे विवाद इति सूचितम्।[२४९]

तत्त्वालोकः– 'सम्बन्धानवच्छिन्नस्यैवे'ति[१]वेति। तादृशसम्बन्धानवच्छिन्नत्वञ्च पारिभाषिकमेव बोध्यम्। तेन न तादात्म्येन घटाभावसाध्यकसद्धेतौ हेतुसमानाधिकरणसंसर्गाभावीयतादृशसम्बन्धानवच्छिन्नप्रतियोगित्वाप्रसिद्धिः।

न च विषयत्वध्वंसमादाय लक्षणसङ्गतिरिति वाच्यम्, तादृशसाध्यकव्यभिचारिण्यतिव्याप्तेरिति।[२५०]

प्रकाशः– 'साध्यतावच्छेदकसम्बन्धान्यसम्बन्धानवच्छिन्नस्यैव हेतुसमानाधिकरणाभावीयप्रतियोगित्वस्य लक्षणे प्रवेशनीयत्वात् तावतैव समवाया[द्य]वच्छिन्नवह्न्याद्यभावमादायाव्याप्तेर्वारणात्तस्य च ध्वंसप्रतियोगितासाधारण्यादि'ति यदुपन्यस्तं जगदीशेन[२], तत्रोच्यते यदिदं साध्यतावच्छेदकसम्बन्धान्यसम्बन्धानवच्छिन्नत्वं पारिभाषिकमेव साध्यतावच्छेदकविशिष्टत्वरूपम्। वैशिष्ट्यञ्च स्वावच्छेदकसम्बन्धातिरिक्तसम्बन्धावच्छिन्नत्व-स्वावच्छेदकसम्बन्धावच्छिन्नत्वान्यतरसम्बन्धेन। तेन यत्र सद्धेतुविशेषस्थले ध्वंसात्मकः संसर्गाभावो हेतुसमानाधिकरणो भवितुन्न शक्नोति, तत्र संसर्गाभावीयप्रतियोगितायां साध्यतावच्छेदकसम्बन्धान्यसम्बन्धानवच्छिन्नत्वस्याप्रसिद्धावपि न क्षतिः। एतदेवोक्तम् 'तेन न तादात्म्येन घटाभावसाध्यकसद्धेतुस्थले हेतुसमानाधिकरणसंसर्गाभावीयतादृशसम्बन्धानवच्छिन्नप्रतियोगित्वाप्रसिद्धिरि'त्यनेन। उक्तस्थले हेत्वधिकरणे घटाभावे ध्वंसानभ्युपगमादप्रसिद्धिरुक्ता।

वह्निमान् धूमादित्यत्र समवायावच्छिन्नवह्निनिष्ठप्रतियोगितायामुक्तसाध्यतावच्छेदकविशिष्टत्वविरहान्नाव्याप्तिः।

अत्र 'न चे'त्यादिना शङ्कितं यत् 'न च विषयत्वध्वंसमादाय लक्षणसङ्गतिरि'ति।

अत्र समाहितं तथासति तादृशसाध्यकव्यभिचारिणि अतिव्याप्तिः स्यादिति। अन्यथा तु तत्र तादृशप्रतियोगित्वाप्रसिद्ध्यैव नातिव्याप्तिरित्याशयः।[२५०]

तत्त्वालोकः– 'साधारण्यादि'ति।[३] इदञ्च भेदभिन्नाभावत्वस्य संसर्गाभावमभ्युपेत्य संसर्गारोपजन्यप्रतीतिविषयाभावत्वमते ध्वंसीयप्रतियोगितायां सम्बन्धावच्छिन्नत्वस्य स्वीकृततया तत्प्रयोगितायामुक्तसम्बन्धानवच्छिन्नत्वस्यासम्भवादिति॥[२५१]

---

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. १८
२. तदेव, जागदीशीमूलम्, पृ. १८
३. तदेव, जागदीशीमूलम्, पृ. १८

प्रकाशः—साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वेन विवक्षितसाध्यतावच्छेदकसम्बन्धान्यसम्बन्धानवच्छिन्नत्वस्य ध्वंसप्रतियोगितासाधारण्यादिति यदुपन्यस्तन्तत्रोच्यते यदा भेदभिन्नाभावत्वं संसर्गाभावत्वमुच्यते तदैव तत्, संसर्गारोपजन्यप्रतीतिविषयाभावत्वस्य संसर्गाभावत्वे तु ध्वंसीयप्रतियोगितायामपि सम्बन्धावच्छिन्नत्वस्वीकारात्साध्यतावच्छेदकसम्बन्धान्यसम्बन्धानवच्छिन्नत्वस्य तत्रासम्भवादिति।[२५१]

तत्त्वालोकः— **'मानाभाव' इति।[1] न च प्रलय एव मानाभाव इति वाच्यम्। समयसमवायिभिन्नवृत्तिध्वंसप्रतियोग्यवृत्तिकार्यद्रव्यत्वं कार्यद्रव्यप्रागभावसमानकालीनारम्भकद्रव्यातिरिक्तकार्यद्रव्यानधिकरणवृत्ति ध्वंसप्रतियोगिवृत्तिकार्यमात्रवृत्तिधर्मत्वाच्छब्दत्ववदित्यनुमानस्यैव मानत्वादिति।[२५२]**

प्रकाशः—यदा स्पन्दस्तदा द्व्यणुकमित्यत्रातिव्याप्तिप्रदर्शकदीधितिव्याख्यावसरे 'न च खण्डप्रलये स्पन्दसत्त्वे मानाभाव' इति यदुपन्यस्तन्तत्र शङ्कते 'न च प्रलय एव मानाभाव' इति।

अत्रानुमानाकारमुपन्यस्य प्रलयसद्भावेऽनुमानस्यैव मानत्वादित्युपन्यस्य समाहितम्। अनुमानाकारश्च समयसमवायिभिन्नवृत्तिध्वंसप्रतियोग्यवृत्तिकार्यद्रव्यत्वं कार्यद्रव्यप्रागभावसमानकालीनारम्भककार्यद्रव्यानधिकरणवृत्ति, ध्वंसप्रतियोगिकार्यद्रव्यमात्रवृत्तिधर्मत्वाच्छब्दत्ववदिति।

समय = समवायिभ्यां भिन्नो यः प्रलयः, तद्वृत्तिर्यो ध्वंसस्तत्प्रतियोग्यवृत्तिकार्यद्रव्यत्वं पक्षः, तत्र पक्षे = कार्यद्रव्यप्रागभावसमानकालीनं यत् आरम्भकातिरिक्तकार्यद्रव्यं तदनधिकरणवृत्तित्वं साध्यम्, ध्वंसप्रतियोगिककार्यमात्रवृत्तिधर्मत्वं हेतुरिति बोध्यम्।[२५२]

तत्त्वालोकः— **'मानत्वादि'ति।[2] इदमुपलक्षणम्। सर्गान्तरीयद्व्यणुकोत्पत्त्यनुरोधेनापि प्रलये स्पन्दः स्वीकरणीय इति।[२५३]**

प्रकाशः—'मानत्वादि'ति। खण्डप्रलये स्पन्दसत्त्वे ब्रह्मणो वर्षशतमायुरित्यागमप्रसिद्धेरेव मानत्वात्। खण्डप्रलये क्रियाया असत्त्वे ब्रह्मणः शतवर्षजीवित्व-

---

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. १९

२. तदेव, जागदीशीमूलम्, पृ. १९

व्यवहारोऽनुपपन्नः स्यात् शतवर्षकालस्य क्षणमुहुर्तादिघटिततया क्रियाविरहे क्षणादेरनुपपन्नत्वादित्याशयः।

यन्मानं दर्शितम् तत्रोच्यते इदमुपलक्षणम्। सर्गान्तरीयद्व्यणुकोत्पत्त्यनुरोधेनापि प्रलये स्पन्दः स्वीकरणीय इति।

यदि खण्डप्रलये स्पन्दो न स्यात्तदा संसर्गान्तरीयद्व्यणुकोत्पादो न स्यात्तदा न स्यादिति तदाशयः।[२५३]

तत्त्वालोकः– 'तृतीयक्षण' इति।[1] महापवनजलवर्षानलादिभिरदृष्टसहकृतैः स्थूलेषु विनष्टेषु त्रसरेणुनाशार्थं परमाणुक्रिया जायते, ततो विभागस्तदनन्तरं पूर्वसंयोगनाशस्तत उत्तरदेशेन क्षणैकस्थायिना त्रसरेणुना संयोगो द्व्यणुकनाशश्च, ततः क्रियानाशस्त्रसरेणुनाशश्च, तत उत्तरदेशसंयोगनाशस्स एव क्षणो निखिलजन्यानाधारत्वान्महाप्रलय इत्युच्यते, तत्क्षणमादाय पूर्वे तृतीयक्षण इत्यर्थः।[२५४]

प्रकाशः– 'ननु महाप्रलयपूर्वतृतीयक्षणे द्व्यणुकत्वावच्छिन्नध्वंससत्त्वान्नातिव्याप्तिः, तदानीमपि चरमद्व्यणुकनाशानुगुणस्य परमाणुस्पन्दस्य सत्त्वात्। तत्कालोत्पन्नपरमाणूत्तरसंयोगेन प्रलयपूर्वक्षण एव पश्चात्तस्य नाशात्, तादृशपरमाणूत्तरसंयोगस्य च कार्यद्रव्येण सहैव स्वीकारान्न नित्यत्वम्। आश्रयनाशादेव तन्नाशसम्भवादित्यत आह– यदाऽदृष्टं तदा जन्यज्ञानमित्यादि' इति जागदीशी।[2]

तत्रत्यं 'महाप्रलयपूर्वतृतीयक्षण' इति परिगृह्य महाप्रलयवर्णनं करोति 'महापवने'त्यादिना। महापवन-जलवर्षानलादिभिरदृष्टसहकृतैस्त्रसरेण्वतिरिक्तेषु निखिलेषु स्थूलेषु विनष्टेषु त्रसरेणुनाशार्थं परमाणौ क्रिया उत्पद्यते, ततो विभागस्तदनन्तरं पूर्वसंयोगनाशः, तत उत्तरदेशेन क्षणैकस्थायिना त्रसरेणुना संयोगो द्व्यणुकनाशश्च, ततः क्रियानाशः त्रसरेणुनाशश्च, तत उत्तरदेशसंयोगनाशस्स एव क्षणो निखिलजन्यानाधारकालत्वान्महाप्रलय इत्युच्यते, तत् क्षणमादाय यः तृतीयः क्षणस्तत्र द्व्यणुकत्वावच्छिन्नध्वंसस्य क्रियायाश्च सत्त्वेन नातिव्याप्तिरिति जगदीशाशयस्तत्त्वालोककृता स्पष्टीकृतः।[२५४]

---

१. प्रकृतग्रन्थः, (प्रथमो भागः), जागदीशीमूलम्, पृ. १९

२. तदेव, जागदीशीमूलम्, पृ. १९

तत्त्वालोकः – 'कार्यद्रव्येण सहैवे'ति।[1] एवकारेण गगनादिभिस्संयोगो व्यवच्छिद्यते। ननु मूर्त्तसंयोगानुगुणक्रियात एव विभुसंयोगोऽभ्युपेयः, विभुमात्रसंयोगानुगुणक्रियाया प्रयोजनविरहेणानभ्युपेयत्वात्तथा चात्राप्युत्तरदेशसंयोगानुगुणक्रियया विभुसंयोगः स्यादेवेत्येवकारार्था सङ्गतिरित्यत आह 'न नित्यत्वमि'ति।[2]

तथा च भावकार्यत्वस्यानित्यत्वव्याप्ततया तदानीं गगनादिसंयोगस्वीकारे नाशकाभावेन नित्यत्वापत्त्या व्यापकविरहेण भावकार्यत्वप्रतिक्षेपे तत्स्वरूपप्रतिक्षेपः, प्रयोगश्च महाप्रलयपूर्वतृतीयक्षणोत्पन्नसंयोगो न नित्यैकवृत्तिः, नाशातिरिक्तनाशकपूर्वत्वानधिकरणत्वे सति भावकार्यत्वात्, यन्नैवं तन्नैवं, यथा सृष्टिकालीनगगनपरमाणुसंयोगः, शब्दध्वंसे व्यभिचारवारणाय विशेष्यदलं तस्य कालेऽपि द्रव्यातिरिक्ते विशेषणत्वस्वीकारे तर्कस्फुरणायैव तदिति बोध्यम्।

विपक्षबाधकश्चात्र भावकार्यस्यानित्यत्वव्याघातः। न च कारणसत्त्वे नियमक्षतिर्न कार्यवारणायालमिति गगनसंयोगःस्यादेव एवमुक्तनियमोऽप्यप्रयोजक एव भावकार्यस्याविनाशित्वे क्षत्यभावात्, तस्मान्नाशकपूर्ववर्तितैव विनाशित्वे प्रयोजिका न तु भावकार्य्यत्वमन्यथा कार्यत्वमात्रस्य विनाशित्वप्रयोजकत्वमभ्युपेत्य नाशस्यापि विनाशित्वं स्यादेवञ्चाविनाशिनोऽपि गगनसंयोगस्य स्वीकारे न कापि हानिरिति वाच्यम्।[२५५]

प्रकाशः – 'कार्यद्रव्येण सहैवे'ति जागदीशीभागं परिगृह्य विशेषविचारं कर्तुमारभते 'एव'कारेण गगनादिसंयोगो व्यवच्छिद्यते इत्यादिना।

तत्र शङ्कते 'ननु मूर्तसंयोगानुगुणक्रियात एव विभुसंयोगोऽभ्युपेयो विभुमात्रसंयोगानुगुणक्रियायाः प्रयोजनविरहेणानभ्युपेतत्वात्तथा चात्राप्युत्तरदेश(त्रसरेणु)संयोगानुगुणक्रियया विभुसंयोगः (गगनसंयोगः) स्यादेवेत्येवकारार्थसङ्गतिरित्यत आह 'न नित्यत्वमि'ति। तथा च भावकार्यस्यानित्यत्वव्याप्ततया गगनादिसंयोगस्वीकारे नाशकाभावेन नित्यत्वापत्त्या व्यापकविरहे भावकार्यत्वप्रतिक्षेपे तत्स्वरूपप्रतिक्षेपः। प्रयोगश्च महाप्रलयपूर्वतृतीयक्षणोत्पन्नसंयोगः न नित्यैकवृत्तिः नाशातिरिक्तनाशकपूर्व-

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. १९

२. तदेव, जागदीशीमूलम्, पृ. १९

त्वानधिकरणत्वे सति भावकार्यत्वात्, यन्नैवं तन्नैवं, यथा सृष्टिकालीनगगनपरमाणुसंयोगः, शब्दध्वंसे व्यभिचारवारणाय विशेष्यदलम्। तस्य कालेऽपि द्रव्यातिरिक्ते विशेषणत्वस्वीकारे तर्कस्फुरणायैव तदिति बोध्यम्।

भावः सुस्पष्ट एवास्ति। यया क्रियया उत्तरदेश संयोगो जायते तयैव क्रियया तत्र विभुसंयोगः कुतो नेति पूर्वपक्षः। तत्र समाधानं भावकार्यत्वस्यानित्यत्वव्याप्त्या विभुसंयोगस्वीकारे नाशकाभावेन नित्यत्वापत्त्या व्यापकविरहेण भावकार्यत्वप्रतिक्षेपे स्वरूपप्रतिक्षेपः स्यादिति।

प्रयोगश्चात्र महाप्रलयपूर्वतृतीयक्षणोत्पन्नसंयोगो न नित्यैकवृत्तिः, नाशातिरिक्तनाशकपूर्वत्वानधिकरणत्वे सति भावकार्यत्वात्, यन्नैवं तन्नैवं, यथा सृष्टिकालीनगगनपरमाणुसंयोग इति।

उक्तप्रयोगे हेतुकोटौ विशेष्यदलं 'भावकार्यत्वं' यदि न स्यात्तदा शब्दध्वंसव्यभिचारः, तत्र हेतोः सत्त्वेन नित्यैकवृत्तित्वाभावविरहात् नित्यैकवृत्तित्वस्यैव सत्त्वात्।

शब्दध्वंसस्य गगनातिरिक्तकालेऽपि विशेषणत्वस्वीकारे तत्र नित्यैकवृत्तित्वविरहेण व्यभिचारो न स्यादिति चेदुच्येत तदा तर्कस्फुरणायैव विशेष्यदलं बोध्यम्। स च तर्को विपक्षबाधको भावकार्यस्य अनित्यत्वव्याघातविषयकः।

अत्र शङ्कते 'न च कारणसत्त्वे नियमक्षतिर्न कार्यवारणायालमिति तथा च गगनसंयोगः स्यादेवे'ति। गगनसंयोगस्य कारणं यद्यस्ति तदा भावकार्यत्वस्यानित्यत्वव्याप्तिनियमो बाधको भवितुन्नार्हति तथा उक्तनियमोऽप्यप्रयोजक एव, भावकार्यस्याविनाशित्वे क्षत्यभावात्, तस्मान्नाशकपूर्ववर्तितैव विनाशित्वें प्रयोजिका, न तु भावकार्यत्वमन्यथा कार्यत्वमात्रस्य विनाशित्वप्रयोजकत्वमभ्युपेत्य नाशस्यापि विनाशित्वं स्यात् एवञ्चाविनाशिनोऽपि गगनसंयोगस्य स्वीकारे न कापि क्षतिरिति वाच्यम्।[२५५]

तत्त्वालोकः— प्रलयप्रयोजकादृष्टस्यैव गगनसंयोगप्रतिबन्धकाभ्युपगमेन तदभावात्मककारणविरहाद् भावकार्यानधिकरणस्यैव प्रलयत्वेनोक्तसंयोगोत्पत्तौ प्रलयत्वव्याहतेः।

न चोपभोगयोग्यभावकार्यानधिकरणत्वमेव प्रलयत्वम्प्रलये भावकार्यसत्त्वनिर्णय एव उपभोगयोग्यभावकार्यत्वत्वेन पक्षतायां गौरवस्य प्रलयसाधकानुमाने सह्यत्वादन्यथा द्व्यणुकस्यापि कस्यचित्सत्त्वे क्षत्यभावेन तत्सत्त्वस्याप्यापत्तेः, एवं भावकार्येषु सर्वेषूपलब्धं विनाशित्वं भावकार्यत्वव्यापकत-

यैव गृहीतम्, न च तन्नित्यभावकार्यसम्भावनामात्रेण हातुमुचितम्, एतदनुरोधेन तदभावस्यैव व्यवस्थापनीयत्वात्।

न च भावत्वमकिञ्चित्करं ध्वंसध्वंसे प्रलये सर्वभावोन्मज्जनप्रसङ्गादनन्तध्वंसस्वीकारप्रसङ्गेन गौरवप्रसङ्गाच्च।

न च प्रलये विभागावस्थानसम्भवः तस्योत्तरदेशसंयोगेनैव प्रायो विनाश्यत्वादन्यथा प्रहरादिपूर्वोत्पन्नविभागावनुत्पन्नविभागौ च घटावालोचयताज्ञायमानविभक्तप्रतीतिस्समानाकारत्वेनानुभूयमानैकत्र विभागविषयिणी परत्र संयोगाभावविषयिणीति स्यात् सति विभागे कुत्रापि न तद्विषयिणीति वक्तुमशक्यत्वात्।

न चेष्टापत्तिरनुभूयमानसमानाकारत्वभङ्गापत्तेः। न च संयोगाभावेनैव विभक्तप्रतीतेर्गतार्थता भावत्वेनानुभूयमानत्वाद्विनिगमनाविरहेण संयोगप्रतीतेरेव विभागाभावविषयत्वप्रसङ्गाच्च। किञ्च उत्तरदेशसंयोगस्यानाशकत्वे विभक्तयोर्ययोर्न संयोगो नित्ययोस्तयोर्विभागस्याविनाशित्वप्रसङ्गः। न च भावकार्यस्याविनाशित्वमिष्यत इत्यलमप्रस्तुतविचारबाहुल्येनेति।[२५६]

प्रकाशः—पूर्वोपपादितां शङ्कान्निरस्यति 'प्रलयप्रयोजकादृष्टस्यैव गगनसंयोगप्रतिबन्धकत्वाभ्युपगमेन तदभावात्मक = प्रतिबन्धकीभूतादृष्टाभावात्मक, -कारणविरहान्न गगनसंयोगः, भावकार्यानधिकरणस्यैव प्रलयत्वेनोक्तसंयोगोत्पत्तौ प्रलयत्वव्याहतेः।

पुनः शङ्कते 'न चोप[भोग]योग्यभावकार्यानधिकरणत्वमेव प्रलयत्वमि'ति। तत्र समाधीयते। प्रलये भावकार्यसत्त्वनिर्णय एव तथावक्तुं शक्यन्न च तदनिर्णय उपभोगयोग्यभावकार्यत्वत्वेन पक्षतायां गौरवस्य प्रलयसाधकानुमाने प्रलये उप[भोग]-योग्यभावकार्यस्यैवासत्त्वनिर्णये सह्यत्वात्। न च तथास्तीति। अन्यथा द्व्यणुकस्यापि कस्यचिदुपभोगा[ग]योग्यस्य सत्त्वे क्षत्यभावेन तत्सत्त्वस्याप्यापत्तेः। एवम्भावकार्येषु सर्वेषूपलब्धं विनाशित्वं भावकार्यत्वव्यापकतयैव गृहीतम्। न च तन्नित्यभावकार्यसम्भावनामात्रेण हातुं शक्यमेतदनुरोधेन तदभावस्यैव = गगनसंयोगाभावस्यैव व्यवस्थापनीयत्वात्।

न च भावत्वमकिञ्चित्करम्, सकलजन्यानाधारकालत्वमेव प्रलयत्वमङ्गीक्रियतामिति शङ्का। समाधानम् 'ध्वंसध्वंसे सर्वभावो[न्म]ज्जनप्रसङ्गादनन्तध्वंसस्वीकारप्रसङ्गेन गौरवप्रसङ्गाच्चे'ति।

अनन्तरं प्रलये विभागासत्त्वमुपपादयति 'न च प्रलये विभागावस्थानसम्भव' इत्यादिना। तस्य विभागस्योत्तरदेशसंयोगेनैव प्रायो विनाश्य[त्वा]दन्यथा प्रहरादिपूर्वोत्पन्नविभागावनुत्पन्नविभागौ च घटावालोचयताञ्जायमानविभक्तप्रतीतिस्समानाकारत्वेनानुभूयमानैकत्र विभागविषयिणी परत्र संयोगाभावविषयिणीति स्यात्। सति च विभागे न कुत्रापि तद्विषयिणीति वक्तुमशक्यत्वात्।

यद्युत्तरदेशसंयोगेन विभागो न विनश्येत्तदा प्रहरादिपूर्वोत्पन्नविभागकयोर्द्वयोर्घटयोरनुत्पन्नविभागकयोश्च[1] समानाकारत्वेनानुमानाविभक्तप्रतीतिरेकत्र (पूर्वत्र) विभागविषयिणी परत्र = अनुत्पन्नविभागस्थले, संयोगाभावविषयिणीति स्यात्, सति विभागे कुत्रापि (पूर्वत्रापि) न तद्विभागविषयिणीति वक्तुमशक्यत्वात्, न चेष्टापत्तिः, समानाकारत्वभङ्गापत्तेः।

जातविभागस्थले विभागस्योत्तरदेशसंयोगेन विनष्टत्वे तु न कश्चिद्दोषः, उभयत्र विभक्तप्रतीतेः संयोगाभावविषयकत्वादित्याशयः।

'न चे'त्यादिना शङ्कते। न च संयोगाभावेनैव विभक्तप्रतीतेर्गतार्थता, विभागो नाभ्युपेयः। समाधानम् 'विभक्तप्रतीतेर्भावविषयकत्वेनानुभूयमानत्वादि'ति, विनिगमनाविरहेण संयोगप्रतीतेरेव विभागाभावविषयकत्वप्रसङ्गाच्च। अन्ते उच्यते 'किञ्चोत्तरदेशसंयोगस्यानाशकत्वे विभक्तयोर्ययोर्न संयोगो नित्ययोस्तयोर्विभागस्याविनाशित्वप्रसङ्गः। न च भावकार्यस्याविनाशित्वमिष्यते। तस्माद्विभाग उत्तरदेशसंयोगविनाश्य एव, प्रलये च न विभाग इति सारांशः।[२५६]

तत्त्वालोकः– 'स्वमते द्व्यणुकस्याभावादि'ति।[2] तस्य मेरुसर्षपयोः साम्यप्रसङ्गवारणायावयवधाराया विश्रामस्य वाच्यत्वे लाघवात् त्रुटावेव विश्रामो वाच्यस्तदपकृष्टमहत्त्वस्य च नित्यत्वाङ्गीकारादपकृष्टमहत्त्वं प्रत्यनेकद्रव्यत्वस्य प्रयोजकतया सप्रयोजकत्वेनाभिमतत्रसरेणुस्सावयवश्चाक्षुषद्रव्यत्वादित्यादिद्व्यणुकादिसाधकमनुमानमप्रयोजकमेवाणुत्वव्यवहारश्चापकृष्टपरिमाणैरेवोपपादनीय इति न द्व्यणुकादिस्वीकारे प्रयोजनमित्याशयः।[२५७]

प्रकाशः– 'स्वमते द्व्यणुकस्याभावादि'ति प्रतीकं परिगृह्य उच्यते। मेरुसर्षपसाम्यप्रसङ्गवारणायावयवधाराविश्रामस्य वाच्यत्वे लाघवात् त्रुटौ एव विश्रामो वाच्योऽपकृष्टमहत्त्वस्य नित्यत्वाङ्गीकारात्, अपकृष्टमहत्त्वम्प्रत्यनेकद्रव्यत्वस्य प्रयोज-

---

१. पूर्वत एवासंयुक्तयोर्घटयोश्चेति यावत्।
२. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. १९

कत्वेनाभिमतन्त्रसरेणुस्सावयवश्चाक्षुषद्रव्यत्वादित्यादिद्व्यणुकादिसाधकानुमानस्याप्रयोजकत्वमेवाणुत्वव्यवहारश्चापकृष्टपरिमाणैरेवोपपाद्य इति द्व्यणुकादिस्वीकारे प्रयोजनाभाव इत्याशयः।[२५७]

तत्त्वालोकः – 'बलवत्तरप्रमाणाभावादि'ति।[१] ब्राह्मं वर्षशतमित्यस्येदानीमागमत्वानुपलब्धेरागमत्वेन प्रसिद्धेरैतिह्यतया तत्र प्रामाण्यासम्प्रतिपत्तेः अविधित्वेनान्यार्थतात्पर्यकत्वसन्देहाच्च सर्गान्तरीयद्व्यणुकोत्पत्त्यर्थं क्रियाभ्युपगमोऽपि प्रलयाव्यवहितोत्तरक्षण एव द्व्यणुकोत्पत्तेः प्रामाणिकत्व एव तस्य च सविवादत्वादिति भावः।[२५८]

प्रकाशः – खण्डप्रलये स्पन्दसत्त्वे बलवत्तरप्रमाणाभाव इति यदुपन्यस्तन्तत्रोच्यते 'ब्राह्मं वर्षमायुरि'त्यस्येदानीमागमत्वानुपलब्धेरागमत्वेन प्रसिद्धेरैतिह्यतया तत्र प्रामाण्यासम्प्रतिपत्तेरविधित्वेनान्यार्थतात्पर्यकत्वसंशयाच्च सर्गान्तरीयद्व्यणुकोत्पत्त्यर्थं क्रियाभ्युपगमोऽपि प्रलयाव्यवहितोत्तरमेव द्व्यणुकोत्पत्तेः प्रामाणिकत्व एव तस्य च सविवादत्वादिति।[२५८]

तत्त्वालोकः – 'तच्चिन्त्यमि'ति।[२] परम्प्रत्युद्भावितस्य दोषस्य परमतेऽसम्भवित्व एवादोषत्वमत्युचितं स्वमतेन तस्यादोषत्वन्तु न दोषतयाऽनुद्भावनप्रयोजकमिति महाप्रलयस्य पराभ्युपगततया महाप्रलयान्तर्भावेणातिव्याप्तिवारणमेव स्थलान्तरानुसरणबीजमतिसुन्दरं न तु स्वमते द्व्यणुकासम्भवेन स्थलासम्भवः। प्राचीनैस्तु त्रसरेणुनित्यतायास्सन्दिग्धतया व्यभिचारसंशयस्य चाप्रतिबन्धकतया चाक्षुषद्रव्यत्वेऽनित्यत्वसावयवत्वादिव्याप्यत्वे निश्चिते त्रसरेणुपरिमाणस्य नित्यत्वासम्भवाद् द्व्यणुकादिसाधकमनुमानन्नाप्रयोजकम्, न च महदारम्भकारम्भकत्वात्परमाणुत्वेनाभिमतस्याप्यस्तु सावयवत्वमनवस्थाभयेन कुत्रापि विश्रामस्य वाच्यत्वे परमाणाविव तत्रैवास्तु विश्राम इति वाच्यम्, महदारम्भकस्यानवयवत्वे यथा महतो घटस्य महत्त्वानुपपत्तिः कपालस्यानेकद्रव्यत्वाभावेन[३] घटस्यानेकद्रव्यत्वाभावान्न तथा महदारम्भकारम्भकस्यानवयवत्वे महत्त्वानुपपत्तिरिति तस्याप्रयोजकत्वात् कपालिकादीनामपि महदारम्भकत्वादेव सावयवत्वमिति न परमाणवयवप्रसङ्ग इत्येवं द्व्यणुकस्याभ्युपेतत्वादिति चिन्ताबीजम्।[२५९]

---

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. १९
२. तदेव, जागदीशीमूलम्, पृ. १९
३. 'कपालस्यानेकत्वाभावेने'ति प्राचीनमुद्रितपुस्तके पाठः।

प्रकाशः – 'तच्चिन्त्यमि'ति। अत्रोच्यते यत्परम्प्रत्युद्भावितदोषस्य परम्प्रत्यसम्भवितत्व एवादोषत्वमुचितम्, स्वमते तस्यादोषत्वन्तु न दोषतयाऽनुद्भावनप्रयोजकमिति, महाप्रलयस्य पराभ्युपगततया महाप्रलयान्तर्भाविणातिव्याप्तिवारणमेव स्थलान्तरानुसरणबीजमतिसुन्दरम्, न तु स्वमते द्व्यणुकानभ्युपगमेन स्थलासम्भव इति।

यत्र स्थलेऽतिव्याप्तिः प्रदत्ता तत्स्थलासम्भवः, स्वमते द्व्यणुकस्याभावादिति कथन्नोचितम् किन्तु महाप्रलये स्पन्दस्य द्व्यणुकस्य चाभावान्नातिव्याप्तिसम्भव इत्येव वक्तुमुचितमिति भावः।

प्राचीनैस्तु त्रसरेणोर्नित्यतायास्संदिग्धतया व्यभिचारसंशयस्याप्रतिबन्धकतया चाक्षुषद्रव्यत्वे सावयवत्वानित्यत्वे निश्चिते त्रसरेणुपरिमाणस्य नित्यत्वासम्भवाद् द्व्यणुकादिसाधकानुमानं नाप्रयोजकम्।

न च महदारम्भकारम्भकत्वेनाभिमतस्य परमाणोरप्यस्तु सावयत्वमनवस्थाभयेन कुत्रापि विश्रामस्य वाच्यत्वे परमाणाविव तत्रैवास्तु इति वाच्यम्, महदारम्भकस्यानवयवत्वे यथा महतो घटस्य महत्त्वानुपपत्तिः कपालस्यानेकद्रव्यत्वाभावेनानेकद्रव्यत्वाभावान्न तथा महदारम्भकारम्भकस्यानवयवत्वे महत्त्वानुपपत्तिरिति तस्याप्रयोजकत्वादिति कपालिकादीनामपि महदारम्भकत्वादेव सावयवत्वमिति न परमाण्वयवप्रसङ्ग इत्येवं द्व्यणुकस्याभ्युपेयत्वादिति चिन्ताबीजम्।[२५९]

तत्त्वालोकः – 'इति मत' इति।[१] प्रलये[२]ऽप्यदृष्टाधिकरणे जन्यस्य नित्यसुखसाक्षात्कारस्य सत्त्वादिति शेषः, सुखमात्रस्य परमपुरुषार्थत्वभ्रममूलकमेव च तन्मतम्बोध्यम्, दुःखाभावस्य पुरुषार्थताम्व्यवस्थाप्य विस्तरेण तन्मतखण्डनस्य भट्टवार्तिक एवोपलब्धत्वादिति।[२६०]

प्रकाशः – 'यदाऽदृष्टं तदा जन्यज्ञानं दुःखम्वे'ति दीधितिव्याख्यावसरे जगदीशेन 'नित्यसुखाभिव्यक्तेर्मुक्तित्वमते'[३]ऽदृष्टहेतुकजन्यज्ञानसाध्यकस्थलस्य सद्धेतुस्थलत्वमाशङ्क्य साध्यान्तरमाह दुःखम्वेति यदुपन्यस्तं तत्रोच्यते प्रलयेऽप्यदृष्टाधिकरणजन्यस्य नित्यसुखसाक्षात्कारस्य सत्त्वादिति शेष इति सुखमात्रस्य परमपुरुषार्थत्वभ्रममूलकमेव च तन्मतम्। सुखमात्रस्यापि परमपुरुषार्थत्वं सम्भवत्येवेति कथनाशयः।

---

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. १९

२. 'प्रलयो' इतिप्राचीनमुद्रितपुस्तके पाठः।

३. 'मुक्तित्वमिति मते' इति पाठोऽपि तत्त्वालोककृदुल्लेखात् प्रतिभाति।

दुःखाभावस्य परमपुरुषार्थतां व्यवस्थाप्य विस्तरेण तन्मतखण्डनस्य भट्टवार्तिक एवोपलब्धत्वादिति।[२६०]

तत्त्वालोकः – 'कार्यमात्रम्प्रत्यदृष्टस्ये'ति।[1] अयमाशयः। नहि प्रयोजन-निमित्ताभ्याम्विना कस्यचित्कार्यस्योत्पत्तिरिति सामान्यतो नियमे प्रयोजनस्य चेतनसम्बद्धस्यानियमवारणाय तत्तच्चेतनादृष्टनियम्यतायाः स्वीकरणीयतया महाप्रलयस्यापि मोक्षविरोध्यात्मविशेषगुणादिभावविरोधितया सप्रयोजनस्य तत्त्वज्ञानद्वारा मोक्षप्रयोजकादृष्टैरेवोत्पादनीयत्वाद् दृष्टजन्यत्वम्।

अत एव महाप्रलयस्य सुखदुःखाद्यजनकतया कथमदृष्टजन्यत्वम्[2]। न चाज्ञातोत्पत्तिविनाशवतामङ्कुरादीनामप्यप्रयोजनत्वेप्यदृष्टजन्यत्वमिति[3] वाच्यम्, परमकारुणिकानां योगिनामुत्पन्नयोगजधर्म्माणामेवान्ततः सांसारिक-जन्तुसुखजननयोग्यतथाविधानाम्विनाशे दुःखस्य दुःखजननयोग्यतथाविधाना-म्विनाशे सुखस्य सम्भवात्।

तत्तदङ्कुरक्लेदादिना क्रियाद्युत्पादकतायाः[4] संसारे कथञ्चित् सर्वेषामेव प्रयोजनवत्त्वादित्यपि निरस्तम्, भविष्यन्महाप्रलयसाक्षात्कारेण योगिनामेव वा सुखाद्युत्पत्तिसम्भवेन कथञ्चित्सप्रयोजनत्वाच्चेति।

केचित्तु लाघवेन कार्यत्वावच्छिन्नम्प्रत्यदृष्टस्य कारणत्वे व्यभिचारवार-णायैव प्रलयेऽप्यदृष्टोत्तरत्वस्य कल्प्यत्वादिति वदन्ति।[२६१]

प्रकाशः – 'ननु कार्यमात्रम्प्रत्यदृष्टस्य हेतुत्वात् प्रलयप्राक्क्षणेऽपि तस्य = अदृष्टस्य, सत्त्वं तथा च तदानीमपि दुःखत्वावच्छिन्नध्वंससत्त्वान्नातिव्याप्तिः, दुःखादेः स्वसाक्षात्कारनाश्य[तया] तदानीमसम्भवादि'ति 'यदा तस्यादृष्टं तदा तदीयं ज्ञानमि'ति दीधितेरवतरणतया यदुपन्यस्तम् तद्घटकं 'कार्यमात्रम्प्रत्यदृष्टस्ये'ति परिगृह्योच्यते 'अयमाशय' इत्यादिना।

नहि प्रयोजननिमित्ताभ्यां विना कस्यचित्कार्यस्योत्पत्तिरिति सामान्यतो नियमे प्रयोजनस्य चेतनसम्बद्धस्यानियमवारणाय तत्तच्चेतनादृष्टनियम्यतायाः स्वीकरणीयतया

---

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. १९

२. 'कथमदृष्टजन्यत्वादि'ति मुद्रितप्राचीनपुस्तके पाठः।

३. 'जन्यत्ववदि'ति मुद्रितप्राचीनपुस्तके पाठः।

४. 'क्रियाद्युत्पादकतया वा' इति मुद्रितप्राचीनपुस्तके पाठः।

महाप्रलयस्यापि मोक्षविरोध्यात्मविशेषगुणादिभाव = मिथ्याज्ञानादिभाव, - विरोधितया सप्रयोजनस्य तत्त्वज्ञानद्वारा मोक्षप्रयोजकादृष्टैरेवोत्पादनीयत्वाददृष्टजन्यत्वम्[1]। अत एव 'महाप्रलयस्य सुखदुःखाद्यजनकतया कथमदृष्टजन्यत्वमि'ति निरस्तम्।

न चाज्ञातोत्पत्तिविनाशवतामङ्कुरादीनामप्यप्रयोजनत्वेऽपि अदृष्टजन्यत्ववद् येषामुत्पत्तिविनाशौ विज्ञातौ न भवतस्तेषामङ्कुरादीनां प्रयोजनवत्त्वविरहेऽपि यथाऽदृष्टजन्यत्वं तथैव महाप्रलयस्यापि प्रयोजनाभावेऽप्यदृष्टजन्यत्वं स्यादित्यपि निरस्तम्। यतो हि परमकारुणिकानां योगिनामुत्पन्नयोगजधर्माणामेवान्ततः सांसारिकजन्तुसुखजननयोग्यतथाविधानां = सांसारिकजन्तुसुखजननयोग्ययोगजधर्माणां, विनाशे दुःखस्य, दुःखजननयोग्यतथाविधानां योगजधर्माणां विनाशे सुखस्य, सम्भवात्।

एतेन 'तत्तदङ्कुरक्लेदादिना क्रियाद्युत्पादकताया संसारे कथञ्चित्सर्वेषामेव प्रयोजनवत्त्वादि'त्यपि निरस्तम्, भविष्यन्महाप्रलयसाक्षात्कारेण योगिनामेव वा सुखाद्युत्पत्तिसम्भवेन कथञ्चित्सप्रयोजनत्वाच्चेति।

केचित्तु लाघवेन कार्यत्वावच्छिन्नम्प्रत्यदृष्टस्य कारणत्वे व्यभिचारवारणायैव प्रलयेऽप्यदृष्टान्तरत्वस्य कल्प्यत्वादिति वदन्ति।[२६१]

तत्त्वालोकः – **'तदानीमसम्भवादि'ति।[2] नित्यत्वप्रसङ्गादिति शेषः। अविदिते प्रमाणाभावादिति क्वचित्पाठः। तस्यायम्भावः। प्रलयप्रयोजकादृष्टादिविनाश्यं[3] तदानीं दुःखमास्तामिति यदि ब्रूयात्तदपि न सम्भवत्यविदितेऽसाक्षात्कृते मानाभावादिति। इदमुपलक्षणम्। शरीराद्यनवच्छिन्ने तस्योत्पत्तेरप्यसम्भवो बोध्यः।[२६२]**

प्रकाशः – 'ननु कार्यम्प्रत्यदृष्टस्य हेतुत्वात्प्रलयप्राक्क्षणेऽपि तस्य सत्त्वम्, तथा च तदानीमपि दुःखत्वावच्छिन्नध्वंससत्त्वान्नातिव्याप्तिः, दुःखादेस्तदानीमसम्भवादि'ति यदुपन्यस्तं जगदीशेन, तत्रोच्यते 'नित्यत्वप्रसङ्गादिति शेषः' [इति]। अनन्तरं 'अविदिते प्रमाणाभावादिति क्वचित्पाठः, तस्यायमाशयः प्रलयप्रयोजकादृष्टविनाश्य एव तदानीं दुःखमास्तामिति ब्रूयात्तदपि न सम्भवति, अविदिते प्रमाणाभांवात्, इदमुपलक्षणम्, शरीराद्यनवच्छिन्ने तस्योत्पत्तेरसम्भवो बोध्यः' [इति]।[२६२]

---

१. 'यददृष्टं तत्त्वज्ञानद्वारा मोक्षप्रयोजकं तदेवादृष्टं महाप्रलयप्रतिबन्धकापसरणद्वारा महाप्रलयप्रयोजकमिति भावः।

२. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. १९

३. 'विनाश्य एवे'ति प्रकाशकृतां पाठः।

तत्त्वालोकः– 'बाधनिश्चयादी'ति।[१] गोमत्ताबुद्धौ गौर्नास्तीति बुद्धे र्न गोप्रतियोगिकाभावावगाहित्वेन विरोधित्वम्, तस्य तद्गवात्यन्ताभावधी साधारणत्वाद् नापि गोत्वसमनियतप्रतियोगिताकाभावावगाहित्वेन यावद्गौर्नास्तीति बुद्धेर्विरोधित्वापातादिति गोत्वावच्छिन्नप्रतियोगिताकाभावावगाहित्वेनैव तद्वाच्यतयाऽत्यन्ताभावप्रतियोगितायां सामान्यधर्मावच्छिन्नत्वसिद्धिरिति भावः।

ननु भ्रमसाधारण्यानुरोधेन प्रतियोगित्वसम्बन्धावच्छिन्नगोत्वेतरधर्मानवच्छिन्नप्रकारतानिरूपिताऽभावत्वावच्छिन्नविशेष्यत्वाभिन्नप्रकारताकनिश्चयत्वेनैव विरोधित्वम्वाच्यमिति न प्रतिबध्यप्रतिबन्धकभावानुरोधेन तत्सिद्धिरत आहादीति। तथा च प्रतिबध्यप्रतिबन्धकभावस्य विषयविरोधाधीनतया गोप्रतियोगिकाभावादीनान्न तत्त्वमिति गोत्वमात्रावच्छिन्नप्रतियोगिताकाभावस्यैव तद्वाच्यतया सामान्यधर्मावच्छिन्नत्वसिद्धिः।

न च केवलगोत्वावच्छिन्नस्य विलक्षणमेव प्रतियोगित्वं संसर्गस्तेन च तत्सत्त्वं न तद्गवाद्यभाव इति प्रतियोगित्वमात्र एव धर्मावच्छिन्नत्वे मानाभावः, भवतापि गोत्वमात्रावच्छिन्नत्वस्य विलक्षणस्यैव स्वीकरणीयत्वादन्यथा तस्याभावघटितत्वेनानवस्थापातादिति वाच्यम्, यावल्लक्षयितुं शक्यम् तावद्वैलक्षण्याभ्युपगमस्यानुचितत्वात्, प्रतियोगित्वञ्च तत्तद्धर्मावच्छिन्नत्वेन लक्षयितुं शक्यते इति तत्त्यागस्यानुचितत्वेनावच्छिन्नत्वाभ्युपगमात्, तन्मात्रावच्छिन्नत्वमपि तदतिरिक्तानवच्छिन्नत्वत्वेन लक्षयितुं शक्यन्तदपि लक्षणीयमेव।

अनवस्थितिश्च तत्त्वाद्यनुगतधर्मघटितत्वेन सामान्यतो ज्ञाते[२] न दोषायास्तु वा तद्विलक्षणमेव, का नो हानिरित्येवानिर्वचनीयतावाद्यतिरिक्तानामवच्छिन्नत्ववादिनां निष्कर्ष इति।[२६३]

प्रकाशः– 'ननु ध्वंसादिप्रतियोगितायां गोत्वादिधर्मावच्छिन्नत्वे मानाभावः, गौर्नष्ट इत्यादिप्रतीतेर्गोप्रतियोगिकध्वंसाद्यवगाहितयाऽप्युपपत्तेर्बाधनिश्चयादिप्रतिबन्ध-

---

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. १९

२. 'ज्ञाने' इति प्राचीनमुद्रितपुस्तके पाठः।

कत्वानुरोधेनैव भेदात्यन्ताभावयोर्गोत्वावच्छिन्नप्रतियोगिकत्वोपगमादि'ति जगदीशेन यदुपन्यस्तन्तत्र 'बाधनिश्चयादी'ति परिगृह्योच्यते।

गोमत्ताबुद्धौ गौर्नास्तीति बुद्धे र्न गोप्रतियोगिकाभावावगाहित्वेन प्रतिबन्धकत्वम्, तस्य तद्गवात्यन्ताभावधीसाधारणत्वाद्, नापि गोत्वसमनियतप्रतियोगिताकाभावावगाहित्वेन, यावद्गौर्नास्तीति बुद्धेः प्रतिबन्धकत्वापातादिति गोत्वावच्छिन्नप्रतियोगिताकाभावावगाहित्वेनैव तद्वाच्यतयाऽत्यन्ताभावप्रतियोगितायां सामान्यधर्मावच्छिन्नत्वसिद्धिरिति भावः।

यत्किञ्चिद्गोसत्त्वकालेऽपि यावद्गौर्नास्तीति प्रतीतेर्जायमानत्वेन गोमत्ताबुद्धिम्प्रति यावद्गौर्नास्तीति बुद्धेरप्रतिबन्धकत्वेन तादृशबुद्धेः प्रतिबन्धकत्वापत्तिः प्रदत्तेति बोध्यम्।

शङ्कते – ननु भ्रमसाधारण्यानुरोधेन प्रतियोगित्वसम्बन्धावच्छिन्नगोत्वेतरधर्मानवच्छिन्नप्रकारतानिरूपिताऽभावत्वावच्छिन्नविशेष्यत्वाभिन्नप्रकारताकनिश्चयत्वेनैव विरोधित्वं वाच्यमिति न प्रतिबध्यप्रतिबन्धकभावानुरोधेन तत्सिद्धिरत आहादीति।

तथा च प्रतिबध्यप्रतिबन्धकभावस्य विषयविरोधाधीनतया गोप्रतियोगिकाभावादीनान्न तत्त्वं = गोविरोधित्वमिति गोत्वमात्रावच्छिन्नप्रतियोगिताकाभावस्यैव तद्वाच्यतया सामान्यधर्मावच्छिन्नत्वसिद्धिः।

अत्र पुनः शङ्कते — न च केवलगोत्वावच्छिन्नस्य विलक्षणमेव प्रतियोगित्वं संसर्गस्तेन च तत्सत्त्वन्न तद्गवाद्यभाव इति प्रतियोगित्वमात्र एव धर्मावच्छिन्नत्वे मानाभाव इति।

यदा गोत्वावच्छिन्नस्य विलक्षणप्रतियोगित्वसंसर्गेणान्वयो भवति विलक्षणप्रतियोगित्वसंसर्गेणाभावे गोत्वावच्छिन्नसत्त्वं भवति, न तद्गवाभावः, तथा च विलक्षणप्रतियोगित्वसंसर्गेण गोत्वाद्यवच्छिन्नस्याभावेऽन्वयेनैव आपत्त्यनुपपत्त्योर्विरहे प्रतियोगित्वमात्रधर्मावच्छिन्नत्वस्य नावश्यकतेति शङ्काशयः।

अत्र समाधीयते। भवतापि गोत्वमात्रावच्छिन्नत्वस्य विलक्षणस्यैव स्वीकार्यत्वादन्यथा तस्य गोत्वमात्रावच्छिन्नत्वस्याभावघटितत्वेनानवस्थापातादिति वाच्यम्, यावल्लक्षयितुं शक्यते तावद्वैलक्षण्याभ्युपगमस्यानुचितत्वात्, प्रतियोगित्वञ्च तत्तद्धर्मावच्छिन्नत्वेन लक्षयितुं शक्यते इति तत्त्यागस्यानुचितत्वेनावच्छिन्नत्वाभ्युपगमात्, तन्मात्रावच्छिन्नत्वमपि तदतिरिक्तानवच्छिन्नत्वेन लक्षयितुं शक्यमिति तदपि लक्षणीयमेव, अनवस्थितिश्च तत्त्वाद्यनुगतधर्मघटितत्वेन सामान्यतो ज्ञाते न दोषाय, अस्तु

वा तद्विलक्षणैव का नो हानिरित्येवानिर्वचनीयतावाद्यतिरिक्तानामवच्छिन्नत्ववादिनां निष्कर्ष इति।[२६३]

तत्त्वालोकः – 'एकसम्बन्धेने'त्यादि।[1] अथ तद्गौर्नास्तीति बुद्धिस्साक्षात्सम्बन्धेन गोमत्ताबुद्धिमात्रस्यैव विरोधिनी, गवावयवे गोमति चत्वरादौ च तद्बुध्यनुत्पत्तेः[2]। कालिकेन गोमत्ताबुद्धिश्च ह्रदत्वाद्यवच्छिन्नविशेष्यिका इदानीं गौरस्तीत्येव, तत्प्रतीतेः। भवति च तद्विरोधिनी सम्बन्धविशेषानवगाहिनीदानीङ्गौर्नास्तीति, प्रतियोगितायां सम्बन्धावच्छिन्नत्वे मानाभावः।

न च गोसमवायिनि संयोगेन गौ र्नास्तीति बुद्ध्युत्पत्तेः सम्बन्धावच्छिन्नत्वमावश्यकं प्रतियोगितायामिति वाच्यम्, गोसंयोगाभावस्य क्लृप्तस्यैव तद्विषयत्वात् संयोगविशिष्टगोप्रतियोगित्वेनोल्लेखेऽपि शिखी विनष्ट इतिवद्विशेषणस्य प्रतियोगित्वसम्भवात्।

न चात्र तत्रैव बाधकस्य विरहेण कथं भासमानस्य त्याग इति वाच्यम्, लाघवस्यैव प्रयोजकस्य बाधस्यैव सत्त्वात्, उक्तप्रतीतिबलात्सम्बन्धविशेषेणैव गोमत्त्वविरोध्यभावस्यैव साक्षात्सम्बन्धेन गोमत्त्वमात्रविरोध्यभावस्यापि गौर्न्नास्तीति प्रतीतिसिद्धस्य सत्त्वम्वाभ्युपेयम्।

एवमपि तादृशात्यन्ताभावध्वंसबुद्धिसाधारणैकप्रतिबन्धकत्वानुरोधेन ध्वंसप्रतियोगितायां धर्मावच्छिन्नत्वमावश्यकमिति चेद्धन्तानुभविकमपीदम्मतं न्यायसिद्धान्तपक्षपातादपोद्यते तथा हि संयोगेन गौर्नास्तीति बुद्धिः प्रतियोगितया गामुल्लिखन्ती गोप्रतियोगिकत्वांशे बाधमनासादयन्ती न लाघवमात्रेण गोसंयोगं प्रतियोगित्वेन स्वीकर्तुं क्षमतेऽनुभवापलापकस्य लाघवस्याकिञ्चित्करत्वात्सन्देह एव लाघवस्य वस्तुव्यवस्थापकत्वाद्गोप्रतियोगिकत्वेन संयोगानुपस्थितावपि संयोगेन गौर्नास्तीति बुद्ध्युत्पादाच्च, एवञ्च साक्षात्सम्बन्धेन गोमन्मात्रे गौर्नास्तीति बुद्धिर्न जायत एवेति केन तुभ्यमभ्यधायि संयोगादिसम्बन्धावच्छिन्नप्रतियोगिताकाभावातिरिक्तस्य तद्विषयस्यानभ्युपगमात् संयोगसम्बन्धावच्छिन्नप्रतियोगिताकाभावावगाहिनी सा प्रत्यक्षबुद्धिः समवायेन गोमति समवायसम्बन्धावच्छिन्नप्रतियोगिताकाभावावगाहिनी च संयोगादिना

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. १९

२. 'तदनुत्पत्तेः' इति प्राचीनमुद्रितपुस्तके पाठः।

गोमति जायत एव योग्यानुपलब्धिरूपसामग्रीवशान्न जायते चातो विपरीता।

न चैवं संयोगादिना गोमत्युपलब्धगवात्यन्ताभावः परत्र स्वबोधसंक्रान्तयेऽत्र गौर्न्नास्तीति कथन्नाभिलपतीति गौ र्नास्तीति प्रत्ययवेद्यस्तेन न गृहीत इति कल्प्यत इति वाच्यम्, समवायेन गौ र्नास्तीत्याद्यभिलापस्य स्पष्टप्रत्यायनेच्छानिबन्धनत्वेनार्थापत्तेरुपक्षीणव्यापारत्वात्।

सम्बन्धानवच्छिन्नप्रतियोगिताकाभावविषयकत्वेन प्रत्यक्षस्यानुव्यवसीयमानतायास्संदिग्धत्वेन न ततस्तादृशाभावसिद्धिस्तादृशानुभवस्याविवादत्वे तादृशाभावनिराकरणममरगुरूणामप्यशक्यमित्यलम्।[२६४]

प्रकाशः – 'न चैवमपि तद्गोत्वावच्छिन्नवत्ताबुद्धिम्प्रति तद्गोत्वावच्छिन्नाभाववत्तानिश्चयत्वेन विरोधितया तद्गोध्वंसस्यापि तद्गोत्वावच्छिन्नप्रतियोगिताकत्वमावश्यकमि'ति शङ्कायामेकसम्बन्धेन तद्गवात्यन्ताभावग्रहेऽपि सम्बन्धान्तरेण तद्गोमत्ताबुद्ध्युत्पादात्सम्बन्धविशेषमन्तर्भाव्यैवात्यन्ताभावग्रहस्य प्रतिबन्धकतया ध्वंसवत्ताग्रहसाधारण्यासम्भवादि'ति यज्जगदीशेनोपन्यस्तन्तत्र तत्त्वालोककृतोच्यते 'अथे'त्यादिना।

तस्यायमाशयो यत् तद्गौर्नास्तीति बुद्धिः साक्षात्सम्बन्धेन गोमत्ताबुद्धिविरोधिनी, गवावयवे गोमति चत्वरादौ च तदनुत्पत्तेः, समवायेन संयोगेन वा गोमति तद्गौर्नास्तीति बुद्धिसत्त्वे तत्र तद्गौरस्तीति बुद्ध्यनुत्पत्तेः।

कालिकेन गोमत्ताबुद्धिश्च ह्रदत्वाद्यवच्छिन्नविशेष्यिका इदानीं गौरस्तीत्याद्याकारिका तद्विरोधिनी चेदानीं गौर्नास्तीति बुद्धिः, इदानीं गौर्नास्तीति प्रतीतिसिद्धाभावीयप्रतियोगितायां तथा गवावयवे चत्वरादौ च गौर्नास्तीति प्रतीतिसिद्धाभावीयप्रतियोगितायां सम्बन्धावच्छिन्नत्वे मानाभावः। तथा च सम्बन्धविशेषान्तर्भावम्विनैवात्यन्ताभावबुद्धेः प्रतिबन्धकत्वसम्भव इति पूर्वपक्षाशयः।

अत्र शङ्कते। न च गोसमवायिनि संयोगेन गौर्नास्तीति बुद्ध्युत्पत्तेः प्रतियोगितायां सम्बन्धावच्छिन्नत्वमावश्यकमिति।

अत्र समाधीयते। गोसंयोगाभावस्य क्लृप्तस्यैव तत्र विषयत्वादिति।

संयोगविशिष्टगोप्रतियोगिकत्वेनोल्लेखेऽपि शिखी विनष्ट इतिवद्विशेषस्य (संयोगस्य) प्रतियोगित्वसम्भवात्।

अत्र पुनः शङ्कते। न चात्र तत्रैव बाधकस्य विरहेण कथं भासमानस्य त्याग इति। यथा गौर्नास्तीत्यत्र प्रतियोगितया भासमानस्य गो र्न त्यागस्तथैव संयोगेन

गौर्नास्तीत्यत्रापि प्रतियोगितया भासमानस्य गोस्त्यागो नोचित इति तदाशयः।

अत्र समाहितम्। लाघवस्यैव प्रयोजकस्य बाधकस्यैव सत्त्वादिति। सम्बन्ध्यभावस्तत्रैव भवति, यत्र तत्सम्बन्धाभावो भवति, ततश्च सम्बन्ध्यभावस्य विषयत्वाय सम्बन्धाभावस्यापि विषयत्वमावश्यकमतो लाघवात् सम्बन्धाभावस्यैव विषयत्वम्, सम्बन्धिनः गोः प्रतियोगित्वेन विषयत्वे लाघवाभावरूपबाधक एव प्रतिबन्धक इत्याशयः।

अत्र पुनरुच्यते। उक्तप्रतीतिबलात् = गोसमवायिनि संयोगेन गौ र्नास्तीति प्रतीतिबलात्, सम्बन्धविशेषेणैव गोमत्त्वविरोध्यभावस्यैव साक्षात्सम्बन्धेन गोमत्त्वमात्रविरोध्यभावस्यापि गौ र्नास्तीति प्रतीतिसिद्धस्य सत्त्वम्वाभ्युपेयम्।

यदि संयोगेन गौर्नास्तीति प्रतीत्या यथा सम्बन्धविशेषेणैव गोमत्त्वविरोध्यभावो गृह्यते तथैव साक्षात्सम्बन्धेन गोमत्त्वमात्रविरोध्यभावोऽपि गौर्नास्तीति प्रतीत्या सम्बन्धविशेषेणैव संयोगसमवायकालिकान्यतमसम्बन्धेन गृह्यते इति यद्युच्येत, तदापि तादृशात्यन्ताभावध्वंसबुद्धिसाधारणैकप्रतिबन्धकत्वानुरोधेन ध्वंसप्रतियोगितायां धर्मावच्छिन्नत्वमावश्यकमिति पूर्वपक्षः।

अत्रोच्यते। हन्तानुभविकमपीदं मतं न्यायसिद्धान्तपक्षपातादपोह्यते। तथा हि संयोगेन गौर्नास्तीति बुद्धिः प्रतियोगितया गामुल्लिखन्ती गोप्रतियोगिकत्वांशे बाधमनासादयन्ती न लाघवमात्रेण गोसंयोगं प्रतियोगित्वेन स्वीकर्तुं क्षमतेऽनुभवापलापकस्य लाघवस्याकिञ्चित्करत्वात्, संदेह एव लाघवस्य वस्तुव्यवस्थापकत्वात्, तथा गोप्रतियोगिकत्वेन संयोगानुपस्थितावपि संयोगेन गौर्नास्तीति बुद्ध्युत्पादाच्च, एवञ्च साक्षात्सम्बन्धेन गोमन्मात्रे गौर्नास्तीति बुद्धिर्न जायत एवेति केन तुभ्यमभ्यधायि संयोगादिसम्बन्धावच्छिन्नप्रतियोगिताकाभावातिरिक्तस्य तद्विषयस्यानभ्युपगमात्, संयोगसम्बन्धावच्छिन्नप्रतियोगिताकाभावावगाहिनी सा प्रत्यक्षबुद्धिस्समवायेन गोमति समवायसम्बन्धावच्छिन्नप्रतियोगिताकाभावावगाहिनी च संयोगादिना गोमति जायत एव। योग्यानुपलब्धिरूपसामग्रीवशान्न जायते, चातो विपरीता।

गौरस्तीति बुद्धिविपरीता गौर्नास्तीति बुद्धिः, सा बुद्धिर्योग्यानुपलब्धिरूपसामग्रीसत्त्वे समवायेन गोमति गवावयवे संयोगेन च गोमति चत्वरादौ च जायत एव, योग्यानुपलब्धिरूपसामग्र्यसत्त्वे च तत्र तत्र न जायते इति कथनाशयः।

अत्र शङ्कते। न चैवं संयोगादिना गोमत्युपलब्धगवात्यन्ताभावः परत्र स्वबोधसंक्रान्तयेऽत्र गौर्नास्तीति कथन्नाभिलपतीति गौर्नास्तीति प्रत्ययवेद्यस्तेन न

गृहीत इति कल्प्यत इति वाच्यम्, गौर्नास्तीति प्रतीतिः संयोगेन गोमति चत्वरादौ जायमाना यदि समवायसम्बन्धावच्छिन्नप्रतियोगिताकगवात्यन्ताभावं विषयीकरोति तदा तत्र समवायेन गौर्नास्तीत्यभिलापः कुतो न भवति, यतस्तादृशाभिलापस्तत्र न भवति तेनेदं कल्प्यते यत्तया प्रतीत्या तादृशाभावो न गृहीत इति वक्तुराशयः।

तत्र समाधीयते। समवायेन गौर्नास्तीत्याद्यभिलापस्य स्पष्टप्रत्यायनेच्छानिबन्धनत्वेनार्थापत्तेरुपक्षीणव्यापारत्वादिति। अर्थापत्त्यैव तादृशार्थस्य गतार्थत्वात्तादृशाभिलापाभावादिति तदाशयः।

अन्ते सारांश उच्यते 'सम्बन्धानवच्छिन्नप्रतियोगिताकाभावविषयकत्वेन प्रत्यक्षस्यानुव्यवसीयमानतायास्संदिग्धत्वेन न ततस्तादृशाभावसिद्धिः, तादृशानुभवस्याविवादत्वे तादृशाभावनिराकरणममरगुरूणाम[प्य]शक्यमित्यलमि'त्यन्तेन।[२६४]

तत्त्वालोकः – 'सम्बन्धविशेषमन्तर्भाव्यैवे'ति।[१] ननु संयोगसमवायादिसम्बन्धेन गोमत्ताबुद्धावुभयसम्बन्धेन गवात्यन्ताभाववत्ताबुद्धेरविरोधित्वेन तद्वारणाय संयोगत्वाद्यतिरिक्तधर्मावच्छिन्नसंसर्गत्वानिरूपितत्वस्यैव विरोधित्वघटकतया वाच्यतया ध्वंसवत्ताबुद्धिसाधारण्यन्दुर्वारमिति वाच्यमिति चेन्न, ध्वंसीयप्रतियोगितायामपि सम्बन्धावच्छिन्नत्वस्वीकारात्।

यद्वा भेदप्रतियोगित्वस्य सम्बन्धानवच्छिन्नत्वे तद्ग्रहस्य प्रतिबन्धकत्वावारणाय तद्धर्मातिरिक्तधर्मानवच्छिन्नसंसर्गतानिरूपितत्वस्यैव वाच्यतया न ध्वंसबुद्धिसङ्ग्रह इति।

यदि च तद्गौर्नास्तीत्यादिबुद्धिरत्यन्ताभावत्वरूपानुयोगित्वावगाहिनी तदात्यन्ताभावध्वंसादिबुद्ध्योर्नैकरूपेण प्रतिबन्धकत्वसम्भव इति चिन्त्यम्।-[२६५]

प्रकाशः – 'एकसम्बन्धेन गवात्यन्ताभावग्रहेऽपि सम्बन्धान्तरेण तद्गोमत्ताबुद्ध्युत्पादात् सम्बन्धविशेषमन्तर्भाव्यैवात्यन्ताभावग्रहस्य प्रतिबन्धकतया ध्वंसवत्ताग्रहसाधारण्यासम्भवादि'ति यदुपन्यस्तं जगदीशेन, तत्र शङ्कते 'ननु संयोगसमवायादिसम्बन्धेन गोमत्ताबुद्धावुभयसम्बन्धेन गवात्यन्ताभावबुद्धेरप्रतिबन्धकत्वेन[२] उभयसम्बन्धावच्छिन्नप्रतियोगिताकगवात्यन्ताभाववत्ताबुद्धेः प्रतिबन्धकत्ववारणाय संयोगत्वातिरिक्त-

---

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. १९

२. एकसम्बन्धेन गोरधिकरणेऽपि संयोगसमवायोभयसम्बन्धेन गोरसत्त्वादिति भावः।

धर्मावच्छिन्नसंसर्गत्वानिरूपितत्वस्य विरोधित्वघटकताया वाच्यतया ध्वंसवत्ताबुद्धि साधारण्यं दुर्वारमि'ति।

अत्र समाधानं द्विधा करोति। तत्र प्रथममुच्यते यद् ध्वंसीयप्रतियोगितायामपि सम्बन्धावच्छिन्नत्वस्वीकारात्तत्र संयोगत्वाद्यतिरिक्तधर्मावच्छिन्नसंसर्गत्वानिरूपितत्वासम्भवादिति।

द्वितीयसमाधानमिदं यद् भेदप्रतियोगित्वस्य सम्बन्धानवच्छिन्नत्वे तद्वारणाय तद्धर्मातिरिक्तधर्मानवच्छिन्नसंसर्गतानिरूपितत्वस्यैव तत्र प्रवेशनीयतया न ध्वंसबुद्धिसङ्ग्रह इति।

अपरमिदमुच्यते यदि तद्गौर्नास्तीति बुद्धिरत्यन्ताभावत्वरूपानुयोगितावगाहिनी तदात्यन्ताभावध्वंसादिबुद्ध्योर्नैकरूपेण प्रतिबन्धकत्वसम्भव इति।[२६५]

तत्त्वालोकः– 'विभावनीयमि'ति।[1] इदानीं गौर्नास्तीति बुद्धेस्सर्वानुमताया अपलाप एव चिन्ताबीजम्। न च तत्र कालिकसम्बन्धेनाभाववत्त्वं[2] विषयः, तद्गोर्विद्यमानतादशायामपीदानीं गौर्नास्तीति प्रत्ययापत्तेः।

न च समवायादिसम्बन्धावच्छिन्नप्रतियोगिताकाभावो विषयः, प्रतियोग्यभावान्वयस्य तुल्ययोगक्षेमत्वेनेदानीं गौरित्यत्र कालिकेन गोमत्त्वस्य प्रतीतत्वेन नञा तत्सम्बन्धावच्छिन्नाभावबोधस्यैवानुभविकत्वादिति।

प्रकाशः– 'अत्यन्ताभावस्य कालमात्रावृत्तित्वप्रसङ्गादि'ति[3] दीधितिव्याख्यावसरे 'तत्र गवात्यन्ताभावस्य दैशिकविशेषणतया कालमात्रावृत्तित्वं प्राच्यैरिष्यत एव, सदातनत्वव्यवहारस्य कालिकविशेषणतयैव सम्भवादिति तु विभावनीयमि'ति यदुपन्यस्तं जगदीशेन, तत्र तत्त्वालोककृतोच्यते 'इदानीं गौर्नास्तीति बुद्धेरपलाप एव चिन्ता (विभावनीयता) बीजमि'ति।

तत्र पुनः शङ्कते। न च तत्र कालिकेनाभावो विषय इति। तत्र समादधाति। तद्गोर्विद्यमानतादशायामपि तद्गौर्नास्तीति प्रत्ययापत्तेरिति। पुनः शङ्कते। समवायसम्बन्धावच्छिन्नप्रतियोगिताकोऽभावो विषय इति। अत्र समाधीयते। प्रतियोग्यभावान्वयस्य तुल्ययोगक्षेमत्वेनेदानीं गौरित्यत्र कालिकेन गोमत्त्वस्य प्रतीतत्वेन नञा तत्सम्बन्धावच्छिन्नाभावबोधस्यैवानुभविकत्वादिति। [२६६]

---

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. २०
२. 'कालिकेनाभाववत्त्वमि'ति प्राचीनमुद्रितपुस्तके पाठः।
३. प्रकृतग्रन्थः (प्रथमो भागः), दीधितिमूलम्, पृ. १८

तत्त्वालोकः – 'नन्विदानीमश्व' इत्यादि।[1] अत्र कालवृत्तितावच्छेदकत्वं देशेऽभ्युपेत्येदानीं कालेऽश्वे च स्वरूपत एव गोत्वाभावस्याभ्युपगम्यतयाश्व इव कालेऽपि स्वरूपत एव तत्सत्त्वमङ्गीकृत्य कालाश्वोभयवृत्तित्वङ्गोत्वाभावे विषय आस्तामिति चेद्, एवं देशवृत्तितायां कालस्याप्यवच्छेदकत्वं न स्याद्, इदानीं गेहे गौर्नास्तीत्यत्राप्युक्तयुक्त्या वृत्तित्वद्वयस्यैव विषयत्वसम्भवाद्।

न चेष्टापत्तिरनुभवविरोधादन्यथा गोस्तद्गेहे विद्यमानत्वदशायामिदानीं गेहे गौर्नास्तीति प्रतीतिरपि स्यात्। गेहे कालान्तरावच्छेदेन तत्काले च देशान्तरावच्छेदेन गवात्यन्ताभावस्याभ्युपगततया वृत्तित्वद्वयावगाहित्वेऽबाधितत्वात्।

तस्या अपीष्टत्वे भवति भवतां मतिर्जानातु तथैव भवान्, किमनुरोधेन, चरणपातेनापि, वयन्देशकालादीनामवच्छेदकत्वमङ्गीकारयाम इत्याखण्डलार्थः।[२६७]

प्रकाशः – 'इयांस्तु विशेषो यदेकस्य देशभेदावच्छिन्नं तथात्वमपरस्य तु स्वरूपावच्छिन्नमिति देशे कालस्यैव कालेऽपि देशस्यावच्छेदकत्वादि'ति[2] दीधितेर्व्याख्यावसरे 'ननु इदानीमश्वे न गोत्वमित्यादिप्रतीतेः कालवृत्तितयाऽश्ववृत्तितया च गोत्वाभावावगाहितयैवोपपत्तौ देशस्य कालवृत्तितावच्छेदकत्वे मानाभाव इत्यत आह देश इति' इति यदुपन्यस्तं जगदीशेन, तत्र 'इदानीमश्वे न गोत्वमि'ति परिगृह्य तत्त्वालोककृतोच्यते 'अत्र कालवृत्तितावच्छेदकत्वं देशेऽभ्युपेत्येदानीं कालेऽश्वे च स्वरूपत एव गोत्वाभावस्याभ्युपगम्यतयाऽश्व इव कालेऽपि स्वरूपत एव तत्सत्त्वमङ्गीकृत्य कालाश्वोभयवृत्तित्वङ्गोत्वाभावे विषय आस्तामिति चेदेवन्देशवृत्तितायां कालस्यावच्छेदकत्वन्न स्यादिदानीं गेहे गौर्नास्तीत्यत्राप्युक्तयुक्त्या वृत्तित्वद्वयस्यैव विषयत्वसम्भवादि'ति।

न चेष्टापत्तिः, अनुभवविरोधाद्। अन्यथा गोस्तद्गेहे विद्यमानत्वदशायामपीदानीं गेहे गौर्नास्तीति प्रतीतिरपि स्यात्, गेहे कालान्तरावच्छेदेन तत्काले च देशान्तरावच्छेदेन गवात्यन्ताभावस्याभ्युपगततया वृत्तित्वद्वयावगाहित्वेऽबाधितत्वात्।

---

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. २०

२. तदेव, दीधितिमूलम्, पृ. १८

अन्ते काक्वा उच्यते। तस्या अपीष्टत्वे भवति भवतां मतिर्जानातु भवान् तथैव, किमनुरोधेन चरणपातेनापि, वयं देशकालादीनामवच्छेदकत्वमङ्गीकारयाम इत्य[या]खण्डलार्थः।

अनुभवानुरोधेन व्यवस्था भवति, यदि भवा[न]नुभवविरुद्धमेव मनुते तर्हि धन्यो भवान्, कुपन्थानं गच्छन्तं भवन्तं किमहं कुर्यामिति तदाशयः।

जगदीशतर्कालङ्कारेणापि तथैवोपन्यस्तमन्ते 'तथा चानुभव एव देशस्य कालवृत्तितावच्छेदकत्वे मानम्, अन्यथा गेहे नेदानीं गौरित्यादिप्रत्ययबलाद्गेहादिदेशस्य गवात्यन्ताभाववत्तायामपि कालो नावच्छेदकः स्यात्तत्रापि गवाभावे गृहवृत्तित्वैतत्कालवृत्तित्वोभयावगाहितायाः सुवचत्वादि'त्युपन्यतमिति[१]।[२६७]

तत्त्वालोकः – 'प्रतियोग्यारोपस्तज्जन्ये'ति।[२] आरोपस्य जनकता चोपलभ्येतेत्येवमापत्तिद्वारा बोध्येति।[२६८]

प्रकाशः – 'न च संसर्गाभावविशेषोऽत्यन्ताभावः, संसर्गाभावत्वञ्च संसर्गारोपजन्यप्रतीतिविषयाभावत्वरूपम्, जन्यताघटकनियमघटितमिति वाच्यमि'ति[३] दीधितेर्व्याख्यावसरे 'संसर्गे'ति परिगृह्य 'स्वप्रतियोगितावच्छेदकसम्बन्धेन यः प्रतियोग्यारोपस्तज्जन्यप्रतीतिविषयो योऽभावस्तत्त्वमि'ति जगदीशेनोपन्यस्तन्तत्र तत्त्वालोककृता स्पष्टीक्रियते 'आरोपस्य जनकता चोपलभ्येतेत्येवमापत्तिद्वारा बोध्ये'ति।

स्वप्रतियोगितावच्छेदकसंयोगादिसम्बन्धेन यद्यत्र स्वप्रतियोगी घटादिस्स्यात्तर्ह्युपलभ्येत, नोपलभ्यते, अतो नास्तीति, अत्रारोपस्य जनकता= यद्यत्र घटः स्यादित्यारोपस्य जनकता, उपलभ्येतेत्येवमापत्तिद्वारेति कथनाशयः।[२६८]

तत्त्वालोकः – 'पूर्वोत्तरकालावेवे'ति।[४] अयमिदानीं यदि स्वाश्रयोत्तरकालकत्वसंसर्गेण घटवान् स्यात्, घटवत्त्वेनोपलभ्येत इति ध्वंसप्रत्यक्षे, अयमिदानीं स्वाश्रयपूर्वकालकत्वसम्बन्धेन घटवान् स्यात्तत्त्वेनोपलभ्येत इति प्रागभावप्रत्यक्षे कारणमित्युत्तरपूर्वकालयोः सम्बन्धघटकत्वात् सम्बन्धत्वमित्याशयः।[२६९]

---

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. २०
२. तदेव, जागदीशीमूलम्, पृ. २१
३. तदेव, दीधितिमूलम्, पृ. २१
४. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. २१
अधुनोपलब्धजागदीशीग्रन्थेषु 'उत्तरकालपूर्वकालावेवे'ति पाठः।

प्रकाशः – 'प्रागभावध्वंसयोरपि उत्तरकाल-पूर्वकालावेव प्रतियोगितावच्छेदकसम्बन्धौ। ताभ्यामेव सम्बन्धाभ्यां प्रतियोग्यारोप[ः] प्रागभावध्वंसप्रत्यक्षे हेतुरतस्तयोर्नाव्याप्तिरिति प्राचामाशय' इति यदुपन्यस्तं जगदीशेन तत्र तत्त्वालोककृता स्पष्टीक्रियते।

अयमिदानीं यदि स्वोत्तरकालकत्वसम्बन्धेन घटवान् स्यात्, घटवत्त्वेनोपलभ्येत इति ध्वंसप्रत्यक्षे कारणं तथा अयमिदानीं स्वाश्रयपूर्वकालकत्वसम्बन्धेन यदि घटवान् स्यात्तदा तत्त्वेन घटवत्त्वेनोपलभ्येत इति प्रागभावप्रत्यक्षे कारणमित्युत्तरपूर्वकालयोः सम्बन्धघटकतया सम्बन्धत्वमित्याशय इति।[२६९]

तत्त्वालोकः – **'चक्रकादिप्रसङ्गः' इति।[१] स्वग्रहसापेक्षग्रहसापेक्षग्रहसापेक्षग्रहविषयत्वेन स्वभिन्नत्वप्रसङ्ग इत्यर्थः। स्वमत्यन्ताभावत्वम्, तद्ग्रहसापेक्षो नियमग्रहस्तत्सापेक्षस्संसर्गाभावत्वग्रहस्तत्सापेक्षत्वस्यात्यन्ताभावत्वग्रहे सत्त्वादापादकसत्त्वं चक्रकप्रसङ्गव्याप्यावात्माश्रयान्योन्याश्रयप्रसङ्गाविति न तौ दर्शिताविति बोध्यम्।[२७०]**

प्रकाशः – 'घटितमि'ति दीधित्यंशं परिगृह्य 'तथा च चक्रकादिप्रसङ्ग इति भाव' इति जगदीशेन यदुपन्यस्तन्तत्र तत्त्वालोककृता स्पष्टीक्रियते।

स्वग्रहसापेक्षो यो ग्रहस्तद्ग्रहसापेक्षो[यो] ग्रहस्तद्ग्रहसापेक्षो यो ग्रहस्तद्विषयत्वेन स्वभिन्नत्वप्रसङ्ग एव चक्रकप्रसङ्गपदाभिधेयोऽर्थः। तत्र स्वमत्यन्ताभावत्वम्, तद्ग्रहसापेक्षो नियमग्रहः = अत्यन्ताभावघटितप्रकृतव्याप्तिरूपनियमग्रहः, तत्सापेक्षः जन्यत्वघटितसंसर्गाभावग्रहः, तत्सापेक्षत्वस्यात्यन्ताभावत्वग्रहे सत्त्वादापादकस्य सत्त्वमिति कथनाशयः।

चक्रकप्रसङ्गव्याप्यौ आत्माश्रयप्रसङ्गान्योन्याश्रयप्रसङ्गाविति चक्रकप्रसङ्गेनैवात्माश्रयान्योन्याश्रयप्रसङ्गयोरपि लब्धत्वात्तौ न दर्शिताविति कथनाशयः। 'चक्रकादिप्रसङ्ग' इत्यत्रादि-पदेन दर्शितदिशा स्वभिन्नत्वप्रसङ्ग एवाभिप्रेतो न तु आत्माश्रयान्योन्याश्रयप्रसङ्गाविति बोध्यम्।

दीधितिकृता 'न च संसर्गाभावविशेषोऽत्यन्ताभावः। संसर्गाभावत्वञ्च संसर्गारोपजन्यप्रतीतिविषयाभावत्वरूपम्, जन्यताघटकनियमघटितमि'त्येवोपन्यस्तम्[२] न तु

---

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. २१

२. तदेव, दीधितिमूलम्, पृ. २१

संसर्गाभावत्वघटिता व्याप्तिः नियमः, तद्घटित - जन्यत्वघटितः संसर्गाभाव इति, अतो दीधित्यनुसारमेव मैथिलेन 'चक्रकादिप्रसङ्ग' इत्यस्य व्याख्यावसरे 'स्वमत्यन्ताभावत्वमि'त्युपन्यस्तम्। तस्माद्विवृतिकृता मुधैवोक्तम् 'यत्तु मैथिलैरुक्तमि'त्यादि[1]। तद्भावावबोधसामर्थ्यरहितेन तेन स्वमहत्त्वख्यापनाय दुःसाहसः कृतः।[२७०]

तत्त्वालोकः – **'कथञ्चिदि'ति।[2] उक्तारोपम्विना जायमानप्रत्यक्षस्थलेऽपि तादृशारोपं परिकल्प्येत्यर्थः।[२७१]**

प्रकाशः – 'नन्वभावबुद्धौ प्रतियोग्यारोपस्य हेतुत्वे मानाभावः, कथञ्चिदभावलौकिकप्रत्यक्षं प्रति प्रतियोग्यारोपस्य हेतुतास्वीकारेऽपि अतीन्द्रियसाध्यके व्यभिचारिणि अतिव्याप्तिः, तत्र हेतुसमानाधिकरणसाध्याभावस्यातीन्द्रियतया निरुक्तसंसर्गाभावत्वविरहादि'ति यदुपन्यस्तं जगदीशेन, तत्र 'कथञ्चिदि'त्यस्याशयः स्पष्टीक्रियते तत्त्वालोककृता 'उक्तारोपम्विना जायमानप्रत्यक्षस्थलेऽपि तादृशारोपं परिकल्प्येत्यर्थः' इत्यनेन।[२७१]

तत्त्वालोकः – **'स्वीकारेऽपी'ति।[3] अपिनाऽत्यन्ताभावप्रत्यक्षे प्रतियोग्युपस्थितिसहकृतयोग्यानुपलम्भस्य प्रागभावप्रत्यक्षे प्रतियोगिजनकसामग्र्युपलम्भसहकृतस्य (योग्यानुपलम्भस्य[4]) ध्वंसप्रत्यक्षे नाशकोपलम्भसहकृतस्य (योग्यानुपलम्भस्य[5]) कारणत्वादेव सर्वत्र निर्वाहान्न प्रतियोग्यारोपस्य कारणत्वमिति सूचितम्।**

न च नाशकोपलम्भसहकारो व्यर्थः, असमवायिकारणमात्रनाशाधीनकार्यनाशस्थले अनुपलब्धासमवायिकारणनाशस्य ध्वंसप्रत्यक्षापत्तेः। न च कपालखण्डाद्युपलब्धिस्थले ध्वंसबुद्ध्यनुपपत्तिरानुमानिकत्वात्कपालध्वंसमनुमाय घटध्वंसस्य प्रत्यक्षसम्भवादिति।[२७२]

प्रकाशः – 'नन्वभावबुद्धौ प्रतियोग्यारोपस्य हेतुत्वे मानाभावादुक्तसंसर्गाभावत्वघटितव्याप्तिलक्षणस्यासम्भवः, कथञ्चिदभावलौकिकप्रत्यक्षम्प्रति प्रतियोग्यारोपस्य

---

१. सिद्धान्तलक्षणजागदीशी (श्रीगुरुप्रसादशास्त्रिसम्पादिता), विवृतिटीका, पृ. १०७

२. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. २१

३. तदेव, जागदीशीमूलम्, पृ. २१

४. मुद्रितप्राचीनपुस्तके कोष्ठकान्तर्गतः ( ) पाठो नास्ति।

५. मुद्रितप्राचीनपुस्तके कोष्ठकान्तर्गतः ( ) पाठो नास्ति।

हेतुतास्वीकारेऽपी'ति यदुपन्यस्तं जगदीशेन तत्रत्य'अपि'शब्दाशयः स्पष्टीक्रियते तत्त्वालोककृता।

अत्यन्ताभावप्रत्यक्षे प्रतियोग्युपस्थितिसहकृतयोग्यानुपलम्भस्य प्रागभावप्रत्यक्षे प्रतियोगिजनकसामग्र्युपलम्भसहकृतस्य योग्यानुपलम्भस्य ध्वंसप्रत्यक्षे नाशकोपलम्भसहकृतस्य योग्यानुपलम्भस्य कारणत्वादेव सर्वत्र निर्वाहान्न प्रतियोग्यारोपस्य कारणत्वमित्यपिना सूचितम्।

अत्र शङ्कते। न च नाशकोपलम्भस्वीकारो व्यर्थ इति। तत्र समादधाति। असमवायिकारणमात्रनाशाधीनकार्यनाशस्थले अनुपलब्धासमवायिकारणनाशस्य ध्वंसप्रत्यक्षापत्तेरिति।

अत्र शङ्कते। न च कपालखण्डाद्युपलब्धिस्थले ध्वंसबुद्ध्यनुपपत्तिरिति। समादधाति। आनुमानिकत्वात्कपालध्वंसमनुमाय घटध्वंसप्रत्यक्षसम्भवादिति।[२७२]

तत्त्वालोकः – 'निरुक्तसंसर्गाभावत्वविरहे'ति[1]। संसर्गारोपजन्यप्रतीतिविषयवृत्त्यभावविभाजकोपाधिमत्त्वस्य संसर्गाभावत्वरूपत्वे नातिव्याप्तिरिति चिन्तनीयम्।[२७३]

प्रकाशः – 'अतीन्द्रियसाध्यके व्यभिचारिण्यतिव्याप्तिः। तत्र हेतुसमानाधिकरणसाध्याभावस्यातीन्द्रियतया निरुक्तसंसर्गाभावत्वविरहादि'ति यदुपन्यस्तं जगदीशेन, तत्रोच्यते 'संसर्गारोपजन्यप्रतीतिविषयवृत्त्यभावविभाजकोपाधिमत्त्वस्य संसर्गाभावत्वरूपत्वे नातिव्याप्तिरिति चिन्तनीयमि'ति।[२७३]

तत्त्वालोकः – 'सदातनत्वविशिष्टमि'ति[2]। न च घटाभावाभावस्य घटरूपतयाऽनित्यत्वे सदातनत्वविरहादत्यन्ताभावत्वानुपपत्तिरिति वाच्यमतिरिक्तत्वाभ्युपगमाद् घटकालविशिष्टस्यैव संसर्गत्वाभ्युपगमेन घटाभावदशायान्तत्सत्त्वासम्भवात्, यद्वा भावत्वस्य भावभेदरूपतया घटस्वरूपे तद्विरहेणात्यन्ताभावत्वविरहेऽपि न दोष इति।[२७४]

प्रकाशः – 'भेदभिन्नाभावत्वं संसर्गाभावत्वं, सदातनत्वविशिष्टञ्च तदेवात्यन्ताभावत्वमि'ति यदुपन्यस्तन्तत्र शङ्कते। न च घटाभावाभावस्य घटरूपतयाऽनित्यत्वे सदातनत्वविरहादत्यन्ताभावत्वानुपपत्तिरिति। समादधाति। अतिरिक्तत्वाभ्युपगमाद्

---

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. २१

२. तदेव, जागदीशीमूलम्, पृ. २१

घटकालविशिष्टस्यैव संसर्गत्वाभ्युपगमेन घटाभावदशायान्तत्सत्त्वासम्भवात्।

यद्वाऽभावत्वस्य भावभेदरूपतया घटस्वरूपे तत्र तद्विरहेणात्यन्ताभावत्वविरहेऽपि न दोष इति।[२७४]

तत्त्वालोकः – **'अनुयोगिताविशेषो वे'ति[१]। इदन्तु बोध्यम्। भेदत्वस्यानुयोगिताविशेषत्वेऽत्यन्ताभावत्वस्यापि तद्रूपत्वमेवेति।[२७५]**

प्रकाशः – 'भेदत्वञ्च संसर्गविधया तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकाभावत्वम्, अनुयोगिताविशेषो वे'ति यदुपन्यस्तं जगदीशेन, तत्रोच्यते 'इदन्तु बोध्यम्, भेदत्वस्यानुयोगिताविशेषत्वे अत्यन्ताभावत्वस्यापि तद्रूपत्वमेव = अनुयोगिताविशेषरूपत्वमेव इति।[२७५]

तत्त्वालोकः – **'सास्नादावव्याप्तीति'[२]। साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वस्य पारिभाषिकत्वे न दोषसम्भव इति तु विभावनीयम्।[२७६]**

प्रकाशः – 'प्रयोजनविरहोऽव्याप्तिश्चे'ति दीधिति[३] व्याख्यावसरे जगदीशेन 'तादात्म्येन गवादेः साध्यतायां तत्सम्बन्धावच्छिन्नात्यन्ताभावाप्रसिद्ध्या [सास्नावत्त्वादाव]व्याप्तिरित्यर्थ इति यदुपन्यस्तम्, तत्रोच्यते 'साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वस्य पारिभाषिकत्वे न दोषसम्भव इति तु विभावनीयम्'।

तत्त्वालोककृता पारिभाषिकसाध्यतावच्छेदकत्वं पूर्वं दर्शितम्, तदेव बोध्यम्। साध्यतासामानाधिकरण्यसाध्यताघटकसम्बन्धेतरसम्बन्धावच्छिन्नत्वोभयाभावरूपस्य तस्य सास्नादिमति विद्यमानघटत्वाद्यभावीयप्रतियोगितायां साध्यतासामानाधिकरण्यविरहेणोभयाभावसत्त्वान्न दोष इत्याशयः।

वह्न्यादिभेदीयप्रतियोगितायां साध्यतासामानाधिकरण्यस्य साध्यताघटकसम्बन्धेतरसम्बन्धावच्छिन्नत्वस्य चोभयोः सत्त्वान्न साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वम्।[२७६]

तत्त्वालोकः – **'इदमप्यभावे'त्यादि[४]। ननु धर्मिभेदधर्मात्यन्ताभावयोरैक्येऽव्याप्तिविरहेऽभावाधिकरणकाभावस्याधिकरणस्वरूपत्वे गोभेदस्यापि**

---

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. २१
२. 'सास्नावत्त्वादावव्याप्ती'त्यादिपाठ इदानीमुपलब्धपुस्तकेषु। –तदेव, जागदीशीमूलम्, पृ. २२
३. तदेव, दीधितिमूलम्, पृ. २१
४. तदेव, जागदीशीमूलम्, पृ. २२

हेतुसमानाधिकरणात्यन्ताभावरूपतया तत्राव्याप्तिरस्त्येव। न चाभावाधिकरणकोप्यभावोऽभावप्रतियोगिक एवाधिकरणस्वरूप इति वाच्यम्, तादात्म्येनाभावसाध्यके तथाप्यव्याप्तेरिति चेद्, न।

हेत्वधिकरणनिरूपितवृत्तितावच्छेदकानुयोगितानिरूपितसंसर्गाभावीयप्रतियोगित्वविवक्षायां दोषाभावात्। न चात्यन्ताभावीयत्वप्रवेशे प्रयोजनविरहोऽत्राप्यस्त्येवेति वाच्यम्, इष्टत्वात्।[२७७]

प्रकाशः – तादात्म्येन गवादेः साध्यतायां सास्नादिमत्त्वेऽत्यन्ताभावप्रवेशे, [इदमपि] = व्याप्यवृत्तिसाध्यकस्थलीयलक्षणस्य साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताघटितत्वादव्याप्तिकथनमपि, अभाववृत्तिरभावो नाधिकरणस्वरूपो न वा धर्मात्यन्ताभाव एव धर्मिणो भेद इति मतेन' इति जगदीशेनोक्तम्[१]। अन्यथा घटत्वात्यन्ताभावस्य घटभेदरूपतयात्यन्ताभावीयप्रतियोगितायां तादात्म्यसम्बन्धावच्छिन्नत्वस्य नाप्रसिद्धिः।

तत्रोच्यते। ननु धर्मिभेदधर्मात्यन्ताभावयोरैक्येऽव्याप्तिविरहेऽप्यभावाधिकरणकाभावस्याधिकरणस्वरूपत्वे गोभेदस्यापि हेतुसमानाधिकरणात्यन्ताभावरूपतया गोभेदे घटत्वविरहाद् घटत्वात्यन्ताभावस्य तत्र सत्त्वात्तस्य स्वाधिकरणगोभेदस्वरूपतया तत्प्रतियोगितावच्छेदकत्वस्यैव साध्यतावच्छेदके गोत्वे सत्त्वादव्याप्तिः स्यादेवेति तदाशयः।

अत्र समादधाति। न चाभावाधिकरणकोऽप्यभावोऽभावप्रतियोगिक एवाधिकरणस्वरूपो घटत्वाद्यभावस्तु नाभावप्रतियोगिकोऽतो नोक्तदोषः।

अत्र समादधाति। तादात्म्येनाभावसाध्यके तथाप्यव्याप्तेः। हेतुसमानाधिकरणाभावप्रतियोगिकाभावस्याभावभेदरूपतया तत्प्रतियोगितावच्छेदकत्वस्यैव साध्यतावच्छेदकेऽभावत्वे सत्त्वाद् अभावभेदाभावोऽभावप्रतियोगिकः, अभावत्वरूपहेतुसमानाधिकरणश्च, तस्याभावभेदात्मकसाध्यभेदवृत्तितयाऽभावभेदीयप्रतियोगितावच्छेदकत्वस्याभावत्वे सत्त्वात्।

तत्रोच्यते। हेत्वधिकरणनिरूपितवृत्तितावच्छेदकानुयोगितानिरूपितसंसर्गाभावीयप्रतियोगित्वविवक्षायां दोषाभावादिति।

---

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. २२

अभावभेदत्वरूपसाध्यभेदत्वरूपानुयोगिताया हेत्वधिकरण = अभाव, - निरूपितवृत्तितावच्छेदकत्वविरहान्नाभावभेदमादाय तादात्म्येन भावसाध्यकेऽव्याप्ति-सम्भव इति तदाशयः।

अत्र शङ्कते। न चात्यन्ताभावीयत्वप्रवेशे प्रयोजनविरहोऽत्राप्यस्त्येवेति वाच्यम्, धूमादिसमानाधिकरणस्य वह्न्यादिभेदस्य साध्यतावच्छेदकसम्बन्धेन प्रतियोगिसमाना-धिकरणत्वादेव व्युदाससम्भवात्। अत्र समादधाति। इष्टत्वादिति।

[यथा] यादृशप्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वं हेतुमतस्तत्प्रतियोगि-तानवच्छेदकत्वघटितलक्षणे संसर्गाभावीयत्वप्रवेशे प्रयोजन[विरह] एव न, तथा व्याप्यवृत्तिसाध्यकस्थलीयलक्षणेऽपि तत्राव्याप्तेरपि सम्भवादित्यत्र तात्पर्यादिति तत्त्वा-लोककृतां तात्पर्यविवरणम्।[२७७]

तत्त्वालोकः – **'सहजत एव प्रतियोगिव्यधिकरणत्वादि'ति**[१]। **इदानीं प्रतियोगिसम्बन्धित्वप्रवेशे प्रयोजनविरहेण प्रतियोग्यधिकरणत्वाभावस्य हेत्व-धिकरणे सत्त्वसम्भवादिति भावः।[२७८]**

प्रकाशः – 'अथ ज्ञानवान् द्रव्यत्वात्, विशेषगुणवान् मनोऽन्यद्रव्यत्वाद्, जातिमान् भावत्वादित्यादौ समवायेन ज्ञानादेः साध्यतायामतिव्याप्तिः, साध्यशून्याना-मपि हेतुमतां विषयत्वविशेषणत्वैकार्थसमवायैः साध्यवत्त्वादि'ति दीधितेः[२] व्याख्याव-सरे जगदीशेन 'ननु विषयताया वृत्त्यनियामकत्वमते ज्ञानाभावस्य गगनादौ सहजत एव प्रतियोगिव्यधिकरणत्वान्नातिव्याप्तिरत आह विशेषगुण इति' इति यदुपन्यस्तन्तत्र तत्त्वालोककृता 'सहजत एवे'त्यस्याशयः स्पष्टीक्रियते।

प्रतियोगितावच्छेदकावच्छिन्नाधिकरणावृत्तित्वघटकप्रतियोगितावच्छेदका-वच्छिन्नाधिकरणत्वं यदि सम्बन्धसामान्येनैव विवक्षितं तदापि समवायकालिकादिस-म्बन्धेन ज्ञानत्वरूपप्रतियोगितावच्छेदकावच्छिन्नाधिकरणे आत्म-घटादौ ज्ञानाभाव-स्यावर्तमानत्वाद् विषयताया वृत्त्यनियामकत्वेन विषयतया ज्ञानत्वावच्छिन्नाधिकरण-त्वाप्रसिद्धत्वात् तथा च हेतुमति गगने प्रतियोगितावच्छेदकावच्छिन्नाधिकरणत्वाभाव-सत्त्वाद् ज्ञानाभावः = साध्याभावः, लक्षणघटको भवेदेवातो नातिव्याप्तिः।

---

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. २२

२. तदेव, दीधितिमूलम्, पृ. २२

यदि 'अधिकरणत्व'स्थाने सम्बन्धित्वमेव तत्र प्रविष्टमभविष्यत्तदा विषयत्वादिना ज्ञानत्वावच्छिन्नसम्बन्धित्वस्यैव हेतुमति गगने सत्त्वाद् ज्ञानाभावो लक्षणघटको नाभविष्यत्, किन्तु इदानीं तत्र प्रतियोगिसम्बन्धित्वप्रवेशे प्रयोजनविरहात् सम्बन्धित्वप्रवेशो नास्ति। तथा च प्रतियोग्यधिकरणत्वाभावस्य हेत्वधिकरणे सत्त्वसम्भवात् सहजत एव तत्र ज्ञानाभावरूपः साध्याभावो लक्षणघटक इत्याशयः।

वृत्त्यनियामकविषयत्वाधि[दि]सम्बन्धेनाधिकरणतैव न भवति। सम्बन्धिता तु वृत्त्यनियामकेनापि भवत्येव, किन्तु अभावविशेषणीभूतप्रतियोगिवैयधिकरण्ये प्रतियोग्यधिकरणावृत्तित्वमेव प्रविष्टमथवा हेत्वधिकरणे प्रतियोग्यनधिकरणत्वमेव, न तु प्रतियोग्यसम्बन्धिवृत्तित्वमथवा हेत्वधिकरणे प्रतियोग्यसम्बन्धित्वमतो गगने हेत्वधिकरणे ज्ञानात्मकप्रतियोगिनो विषयतासम्बन्धित्वस्य सत्त्वेऽपि तदधिकरणत्वविरहान्नातिव्याप्तिरिति कथनाशयः।[२७८]

तत्त्वालोकः – 'अव्यावर्तकत्वादि'ति[१]। सावयवत्वस्य तत्प्रयोजकत्वादन्यथा विभूनामपि व्यावर्तकत्वापत्तेः। नन्वस्त्ववच्छिन्नपरिमाणवत्त्वमेव व्यावर्तकत्वे प्रयोजकमित्यत्र सिद्धान्तभङ्गरूपदण्डमाह कालोपाधीति।

न च दिगुपाधितायामवच्छिन्नपरिमाणवत्त्वम् कालोपाधितायाञ्च जन्यत्वं प्रयोजकमिति न दोष इति वाच्यम्। परमाणूनां व्यावर्तकत्वस्यानुभावकत्वे हि प्रयोजकभेदकल्पना युज्यते, न चासन्दिग्धन्तदस्तीत्युभयत्रापि सावयवत्वस्यैव प्रयोजकत्वौचित्यादिति।[२७९]

प्रकाशः – दीधितिघटक'विशेषगुणवान् मनोऽन्यद्रव्यत्वादि'त्यस्य व्याख्यावसरे जगदीशेन 'द्रव्यत्वादित्युक्तौ सम्बन्धसामान्येन विशेषगुणस्य मनस्यसत्त्वान्नातिव्याप्तिसम्भवः, कालोपाधितावद्दिगुपाधित्वस्यापि मनस्यसत्त्वादव्यावर्तकत्वात्, अन्यथा मनसः कालोपाधित्वमपि स्यादत उक्तं मनोऽन्येती'ति यदुपन्यस्तम्[२], यस्यायमाशयो 'मनोऽन्य'पदानुपादाने द्रव्यत्वरूपहेत्वधिकरणे मनसि मनसो व्यावर्तकत्वविरहेण दैशिकविशेषणतयाऽपि तत्र विशेषणस्य सत्त्वासम्भवाद् विशेषगुणाभावरूपः साध्याभावः प्रतियोगिव्यधिकरणतया लक्षणघटको भवेदेवातो न तत्राव्याप्तिरतो 'मनोऽन्य'पदमुपात्तमिति तत्र तत्त्वालोककृता 'अव्यावर्तकत्वादि'ति परिगृह्योच्यते।

---

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. २२

२. तदेव, जागदीशीमूलम्, पृ. २२

सावयवत्वस्यैव तत्प्रयोजकतया = दिगुपाधित्वप्रयोजकतया, अन्यथा = सावयवत्वस्य तत्प्रयोजकत्वविरहे, विभूनामपि व्यावर्तकत्वापत्तेः, मनोवत् सावयवत्वविरहात् नित्यत्वाच्चेति।

तत्र शङ्कते। नन्वस्त्ववच्छिन्नपरिमाणवत्त्वमेव व्यावर्तकत्वे प्रयोजकम्, तथासति विभूनामवच्छिन्नपरिमाणवत्त्वविरहेण न व्यावर्तकत्वप्रसक्तिः, तत्र सिद्धान्तभङ्गरूपदण्डमाह। अन्यथा कालोपाधित्वमपि तस्य मनसः स्यादिति।

तत्र पुनः शङ्कते। न च दिगुपाधितायामवच्छिन्नपरिमाणवत्त्वं प्रयोजकमस्तु कालोपाधितायाञ्च जन्यत्वमेव प्रयोजकमतो न दोष इति।

तत्र समादधाति। परमाणूनां व्यावर्तकत्वस्यानुभाव[क]त्वे हि प्रयोजकभेदकल्पना युज्यते, न चासन्दिग्धन्तदस्तीत्युभयत्रापि = दिगुपाधितायां कालोपाधितायाञ्च, सावयवत्वस्यैव प्रयोजकत्वौचित्यादिति।[२७९]

तत्त्वालोकः – 'प्राचां मते' इति[१]। प्राच्यां घट इति बुद्धिर्न दिङ्मात्रमधिकरणतया विषयीकरोति, प्रतीच्यां घट इति प्रत्ययापत्तेः, नाप्युपाधिमात्रम्, वृक्षे[२] घट इति प्रत्ययापत्तेः, किन्तूपाधिविशेषविशिष्टां दिशन्तत्रोपाधेरवच्छेदकत्वमेव न त्वधिकरणत्वमित्येके।

विशिष्टबुद्धेर्विशेषणविशेष्योभयसम्बन्धावगाहित्ववद्विशिष्टानुयोगिकबुद्धेर्विशेषणविशेष्योभयानुयोगिकसम्बन्धावगाहितया दिशीव दिगुपाधावप्यधिकरणत्वम्, न च घटे रूपमित्यादिविशिष्टबुद्धिः कथमिति वाच्यम्, तस्योपलक्षितानुयोगिकत्वस्यैव स्वीकारादित्यपरे इति विवादप्रदर्शनाय 'मत' इत्युक्तम्।[२८०]

प्रकाशः – जगदीशेन ''यत्तु मूर्तमात्रस्य दिगुपाधित्वं महादिग्वृत्तितायामवच्छेदकत्वम्, नत्वधिकरणत्वमिति प्राचां मते, सम्बन्धसामान्येनैव तस्य (मनसः) विशेषगुणानधिकरणत्वात्, 'मनोऽन्य'पदमिती''ति यदुपन्यस्तम्, तत्र तत्त्वालोककृता 'प्राचां मते' इत्येतद्घटक 'मते' इति विवादप्रदर्शनायोक्तमिति उपपाद्यते।

प्राच्यां घट इति बुद्धिर्न दिङ्मात्रमधिकरणतया विषयीकरोति, प्रतीच्यां घट इति प्रत्ययापत्तेः, नाप्युपाधिमात्रम्, वृक्षे घट इति प्रत्ययापत्तेः, किन्तूपाधिविशेष-

---

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. २२

२. 'वृक्षो' इति प्राचीनमुद्रितपुस्तके पाठः।

विशिष्टां दिशं विषयीकरोति, तत्रोपाधेरवच्छेदकत्वमेव, नत्वधिकरणत्वमित्येके।

अपरे तु विशिष्टबुद्धेर्विशेषणविशेष्योभयसम्बन्धावगाहित्ववद्विशिष्टानुयोगिकबुद्धेर्विशेषणविशेष्योभयानुयोगिकसम्बन्धावगाहितया दिशीव दिगुपाधावप्यधिकरणत्वम्।

अत्र शङ्कते। न च घटे रूपमित्यादिविशिष्टबुद्धिः कथमिति वाच्यम्।

अत्र समादधाति। तस्योपलक्षितानुयोगिकत्वस्यैव स्वीकारादिति। विशिष्टानुयोगिकबुद्धेर्विशेषणविशेष्योभयानुयोगिकसम्बन्धावगाहित्वे घटे रूपमित्यत्र घटत्वविशिष्टघटानुयोगिकबुद्धेः = घटत्व-घटोभयानुयोगिक[बुद्धेः], रूप (प्रति ?)[1] प्रतियोगिकसम्बन्धावगाहित्वविरहादनुपपत्तिरिति शङ्काशयः।

तत्र समाधानम्। तत्रोपलक्षितानुयोगिकत्वमेव, न तु विशिष्टानुयोगिकत्वमतो नानुपपत्तिरिति।[२८०]

तत्त्वालोकः – 'एवमप्यवच्छेदकतासम्बन्धेने'ति[2]। ममान्तःकरणे कोपो मम चेतसि राग इत्यादिप्रामाणिकव्यवहारदर्शनाद् द्वेषेच्छाद्यात्मविशेषगुणावच्छेदकत्वस्य मनोनिष्ठस्य वृत्तिनियामकत्वमभ्युपेत्य।

यत्तु चेष्टात्वावच्छिन्नं प्रतिकृतेरवच्छेदकतासम्बन्धेन कारणत्वमिति तदनुरोधेन वृत्तिनियामकत्वं तस्येति, तदपि कारणत्वघटकप्रतियोगितायां कारणतावच्छेदकसम्बन्धावच्छिन्नत्वस्य प्रवेशपक्षे वृत्त्यनियामकस्य प्रतियोगितानवच्छेदकतया कारणत्वासम्भवादत्र तादात्म्यादीनामपि वृत्तिनियामकत्वप्रसङ्गान्नातीवादरो विधेयः।[२८१]

प्रकाशः –जगदीशेन 'यत्तु मूर्तमात्रस्य दिगुपाधित्वं महादिग्वृत्तितायामवच्छेदकत्वं नत्वधिकरणत्वमिति प्राचां मते सम्बन्धसामान्येनैव तस्य विशेषगुणानधिकरणत्वात् मनोऽन्यपदमि'त्युल्लिख्य 'तन्मन्दम्, एवमप्यवच्छेदकतासम्बन्धेनैव मनसो विशेषगुणवत्तायाः सम्भवेन मनोऽन्यपदवैयर्थ्यापत्तेरि'ति यदुपन्यस्तम्, तत्त्वालोककृता 'एवमवच्छेदकतासम्बन्धेने'ति परिगृह्योच्यते 'ममान्तःकरणे कोपो मम चेतसि राग इत्यादिप्रामाणिकव्यवहारदर्शनाद् द्वेषेच्छाद्यात्मविशेषगुणावच्छेदकत्वस्य मनोनिष्ठस्य

---

१. कोष्ठकान्तर्गतः पाठोऽधिक इव प्रतिभाति।

२. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. २२
'एवमवच्छेदकते'ति प्राचीनमुद्रितपुस्तके पाठः।

वृत्तिनियामकत्वमभ्युपेत्योक्तकथनम्, एवमप्यवच्छेदकतासम्बन्धेनैव विशेषगुणवत्तायाः मनसि सम्भवेन 'मनोऽन्य' पदवैयर्थ्यापत्तेरिति कथनम्।

तत्त्वालोककृता तदनन्तरमुक्तं 'यत्तु चेष्टात्वावच्छिन्नं प्रति कृतेरवच्छेदकतासम्बन्धेन कारणत्वमिति तदनुरोधेन वृत्तिनियामकत्वन्तस्येति तदपि कारणत्वघटकप्रतियोगितायां कारणतावच्छेदकसम्बन्धावच्छिन्नत्वस्य प्रवेशपक्षे वृत्त्यनियामकस्य प्रतियोगितानवच्छेदकतया कारणत्वासम्भवादि'ति, अन्ते उक्तम् 'अत्र नातीवादरो विधेयः' इति, उक्तदिशाऽवच्छेदकत्वस्य वृत्तिनियामकत्वे तादात्म्यादीनामपि वृत्तिनियामकत्वप्रसङ्गादिति।[२८७]

तत्त्वालोकः – 'दिक्कालयोरीश्वरानतिरिक्तत्वादि'ति[१]। तयोरीश्वरानतिरिक्तत्वेऽपि सूर्यपरिस्पन्दावच्छिन्ने तत्रेदानीं घट इत्यादिबुद्धिविषयत्वमुदयादिसन्निधानाद्यवच्छिन्ने प्राच्यां घट इत्यादिबुद्धिविषयत्वं घटादीनान्तु नोपाधित्वम्, तेनोपधेयोपाधेरेकत्वेनेदानीं घटः, प्राच्यां घट इत्यनयोरेकत्र प्रसङ्गः। घटादीनामुपाधित्वस्यानुभविकत्वे उक्तप्रसङ्गवारणाय तयोर्भेदो न केनाप्यपलपितुं शक्य इति मन्तव्यम्। मतमिदं दीधितिकृतो नात्यादरणीयं न्यायविद्भिरुक्तयुक्त्या तत्तदन्तःकरणशरीराद्युपाधिभेदकल्पनया सर्वदोषपरिहारेणैकचेतनवादरूपौपनिषदमतप्रवेशापत्तेरिति।[२८२]

प्रकाशः – 'ननु स्वमते दिक्कालयोरीश्वरानतिरिक्तत्वादत्र = विशेषगुणवान् मनोऽन्यद्रव्यत्वादित्यत्र, व्याप्तिरेवेत्यत आह जातिमान् भावत्वादि'ति जागदीश्यां यदुपन्यस्तं तत्रोच्यते तत्त्वालोककृता।

तयोरीश्वरानतिरिक्तत्वेऽपि सूर्यपरिस्पन्दावच्छिन्ने तत्रेदानीं घट इत्यादिबुद्धिविषयत्वमुदयादिसन्निधानावच्छिन्ने प्राच्यां घट इत्यादिबुद्धिविषयत्वं घटादीनान्तु नोपाधित्वं, तेनोपधेयोपाधेरेकत्वेनेदानीं घटः प्राच्यां घट इत्यनयोरेकत्र प्रसङ्गः।

यत्र इदानीं घट इति प्रतीतिर्भवति तत्र प्राच्यां घट इति प्रतीतिप्रसङ्ग इति भावः। घटादीनामुपाधित्वस्यानुभविकत्वे उक्तप्रसङ्गवारणाय तयोर्भेदो = दिक्कालयोरीश्वराद्भेदो, न केनाप्यपलपितुं शक्य इति मन्तव्यम्। उक्तयुक्त्या तत्तदन्तःकरणशरीराद्युपाधिभेदकल्पनया सर्वदोषपरिहारेणैकचेतनवादरूपौपनिषदमतप्रवेशापत्तेरिति।

---

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. २३

दिक्कालयोरीश्वरानतिरिक्तत्वेऽपि इदानीं घटः, प्राच्यां घट इति प्रतीत्योरेकत्र प्रसङ्गवारणाय सूर्यपरिस्पन्दावच्छिन्ने तत्र इदानीं घट इति प्रतीतिविषयत्वम्, उदयाचलादिसन्निधावच्छिन्ने तत्र प्राच्यां घट इति प्रतीतिविषयत्वम्, ततश्च तत्तदन्तःकरणशरीराद्युपाधिभेदकल्पनैकचेतनवादौपनिषदमतप्रवेशापत्तेः।

तस्माद्दीधितिकृतो दिक्कालयोरीश्वरानतिरिक्तत्वविषयकमतं न्यायविद्भिर्नैव मन्तव्यमिति कथनाशयः।[२८२]

तत्त्वालोकः– 'स्वप्रतियोगित्वं यादृशसम्बन्धावच्छिन्नमि'ति[१]।

अत्र स्वप्रतियोगिताविशिष्टनिरूपकताकाधिकरणत्ववन्निरूपितवृत्तित्वन्नास्तीति प्रातीतिकाभावो लक्षणघटकः। वैशिष्ट्यञ्च स्वावच्छेदकधर्मावच्छिन्नत्व-स्वनिरूपितसंसर्गतावच्छेदकधर्मावच्छिन्नसंसर्गताकत्वोभयसम्बन्धेनेति। प्रतियोगितावच्छेदकावच्छिन्नत्वञ्च– प्रतियोगितावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकताकत्वम्। तत्र न्यूनवारकपर्याप्तिनिवेशफलं विशिष्टसत्तावान् जातेरित्यत्र ग्रन्थकृतैवोक्तमितरवारकपर्याप्तिनिवेशफलन्तु वह्निमान् महानसीयवह्निमद्विषयकज्ञानत्वादित्यत्रातिव्याप्तिवारणम्।

न चास्य सद्धेतुत्वमेवेति वाच्यं शुद्धवह्नित्वावच्छिन्नस्य शुद्धवह्नित्वावच्छिन्ननिरूपितविषयित्वस्य संसर्गतया महानसीयवह्निज्ञाने तस्य सत्त्वेन तेन सम्बन्धेन साध्यतायां सद्धेतुत्वेऽपि प्रकारितासम्बन्धेन साध्यतायां व्यभिचारित्वात्।

न च तज्ज्ञानस्य वह्निप्रकारकतया तत्सम्बन्धेन तत्र कुतो न वह्निसत्त्वमिति वाच्यम्, शुद्धवह्नित्वावच्छिन्नस्य शुद्धवह्नित्वावच्छिन्ननिरूपितप्रकारित्वस्यैव संसर्गत्वात्तादृशी च प्रकारिता न तज्ज्ञाने महानसीयत्वस्याधिकस्य निरूपकतावच्छेदकत्वात्।

उभयधर्मावच्छिन्ननिरूपितप्रकारित्वञ्च न प्रत्येकधर्मावच्छिन्नस्य संसर्गः, विशिष्टसत्तात्वावच्छिन्ननिरूपितसमवायस्य तत्र तत्र प्रतिपादितसत्तात्वावच्छिन्नासंसर्गत्ववत्, तस्यापि च प्रकारित्वस्य संसर्गत्वे महानसीयवह्निमदिति ज्ञानानन्तरं वह्निमत्त्वेन जानामीत्यनुव्यवसायापत्तेः। महानसीयवह्निमानित्यनुमित्यनन्तरं वह्निमनुमिनोमीत्यनुव्यवसायापत्तेश्च। न च तदिष्यते, तथासति

---

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. २३

वह्नित्वमात्रावच्छिन्नविधेयताकानुमितौ प्रमाणाभावप्रसङ्गात्।

वह्निं जानामीत्यनुव्यवसायश्च न प्रकारितासम्बन्धेन, ज्ञानांशे वह्न्यवगाही वह्निविशेष्यकज्ञानानन्तरमपि तदुत्पादात्, किन्तु विषयित्वमात्रेणेति। एवं प्रतियोगितासम्बन्धेन वह्निसाध्यकमहानसीयवह्न्यभावत्वहेतुकातिव्याप्तिवारणमपि। महानसीयवह्निसाध्यकवह्निमहानसीयविषयकज्ञानत्वहेतुकातिव्याप्तिश्च वह्नित्वमहानसीयत्वगतद्वित्वमहानसीयत्ववह्नित्वगतद्वित्वयोर्भेदे सहजत एव वारणीया।

तदभाव एकत्वादेः पर्याप्त्यनभ्युपगमे च समवायेन महानसीयत्वविशिष्टत्वे सति कालिकेन वह्नित्वविशिष्टसाध्यके धूमे व्यभिचारिणि समवायावच्छिन्नवह्नित्वनिष्ठावच्छेदकतानिरूपितकालिकावच्छिन्नमहानसीयत्वनिष्ठावच्छेदकतानिरूपितनिरूपकतामादायातिव्याप्तेर्वारणाय च प्रतियोगिताविशिष्टनिरूपकत्वमेवादरणीयम्।

वैशिष्ट्यञ्च स्वनिरूपितावच्छेदकताविशिष्टान्यावच्छेदकत्वानिरूपितत्व, - स्ववृत्तित्वोभयसम्बन्धेन। वृत्तिता च स्वनिरूपितावच्छेदकताविशिष्टान्यावच्छेदकत्वानिरूपितत्वसम्बन्धेन। वैशिष्ट्यञ्चोभयत्र प्रसिद्धचतुष्टयेषु यावदादेयन्तैश्च बोध्यम्।

एवञ्च प्रतियोगितावच्छेदकनिरूपकतावच्छेदकयोर्विशिष्टावच्छेदकत्वपक्षे भिन्नतया स्वानवच्छेदकानवच्छिन्नत्वसम्बन्धेन प्रतियोगितावच्छेदकतावैशिष्ट्यस्य निरूपकतावच्छेदकताया विरहाद्विशेषसम्बन्धस्यावच्छेदकत्वपक्षे स्वावच्छेदकसम्बन्धावच्छिन्नत्वविरहेण तद्वैशिष्ट्यविरहान्न महानसीयवह्निसाध्यकव्यभिचारिण्यतिव्याप्तिः।

अथ विशिष्टस्यानवच्छेदकत्वे सम्बन्धविशेषस्यानवच्छेदकत्वे च का गतिरिति चेद्। न रक्तदण्डवानिति प्रतीतौ स्थलभेदेन यथा विलक्षणावच्छेदकताद्वयस्वीकारस्तथा महानसीयवह्निमानिति ज्ञानम्वह्निमहानसीयवदिति प्रतीतेर्वारणाय महानसीयवह्निमदिति प्रतीत्युपपत्तये च महानसीयविशेषणतापन्ने वह्निविशेषणतापन्ने च वह्नित्व इवावच्छेदकत्वद्वयस्य विलक्षणस्य स्वीकरणीयतया स्ववृत्त्यच्छेदकतात्वव्याप्यधर्मवत्त्वस्यापि वैशिष्ट्यघटकतयातिव्याप्तिवारणस्य कर्तुं शक्यत्वादिति मादृशामपरः पन्थाः।[२८३]

प्रकाशः– 'अथ ज्ञानवान् द्रव्यत्वात्, विशेषगुणवान् मनोऽन्यद्रव्यत्वात्,

जातिमान् भावत्वादित्यादौ समवायेन ज्ञानादेः साध्यतायामतिव्याप्तिः, साध्यशून्यानामपि हेतुमतां विषयत्वविशेषणत्वैकार्थसमवायैः साध्यवत्त्वादिति चेन्मैवं, प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगिनो यदधिकरणं सम्बन्धि वा तद्वृत्तित्वाभावस्योक्तत्वात्, भवति चैवमन्योन्याभावोऽपि प्रतियोग्यसमानाधिकरणः' इति[१] दीधितेर्व्याख्यावसरे जगदीशेन 'न च तादृशयत्किञ्चित्सम्बन्धेन प्रतियोगिसामानाधिकरण्याभावोक्तौ वह्निसामान्याभावस्यापि धूमवत्पर्वतावच्छेदेन महानसीयसंयोगेन प्रतियोग्यसमानाधिकरणत्वाद्वह्निमान् धूमादित्यादावव्याप्तिः, स्वप्रतियोगितावच्छेदकसम्बन्धसामान्येन तथोक्तौ च जातिमान् जातित्वादित्यादातिव्याप्तिः, समवायेन जात्यभावस्य तादात्म्येन जातिमद्भेदत्वात् तस्य च स्वप्रतियोगितावच्छेदकतादात्म्यसम्बन्धेन यज्जातिसम्बन्धि, तद्वृत्तित्वेन प्रतियोगिव्यधिकरणत्वाभावादिति वाच्यमि'त्युपन्यस्य 'स्वप्रतियोगित्वं यादृशसम्बन्धावच्छिन्नं तादृशसम्बन्धेन यत्प्रतियोगिसम्बन्धि, तद्वृत्तित्वाभावस्योक्तत्वादि'त्युपन्यस्तम्[२]।

तस्य च सामान्यतया यद्रूपपर्याप्तावच्छेदकताकसंसर्गनिष्ठावच्छेदकतानिरूपितप्रतियोगित्वं तद्रूपपर्याप्तावच्छेदकताकसंसर्गनिष्ठावच्छेदकतानिरूपिताधेयताकाधिकरणतावद्वृत्तित्वाभाववदभावस्य प्रतियोग्यसमानाधिकरणाभावान्तग्रन्थेन विवक्षितत्वादित्यर्थः।

भवति हि संयोगेन वह्न्यभावप्रतियोगित्वं संयोगत्वपर्याप्तावच्छेदकताकसंयोगनिष्ठावच्छेदकतानिरूपितमेवञ्च संयोगत्वात्मकतद्रूपपर्याप्तावच्छेदकताकसंयोगनिष्ठावच्छेदकतानिरूपितवह्निनिष्ठाधेयताकाधिकरणतायाः पर्वतादौ सत्त्वात् तत्र वह्न्यभावस्य वृत्तित्वेन न वह्न्यभावो निरुक्तप्रतियोगिव्यधिकरण इति न वह्निमान् धूमादित्यत्राव्याप्तिः।

न वा जातिमान् जातित्वात् जातिमान् भावत्वादित्यादावतिव्याप्तिः, समवायेन जात्यभावप्रतियोगित्वस्य समवायत्वनिष्ठावच्छेदकताकसमवायनिष्ठावच्छेदकतानिरूपिततया तादृशसमवायत्वनिष्ठावच्छेदकताकसमवायनिष्ठावच्छेदकतानिरूपितजात्यधिकरणताया द्रव्यादौ सत्त्वात्। तत्र जात्यभावस्यासत्त्वात् हेतुमति सामान्ये च समवायेन जात्यधिकरणताया असत्त्वात् साध्याभावस्य निरुक्तप्रतियोगिव्यधिकरणतया लक्षणघटकतया नातिव्याप्तिः।

---

१. प्रकृतग्रन्थः (प्रथमो भागः), दीधितिमूलम्, पृ. २२

२. तदेव, जागदीशीमूलम्, पृ. २३

जगदीशेन 'संयोगसामान्यावच्छिन्नवह्न्यभावप्रतियोगितायां महानसीयसंयोगत्वादिविशिष्टानवच्छेद्यतया वह्न्यभावस्य पर्वतादौ महानसीयसंयोगेन प्रतियोगिसामानाधिकरण्याभावेऽप्यव्याप्तिविरहादिति ध्येयमि'त्युपन्यस्तम्।[१] तेनोपपादितपर्याप्तिनिवेशः सूचितः।

अत्र तत्त्वालोककृता 'स्वप्रतियोगित्वं यादृशसम्बन्धावच्छिन्नमि'ति जागदीश्यंशं परिगृह्य स्वदृष्ट्या विस्तृतविचारो दर्शितः। तत्रोच्यते तेन 'अत्र स्वप्रतियोगिताविशिष्टनिरूपकताकाधिकरणत्ववन्निरूपितवृत्तित्वन्नास्तीति प्रातीतिकोऽभावो लक्षणघटकः'। यादृशाभावस्य स्वप्रतियोगिताविशिष्टनिरूपकताकाधिकरणवन्निरूपितवृत्तिता न भवति तादृश एवाभावः सर्वत्र लक्षणघटको भवतीति तदाशयः।

तत्र निरूपकतायां स्वप्रतियोगितावैशिष्ट्यं स्वावच्छेदकधर्मावच्छिन्नत्व, - स्वनिरूपितसंसर्गतावच्छेदकधर्मावच्छिन्नसंसर्गताकत्वोभयसम्बन्धेनेति। प्रतियोगितावच्छेदकावच्छिन्नत्वञ्च. प्रतियोगितावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकताकत्वम्।

तत्र न्यूनवारकपर्याप्तिनिवेशफलम्विशिष्टसत्तावान् जातेरित्यत्र ग्रन्थकृतैवोक्तम्। तत्र न्यूनवारकपर्याप्तेरनिवेशे विशिष्टसत्तावान् जातेरित्यत्र व्यभिचारिणि विशिष्टसत्ताभावात्मकसाध्याभावो लक्षणघटको न स्यात्, तदीयप्रतियोगिविशिष्टनिरूपकताकाधिकरणतावद्वृत्तित्वस्यैव विशिष्टसत्ताभावे सत्त्वात्, गुणकर्मणोरपि सत्तात्वावच्छिन्नाधिकरणत्वसत्त्वात्। न्यूनवारकस्य तत्र निवेशे तु नातिव्याप्तिः। गुणकर्मान्यत्ववैशिष्ट्यावच्छिन्ननिरूपकताकाधिकरणताया गुणकर्मणोरभावादिति तदाशयः।

इतरवारकपर्याप्तिनिवेशफलन्तु वह्निमान् महानसीयवह्निमद्विषयकज्ञानत्वादित्यत्रातिव्याप्तिवारणम्।

इतरवारकपर्याप्तेरनिवेशे उक्तस्थले वह्न्यभावात्मकसाध्याभावो लक्षणघटको न स्यात्, महानसीयत्वविशेषितवह्नित्वावच्छिन्ननिरूपकताकाधिकरणत्वस्यैव हेत्वधिकरणे महानसीयवह्निमद्विषयकज्ञानसत्त्वात्।

अत्र शङ्कते। न चास्य सद्धेतुत्वमेवेति वाच्यमिति। अत्र समादधाति। शुद्धवह्नित्वावच्छिन्नस्य शुद्धवह्नित्वावच्छिन्नविषयत्वस्य संसर्गतया महानसीयवह्निज्ञाने तस्य सत्त्वेन तेन सम्बन्धेन साध्यतायां सद्धेतुत्वेऽपि प्रकारितासम्बन्धेन साध्यतायां

---

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. २३

व्यभिचारित्वादिति।

पुनरत्र शङ्कते। न च तज्ज्ञानस्य वह्निप्रकारकतया तत्सम्बन्धेन तत्र कुतो न वह्निसत्त्वमिति वाच्यम्। अत्र समादधाति। शुद्धवह्नित्वावच्छिन्नस्य शुद्धवह्नित्वावच्छिन्ननिरूपितप्रकारित्वस्यैव संसर्गत्वात्तादृशप्रकारिता न तज्ज्ञाने महानसीयत्वाधिकस्य निरूपकतावच्छेदकत्वात्। उभयधर्मावच्छिन्ननिरूपितप्रकारित्वञ्च न प्रत्येकधर्मावच्छिन्नस्य संसर्गः, विशिष्टसत्तात्वावच्छिन्नसमवायस्य तत्र तत्र प्रतिपादितसत्तात्वावच्छिन्नासंसर्गत्ववदिति।

तस्यापि च प्रकारित्वसंसर्गत्वे = उभयधर्मावच्छिन्नप्रकारित्वस्य प्रत्येकधर्मावच्छिन्नस्य संसर्गत्वे, महानसीयवह्निमदिति ज्ञानानन्तरं वह्निमत्त्वेन जानामीत्यनुव्यवसायापत्तेः, महानसीयवह्निमदित्यनन्तरं वह्निमनुमिनोमीत्यनुव्यवसायापत्तेश्च। न च तदिष्यते, तथासति वह्नित्वमात्रावच्छिन्नविधेयताकानुमितौ प्रमाणाभावप्रसङ्गात्।

वह्निं जानामीत्यनुव्यवसायश्च न प्रकारितासम्बन्धेन, ज्ञानांशे वह्न्यवगाही वह्निविशेष्यकज्ञानानन्तरमपि तदुत्पादात् = वह्निं जानामीत्यनुव्यवसायोत्पादात्, किन्तु विषयित्वमात्रेणेति। उपपादनस्य स्पष्टत्वाद् व्याख्यापेक्षा नास्ति।

अनन्तरमुच्यते एवं यथा प्रकारितासम्बन्धेन वह्निसाध्यकमहानसीयवह्निमद्विषयकज्ञानत्वहेतुकस्थलेऽतिव्याप्तिवारणमितरवारकपर्याप्तिनिवेशफलन्तथैव प्रतियोगितासम्बन्धेन वह्निसाध्यकमहानसीयवह्न्यभावत्वहेतुकातिव्याप्तिवारणमपि तत्फलम्। शुद्धवह्नित्वावच्छिन्नस्य शुद्धवह्नित्वावच्छिन्नप्रतियोगित्वस्यैव संसर्गत्वादुभयधर्मावच्छिन्नप्रतियोगिताकाभावे शुद्धवह्नित्वावच्छिन्नस्यासत्त्वात्।

महानसीयवह्निसाध्यकवह्निमहानसीयविषयकज्ञानत्वहेतुकातिव्याप्तिश्च वह्नित्वमहानसीयत्वगतद्वित्वमहानसीयत्वगतद्वित्वयोर्भेदे सहजत एव वारणीया।

तदभावे = उक्तयोर्द्वयोर्द्वित्वयोर्भेदविरहे, एकत्वादेः पर्याप्त्यभ्युपगमे च समवायेन महानसीयत्वविशिष्टत्वे सति कालिकेन वह्नित्वविशिष्टसाध्यके धूमे व्यभिचारिणि समवायावच्छिन्नवह्नित्वनिष्ठावच्छेदकतानिरूपितकालिकावच्छिन्नमहानसीयत्वनिष्ठावच्छेदकतानिरूपितनिरूपकतामादायातिव्याप्तेर्वारणाय च प्रतियोगिताविशिष्टनिरूपकत्वमेवादरणीयम्।

वैशिष्ट्यञ्च स्वनिरूपितावच्छेदकताविशिष्टान्यावच्छेदकत्वानिरूपितत्व, - स्ववृत्तित्वोभयसम्बन्धेन। वृत्तिता च स्वनिरूपितावच्छेदकताविशिष्टान्यावच्छेदकत्वानिरूपितत्वसम्बन्धेन। उभयत्र सम्बन्धघटकवैशिष्ट्यञ्च प्रसिद्धचतुष्टयेषु स्वसामानाधिकरण्यादिषु यावदादेयं तैर्बोध्यम्।

एवंसति उक्तस्थलद्वये व्यभिचारिण्यतिव्याप्तिविरहमुपपादयति एवञ्च प्रतियोगितावच्छेदकनिरूपकतावच्छेदकयोर्विशिष्टावच्छेदकत्वपक्षे भिन्नतया स्वानवच्छेदकानवच्छिन्नत्वसम्बन्धेन प्रतियोगितावच्छेदकतावैशिष्टयस्य निरूपकतावच्छेदकताया विरहाद्विशेषसम्बन्धस्यावच्छेदकत्वपक्षे स्वावच्छेदकसम्बन्धावच्छिन्नत्वविरहेण तद्वैशिष्टयविरहाद् न महानसीयवह्निसाध्यकव्यभिचारिण्यतिव्याप्तिरिति।

अत्र शङ्कते। अथ विशिष्टस्यानवच्छेदकत्वपक्षे सम्बन्धविशेषस्यानवच्छेदकत्वपक्षे च का गतिः? कथमुक्तस्थलेऽतिव्याप्तिवारणमिति भावः।

तत्रोच्यते। रक्तदण्डवानिति प्रतीतौ स्थलभेदेन यथा विलक्षणावच्छेदकताद्वयस्वीकारस्तथा महानसीयवह्निमानिति ज्ञानम् वह्निमहानसीयवदिति प्रतीतेर्वारणाय महानसीयवह्निमानिति प्रतीत्युपपत्तये च महानसीयविशेषणतापन्ने वह्निविशेषणतापन्ने च वह्नित्व इव विलक्षणावच्छेदकत्वद्वयस्य विलक्षणस्य स्वीकरणीयतया स्ववृत्त्यवच्छेदकतात्वव्याप्यधर्मवत्त्वस्यापि वैशिष्टयघटकत्वाङ्गीकारेणातिव्याप्तिवारणस्य कर्तुं शक्यत्वादिति मादृशामपरः पन्थाः।

रक्तदण्डवानिति स्थले स्थलभेदेन रक्तत्वोपलक्षिते रक्तत्वविशेषिते च विलक्षणावच्छेदकताद्वयस्वीकार इत्याशयं प्रतीमः।

तथा च विलक्षणावच्छेदकताद्वये स्वीकारे वैशिष्टयघटकतया स्ववृत्त्यवच्छेदकतात्वव्याप्यधर्मवत्त्वस्याधिकस्य तत्र निवेशे महानसीयवह्निसाध्यकवह्निमहानसीयवह्निमद्ज्ञानत्वहेतुके व्यभिचारिणि नातिव्याप्तिः, वह्निमहानसीयवह्निमज्ज्ञाननिष्ठाधिकरणतानिरूपकतायां महानसीयवह्नयभावप्रतियोगितावैशिष्टयविरहादित्याशयः। साध्याभावस्य तत्र प्रतियोगिव्यधिकरणतया लक्षणघटकत्वात्।[२८३]

तत्त्वालोकः – 'भेदकूटविशिष्टहेत्वधिकरणे'ति[१]। हेत्वधिकरणनिरूपितवृत्तितावच्छेदककूटत्वप्रतियोगिकपर्य्याप्तीयानुयोगितानिरूपितपरम्परावच्छेदकत्वेन [परम्परावच्छेदकत्ववत्त्वेन] प्रतियोगित्वस्यात्र लक्षणघटकत्वम्बोध्यम्।[२८४]

प्रकाशः – लक्षणघटकाभावविशेषणप्रतियोग्यसामानाधिकरण्ये स्वप्रतियोगितावच्छेदकसम्बन्धेन यत्प्रतियोगिसम्बन्धि तद्वृत्तित्वाभावस्योक्तौ अन्योन्याभावस्य

१. 'भेदकूटविशिष्टहेतुमदि'त्यादिपाठोऽधुनोपलब्धजागदीशीपुस्तकेषु।
–प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. २४

प्रतियोग्यसमानाधिकरणमुपपाद्य 'न चैवं प्रतियोग्यनधिकरणहेतुमन्निष्ठाभावेत्यग्रिमनिष्कर्षेऽप्यप्रतीकार' इत्याशङ्क्य प्रतियोगितावच्छेदकसम्बन्धेन ये प्रतियोगिसम्बन्धिनः, तत्तद्व्यक्तित्वावच्छिन्नभेदकूटविशिष्टहेतुमद्वृत्तित्वस्यैव तत्र वक्तव्यत्वादि'ति जगदीशेन यत् समाहितन्तत्र तत्त्वालोककृता स्पष्टीक्रियते हेत्वधिकरणनिरूपितवृत्तितावच्छेदककूटत्व(भेदकूटत्व)प्रतियोगिकपर्याप्तीयानुयोगितानिरूपितपरम्परावच्छेदकत्ववत्त्वेन प्रतियोगित्वस्यात्र लक्षणघटकत्वं बोध्यमि'त्यनेन।

प्रतियोगितावच्छेदकसम्बन्धेन ये प्रतियोगिसम्बन्धिनस्तत्तद्व्यक्तिभेदसमूहगतं यत्समुदायत्वविशेषरूपं कूटत्वं हेत्वधिकरणवृत्तितावच्छेदकं, तत्कूटत्वप्रतियोगिका या पर्य्याप्तिः, तत्पर्याप्तीया या अनुयोगिता, तन्निरूपिता परम्परावच्छेदकता सम्बन्धिभेदप्रतियोगितायां, तस्मात्तादृशपरम्परावच्छेदकत्ववत्त्वेन प्रतियोगित्वस्य (भेदप्रतियोगित्वस्य) अत्र लक्षणघटकतेति कथनाशयः।[२८४]

तत्त्वालोकः – 'तादात्म्यसम्बन्धेनापी'ति[१]। अत्र तादात्म्यसम्बन्धेन कस्यचिदपि न प्रागुक्तव्याप्यवृत्तित्वमिति योजना व्याप्यवृत्तित्वस्य साध्यतावच्छेदकसम्बन्धेनाधिकरणत्वघटितत्वाभ्युपगमेन सङ्गमनीया।

तत्र तादात्म्येनात्मसाध्यके प्रतियोगिवैयधिकरण्याघटितव्याप्तिज्ञानस्यापि प्रमात्मकतया तस्य व्याप्यवृत्तिसाध्यकत्वस्य समुचिततया तन्निर्वाहाय सम्बन्धित्वनिवेशस्यावश्यकत्वे सङ्गतिर्बोध्या। तादात्म्यसम्बन्धेनापि कस्यचिज्जन्यस्य न प्रागुक्तव्याप्यवृत्तित्वमिति योजना तु रमणीयैवेति।[२८५]

प्रकाशः – 'जगदीशेन प्रतियोगितावच्छेदकसम्बन्धेन ये प्रतियोगिसम्बन्धिनस्तत्तद्व्यक्तिभेदकूटविशिष्टहेतुमद्वृत्तित्वस्यैव तत्र वक्तव्यत्वादि'त्युल्लिख्य 'वस्तुतो तादात्म्यसम्बन्धेनापि न कस्यचित् प्रागुक्तव्याप्यवृत्तित्वमतो यथाश्रुतमेव सम्यगि'ति समुपन्यस्तम्[२]।

तत्र तत्त्वालोककृतोच्यते अत्र तादात्म्यसम्बन्धेन न कस्यचित् प्रागुक्तव्याप्यवृत्तित्वमिति योजना व्याप्यवृत्तित्वस्य साध्यतावच्छेदकसम्बन्धेनाधिकरणत्वघटितत्वाभ्युपगमेन सङ्गमनीया, तादात्म्यसम्बन्धस्य वृत्त्यनियामकत्वेन तेन सम्बन्धेन कस्याप्यधिकरणाप्रसिद्धेः।

---

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. २४

२. तदेव, जागदीशीमूलम्, पृ. २४

तत्त्वालोककृताऽग्रे उच्यते 'तत्र तादात्म्येनात्मसाध्यकस्थले प्रतियोगिवैयधिकरण्याघटितव्याप्तिज्ञानस्यापि प्रामाणिकतया तस्य व्याप्यवृत्तिसाध्यकत्वस्य समुचिततया तन्निर्वाहाय सम्बन्धित्वनिवेशस्यावश्यकत्वेऽसङ्गतिर्बोध्या, तादात्म्यसम्बन्धेनापि कस्यचिज्जन्यस्य न प्रागुक्तव्याप्यवृत्तित्वमिति योजना तु रमणीयैवे'ति।[२८५]

तत्त्वालोकः– **'यथाश्रुतमेव सम्यगि'ति[१]। उक्तव्याप्यवृत्तित्वस्य पारिभाषिकस्यैवालक्ष्यतानियामकत्वेन तादात्म्यसम्बन्धसाध्यकस्थलस्यापि लक्ष्यतया वास्तविकव्याप्यवृत्तित्वस्यैवेदानीन्तादात्म्येन कपिसंयोगादिमतः स्वीकरणीयतया भेदकूटनिवेशे प्रयोजनाभाव इति भावः।[२८६]**

प्रकाशः–पूर्वं 'न च तादात्म्येन वस्तुमात्रस्यैव व्याप्यवृत्तित्वात्तादृशसम्बन्धेन साध्यतायां प्रतियोगिवैयधिकरण्याप्रवेशादिदमयुक्तमि'त्याशङ्क्य 'मूलावच्छेदेन कपिसंयोगवद्भेदस्य स्वयमङ्गीकारात्तादात्म्येन कपिसंयोगवतोऽप्यव्याप्यवृत्तित्वादि'त्युपन्यस्तम्।

तत्रोच्यते। उक्तव्याप्यवृत्तित्वस्य पारिभाषिकस्यैवालक्ष्यतानिया[मकत्वेन] तादात्म्यसम्बन्धसाध्यकस्थलस्यापि लक्ष्यतया वास्तविकव्याप्यवृत्तित्वस्यैवेदानीं तादात्म्येन कपिसंयोगादिमतः स्वीकरणीयतया भेदकूटनिवेशे प्रयोजनाभाव इति भावः।

तादात्म्येनात्मसाध्यकस्थले प्रतियोगिवैयधिकरण्याघटितव्याप्तिज्ञानस्यापि प्रामाणिकतया तस्य व्याप्यवृत्तिसाध्यकत्वस्य समुचितत्वस्योक्ततया तथैवेदानीं तादात्म्येन कपिसंयोगादिमतः स्वीकरणीयतया भेदकूटनिवेशे प्रयोजनाभाव इत्याशयः। [२८६]

तत्त्वालोकः– **'यो हेतुस्तदधिकरणे'ति[२]। अत्र हेत्वधिकरणत्व एव तादृशवृत्तित्वाभावस्य विशेषणत्वे तात्पर्यम्। तेन विषयितया वह्नेर्हेतुत्वे, वह्निज्ञानत्वस्य साध्यत्वे वह्निज्ञाने वह्नौ वह्निज्ञानत्वसामानाधिकरण्यम्, न तूक्तसामानाधिकरण्याभावविशिष्टवह्निज्ञान इति वह्निज्ञानत्वसामानाधिकरण्याभावविशिष्टवह्न्यधिकरणे तादृशवह्निज्ञाने साध्याभावस्य सत्त्वेऽपि नाव्याप्तिः। नापि वह्नित्वावच्छिन्ननिरूपितविषयितया वह्नेर्हेतुत्वे तेन सम्बन्धेन विशिष्टवह्नित्वाधिकरणत्वाप्रसिद्धावप्यव्याप्तिः।**

---

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. २४

२. तदेव, जागदीशीमूलम्, पृ. २४

न च सामानाधिकरण्याभाव उपलक्षणम्, कपिसंयोगसाध्यकवृक्षवृत्तित्वविशिष्टसत्त्वे सद्धेतौ गुणावच्छेदेन प्रतियोगिसामानाधिकरण्याभाववत्सत्तानतिरिक्तविशिष्टसत्ताधिकरणवृक्षवृत्तित्वात् कपिसंयोगाभावस्येत्यव्याप्तेरिति। [२८७]

प्रकाशः – 'यद्यपि प्रतियोग्यसामानाधिकरण्यं हेतुविशेषणीकृत्य प्रतियोग्यसामानाधिकरण्यविशिष्टो यो हेतुस्तदधिकरणवृत्त्यभाव[स्य] प्रतियोगितानवच्छेदकत्वविवक्षयैव संयोगी एतत्त्वादित्यादौ नाव्याप्तिसम्भव' इति[१] जगदीशेन यदुपन्यस्तन्तत्र तत्त्वालोककृतोच्यते अत्र हेत्वधिकरणत्व एव तादृशवृत्तित्वाभावस्य = प्रतियोग्यधिकरणवृत्तित्वाभावस्य, विशेषणत्वे तात्पर्यमन्यथा विषयितया वह्नेर्हेतुत्वे वह्निज्ञानत्वस्य साध्यत्वेऽव्याप्तिः स्यात्, यतो हि वह्न्यात्मकहेतौ वह्निज्ञानत्वरूपसाध्याभावप्रतियोगिसामानाधिकरण्यं शुद्धवह्निज्ञाने वह्निज्ञानत्वसामानाधिकरण्याभावविशिष्टवह्न्यात्मकहेतोरधिकरणे वह्निज्ञानत्वरूपसाध्याभावस्य सत्त्वेनाव्याप्तिः स्यादिति।

वह्निज्ञानत्वसामानाधिकरण्याभावविशिष्टवह्निज्ञाने शुद्धवह्निज्ञानत्वरूपं साध्यन्नास्ति इति भावः।

तथा वह्नित्वावच्छिन्ननिरूपितविषयितासम्बन्धेन वह्नेर्हेतुत्वे तेन सम्बन्धेन प्रतियोग्यसामानाधिकरण्यविशिष्टवह्नित्वावच्छिन्नाधिकरणत्वाप्रसिद्ध्याऽव्याप्तिः स्यात्तस्मात् तादृशवृत्तित्वाभावस्य हेत्वधिकरणत्वे एव विशेषणत्वे जगदीशस्य तात्पर्यमिति।

अत्र शङ्कते। न च प्रतियोगिसामानाधिकरण्याभाव उपलक्षणमिति।

अत्र समादधाति। कपिसंयोगसाध्यकवृक्षवृत्तित्वविशिष्टसत्त्वे सद्धेतावव्याप्तिः स्यादिति।

तत्रोपपादयति गुणावच्छेदेन प्रतियोगिसामानाधिकरण्याभाववत्सत्तानतिरिक्तविशिष्टाधिकरणवृक्षवृत्तित्वात् कपिसंयोगाभावस्येत्यव्याप्तेरिति।[२८७]

तत्त्वालोकः – 'मूलस्वरसेने'ति[२]। यद्यपि तादृशमूलस्य संयोगाभावहेतुकव्यभिचारिण्यतिव्याप्तिवारणपरता सम्भवति तथापि प्रसिद्धसत्त्वहेतुकव्यभि-

---

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. २४

२. तदेव, जागदीशीमूलम्, पृ. २४

चारिण्यतिव्याप्तिवारणपरतापरित्यागस्यानुचितत्वेनाभावविशेषणत्वलाभ इति। [२८८]

प्रकाशः – 'तथापि कर्मणि च संयोगाभावः प्रतियोग्यसमानाधिकरण इति मूलस्वरसेन हेतुसमानाधिकरणाभावस्यैव विशेषण[णं] प्रतियोग्यसमानाधिकरणदलमत एतावान् प्रयास इत्यवधेयमि'ति यदुपन्यस्तं[1] जगदीशेन, तत्रोच्यते तत्त्वालोककृता। यद्यपि तादृशमूलस्य संयोगाभावसाध्यकव्यभिचारिण्यतिव्याप्तिवारणपरता सम्भवति, वृक्षः कपिसंयोगवान् कपिसंयोगाभावादित्यत्र व्यभिचारिणि अतिव्याप्तिवारणपरता 'कर्मणि च संयोगाभावः प्रतियोगिव्यधिकरण' इति मूलस्य प्रतियोग्यसामानाधिकरण्यस्य हेतुविशेषणत्वेऽपि सम्भवति।

अत्र समादधाति। तथापि प्रसिद्धसत्त्वहेतुकव्यभिचारिण्यतिव्याप्तिवारणपरतात्यागस्यानुचितत्वेन अभावविशेषणत्वलाभ इति।[२८८]

तत्त्वालोकः – **'अवच्छेदकत्वाभावे'ति[2]। अत्रैवम्मूले वृक्षे न कपिसंयोग इत्यत्रापि वृक्षवृत्तेः कपिसंयोगनिष्ठाया अवच्छेदकत्वाभावस्यैव विषयत्वसम्भवेन प्रतियोगिवैयधिकरण्यस्यैव व्यर्थत्वं स्यादत्रावच्छेदकत्वाभावस्य तत्र कपिसंयोगाभावस्यैव विषयत्वमानुभविकमिति नास्माकञ्चित्तमास्कन्दतीति चिन्त्यम्।**[२८९]

प्रकाशः – 'प्रतीतेरन्यथैवोपपादितत्वादि'ति[3] दीधितेर्व्याख्यां कुर्वता जगदीशेन 'उक्तप्रतीतिः संयोगाभावनिष्ठस्य संयोगसामानाधिकरण्यस्यावच्छेदकत्वाभावमेव गुणादौ, संयोगानधिकरणीभूतगुणवृत्तित्वमेव [वा] संयोगाभावादाववगाहत' इति तदर्थ इति[4] यदुपन्यस्तन्तत्र तत्त्वालोककृतोच्यते 'अत्रैवं मूले वृक्षे न कपिसंयोग इत्यत्रापि वृक्षवृत्तिकपिसंयोगनिष्ठावच्छेदकत्वाभावस्यैव विषयत्वसम्भवेन प्रतियोगिवैयधिकरण्यस्यैव व्यर्थत्वं स्यादत्रावच्छेदकत्वाभावस्य तत्र कपिसंयोगाभावस्यैव विषयत्वमानुभविकमिति नास्माकञ्चित्तमास्कन्दतीति चिन्त्यमि'ति।

सुस्पष्टार्थकोऽयं भागः, व्याख्यापेक्षा नास्ति।[२८९]

---

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. २४
२. तदेव, जागदीशीमूलम्, पृ. २५
३. तदेव, दीधितिमूलम्, पृ. २५
४. तदेव, जागदीशीमूलम्, पृ. २५

तत्त्वालोकः – 'हेत्वधिकरण' इति[१]। सप्तम्या अवच्छेदकत्वार्थकत्वमादृत्याह 'प्रतियोगिवैयधिकरण्यावच्छेदके'ति[२]। हेत्वधिकरण इति सप्तम्या निरूपितत्वार्थकत्वे प्रतियोग्यनधिकरणनिरूपितं यद्धेत्वधिकरणनिरूपितवृत्तित्वं तद्वदभावे हेत्वधिकरणवृत्तित्वम्प्रतियोगिव्यधिकरणहेतुसमानाधिकरणत्वान्तस्य यथाश्रुतमेवार्थस्तत्र व्याप्यवृत्तेरवच्छेदकत्वाभावेऽपि न दोष इत्यरुचेराह 'गुरुतरञ्चे'ति।[३] 'तस्य केवलान्वयितये'ति[४]। घटादीनां कालोपाधित्वे कालवदेवाभावसत्त्वं तस्यानुपाधित्वे नित्यवदेव तत्र तादृशोऽभाव[५] इति भावः।[२९०]

प्रकाशः – 'सामानाधिकरण्यवतो न तदभाववत्त्वं, प्रतीतेरन्यथैवोपपादितत्वादित्यस्वरसात् प्रतियोगिवैयधिकरण्येत्यादिविशेषणं वक्ष्यति, तच्च हेत्वधिकरणे बोध्यमि'ति[६] दीधितेर्व्याख्यायां 'तेन [कपि]संयोगाभावस्य प्रतियोगिवैयधिकरण्यावच्छेदकगुणाद्यवच्छिन्नत्वेऽपि कपिसंयोगी एतत्त्वादित्यादौ नाव्याप्तिरि'ति जगदीशेन यदुपन्यस्तन्तत्रोच्यते सप्तम्या [अ]वच्छेदकत्वार्थकत्वमादृत्याह 'प्रतियोगिवैयधिकरण्यावच्छेदके'ति।

जगदीशेन 'संयोगाभावस्य प्रतियोगिवैयधिकरण्यावच्छेदकगुणाद्यवच्छिन्नत्वेऽपी'ति यदुपन्यस्तम्, तत् सप्तम्या अवच्छेदकत्वार्थकत्वमादृत्य। 'हेत्वधिकरणे' इति सप्तम्या निरूपितत्वार्थकत्वे तु प्रतियोग्यनधिकरणनिरूपितं यद्धेत्वधिकरणवृत्तित्वं तद्वदभावे हेत्वधिकरणवृत्तित्वम्, प्रतियोगिव्यधिकरणहेतुसमानाधिकरणत्वान्तस्य यथाश्रुतमेवार्थस्तत्र = उक्तार्थे सप्तम्या निरूपितत्वार्थकत्वपक्षे, व्याप्यवृत्तेरवच्छेदकत्वाभावेऽपि न दोष इत्यरुचेराह 'गुरुतरञ्चे'ति।

'तस्य केवलान्वयितये'ति[७] जागदीश्यंशपरिग्रहः। 'ननु प्रतियोगितावच्छेदका-

---

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. २५

२. तदेव, जागदीशीमूलम्, पृ. २५

३. तदेव, जागदीशीमूलम्, पृ. २५

४. उपलब्धजागदीश्यान्तु 'केवलान्वयित्वादि'ति पाठः।
 –तदेव, जागदीशीमूलम्, पृ. २६

५. 'तादृशाभाव' इति प्राचीनमुद्रितपुस्तके पाठः।

६. प्रकृतग्रन्थः (प्रथमो भागः), दीधितिमूलम्, पृ. २५

७. 'केवलान्वयित्वादि'त्युपलब्धजागदीशीग्रन्थेषु पाठः।

वच्छिन्नस्य यस्य कस्यचित्, तत्सामान्यस्य, प्रतियोगितावच्छेदकयत्किञ्चिदवच्छिन्नस्य वा, अनधिकरणत्वमुक्तमिति। आद्ये अव्याप्यवृत्तिसाध्यकाव्याप्तिः, एकप्रतियोग्यधिकरणस्या[पि] तद्व्यक्त्यन्तरानधिकरणत्वात्। द्वितीये संयोगसामान्याभाववान् द्रव्यत्वाभाववान् वा सत्त्वादित्यादावतिव्याप्तिः, साध्याभाववतो द्रव्यस्य तत्प्रतियोगि-[संयोग]विशेषाभाववत्त्वादि'ति[1] दीधितेर्व्याख्यायां जगदीशेन 'स्वमते संयोगसामान्याभावस्य केवलान्वयितया [केवलान्वयित्वात्] तत्साध्यकसत्तादिकं सद्धेतुरेवेत्यत [साध्यान्तरम्] आह द्रव्यत्वाभावे'ति[2] यदुपन्यस्तन्तद्घटको भागः 'केवलान्वयितये'ति। तत्रोच्यते। घटादीनां कालोपाधित्वे कालवदेव तत्राभाव = संयोगसामान्याभाव, सत्त्वम्। तस्य = घटादेः, अनुपाधित्वे = कालानुपाधित्वे, नित्यवदेव तत्र तादृशोऽभावः = संयोगसामान्याभाव इति भावः।[२९०]

तत्त्वालोकः – दीधितौ 'प्रतियोगितावच्छेदकावच्छिन्नस्य यस्य कस्यचिदि'त्यादि[3]। प्रतियोगितावच्छेदकसमानाधिकरणनिरूपकत्वनिष्ठावच्छेदकताभिन्नाधिकरणतात्वनिष्ठावच्छेदकताभिन्नावच्छेदकत्वानिरूपिताधिकरणत्वनिष्ठावच्छेदकताभिन्नावच्छेदकत्वानिरूपितप्रतियोगिताकभेदवत्त्वं निरूपितत्वसम्बन्धावच्छिन्नप्रतियोगित्वनिष्ठावच्छेदकताभिन्नावच्छेदकत्वानिरूपितावच्छेदकत्वनिष्ठावच्छेदकताभिन्नावच्छेदकत्वानिरूपितधर्मनिष्ठाधेयत्वसम्बन्धावच्छिन्नावच्छेदकताभिन्नावच्छेदकत्वानिरूपितावच्छेदकत्वनिष्ठावच्छेदकत्वभिन्नावच्छेदकत्वानिरूपितनिरूपकत्वनिष्ठावच्छेदकताभिन्नावच्छेदकत्वानिरूपिताधिकरणत्वनिष्ठावच्छेदकताभिन्नावच्छेदकत्वानिरूपितप्रतियोगिताकभेदवत्त्वम्।

प्रतियोगितावच्छेदकतासमानाधिकरणाधेयत्वसम्बन्धावच्छिन्नावच्छेदकताभिन्नावच्छेदकत्वानिरूपितावच्छेदकत्वनिष्ठावच्छेदकताभिन्नावच्छेदकत्वनिरूपितनिरूपकत्वनिष्ठावच्छेदकताभिन्नावच्छेदकत्वानिरूपिताधिकरणत्वनिष्ठावच्छेदकत्वभिन्नावच्छेदकत्वानिरूपितप्रतियोगिताकभेदवत्त्वं वोक्तमित्यर्थः।[२९१]

---

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. २५

२. तदेव, जागदीशीमूलम्, पृ. २६

३. तदेव, दीधितिमूलम्, पृ. २५

प्रकाशः – शिरोमणिकृतोक्तविकल्पत्रयस्यात्र क्रमशो निर्वचनं तत्त्वालोककृता विहितम्। यदा प्रतियोगितावच्छेदकावच्छिन्नस्य यद् यत्किञ्चिदधिकरणं, तद्भेदो हेत्वधिकरणे विवक्ष्यते, तदा भेदप्रतियोगितावच्छेदकाः प्रतियोगितावच्छेदक(त्व ?) = लक्षणघटकाभावीयप्रतियोगितावच्छेदक, - समानाधिकरणं प्रतियोगिविशेषनिष्ठं यदधिकरणविशेषस्य निरूपकत्वं तत्, तथा अधिकरणतात्वमधिकरणत्वमेते त्रयोऽवच्छेदकाः भवन्ति।

अतस्तत्तदवच्छेदकनिष्ठावच्छेदकताभिन्नावच्छेदकत्वानिरूपितप्रतियोगिताकभेदवत्त्वमर्थः कृतः।

अत्र सरला(सुबोधनी)कृता 'कपिसंयोगी एतद्वृक्षत्वादि'त्यत्र याऽव्याप्तिर्दर्शिता[१], सा तु दीधितिकृता शिरोमणिना स्वेनापि 'आद्ये अव्याप्यवृत्तिसाध्यकाव्याप्तिः, एकप्रतियोग्यधिकरणस्यापि तद्व्यक्त्यन्तरानधिकरणत्वादि'त्युपन्यस्य वक्ष्यमाणैवास्ति। नात्र तत्त्वालोककृतो दोषः। तत्त्वालोककृता तु दीधित्युक्तस्यैव निर्वचनं कृतमिति बोध्यम्। एवमेव द्वितीयतृतीयविकल्पनिर्वचनस्थलेऽपि बोध्यम्।[२९१]

तत्त्वालोकः – 'अनतिरिक्ततये'ति[२]। अयमाशयः। विशिष्टसत्तावान् गुण इति ज्ञानानन्तरं सत्त्वज्ञानामीत्यनुव्यवसायदर्शनात् सत्त्वस्य द्विधा भानाननुभवाद्विशिष्टसत्त्वं सत्त्वादनतिरिच्यते।

न च तत्र सत्त्वस्य विशेष्यत्वमात्रम् प्रकारत्वन्तु विशिष्टसत्त्वस्येत्यभ्युपगमेऽप्युक्तानुव्यवसायोपपत्तिरिति वाच्यम्, तादृशविशेष्यत्वस्य प्रकारतानात्मकत्वे तज्ज्ञानस्य समूहालम्बनत्वापत्तेः, सत्ता नास्तीति बुद्धिप्रतिबध्यत्वाद्यनुपपत्तेश्च।

न च विशिष्टमात्रस्य प्रकारत्वेऽपि प्रकारतावच्छेदकत्वस्य वैशिष्ट्यसत्तात्वोभयवृत्तितया सत्तात्वावच्छिन्नप्रकारताशालिबुद्धित्वरूपप्रतिबध्यतावच्छेदकसत्त्वान्नानुपपत्तिरिति वाच्यम्, प्रकारे भासमानस्यैव प्रकारतावच्छेदकतया सत्तात्वस्य विशिष्टावृत्तित्वे तज्ज्ञानस्य भ्रमत्वापातात्। वृत्तित्वे ह्यनतिरिक्तत्वाभ्युपगमः।

---

१. सिद्धान्तलक्षणसुबोधनी, पृ. ४३९

२. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ.२६

न च सत्तात्वमुभयसाधारणो धर्म इति वाच्यम्, केवलस्य विशिष्टव्यावृत्तधर्मान्तरानुपलम्भात्, कैवल्ये त्वनेकविधे विलक्षणे प्रमाणाभावात्।

न च विशिष्टस्यानतिरिक्तत्वे गुणे तत्प्रतीतेः प्रमात्वमिति वाच्यम्, विशिष्टाधिकरणत्वस्य प्रमात्वनियामकत्वाभ्युपगमात्। न चाधिकरणत्ववैलक्षण्यापेक्षया विशिष्टस्यैव कुतो न वैलक्षण्यमिति वाच्यम्, विशिष्टस्यातिरिक्तस्य स्वीकारेऽपि तन्निरूपिताधिकरणत्वस्य केवलनिरूपिताधिकरणत्वातिरिक्तस्य निरूपकभेदेन स्वीकरणीयत्वात्। इयांस्तु विशेषोऽस्माकमवच्छेदकं वैलक्षण्यप्रयोजकम्, भवतान्तु निरूपकमेवेति।

अथ विशिष्टाधिकरणत्वस्य प्रतीतिनियामकत्वे सर्वेषामेवाभावानामैक्यप्रसङ्गः, घटवति घटाभाववत्ताबुद्धेर्घटप्रतियोगिकत्वविशिष्टाभावत्वावच्छिन्नाधिकरणत्वस्यापि विलक्षणस्यासत्त्वादेव वारणादिति चेत्।

सत्यम्। विशेषणानुपरक्तस्य सत्त्वस्य प्रतीतिसिद्धतया तस्य सर्वत्र विशिष्टप्रतीतौ विशेषणोपरागो युक्तः, प्रतियोग्युपरागम्विनाऽभावबुद्धेरप्रसिद्धतया केवलाभावसद्भावे प्रमाणाभावात्कस्य विशिष्टबुद्ध्यनुसारः स्याद् विशिष्टबुद्धयो हि तत्तत्प्रतियोग्युपरक्तत्वेन भिन्नमूर्तिकानेवाभावान् विषयीकुर्वन्ति, केवलमभावत्वमात्रञ्चानुगताकारानुरोधादेकम्।

एवम्विशिष्टाधिकरणत्वं यदस्माभिः क्वचिदङ्गीक्रियते, क्वचिच्च न, न तत्र वाङ्मात्रस्य सहायता, किन्तु वैशिष्ट्ये विशेषणाधिकरणत्वं येन सम्बन्धेन निविशिष्टे [निविष्टं] तेन विशेषणवत्त्वविशेष्यवत्त्वोभयसद्भावस्य, नैतस्याभावाधिकरणत्वसत्त्वासत्त्वप्रयोजकत्वमसम्भवात्।

अनीलघटवति नीलविशिष्टघटत्वावच्छिन्नाधिकरणत्वासत्त्वप्रयोजकन्तूक्ताधिकरणतानिरूपकस्यानीलाद् व्यावृत्तत्वम् तदिवाभावाधिकरणत्वस्थले स्वीकारे घटप्रतियोगिकाभावस्याघटप्रतियोगिकाभावव्यावृत्तावेकाभावकथापि दूरापेता कदाचिद्रक्तस्य दण्डस्यारक्ततादशायां रक्तविशिष्टदण्डाधिकरणत्वासत्त्वप्रयोजकं हि विशेष्यसम्बन्ध[सम्बद्ध]विशेषणेन सह विशेष्याधिकरणस्यैककालत्वं तदपि न प्रकृते सत्त्वप्रयोजकं विशेषणस्य घटस्य भूतलेन सहैककालत्वात् कालविशेषणस्थलीयाधिकरणत्वप्रयोजकस्य कालाधिकरणसम्बन्धस्य प्रकृतविषयानन्तर्भावादिति।

अत एवाभावस्थलेऽननुभविकमधिकरणत्ववैलक्षण्यमभ्युपेत्य कयो-

श्चिद् द्वयोरभावयोरभेदोपगमे सर्वेषामेवाभावानामैक्यप्रसङ्ग इत्युक्तम्। 'जलादिवृत्तित्वविशिष्टगोत्वाद्यभावे'त्यादिदीधितिव्याख्यावसरे विशिष्टस्यातिरिक्तत्वे प्रमात्वस्यापारिभाषिकत्वमनुगुणमिति यत्प्रागुक्तन्तत्त्वेतास्वतिरिक्तसाधकयुक्तिष्वकिञ्चित्करमित्यलं प्रसङ्गागतविचारबाहुल्येनेति।[२९२]

प्रकाशः—विकल्पत्रयान्तर्गतद्वितीयविकल्पे प्रतियोगितावच्छेदकावच्छिन्नसामान्यस्यानधिकरणत्वे संयोगसामान्याभाववान् द्रव्यत्वाभाववान् वा सत्त्वादित्यादावतिव्याप्तिरुक्ता 'साध्याभाववतो द्रव्यस्य तत्प्रतियोगिसंयोगविशेषाभाववत्त्वात्, नित्यत्वादिविशिष्टद्रव्यत्वाभावात्मकतत्प्रतियोगिनोऽधिकरणत्वाच्च, स्वाभावाभावात्मकस्य विशिष्टस्यापि द्रव्यत्वस्य द्रव्यत्वानतिरेकादि'[१]त्युपन्यस्य दीधितिकृता।

तद्व्याख्यावसरे जगदीशेन 'न च नित्यवृत्तित्वविशिष्टद्रव्यत्वाभावस्याभावो न नित्यवृत्तित्वविशिष्टद्रव्यत्वं, विशिष्टस्यानतिरिक्ततया जन्यद्रव्येऽपि नित्यवृत्तित्वविशिष्टद्रव्यत्वस्याभावो नास्तीति प्रतीतिप्रसङ्गात्, किन्तु नित्यैकत्वादिकमेवेति नातिव्याप्तिरिति वाच्यमि'त्युपन्यस्तम्[२]। तत्र 'अनतिरिक्ततये'ति परिगृह्य प्रसिद्धस्थल एव उक्तखण्डेन विशदो विचार आरभ्यते 'अयमाशय' इत्यादिना।

विशिष्टसत्तावान् गुण इति ज्ञानानन्तरं सत्त्वञ्जानामीत्यनुव्यवसायदर्शनात् सत्त्वस्य द्विधाभानाननुभवात्। सत्त्वञ्जानामि सत्त्वं विशिष्टभिन्नं जानामीत्येवं द्विधा भानाननुभवादित्याशयः। विशिष्टसत्त्वं सत्त्वादनतिरिच्यते। तत्र कारणं विशिष्टसत्तावान् गुण इति ज्ञानानन्तरं सत्त्वं जानामीति अनुव्यवसायोत्पत्तिः दर्शिता।

तत्र शङ्कते। न च तत्र = विशिष्टसत्तावान् गुण इत्यत्र, सत्त्वस्य विशेष्यत्वमात्रं = विशिष्टात्मकविशेषणस्य विशेष्यत्वमात्रम्, प्रकारत्वन्तु विशिष्टसत्त्वस्येत्यभ्युपगमेऽपि उक्तानुव्यवसायोपपत्तिः, विशिष्टात्मकविशेषणविशेष्यतया सत्त्वज्ञानस्य जातत्वादिति भावः।

तत्र समादधाति। तादृशविशेष्यत्वस्य = सत्त्वनिष्ठविशेष्यत्वस्य, प्रकारतानात्मकत्वे तज्ज्ञानस्य समूहालम्बनत्वापत्तेः। अनेकविशेष्यताकज्ञानस्य भूतलं घटवत् पटवच्चेत्यादेः यथा समूहालम्बनत्वं तथैवेत्यर्थः। तथा तादृशविशेष्यत्वस्य प्रकारतानात्मकत्वे सत्ता नास्तीति बुद्धिप्रतिबध्यत्वाद्यनुपपत्तेश्च।

---

१. प्रकृतग्रन्थः (प्रथमो भागः), दीधितिमूलम्, पृ. २५-२६

२. तदेव, जागदीशीमूलम्, पृ. २६

तत्र पुनः शङ्कते। न च विशिष्टमात्रस्य प्रकारत्वेऽपि प्रकारतावच्छेदकत्वस्य वैशिष्ट्यसत्तात्वोभयवृत्तितया सत्तात्वावच्छिन्नप्रकारताशालिबुद्धित्वरूपप्रतिबध्यतावच्छेदकसत्त्वान्नानुपपत्तिरिति वाच्यम्।

अत्र समादधाति। प्रकारे भासमानस्यैव प्रकारतावच्छेदकतया सत्तात्वस्य विशिष्टावृत्तित्वे तज्ज्ञानस्य भ्रमत्वापत्तेः। विशिष्टवृत्तित्वे ह्यनतिरिक्तत्वाभ्युपगमः। अत्र शङ्कते। न च सत्तात्वमुभयसाधरणो धर्मः। सत्तात्वं विशिष्टे वर्तत इत्येतावता विशिष्टस्य न सत्तानतिरिक्तत्वं वक्तुं शक्यन्तस्योभयसाधारणधर्मत्वादिति तदाशयः।

तत्र समाधानम्। केवले विशिष्टव्यावृत्तधर्मान्तरानुपलम्भात् कैवल्ये अनेकविधे प्रमाणाभावादिति। यो धर्मो विशिष्टे न वर्तते तादृशो धर्मः केवले न भवति। एतावतापि केवलस्य विशिष्टादनतिरिक्तत्वमेवायाति।

अनन्तरं शङ्कते। न च विशिष्टस्यानतिरिक्तत्वे गुणे तत् (विशिष्ट)प्रतीतेः प्रमात्वमिति वाच्यम्। अत्र समाधत्ते। विशिष्टाधिकरणत्वस्य प्रमात्वनियामकत्वाभ्युपगमादिति।

पुनः शङ्कते। न चाधिकरणत्ववैलक्षण्यापेक्षया विशिष्टस्य कुतो न वैलक्षण्यमिति वाच्यमिति।

समाधानं करोति। विशिष्टस्यातिरिक्तस्य स्वीकारेऽपि तन्निरूपिताधिकरणत्वस्य केवलनिरूपिताधिकरणत्वातिरिक्तस्य निरूपकभेदेन स्वीकरणीयत्वात्।

इयांस्तु विशेषोऽस्माकमवच्छेदकं वैलक्षण्यप्रयोजकम्, भवतान्तु निरूपकमेवेति।

अत्र पुनः पूर्वपक्षमुपस्थापयति। न च विशिष्टाधिकरणत्वस्य प्रतीतिनियामकत्वे सर्वेषामेवाभावानामैक्यप्रसङ्गः, घटवति घटाभाववत्ताबुद्धेर्घटप्रतियोगिकत्वविशिष्टाभावत्वावच्छिन्नाधिकरणत्वस्याविलक्षणस्यासत्त्वादेव वारणादिति चेत्। सत्यम्।

अत्र समाधानं करोति। विशेषणानुपरक्तस्य सत्त्वस्य प्रतीतिसिद्धतया तस्य सर्वत्र विशिष्टप्रतीतौ विशेषणोपरागो युक्तः, प्रतियोग्युपरागम्विनाऽभावबुद्धेरप्रसिद्धतया केवलाभावसद्भावे प्रमाणाभावात् कस्य विशिष्टबुद्ध्यनुसारस्स्यात्, विशिष्टबुद्धयो हि तत्तत्प्रतियोग्युपरक्तत्वेन भिन्नमूर्तिकानेवाभावान् विषयीकुर्वन्ति।

एवं विशिष्टाधिकरणत्वं यदस्माभिः क्वचिदङ्गीक्रियते क्वचिच्च न। न तत्र वाङ्मात्रस्य सहायता, किन्तु वैशिष्ट्ये विशेषणाधिकरणत्वं येन सम्बन्धेन निविशिष्टे-

[निविष्टं] तेन विशेषणवत्त्व-विशेष्यवत्त्वोभयसद्भावस्य, नैतस्याभावाधिकरणत्वसत्त्वासत्त्वप्रयोजकत्वमसम्भवात्।

अनीलघटवति नीलविशिष्टघटत्वावच्छिन्नाधिकरणत्वासत्त्वप्रयोजकं तूक्ताधिकरणतानिरूपकस्यानीलाद् व्यावृत्तत्वम्, तदिवाभावाधिकरणस्थले स्वीकारे घटप्रतियोगिकाभावस्याघटप्रतियोगिकाभावव्यावृत्तावेकाभावकथापि दूरापेता। कदाचिद्रक्तस्य दण्डस्यारक्ततादशायां रक्तदण्डाधिकरणतासत्त्वप्रयोजकं हि विशेष्यसम्बद्धविशेषणेन सह विशेष्याधिकरणस्यैककालत्वम्, तदपि न प्रकृते सत्त्वप्रयोजकम्, विशेषणस्य घटस्य भूतलेन सहैककालत्वात्, कालविशेषणस्थलीयाधिकरणत्वप्रयोजकस्य कालाधिकरणसम्बन्धस्य प्रकृतविषयानन्तर्भावात्। अत एवाभावस्थलेऽननुभविकमधिकरणवैलक्षण्यमभ्युपेत्य कयोश्चिदभावयोरभेदोपगमे सर्वेषामेवाभावानामैक्यप्रसङ्ग इत्युक्तम्।

जलादिवृत्तित्वविशिष्टगोत्वाद्यभावेत्यादिदीधितिव्याख्यावसरे विशिष्टस्यातिरिक्तत्वे प्रमात्वस्यापारिभाषिकत्वमनुगुणमिति यत्प्रागुक्तम्, तत्त्वेतास्वनतिरिक्तत्वसाधकयुक्तिष्वकिञ्चित्करमित्यलं प्रसङ्गागतविचारबाहुल्येनेति।

अत्र केवलस्य विशिष्टानतिरिक्तत्वे बहूपपाद्य युक्तयो दर्शिताः। ताः सावधानेन ध्यातव्याः। 'जलादिवृत्तित्वविशिष्टगोत्वाभावे'त्यादिदीधितिभागोऽन्वेष्टव्यः। मया त्वन्वेषणे कृतेऽपि नोपलब्ध इदानीम्। अतो न व्याख्यातोऽतः क्षन्तव्योऽहमिति विरम्यते।[२९२]

तत्त्वालोकः – 'असम्भव' इति[१]। यद्यपि स्वप्रतियोगितावच्छेदकसम्बन्धेन साध्यतावच्छेदकसम्बन्धावच्छिन्न-स्वप्रतियोगितावच्छेदकावच्छिन्नसामान्यानधिकरणत्वविवक्षायान्नासम्भवः, तथापि स्वरूपसम्बन्धेन साध्यतायां सद्धेतावव्याप्तिर्भवत्येवेति बोध्यम्।[२९३]

प्रकाशः – 'यथाश्रुतस्य प्रागुक्तक्रमेण प्रतियोगिव्यधिकरणाभावस्याप्रसिद्ध्या वह्निमान् धूमादित्यादौ सर्वत्रासम्भव इति अत्र नव्या'[२] इत्युल्लिख्य यदुपन्यस्तम्, तत्रा'ऽसम्भव' इति परिगृह्य तत्त्वालोककृतोच्यते यद्यपि स्वप्रतियोगितावच्छेदकसम्बन्धेन साध्यतावच्छेदकसम्बन्धावच्छिन्न-स्वप्रतियोगितावच्छेदकावच्छिन्नसामान्यानधिकरणत्वविवक्षायां नासम्भवः।

---

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. २६

२. तदेव, जागदीशीमूलम्, पृ. २६

वह्निमान् धूमादित्यत्र पूर्वक्षणवृत्तित्वविशिष्टघटाभावाभावस्य साध्यतावच्छेदक(संयोग)सम्बन्धावच्छिन्नस्वप्रतियोगितावच्छेदकावच्छिन्न-सामान्यानन्तर्गतत्वादिति तदाशयः।

तथापि स्वरूपसम्बन्धेन साध्यतायां सद्धेतावव्याप्तिः, तत्र तादृशाभावीयतादृशप्रतियोगिनः साध्यतावच्छेदकसम्बन्धावच्छिन्न-स्वप्रतियोगितावच्छेदकावच्छिन्न-सामान्यान्तर्गतत्वादिति कथनाशयः।[२९३]

तत्त्वालोकः – 'स्वप्रतियोगित्वमि'त्यादि[1]। स्वत्वस्यानुगतत्वे स्वप्रतियोगितानिरूपितसंसर्गतावच्छेदकतासमानाधिकरणाधेयत्वसम्बन्धावच्छिन्नावच्छेदकतानिरूपितावच्छेदकत्वनिष्ठावच्छेदकतानिरूपितसंसर्गत्वनिष्ठावच्छेदकतानिरूपितनिरूपकत्वनिष्ठावच्छेदकतानिरूपिताधिकरणत्वनिष्ठावच्छेदकताकप्रतियोगिताकभेदत्वेन निवेशः।

भवति च संयोगत्वनिष्ठावच्छेदकताकसंसर्गताकघटाभावप्रतियोगितावच्छेदकावच्छिन्ननिरूपकताकाधिकरणत्वावच्छिन्नप्रतियोगिताकभेदो हेत्वधिकरणवृत्तिरिति नासम्भवः।[२९४]

प्रकाशः –संयोगत्वनिष्ठावच्छेदकताकसंयोगनिष्ठसंसर्गताकघटाभावप्रतियोगितावच्छेदकावच्छिन्ननिरूपकताकाधिकरणत्वावच्छिन्नप्रतियोगिताकभेदीयप्रतियोगितावच्छेदककोटौ अन्तिमोऽवच्छेदकः संयोगत्वम्। तच्चाधेयत्वसम्बन्धेनावच्छेदकत्वे विशेषणम्। द्वितीयम[2]वच्छेदकमवच्छेदकत्व[त्वम्]। तृतीयमवच्छेदकं संसर्गत्वम्। चतुर्थम् निरूपकत्वम्। पञ्चमम् अधिकरणत्वम्। अतो दर्शितदिशा दर्शितभेदस्य निवेशः कृतः।[२९४]

तत्त्वालोकः – स्वत्वस्याननुगतत्वे चाभावविशिष्टाभावीयसाध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगितानवच्छेदकत्वं विवक्षणीयम्।

वैशिष्ट्यञ्च स्वतादात्म्य, -स्वविशिष्टनिरूपकताकाधिकरणत्वसम्बन्धावच्छिन्न-स्वनिष्ठावच्छेदकताक-प्रतियोगिताकभेदवद्धेत्वधिकरणवृत्तित्वोभयसम्बन्धेन। स्ववैशिष्ट्यञ्च स्वप्रतियोगितानिरूपितसंसर्गतावच्छेदकतासमानाधिकरणावच्छेदकताकसंसर्गताकत्व, -स्वप्रतियोगितावच्छेदकतासमानाधिकरणावच्छेदकताकत्वोभयसम्बन्धेन।

---

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. २७

२. अन्तिमभागतो द्वितीयम्

अत्रोभयत्वावच्छिन्नसंसर्गतानिरूपितावच्छेदकत्वनिष्ठावच्छेदकतायां संसर्गतावच्छेदकतासामानाधिकरण्यनिष्ठावच्छेदकतानिरूपितत्वमात्रं निविशिष्टम्। तेन स्वनिरूपितप्रतियोगिताकसंसर्गतावच्छेदकतासमानाधिकरणसंयोगत्वनिष्ठावच्छेदकत्वघटितविशेषसंसर्गेण स्वविशिष्टनिरूपकताकाधिकरणत्वरूपविशेषसम्बन्धावच्छिन्नस्वनिष्ठावच्छेदकताकप्रतियोगिताकभेदवत्त्वस्य हेत्वधिकरणे सत्त्वान्नासम्भवः। स्वत्वस्य परिचायकत्वान्नाननुगमः।[२९५]

प्रकाशः – अत्राभावविशिष्टोऽभावः संयोगसम्बन्धावच्छिन्नप्रतियोगिताको घटाभावः। स्ववैशिष्ट्यन्तत्र स्वतादात्म्य, - स्वविशिष्टा या निरूपकता तादृशनिरूपकताकाधिकरणत्वसम्बन्धावच्छिन्न-स्व(अभाव)निष्ठावच्छेदकताकप्रतियोगिताकभेदवद्धेत्वधिकरणवृत्तित्वोभयसम्बन्धेन।

निरूपकतायां स्व(अभाव)वैशिष्टयञ्च स्वप्रतियोगितानिरूपितसंसर्गतावच्छेदकतासमानाधिकरणावच्छेदकताकसंसर्गताकत्व, - स्व(अभाव)प्रतियोगितावच्छेदकतासमानाधिकरणावच्छेदकताकत्वोभयसम्बन्धेन।

उक्तोभयसम्बन्धेन संयोगसम्बन्धावच्छिन्नप्रतियोगिताकाभावविशिष्टा निरूपकता घटनिष्ठा, तत्र स्व(उक्ताभाव)प्रतियोगितानिरूपितसंसर्गतावच्छेदकता(संयोगत्वावच्छेदकता) समानाधिकरणावच्छेदकताकसंसर्गताकत्व, - स्व(उक्ताभाव)-प्रतियोगितावच्छेदकता (घटत्वनिष्ठावच्छेदकता) समानाधिकरणावच्छेदकत्वयोः सत्त्वात्।

एवंसति स्वविशिष्टनिरूपकताकाधिकरणत्वसम्बन्धेन उक्ताभावो भेदप्रतियोगिनि अधिकरणे विशेषणम्। अत एव स्वविशिष्टनिरूपकताकाधिकरणत्वसम्बन्धावच्छिन्न-स्व(उक्ताभाव)निष्ठावच्छेदकताकप्रतियोगिताकभेदवद्धेत्वधिकरणवृत्तित्वात्मको द्वितीयः सम्बन्धोऽपि संयोगसम्बन्धावच्छिन्नप्रतियोगिताके घटाभावे संघटितः।

तदीयसाध्यतावच्छेदकसंयोगसम्बन्धावच्छिन्ना या प्रतियोगिता, तदवच्छेदकत्वं घटत्वे, अनवच्छेदकत्वं वह्नित्वे साध्यतावच्छेदके इति लक्षण सङ्गतिः।[२९५]

तत्त्वालोकः – अथ पूर्वक्षणवृत्तित्वविशिष्टघटाभावाभावस्य साध्यत्वे धूमे घटाभावप्रतियोगितावच्छेदकसंयोगेन स्वप्रतियोगितावच्छेदकावच्छिन्नानधिकरणपर्वतवृत्तिघटाभावात्मकसाध्याभावप्रतियोगितावच्छेदकत्वात्साध्यतावच्छेदकस्येत्यव्याप्तिः।

न च स्वीययत्प्रतियोगितावच्छेदकसम्बन्धेन स्वप्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वं हेतुमतस्तद्वृत्तिसाध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकाभावीयतत्प्रतियोगित्वं प्रतियोगिताविशिष्टप्रतियोगितात्वेनानुगतन्निवेश्यम्। वैशिष्ट्यञ्च स्वतादात्म्य, -स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वनिरूपकाभावीयप्रतियोगितावच्छेदकावच्छिन्नत्वोभयसम्बन्धेन स्वविशिष्ट-निरूपकताकाधिकरणतावत्त्वसम्बन्धावच्छिन्न-स्वनिष्ठावच्छेदकताकप्रतियोगिताकभेदवद्धेत्वधिकरणवृत्तिसाध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकाभावीयत्वोभयसम्बन्धेनेति न दोष इति वाच्यम्।

घटवान् तत्क्रियात्वादित्यत्र कालिकसम्बन्धावच्छिन्नप्रतियोगिताकस्य तत्क्रियासमानकालीनपदार्थाभावस्य पूर्वक्षणविशिष्टस्वाभावाभावात्मकतया स्वप्रतियोगितावच्छेदकावच्छिन्नसामान्यान्तर्गतपूर्वक्षणवृत्तित्वविशिष्टस्वाभावस्य स्वप्रतियोगितावच्छेदकेन कालिकेन स्वरूपेण वा हेतुमति सत्त्वेनाव्याप्तेरिति चेद्। न। स्वविशिष्टप्रतियोगितावच्छेदकावच्छिन्नत्वस्यैव संसर्गत्वात्।

वैशिष्ट्यञ्च स्वनिरूपकाभावीयत्व, -स्वावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेन।

तथा च तद्व्यक्तिनिष्ठकालिकसम्बन्धावच्छिन्नप्रतियोगितावच्छेदकसम्बन्धावच्छिन्नस्वनिरूपकाभावप्रतियोगितावच्छेदकावच्छिन्नत्वस्य तद्व्यक्तिनिष्ठनिरूपकत्व एव सत्त्वेन नाव्याप्तिः।[२९६]

प्रकाशः—स्वत्वस्याननुगतत्वे पूर्वदर्शितानुगमपक्षे पूर्वक्षणवृत्तित्वविशिष्टघटाभावस्याभावो यत्र साध्यं धूमश्च हेतुस्तत्र सद्धेतावव्याप्तिं शङ्कते। साध्याभावात्मकतृतीयाभावस्वरूपघटाभावप्रतियोगितावच्छेदकसंयोगसम्बन्धेन स्वप्रतियोगितावच्छेदकावच्छिन्नानधिकरणपर्वतवृत्तिघटाभावात्मकसाध्याभावप्रतियोगितावच्छेदकत्वात् साध्यतावच्छेदकस्येत्यव्याप्तिः।

अत्र 'न चे'त्यादिना उक्ताव्याप्तिपरिहारोपायं दर्शयति। स्वीययत्प्रतियोगितावच्छेदकसम्बन्धेन स्वप्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वं हेतुमतस्तद्वृत्तिसाध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकाभावीयतत्प्रतियोगित्व[त्वं] प्रतियोगिताविशिष्टप्रतियोगितात्वेनानुगतं निवेश्यम्। तत्र वैशिष्ट्यञ्च स्वतादात्म्य, -स्वविशिष्टनिरूपकताकाधिकरणतावत्त्वसम्बन्धावच्छिन्नस्वनिष्ठावच्छेदकताकप्रतियोगिताकभेदवद्धेत्वधिकरणवृत्तिसाध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकाभावीय-

त्वोभयसम्बन्धेन।

निरूपकतायां स्ववैशिष्ट्यञ्च स्वावच्छेदकसम्बन्धावच्छिन्नत्व, -स्वनिरूपकाभावीयप्रतियोगितावच्छेदकावच्छिन्नत्वोभयसम्बन्धेन। एवंसति नोक्ताव्याप्तिः।

तत्प्रतियोगित्वस्य दर्शितदिशा प्रतियोगिताविशिष्टप्रतियोगितात्वेनानुगतीकृत्य निवेशे दर्शितसाध्यनिष्ठप्रतियोगित्वस्यापि परिग्रहात् तादृशप्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वस्य हेतुमति विरहाद् लक्षणघटकतया साध्याभावस्य परिग्रहाभावात्।

अत्र घटवान् तत्क्रियात्वादित्यत्र तत्क्रियाधिकरणकसमवायसम्बन्धावच्छिन्नाधेयत्वसम्बन्धेन घटसाध्यक-तत्क्रियात्वसद्धेतावव्याप्तिः स्यादिति। कालिकसम्बन्धावच्छिन्नप्रतियोगिताक-तत्क्रियाऽसमानकालीनपदार्थाभावस्य पूर्वक्षणवृत्तित्वविशिष्टस्वाभावाभावात्मकतया स्वप्रतियोगितावच्छेदकावच्छिन्नसामान्यान्तर्गतपूर्वक्षणवृत्तित्वविशिष्टस्वाभावस्य स्वप्रतियोगितावच्छेदककालिकसम्बन्धेन स्वरूपसम्बन्धेन हेतुमति सत्त्वेनाव्याप्तेः।

स्वप्रतियोगितावच्छेदककालिकसम्बन्धेन स्वप्रतियोगितावच्छेदकावच्छिन्नानधिकरणे हेत्वधिकरणे स्वाभावस्य साध्याभावस्य कालिकेन स्वरूपेण वा वृत्तित्वेन तादृशाभावप्रतियोगितावच्छेदकत्वस्यैव साध्यतावच्छेदके सत्त्वादव्याप्तिरित्याशयः।

उक्ताव्याप्तिपरिहारायोपायं दर्शयति। स्वविशिष्टप्रतियोगितावच्छेदकावच्छिन्नत्वस्यैव संसर्गत्वादिति। वैशिष्ट्यञ्च स्वनिरूपकाभावीयत्व, -स्वावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेन।

उक्तस्थलेऽव्याप्त्यभावं स्वयमुपपादयति। तथा च तद्व्यक्तिनिष्ठकालिकसम्बन्धावच्छिन्नप्रतियोगितावच्छेदकसम्बन्धावच्छिन्नस्वनिरूपकाभावप्रतियोगितावच्छेदकावच्छिन्नत्वस्य तद्व्यक्तिनिष्ठनिरूपकत्व एव सत्त्वेन नाव्याप्तिरिति।[२९६]

तत्त्वालोकः – न चैवमपि प्रमेयवान् वाच्यत्वादित्यत्र समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठप्रतियोगिताविशिष्टत्वस्य स्वस्मिन् सत्त्वेनाव्याप्तिरिति वाच्यम्, साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकाभावीयत्वं विहाय साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वस्य विशिष्टप्रतियोगिताया एव विशेषणत्वात्।

न च घटनिष्ठसंयोगसम्बन्धावच्छिन्नप्रतियोगितायां स्वरूपसम्बन्धावच्छिन्नत्वविरहेण तादृशप्रतियोगिताऽप्रसिद्ध्यातिव्याप्त्यसम्भवाद् ग्रन्थासङ्गति-

रिति वाच्यम्, स्वरूपसम्बन्धेन साध्यतायां सद्धेतावुक्तयुक्त्याऽव्याप्त्या साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वस्य पारिभाषिकस्यैव विवक्षितत्वादिति।[२९७]

प्रकाशः – अत्र पुनः शङ्कते 'न चैवमपी'त्यादिना। प्रमेयवान् वाच्यत्वाद् यत्र स्वरूपेण तादात्म्येन वा प्रमेयस्य साध्यता तत्र वाच्यत्वं सद्धेतुस्तत्र समवायसम्बन्धावच्छिन्नप्रतियोगिताकप्रमेयाभावप्रतियोगिताविशिष्टत्वस्य स्वस्मिन् = प्रमेये, सत्त्वेनाव्याप्ति[:], तादृशप्रतियोगितावच्छेदकत्वस्यैव साध्यतावच्छेदके प्रमेयत्वे सत्त्वात्।

अत्र समाधानायोपायं दर्शयति। साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकाभावीयत्वं विहाय साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वस्य स्वविशिष्टप्रतियोगिताया एव विशेषणत्वादिति।

तथा च तत्र साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वस्य प्रतियोगिताविशिष्टप्रतियोगितायामभावान्नाव्याप्तिः।

अत्र शङ्कते 'न चे'त्यादिना। न च घटनिष्ठसंयोगसम्बन्धावच्छिन्नप्रतियोगितायाम् अभावसाध्यकस्थलीयसाध्यतावच्छेदकसम्बन्धात्मकस्वरूपसम्बन्धावच्छिन्नत्वविरहेण तादृशप्रतियोगिताविशिष्टप्रतियोगित्वाप्रसिद्ध्याऽव्याप्त्यसम्भवाद् ग्रन्थासङ्गतिरिति।

अत्र समादधाति। स्वरूपसम्बन्धेन साध्यतायां सद्धेतावुक्तयुत्त्याऽव्याप्त्या साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वस्य पूर्वदर्शितस्य पारिभाषिकस्यैव विवक्षितत्वादिति।[२९७]

तत्त्वालोकः – **'सत्ताद्रव्यत्वयोरि'ति[१]। द्वित्वं विवक्षितम्[२]। सत्तामात्रेणैव समवेतत्व[३]व्यवहारोपपत्तौ द्रव्यत्वादीनामननुगतानां न तथात्वम्।**

न च विनिगमकाभावः। एकमेव हि विनिगमकः। द्रव्यत्वादिषु मध्ये नैकमपि तादृशम् यत् सर्वत्र समवेतत्व[४]व्यवहारप्रयोजकम्। तस्यैकस्य

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. २८

२. यद्यपि प्राचीनमुद्रितपुस्तके प्रकाशकृल्लेखे च 'द्वित्वं विवक्षितमि'त्येव पाठस्तथापि 'द्वित्वमविवक्षितमि'त्यनेन भवितव्यमिति विभाव्यते।

३. 'समवेते'त्येव पाठः प्राचीनमुद्रितपुस्तके।

४. 'समवेते'त्येव पाठः प्राचीनमुद्रितपुस्तके।

तथात्वेऽपरस्यापि तथात्वमित्यनेकस्य तादृशाभावत्वे गौरवम्। सत्त्वस्य तथात्वे च तेनैव सर्वत्र समवेतव्यवहारोपपत्तेर्नापरस्य तथात्वमिति भावः।[२९८]

प्रकाशः – दीधितिकृता विहितविकल्पत्रयान्तर्गततृतीयविकल्पे कपिसंयोगाभाववान् आत्मत्वादित्यत्राव्याप्तिरुक्ता।[१]

तत्र जगदीशतर्कालङ्कारेण 'वृक्षादावुत्पत्तिकालावच्छेदेन गुणसामान्याभावसत्त्वाद् वृक्षत्वादिकं हेतुं परित्यज्यात्मत्वं हेतुरुक्त'[२] इत्युपन्यस्य 'यद्यपि वृक्षादेः स्वसमवेतकपिसंयोगसामान्यस्वरूपाभावप्रतियोगिनः समवेतसामान्याभावस्य द्रव्यमात्रसमवेताभावस्य चानधिकरणत्वाद् वृक्षत्वादेरपि हेतुतायामव्याप्तिः सम्भवत्येव तथापि सत्ताद्रव्यत्वयोरेव समवेताभावद्रव्यमात्रसमवेताभावयोरभावत्वं, लाघवात्, न तु कपिसंयोगाद्यात्मकसमवेतमात्रस्य तथात्वं, गौरवादित्याशय' इत्युपन्यस्तम्[३]।

तथासति कपिसंयोगाभावसाध्यकवृक्षत्वहेतुकस्थले नाव्याप्तिसम्भवः, समवेतसामान्याभावस्य द्रव्यमात्रसमवेताभावस्य साध्याभावप्रतियोगित्वविरहादिति तदाशयः।

अत्र तत्त्वालोककृता 'सत्ताद्रव्यत्वयोरेवे'ति परिगृह्योच्यते। सत्तामात्रेणैव समवेतव्यवहारोपपत्तौ द्रव्यत्वादीनामननुगतानां न तथात्वम्। न च विनिगमकाभावः। एकमेव हि विनिगमकः। द्रव्यत्वादिषु मध्ये नैकमपि तादृशम् यत् सर्वत्र समवेतव्यवहारप्रयोजकम्। तस्यैकस्य = द्रव्यत्वादेरेकस्य, तथात्वेऽपरस्यापि तथात्वमित्यनेकस्य तादृशाभावत्वे गौरवम्। सत्त्वस्य तथात्वे च तेनैव सर्वत्र समवेतव्यवहारोपपत्तेर्नापरस्य तथात्वमिति भावः।

गुणसामान्याभावाभावस्य गुणस्वरूपत्वेन कपिसंयोगाभाववान् आत्मत्वादित्यत्र गुणस्वरूपकपिसंयोगात्मकसाध्याभावाधिकरणे आत्मनि तदीयप्रतियोगितावच्छेदकगुणसामान्याभावत्वावच्छिन्नानधिकरणत्वसत्त्वाद् याऽव्याप्तिरुपपादिता, तत्र 'न च गुणसामान्याभावस्य अभावो द्रव्यत्वमेव, [लाघवात्], न तु गुणः, गौरवात्, ततश्च न कपिसंयोगात्मकगुणप्रतियोगित्वं गुणसामान्याभावस्य इति नोक्ताव्याप्तिसम्भव' इत्याशङ्क्य 'घटादावुत्पत्तिदशायां गुणसामान्याभावस्यैव सत्त्वेन द्रव्यत्वस्य तदभावत्वासम्भवाद् अभावाभावस्य प्रतियोगित्वनियमाच्चेति भाव' इति समाहितम्[४]।

---

१. प्रकृतग्रन्थः (प्रथमो भागः), दीधितिमूलम्, पृ. २६

२. तदेव, जागदीशीमूलम्, पृ. २७

३. तदेव, जागदीशीमूलम्, पृ. २८

४. तदेव, जागदीशीमूलम्, पृ. २८

गुणसामान्याभावाभावस्य द्रव्यत्वस्वरूपत्वे उत्पत्तिकालीनघटो गुणसामान्याभावाभावाभाव[वा]निति प्रतीतेरपलापापत्तिः स्यात्, उत्पत्तिकालेऽपि घटादौ द्रव्यत्वस्य सत्त्वात् तथा अभावाभावस्य प्रतियोगित्वनियमाच्च गुणसामान्याभावस्याभावो न द्रव्यत्वम्। ततश्च दर्शिताव्याप्तिर्युक्तैवेति कथनाशयः।[२९८]

तत्त्वालोकः – **'नियमाच्चेति भावः'[१]। ननु गुणसामान्याभावाभावस्याप्येकत्वस्वरूपत्वमेवास्तु। कपिसंयोगादीनान्तु न तथात्वम्, इत्यात्महेतावपि न दोषसम्भव इति चेत्।**

अत्र केचित् स्ववृत्तिपदार्थविभाजकीभूतधर्मानधिकरणवृत्तिप्रतियोगिताकाभावावृत्तित्वं स्वप्रतियोगित्वविशेषणं वाच्यम्। तथा चात्मत्वहेतौ कपिसंयोगात्मकाभावस्य कपिसंयोगान्यकपिवृत्तिगुणान्यगुणसामान्याभावाभावस्यैकतया तदीयताद्दशगुणसामान्याभावनिष्ठप्रतियोगित्वस्य ताद्दशाभावावृत्तितया संग्राह्यत्वाद् भवत्येवाव्याप्तिः, वृक्षत्वहेतुके च ताद्दशगुणसामान्याभावनिष्ठप्रतियोगित्वस्य ताद्दशत्वेन संग्राहच्यत्वेऽपि तत्प्रतियोगितावच्छेदकावच्छिन्नाधिकरणत्वस्य वृक्षादावुत्पत्तिकालावच्छेदेन सत्त्वात्।

कपिसंयोगान्यकपिवृत्तिसमवेतान्यसमवेताभावाभावप्रतियोगितावच्छेदकावच्छिन्नाधिकरणत्वसत्त्वेऽपि तत्प्रतियोगित्वस्य कपिसंयोगवृत्तिपदार्थविभाजकीभूतधर्मानधिकरणघटत्ववृत्तिप्रतियोगिताकाभाववृत्तित्वेन धारणासम्भवान्नाव्याप्तिरिति ग्रन्थासङ्गतिः।

न चोक्तसमवेताभावाभावमादायैव वृक्षत्वहेतावव्याप्तिरिति वाच्यम्, अनुयोगिताविशिष्टानुयोगितानिरूपितप्रतियोगितानवच्छेदकत्वस्य विवक्षितत्वात्। वैशिष्ट्यञ्च स्वतादात्म्य, स्वविशिष्टप्रतियोगितावच्छेदकयत्किञ्चिद्धर्मावच्छिन्नाधिकरणहेत्वधिकरणवृत्त्यभावनिष्ठत्वोभयसम्बन्धेन।

वैशिष्ट्यञ्च स्वाश्रयनिरूपितत्व, – स्वाश्रयवृत्तिपदार्थविभाजकीभूतधर्मानधिकरणवृत्तिप्रतियोगिताकाभावावृत्तित्वोभयसम्बन्धेन।

तथा च ताद्दशसमवेताभावाभावत्वरूपानुयोगिताविशिष्टानुयोगितानिरूपितत्वस्य कपिसंयोगाभावनिष्ठप्रतियोगित्वे विरहान्नाव्याप्तिरिति।[२९९]

---

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. २८

प्रकाशः – 'अभावाभावस्य प्रतियोगित्वनियमाच्चे'ति प्रतीकं परिगृह्य तत्त्वालोककृतोच्यते यद् गुणसामान्याभावस्याप्येकत्वस्वरूपत्वमेवास्तु, कपिसंयोगादीनान्तु न तथात्वमत आत्मत्वहेतावपि न दोषः, गुणसामान्याभावस्य साध्याभावप्रतियोगित्वविरहात्।

अत्र केचित्कथयन्ति यत् स्व = लक्षणघटकाभाव, - वृत्तिपदार्थविभाजकीभूतधर्मानधिकरणवृत्तिप्रतियोगिताकाभावावृत्तित्वं स्वप्रतियोगित्वविशेषणं वाच्यम्। तथा चात्मत्वहेतौ कपिसंयोगात्मकाभावस्य कपिसंयोगान्यो यः कपिवृत्तिगुणस्तदन्यगुणसामान्याभावाभावस्यैकतया = कपिसंयोगात्मकाभावस्य कपिसंयोगान्यकपिवृत्तिगुणान्यगुणसामान्याभावाभावात्मकतया, तदीयगुणसामान्याभावनिष्ठप्रतियोगित्वस्य तादृशाभावावृत्तितया कपिसंयोगात्मकाभाववृत्तिर्यो गुणत्वरूपः पदार्थविभाजको धर्मस्तदनधिकरणं कपिस्तद्वृत्तिप्रतियोगिताकाभावो न कपिसंयोगान्यकपिवृत्तिगुणान्यगुणसामान्याभावः, अतस्तादृशगुणसामान्याभावनिष्ठप्रतियोगित्वस्य तादृशाभावावृत्तितया संग्राह्यत्वादात्मत्वहेतुकस्थले भवत्येवाव्याप्तिः।

वृक्षत्वहेतुकस्थले तादृशगुणसामान्याभावनिष्ठप्रतियोगित्वस्य तादृशत्वेन सङ्ग्राह्यत्वेऽपि तत्प्रतियोगितावच्छेदकावच्छिन्नाधिकरणत्वस्योत्पत्तिकालावच्छेदेन वृक्षादौ सत्त्वेन नाव्याप्तिः। कपिसंयोगात्मकसाध्याभावस्य तत्र प्रतियोगिसमानाधिकरणत्वेन प्रतियोगिव्यधिकरणत्वविरहादित्याशयः।

कपिसंयोगान्यकपिवृत्तिसमवेतान्यसमवेताभावाभावप्रतियोगितावच्छेदकावच्छिन्नाधिकरणत्वस्य तत्रात्मनि सत्त्वेऽपि तत्प्रतियोगित्वस्य कपिसंयोगवृत्तिपदार्थविभाजकधर्मानधिकरणघटत्ववृत्तिप्रतियोगिताकाभाववृत्तित्वेन धारणासम्भवान्नाव्याप्तिरिति ग्रन्थासङ्गतिः।

कपिसंयोगाभाववान् आत्मत्वादित्यत्राव्याप्तिरिति ग्रन्थासङ्गतिर्न, अव्याप्तेरुपपादितत्वात्।

अत्र शङ्कते। न चोक्तसमवेताभावाभाव = कपिसंयोगान्यकपिवृत्तिसमवेतान्यसमवेताभावाभाव, - मादायैव वृक्षत्वहेतावव्याप्तिः।

अत्र समाधानं दर्शयति। अनुयोगिताविशिष्टानुयोगितानिरूपितप्रतियोगितानवच्छेदकत्वस्य विवक्षितत्वादिति।

तत्र वैशिष्ट्यम् स्वतादात्म्य, - स्वविशिष्टप्रतियोगितावच्छेदकयत्किञ्चिद्धर्मावच्छिन्नाधिकरणहेत्वधिकरणवृत्त्यभावनिष्ठत्वोभयसम्बन्धेन। वैशिष्ट्यञ्च स्वाश्रयनि-

रूपितत्व, -स्वाश्रयवृत्तिपदार्थविभाजकीभूतधर्मानधिकरणवृत्तिप्रतियोगिताकाभावावृत्तित्वोभयसम्बन्धेन। तथा च तादृशसमवेताभावाभावत्वरूपानुयोगिताविशिष्टानुयोगितानिरूपितत्वस्य कपिसंयोगाभावनिष्ठप्रतियोगित्वे विरहान्नाव्याप्तिः।[२९९]

तत्त्वालोकः – अथात्र समवायसम्बन्धावच्छिन्नप्रतियोगिताकप्रमेयाभावसाध्यकभावत्वे साध्याभावत्वरूपानुयोगित्वस्य निखिलपदार्थवृत्तित्वेन स्वसमानाधिकरणपदार्थविभाजकीभूतधर्मानधिकरणत्वाप्रसिद्ध्याऽनुयोगित्वान्तरमादायातिव्याप्तिः। तस्य सत्तामात्रवृत्तित्वे स्वविशिष्टसत्ताभावनिष्ठप्रतियोगित्वमादायातिव्याप्तिवारणेऽप्युक्तप्रमेयाभावस्य स्वरूपविषयित्वान्यतरसम्बन्धेन साध्यतायां सत्ताभावविषयकज्ञानत्वेऽतिव्याप्तिर्दुवारा, प्रमेयाभावनिष्ठप्रतियोगितायामुक्तावृत्तित्वरूपविशेषणविरहात्। सत्ताभावनिष्ठप्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वस्य हेत्वधिकरणे विरहाच्च।

पटवृत्तित्वविशिष्टघटत्वाभावसाध्यके व्यभिचारिणि साध्याभाववृत्तिपदार्थविभाजकीभूतधर्मानधिकरणघटत्वनिष्ठप्रतियोगिताकाभाववृत्तित्वस्यैव साध्याभावत्वरूपानुयोगित्वाश्रयनिरूपितप्रतियोगितायां सत्त्वेनाभावान्तरानुयोगित्वमादायातिव्याप्त्यापत्तिश्च। अतिव्याप्तिवारणायाश्रितकल्पेऽतिव्याप्तेरिष्टापत्तेरयोगादिति चेन्न।

अनुयोगितावैशिष्ट्यस्य प्रतियोगितायां स्वाश्रयनिरूपितत्व, -स्ववृत्तित्वोभयसम्बन्धेन वाच्यत्वात्।

वृत्तित्वञ्च स्वनिरूपकत्व, -स्वाश्रयप्रतियोगियत्किञ्चिद्वृत्तिपदार्थविभाजकीभूतधर्मानधिकरणप्रतियोगिताकाभावावृत्ति[१]त्वान्यतरसम्बन्धेन।

तथा च व्यभिचारिणि साध्यनिष्ठप्रतियोगितैवानुयोगिताविशिष्टा, कपिसंयोगाभावसाध्यकसद्धेतौ तादृशगुणसामान्याभावनिष्ठापीति नासङ्गतिरिति ध्येयम्।

यत्तु गुणसामान्याभावस्य यदेकत्वमात्रस्वरूपन्तत्र नानुगतत्वप्रयोजकम् द्रव्यत्वादिवदनुगतस्यैकत्वस्याभावादननुगतस्यापि स्वसत्तायां गुणसामान्याभावाभावव्यवहारोत्पादकत्वेन तत्स्वरूपत्वे च विनिगमकाभावान्निखिलगुणात्मकत्वमिति।

---

१. 'प्रतियोगिकाभावाभावावृत्ति' इति प्राचीनमुद्रितपुस्तके पाठः।

तत्तुच्छम्। संख्यारूपत्वम्वा परिमाणरूपत्वं वा पृथक्त्वरूपत्वम्वेत्यत्र विनिगमकाभावेऽपि संयोगादिरूपतायां लाघवस्यैव विनिगमकत्वात्। एकत्वेन चैकेनैव तत्तद्द्रव्ये गुणसामान्याभावाभावव्यवहारोपपत्तेः संयोगादिभिस्त्वनन्तैरिति।[३००]

प्रकाशः – एतत्खण्डेन अनुयोगिताविशिष्टानुयोगितानिरूपितप्रतियोगितानवच्छेदकत्वविवक्षायां दोषं दर्शयति। यत्र समवायसम्बन्धावच्छिन्नप्रतियोगिताकः प्रमेयाभावः साध्यं भावत्वं च हेतुस्तत्र व्यभिचारिणि अतिव्याप्तिः स्यादिति। यतो हि तत्र साध्याभावत्वरूपानुयोगित्वस्य निखिलपदार्थवृत्तित्वेन[1] स्व = साध्याभावत्वरूपानुयोगिता, - समानाधिकरणपदार्थविभाजकीभूतधर्मानधिकरणत्वाप्रसिद्ध्याऽनुयोगित्वान्तरमादायातिव्याप्तिः।

व्यभिचारिणि साध्याभावस्य लक्षणाघटकत्वेऽभावान्तरमादाय साध्यतावच्छेदके तदीयप्रतियोगितानवच्छेदकत्वस्य सत्त्वादित्याशयः।

तस्य = साध्याभावत्वरूपानुयोगित्वस्य, - सत्तामात्रवृत्तित्वे समवायसम्बन्धावच्छिन्नप्रतियोगिताकप्रमेयाभावाभावस्य द्रव्यादिषु त्रिष्वेव सत्त्वेन सत्ताया अपि तत्रैव सत्त्वेन साध्याभावत्वरूपानुयोगित्वस्य सत्तामात्रवृत्तित्वात्।

तादृशानुयोगिताविशिष्टानुयोगिता सैवानुयोगिता, तादृशानुयोगितात्मकस्वविशिष्टप्रतियोगिता सत्ताभावात्मकसाध्यनिष्ठा प्रतियोगिता, तदवच्छेदकत्वस्यैव साध्यतावच्छेदके सत्त्वादतिव्याप्तिवारणे तु उक्तप्रमेयाभावस्य = समवायसम्बन्धावच्छिन्नप्रतियोगिताकप्रमेयाभावस्य, स्वरूपविषयित्वान्यतरसम्बन्धेन साध्यतायां सत्ताभावविषयकज्ञानत्वे व्यभिचारिणि अतिव्याप्तिर्दुर्वारा, हेत्वधिकरणे सत्ताभावविषयके ज्ञाने उक्तसाध्यस्य स्वरूपेण विषयितया वा उक्तान्यतरात्मकसाध्यतावच्छेदकसम्बन्धेनासत्त्वाद् व्यभिचारित्वन्तस्य तत्रातिव्याप्तिमुपपादयति।

प्रमेयाभावनिष्ठप्रतियोगितायामुक्तावृत्तित्वरूपविशेषणविरहादिति सत्तात्मको यः साध्याभावस्तद्वृत्तिर्यः सामान्यत्वरूपः पदार्थविभाजको धर्मस्तदनधिकरणं समवायसम्बन्धावच्छिन्नप्रतियोगिताकप्रमेयाभावात्मकं साध्यन्तत्र साध्याभावीयप्रतियोगिताया वृत्तित्वमेव, न त्ववृत्तित्वमत उक्तम् 'प्रमेयाभावप्रतियोगितायामुक्तावृत्तित्वरूपविशेषणविरहादि'ति।

---

१. प्रमेयाभावात्मकसाध्याभावस्य प्रमेयरूपत्वात्।

उक्तस्थलेऽतिव्याप्तौ कारणान्तरमपि दर्शयति सत्ताभावनिष्ठप्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वस्य हेत्वधिकरणे विरहाच्चेति।

सत्तात्मकसाध्याभावस्य प्रतियोगी सत्ताभावः, सत्ताभावाभावस्य सत्तात्मकत्वात्, सत्ताभावविषयके ज्ञाने हेत्वधिकरणे सत्ताभावात्मकसत्तात्मकसाध्याभावप्रतियोगिनो विषयितासम्बन्धेन विद्यमानत्वात्, सत्ताभावनिष्ठप्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वस्य हेत्वधिकरणे विरहाच्चेत्युक्तिः।

स्थलान्तरेऽपि अतिव्याप्तिं दर्शयति। पटवृत्तित्वविशिष्टघटत्वाभावसाध्यके व्यभिचारिणि साध्याभाववृत्तिपदार्थविभाजकीभूतधर्मानधिकरणघटत्वनिष्ठप्रतियोगिताकाभाववृत्तित्वस्यैव साध्याभावत्वरूपानुयोगित्वाश्रयनिरूपितप्रतियोगिताया सत्त्वेनाभावान्तरानुयोगित्वमादायातिव्याप्त्यापत्तिश्च साध्याभावत्वरूपानुयोगितानिरूपितप्रतियोगिता पटवृत्तित्वविशिष्टघटत्वाभावरूपं उक्तसाध्यञ्च घटत्ववृत्तिप्रतियोगिताकाभावात्मकमतो न स्व = साध्याभाव, - वृत्तिपदार्थविभाजकीभूताभावत्वधर्मानधिकरणघटत्ववृत्तिप्रतियोगिताकसाध्यात्मकाभाववृत्तिप्रतियोगिताक एव साध्याभावो, न तु तादृशावृत्तिप्रतियोगिताकोऽतः साध्याभावापरिग्रहोऽभावान्तरमादायातिव्याप्तिरित्याशयः।

आश्रितकल्पेऽतिव्याप्तेरिष्टापत्तेरयोगादिति चेद्।

न। अनुयोगिताविशिष्टत्वस्य प्रतियोगितायां स्वाश्रयनिरूपितत्व, - स्ववृत्तित्वोभयसम्बन्धेन वाच्यत्वात्। वृत्तित्वञ्च स्वनिरूपकत्व, - स्वाश्रयप्रतियोगियत्किञ्चिद्वृत्तिपदार्थविभाजकीभूतधर्मानधिकरणप्रतियोगिताकाभावावृत्तित्वान्यतरसम्बन्धेन। तथा च व्यभिचारिणि साध्यनिष्ठप्रतियोगितैवानुयोगिताविशिष्टा कपिसंयोगाभावसाध्यकसद्धेतौ तादृशगुणसामान्याभावनिष्ठापीति नासङ्गतिरिति ध्येयम्।

व्यभिचारिणि साध्यनिष्ठप्रतियोगितायामनुयोगिताविशिष्टत्वं स्वाश्रय = अनुयोगिताश्रय, - निरूपितत्वस्य सत्त्वात् स्वनिरूपकत्वसम्बन्धेन, स्व = अनुयोगिता, - वृत्तित्वसत्त्वाच्च।

एवमेव कपिसंयोगाभावसाध्यकसद्धेतौ गुणसामान्याभावनिष्ठप्रतियोगितायामप्यनुयोगिताविशिष्टत्वमवधेयम्।

यत्तु गुणसामान्याभावस्य यदेकत्वमात्रस्वरूपन्तत्र नानुगतत्वं प्रयोजकम्, द्रव्यत्वादिवदनुगतस्यैकत्वस्याभावादननुगतस्यापि स्वसत्तायां गुणसामान्याभावाभावव्यवहारोत्पादकत्वेन तत्स्वरूपत्वे च विनिगमकाभावान्निखिलगुणस्वरूपत्वमिति।

तत्तुच्छम्। संख्यारूपत्वम्वा परिमाणरूपत्वम्वा पृथक्त्वरूपत्वम्वेत्यत्र विनिगमकाभावेऽपि संयोगादिरूपतायां लाघवस्यैव विनिगमकत्वात्, एकत्वेनैकेनैव तत्तद्द्रव्ये गुणसामान्याभावाभावव्यवहारोपपत्तेः संयोगादिभिस्त्वनन्तैरिति।

गुणसामान्याभावाभावस्य संयोगादिरूपत्वमेव, न तु संख्यारूपत्वं, परिमाणरूपत्वम्वा पृथक्त्वरूपत्वम्वेत्यत्र विनिगमकविरहेऽपि तस्य गुणसामान्याभावाभावस्यैकत्वरूपत्वमेव, न तु संयोगादिरूपत्वमित्यत्र लाघवमेव विनिगमकमित्याशयः।[३००]

तत्त्वालोकः – दीधितौ 'यादृशप्रतियोगिते'त्यादिः[१]। यादृशप्रतियोगितानिरूपितावच्छेदकतावद्धर्मनिष्ठावच्छेदकतानिरूपितनिरूपकताकाधिकरणतावान्नेति प्रतीतिसिद्धस्य प्रतियोगितात्वसमानाधिकरणोभयावृत्तिधर्मावच्छिन्नावच्छेदकताभिन्नावच्छेदकत्वा[२]निरूपितावच्छेदकत्वनिष्ठावच्छेदकता[२]भिन्नावच्छेदकत्वानिरूपितधर्मनिष्ठावच्छेदकताभिन्नावच्छेदकत्वा[३]निरूपितावच्छेदकत्व[३]निष्ठावच्छेदकताभिन्नावच्छेदकत्वानिरूपितनिरूपकत्वनिष्ठावच्छेदकताभिन्नावच्छेदकत्वानिरूपिताधिकरणत्वनिष्ठावच्छेदकताभिन्नावच्छेदकत्वानिरूपितप्रतियोगिताकभेदस्य हेत्वधिकरणवृत्तेर्निरूपितं यत्प्रतियोगित्वन्तन्निरूपिताधिकरणत्वनिष्ठावच्छेदकतानिरूपितनिरूपकत्वनिष्ठावच्छेदकतानिरूपितावच्छेदकत्वनिष्ठावच्छेदकतानिरूपितधर्मनिष्ठावच्छेदकतानिरूपितावच्छेदकत्वनिष्ठावच्छेदकतानिरूपितावच्छेदकतावत्प्रतियोगितानवच्छेदकत्वं विवक्षितम्।

न च महानसीयाभावप्रतियोगितावच्छेदकावच्छिन्नत्वे सति वह्न्यभावप्रतियोगितावच्छेदकावच्छिन्ननिरूपकताकाधिकरणतावान्नेति भेदस्यापि तादृशभेदत्वेन लक्षणाक्रान्ततया तन्निरूपितप्रतियोगितानिरूपितपरम्परावच्छेदकतावत्त्वस्य वह्न्यभावप्रतियोगित्वे सत्त्वादव्याप्तिरिति वाच्यम्, अवच्छेदकत्वनिष्ठावच्छेदकताविशिष्टनिरूपकत्वनिष्ठावच्छेदकत्वस्य विवक्षितत्वात्। वैशिष्ट्यञ्च स्वभिन्नावच्छेदकत्वानिरूपितत्वसम्बन्धेन।

---

१. प्रकृतग्रन्थः (प्रथमो भागः), दीधितिमूलम्, पृ. २६

२. 'निरूपितावच्छेदकत्वनिष्ठावच्छेदकत्वनिष्ठावच्छेदकते'त्येवं प्रकाशकृल्लेखे पाठः।

३. 'निरूपितावच्छेदकावच्छेदकत्वे'ति पाठः प्रकाशकृल्लेखे।

यद्वैकत्ववृत्तित्वं निरूपकत्वनिष्ठावच्छेदकतायां विशेषणं वाच्यम्। वृत्तित्वञ्च स्वनिरूपितपरम्परीयोभयावृत्तिधर्मनिष्ठावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन। तथा च न दोष इति। तन्न। एकत्वादेः पर्याप्त्यनभ्युपगमे निवेशासम्भवात्।

वस्तुतस्तु निरूपकत्वनिष्ठावच्छेदकतायान्न किमपि विशेषणादिकं देयम्। निरूपकत्वस्य यादृशप्रतियोगितावच्छेदकतात्वावच्छिन्नपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तित्वेन यादृशप्रतियोगिताविशिष्टत्वेन वा निवेशनीयतया निरूपकत्वनिष्ठावच्छेदकतावच्छेदकतया प्रतियोगित्व[व्यक्ति]द्वयस्य प्रवेशासम्भवात्। किन्तु वह्न्यभावप्रतियोगित्वव्यक्तिविशिष्टनिरूपकताधिकरणतावत्त्वे सति महानसीयाभावप्रतियोगिताविशिष्टनिरूपकताकाधिकरणतावद्भेदवारणाय तादृशाधिकरणत्वनिष्ठावच्छेदकताविशिष्टत्वं प्रतियोगितायान्निवेश्यम्। वैशिष्ट्यञ्च स्वभिन्नावच्छेदकत्वानिरूपितत्वसम्बन्धेन।

यद्वाधिकरणत्वनिष्ठावच्छेदकताद्वयानिरूपितत्वं प्रतियोगितावृत्त्युभयावृत्तिधर्मनिष्ठावच्छेदकताद्वयानिरूपितत्वम्वा विशेषणतया प्रतियोगित्वस्योपादेयमिति न कस्यचिदपि दोषस्य सम्भवः।

इदञ्चाधिकरणत्वप्रतियोगित्वावच्छेदकत्वानामधिकरणप्रतियोग्यवच्छेदकानां भेदेऽपि न भेद इति मते। अन्यथा धूमवान् वह्नेरित्यत्रातिव्याप्तेः। धूमाभावप्रतियोगितावच्छेदकावच्छिन्ननिरूपकताकाधिकरणतावद्भेदस्य प्रतियोगितायामधिकरणत्वद्वयादिनिष्ठावच्छेदकतानिरूपितत्वस्य सत्त्वेनावच्छेदकताद्वयस्याधिकरणत्वादिनिष्ठस्य निरूपितत्वसत्त्वेन च धूमत्वावच्छिन्नप्रतियोगित्वस्य लक्षणाघटकत्वादेवं साक्षात्परम्परासाधारणावच्छेदकत्वनिरूपितत्वमभ्युपेत्यैवं[मभ्युपेत्यैवेदं] समुचितमन्यथा वह्निमान्धूमादित्यत्राव्याप्तेरनुपदोक्ताया अनुद्धारादित्यवध्येयम्।[३०१]

प्रकाशः– दीधितिकृता विहितविकल्पेषु त्रिषु सर्वत्र दोषदर्शनानन्तरम् तदुद्धारायोक्तम् 'यादृशप्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वं हेतुमतस्तदनवच्छेदकत्वस्योक्तत्वादि'ति[१]।

---

१. प्रकृतग्रन्थः (प्रथमो भागः), दीधितिमूलम्, पृ. २६

तथा च तृतीये विकल्पे 'गुणसामान्याभावनिष्ठप्रतियोगिताया अवच्छेदकं यद् गुणसामान्याभावत्वं हेतुमतस्तदवच्छिन्नानधिकरणत्वेऽपि कपिसंयोगाभावत्वस्य तादृशप्रतियोगितानवच्छेदकत्वात्तद्रूपेण साध्यतायामात्मत्वहेतौ नाव्याप्तिरि'ति तर्कालङ्कारेण व्याख्यातम्।

द्वितीये विकल्पे 'द्रव्यत्वाभाववान् सत्त्वादित्यादौ तु द्रव्यत्वाभावत्वावच्छिन्नानधिकरणं यद्धेतुमत्तन्निष्ठाभावस्य तादृशप्रतियोगितावच्छेदकमेव द्रव्यत्वाभावत्वमिति नातिव्याप्तिरिति भाव' इत्यपि व्याख्यातम्[१]।

तत्र तत्त्वालोककृता 'यादृशप्रतियोगितानिरूपितावच्छेदकतावद्धर्मनिष्ठावच्छेदकतानिरूपितनिरूपकताकाधिकरणतावान्नेति प्रतीतिसिद्धस्य' इत्यादिना 'विवक्षितमि-'त्यन्तेनानुगमप्रकारो दर्शितः। दर्शितप्रतीतिसिद्धभेदीयप्रतियोगितावच्छेदका ये ये, तत्तन्निष्ठावच्छेदकताभिन्नावच्छेद्कत्वानिरूपितप्रतियोगिताकभेदस्य हेत्वधिकरणवृत्तेर्निवेशः।

तत्र प्रतियोगितात्वसमानाधिकरण उभयावृत्तिधर्मतत्प्रतियोगितागततद्व्यक्तित्वधर्मवत्त्वेन प्रतियोगितायाः प्रवेशः। अतोऽन्तिमभागतः प्रथमावच्छेदकता तत्प्रतियोगित्वनिष्ठा। तद्व्यक्तित्वावच्छिन्ना, द्वितीयावच्छेदकता अवच्छेदकत्वनिष्ठा। तृतीयावच्छेदकता धर्मनिष्ठा। तुरीयावच्छेदकता पुनः अवच्छेदकत्वनिष्ठा। पञ्चमी अवच्छेदकता निरूपकत्वनिष्ठा। षष्ठी अवच्छेदकता अधिकरणत्वनिष्ठा। तत्प्रतियोगितानिरूपितावच्छेदकतावद्धर्मनिष्ठावच्छेदकताकनिरूपकताकाधिकरणतावद्भेदस्थले दर्शितक्रमेणैव निवेशः।

अनन्तरमुक्तक्रमविपरीतक्रमेण दर्शयति। हेत्वधिकरणवृत्तेरुक्तभेदनिरूपितं यत्प्रतियोगित्वम्, तन्निरूपिताधिकरणत्वनिष्ठावच्छेदकतावच्छेदकतानिरूपितनिरूपकत्वनिष्ठावच्छेदकतानिरूपितावच्छेदकत्वनिष्ठावच्छेदकतानिरूपितधर्मनिष्ठावच्छेदकतानिरूपितावच्छेदकत्वनिष्ठावच्छेदकतानिरूपितावच्छेदकतावत्प्रतियोगितानवच्छेदकत्वं विवक्षितमित्युक्तम्।

पूर्वं या प्रतियोगिता उक्तनिवेशक्रमे प्रथमासीत्सेदानीमन्तिमभागे आनीता। तादृशप्रतियोगिताया एवानवच्छेदकत्वस्य साध्यतावच्छेदकत्वे विवक्षितत्वादित्यवधेयम्।

---

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. २८

अत्र शङ्कते 'न चे'त्यादिना। वह्निमान् धूमादित्यत्राव्याप्तिः स्यात्। यतो हि हेत्वधिकरणे विवक्षितभेदस्य दर्शितं यदनुगमकरूपन्तादृशानुगमरूपस्य महानसीयाभावप्रतियोगितावच्छेदकावच्छिन्नत्वे सति वह्न्यभावप्रतियोगितावच्छेदकावच्छिन्ननिरूपकताकाधिकरणतावान्नेति भेदस्यापि, अर्थान्महानसीयवह्न्यधिकरणतावान्नेति भेदस्यापि, तादृशभेदत्वेन लक्षणाक्रान्ततया तन्निरूपितप्रतियोगितानिरूपितपरम्परावच्छेदकतावत्त्वस्य वह्न्यभावप्रतियोगित्वे सत्त्वात्तदवच्छेदकत्वस्य साध्यतावच्छेदके वह्नित्वे सत्त्वादव्याप्तिरिति।

अत्रोक्ताव्याप्तिपरिहारोपायं दर्शयति 'अवच्छेदकत्वनिष्ठावच्छेदकताविशिष्टनिरूपकत्वनिष्ठावच्छेदकत्वस्य विवक्षितत्वादि'त्यनेन। वैशिष्ट्यञ्च स्वभिन्नावच्छेदकत्वानिरूपितत्वसम्बन्धेन।

तथासति स्वभिन्नमहानसीयत्वनिष्ठावच्छेदकतानिरूपितत्वस्यैव निरूपकत्वनिष्ठावच्छेदकतायां सत्त्वेन स्वभिन्नावच्छेदकत्वानिरूपितत्वसम्बन्धेन अवच्छेदकत्वनिष्ठावच्छेदकताविशिष्टत्वविरहान्नोक्तदोषः।

उक्तदोषवारणायोपायान्तरं दर्शयति, यस्य 'तन्ने'त्यादिना खण्डनं विधास्यते।

यद्वा एकत्ववृत्तित्वं निरूपकत्वनिष्ठावच्छेदकतायां विशेषणं वाच्यम्। वृत्तित्वञ्च स्वनिरूपितपरम्परीयोभयावृत्तिधर्मनिष्ठावच्छेदकतात्वावच्छिन्नपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन। तथा च न दोषः, आपादकभेदप्रतियोगिकोटिप्रविष्टनिरूपकत्वनिष्ठावच्छेदकताया दर्शितविवक्षितसम्बन्धेन एकत्ववृत्तित्वविरहात्।

वह्निनिष्ठप्रतियोगित्व, - महानसीयनिष्ठप्रतियोगित्वोभयगतद्वित्वे एव तस्या उक्तसम्बन्धेन वृत्तित्वात्।

अस्य खण्डनं क्रियते। तन्न, एकत्वादेः पर्याप्त्यनभ्युपगते तथानिवेशासम्भवादिति।

पुनश्च कथयति वस्तुतस्तु निरूपकत्वनिष्ठावच्छेदकतायान्न किमपि विशेषणादिकं देयम्। निरूपकत्वस्य यादृशप्रतियोगितावच्छेदकतात्वावच्छिन्नपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तित्वेन यादृशप्रतियोगिताविशिष्टत्वेन निवेशनीयतानिरूपकत्वनिष्ठावच्छेदकतया प्रतियोगित्वव्यक्तिद्वयस्य प्रवेशासम्भवात्। किन्तु वह्न्यभावप्रतियोगित्वव्यक्तिविशिष्टनिरूपकताकाधिकरणतावत्त्वे सति महानसीयाभावप्रतियोगिताविशिष्टनिरूपकताकाधिकरणतावद्भेदवारणाय तादृशाधिकरणत्वनिष्ठावच्छेदकताविशिष्टत्वं प्रतियोगितायान्निवेश्यम्। वैशिष्ट्यञ्च स्वभिन्नावच्छेदकत्वानिरूपितत्वसम्बन्धेन।

यद्वाधिकरणत्वनिष्ठावच्छेदकताद्वयानिरूपितत्वं प्रतियोगितावृत्त्युभयावृत्तिधर्मनिष्ठावच्छेदकताद्वयनिरूपितत्वम्वा विशेषणतया प्रतियोगित्वस्योपादेयमिति न कस्यचिद् दोषस्य सम्भवः। आपादकदर्शितभेदनिरूपितप्रतियोगित्वे अधिकरणत्वनिष्ठावच्छेदकताद्वयनिरूपितत्वस्यैव प्रतियोगितावृत्त्युभयावृत्तिधर्मनिष्ठावच्छेदकताद्वयनिरूपितत्वस्य सत्त्वात् प्रदत्तदोषाभावः।

अन्ते उच्यते इदञ्च = अधिकरणत्वनिष्ठावच्छेदकताद्वयानिरूपितत्वादिकं, प्रतियोगित्वविशेषणम् अधिकरणत्वप्रतियोगित्वावच्छेदकत्वानामधिकरणप्रतियोग्यवच्छेदकानां भेदेऽपि न भेद इति मते। अन्यथा धूमवान् वह्नेरित्यत्रातिव्याप्तेः। धूमाभावप्रतियोगितावच्छेदकावच्छिन्ननिरूपकताकाधिकरणतावद्भेदस्य प्रतियोगितायामधिकरणत्वद्वयादिनिष्ठावच्छेदकतानिरूपितत्वसत्त्वात्, धूमत्वावच्छिन्नप्रतियोगित्वस्य लक्षणाघटत्वात्।

तथा साक्षात्परम्परासाधारणावच्छेदकत्वनिरूपितत्वमभ्युपेत्यैवं[पेत्यैवेदं] समुचितमन्यथा वह्निमान् धूमादित्यत्राव्याप्तेरनुपदोक्ताया अनुद्धारादित्यवधेयम्।[३०१]

तत्त्वालोकः -- 'अधिकरणतानिरूपितस्वरूपसम्बन्धेने'ति[१]।

न चाधिकरणत्वीयस्वरूपोपादाने प्रतियोगितावच्छेदकतया अधिकरणतात्वप्रवेशो व्यर्थ इति वाच्यम्, वाच्यं प्रमेयत्वत्वादित्यादौ प्रतियोगितावच्छेदकावच्छिन्ननिरूपकतानिरूपितप्रमेयत्वनिष्ठाधेयत्वस्य स्वरूपसम्बन्धावच्छिन्ननिरूपकताकप्रमेयत्वनिष्ठाधिकरणत्वस्य च प्रमेयत्वात्मकतयैकत्वेन प्रतियोगिव्यधिकरणाभावाप्रसिद्ध्याऽव्याप्तिप्रसङ्गात्। अधिकरणतात्वावच्छिन्नप्रतियोगिकस्वरूपसम्बन्धविवक्षणे च वह्न्यभावप्रतियोगित्वस्यापि लक्षणघटकत्वापत्तेः। प्रतियोगितावच्छेदकावच्छिन्ननिरूपकतानिरूपितत्वावच्छिन्नस्य तादृशाधिकरणतात्वावच्छिन्नप्रतियोगिकस्वरूपेण सत्त्वासम्भवादिति।

अनुगमस्तु प्रतियोगिताविशिष्टप्रतियोगिताकाभावत्वेन। वैशिष्ट्यञ्च स्वावच्छेदकावच्छिन्ननिरूपकताकाधिकरणतात्वावच्छिन्नत्व,- स्वावच्छेदकसम्बन्धावच्छिन्नाधिकरणत्वीयस्वरूपसम्बन्धावच्छिन्नत्वोभयसम्बन्धेनेति। [३०२]

---

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. २८

प्रकाशः – 'यादृशप्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वं हेतुमतस्तदनवच्छेदकत्वस्योक्तत्वादि'ति दीधितिव्याख्यामध्ये 'न च वह्निमान् तत्पर्वतत्वादित्यादौ तत्तद्वह्निसंयोगसम्बन्धेन साध्यतायामव्याप्तिः, तत्सम्बन्धावच्छिन्नघटाद्यभावप्रतियोगिनस्तेन सम्बन्धेनाधिकरणत्वाप्रसिद्धेरिति वाच्यमि'त्याशङ्क्य 'यत्प्रतियोगितावच्छेदकसम्बन्धावच्छिन्नाधिकरणतानिरूपितस्वरूपसम्बन्धेन यादृशप्रतियोगितावच्छेदकावच्छिन्नाधिकरणतासामान्याभाववत्त्वं हेतुमतस्तत्सम्बन्धेन तादृशप्रतियोगितानवच्छेदकत्वात्, घटत्वावच्छिन्नाधिकरणतासामान्यस्यैव तत्तद्वह्निनिरूपितसंयोगसम्बन्धावच्छिन्नाधिकरणतानिरूपितस्वरूपसम्बन्धेनाभावस्य हेतुमति सत्त्वेन तादृशसम्बन्धेन घटाद्यभावस्यैव प्रतियोगिव्यधिकरणत्वसम्भवादि'ति समाहितं[१] तर्कालङ्कारेण।

तत्र तत्त्वालोककृता 'अधिकरणतानिरूपितस्वरूपसम्बन्धेने'ति परिगृह्य शङ्क्यते 'न चे'त्यादिना।

'न चाधिकरणत्वीयस्वरूपोपादाने प्रतियोगितावच्छेदकतया अधिकरणतात्वप्रवेशो व्यर्थ इति वाच्यम्।

अस्य समाधानम्। 'वाच्यं प्रमेयत्वत्वादित्यत्र प्रतियोगिव्यधिकरणाभावाप्रसिद्ध्या अव्याप्तिप्रसङ्गादि'ति।

तदुपपादनञ्च प्रतियोगितावच्छेदकावच्छिन्ननिरूपकतानिरूपितप्रमेयत्वनिष्ठाधेयत्वस्य स्वरूपसम्बन्धावच्छिन्ननिरूपकतानिरूपितप्रमेयत्वनिष्ठाधिकरणत्वस्य च प्रमेयत्वात्मकतयैकत्वेन इति।

घटपटादौ प्रमेयत्वं वर्तते। मतो[अतो] घटपटाद्यभावप्रतियोगितावच्छेदकघटत्वपटत्वावच्छिन्ननिरूपकतानिरूपिताधेयत्वं प्रमेयत्ववर्ति तथा प्रमेयत्वे स्वरूपसम्बन्धेन वाच्यत्वज्ञेयत्वादेरधिकरणत्वं वर्तते। अतः स्वरूपसम्बन्धावच्छिन्ननिरूपकताकाधिकरणत्वमपि प्रमेयत्ववर्ति प्रमेयत्वस्वरूपमेव। ततश्च प्रतियोगितावच्छेदकावच्छिन्ननिरूपकतानिरूपिताधेयत्वस्य प्रमेयत्वात्मके हेत्वधिकरणे सत्त्वेन तदभिन्नतया स्वरूपसम्बन्धावच्छिन्ननिरूपकताकाधिकरणत्वस्यापि तत्र सत्त्वात्प्रतियोगिव्यधिकरणाभावाप्रसिद्ध्याऽव्याप्तिः।

अधिकरणतात्वावच्छिन्नप्रतियोगिकस्वरूपसम्बन्धविवक्षणे च नोक्ताव्याप्तिः। अधिकरणतात्वावच्छिन्नप्रतियोगिकस्वरूपेण प्रतियोगितावच्छेदकावच्छिन्ननिरूपक-

---

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. २८

तानिरूपिताधेयत्वस्य वृत्तित्वविरहात्। किन्तु तथाविवक्षणे = अधिकरणतात्वावच्छिन्नप्रतियोगिकस्वरूप[सम्बन्ध]विवक्षणे, वह्निमान् धूमादित्यत्र व्याप्तिः स्यात्, वह्न्यभावप्रतियोगित्वस्य लक्षणघटकत्वापत्तेः। प्रतियोगितावच्छेदका[वच्छेदका][1]वच्छिन्ननिरूपकतानिरूपितत्वावच्छिन्नस्य तादृशाधिकरणतात्वावच्छिन्नप्रतियोगिकस्वरूपेण सत्त्वासम्भवात्।

अत्रानुगमस्तु प्रतियोगिताविशिष्टप्रतियोगिताकाभावत्वेन। वैशिष्ट्यञ्च स्वावच्छेदकावच्छिन्ननिरूपकताकाधिकरणतात्वावच्छिन्नत्व, - स्वावच्छेदकसम्बन्धावच्छिन्नाधिकरणत्वीयस्वरूपसम्बन्धावच्छिन्नत्वोभयसम्बन्धेनेति।[३०२]

तत्त्वालोकः – 'तेनायः[2]पिण्डस्यापी'ति[3]। सम्बन्धसामान्येन प्रतियोगितावच्छेदकावच्छिन्नत्व[4]विवक्षायामेवैतद्दोषस्य प्रदर्शिततया कथमेतत्सम्भवः, प्रतियोगिव्यधिकरणाभावाप्रसिद्धेरिति चेत्, तदयोगोलका[5]संयुक्तासमानकालीनतद्व्यक्त्यवच्छिन्नाभावस्यैव प्रतियोगिव्यधिकरणत्वसम्भवात्। तत्प्रतियोगितैव लक्षणघटिका। स्ववृत्तिवाच्यत्वादिकन्तु न संसर्गः। अत एव वह्निमान्धूमादित्यादावव्याप्तिसम्भवेऽतिव्याप्तिदानमनुचितमिति निरस्तम्।

न चैवमपि द्रव्यमात्मत्वादित्यादावव्याप्तिः, विषयितया ज्ञानस्याभाव-[मात्र][6]प्रतियोगितावच्छेदकावच्छिन्नत्वादिति वाच्यम्, विषयित्वस्येदानीं संसर्गत्वानभ्युपगमात्। अधिकरणतानिरूपकतावच्छेदकसम्बन्धसमान्येनैव प्रतियोगितावच्छेदकावच्छिन्नत्वस्य वाच्यत्वात्।

न च तथाप्यात्मनि वस्तुमात्रसमानकालीनस्य कस्यचिद् विशेषगुणस्य सर्वदैव सत्त्वादव्याप्तितादवस्थ्यमिति वाच्यम्, चरमध्वंसावच्छिन्नावच्छिन्नाभावप्रतियोगित्वस्यैव लक्षणघटकत्वसम्भवादिति ध्येयम्।[३०३]

---

१. कोष्ठकान्तर्गतः [ ] पाठोऽधिक इव प्रतिभाति।
२. 'तेन तप्तायः' इत्येवं पाठः प्रकाशकृल्लेखे।
३. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. २८
४. 'प्रतियोगितावच्छेदकत्वे'त्येव पाठः प्रकाशकृल्लेखे।
५. 'गोलक' इत्येवं पाठः प्राचीनमुद्रितपुस्तके।
६. [ ] कोष्ठकान्तर्गतः पाठः प्रकाशकृल्लेखे नास्ति।

प्रकाशः – 'यादृशप्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वं हेतुमत' इत्यादिदीधितिव्याख्यावसरे 'अत्र च प्रतियोगितावच्छेदकधर्मावच्छिन्नत्वं साध्यतावच्छेदकताघटकसम्बन्धेनैव वाच्यम्, तेनायःपिण्डस्य कालिकसम्बन्धेन यद्धूमत्वविशिष्टं तृणादिकम्, संयोगेन तस्याधिकरणत्वेऽपि धूमवान् वह्नेरित्यादौ नातिव्याप्तिरि'ति यदुपन्यस्तं[1] तर्कालङ्कारेण, तत्र तत्त्वालोककृत् 'सम्बन्धसामान्येन प्रतियोगितावच्छेदकावच्छिन्नत्वस्य विवक्षायामेवैतद्दोषस्य दर्शिततया कथमेतत्सम्भवः, प्रतियोगिव्यधिकरणाभावाप्रसिद्धेः। प्रतियोगिव्यधिकरणाभावाप्रसिद्ध्यैवातिव्याप्तिवारणसम्भवादतिव्याप्तिदानमसङ्गतमिति भावः।

अत्र समाधानं करोति। तदयोगोलकासंयुक्तासमानकालीनतद्व्यक्त्यवच्छिन्नाभावस्यैव प्रतियोगिव्यधिकरणत्वसम्भवात्तत्प्रतियोगितैव लक्षणघटिका इति।

या व्यक्तिः न तदयोगोलकसंयुक्ता न च तदयोगोलकसमानकालीना, तद्व्यक्त्यभावस्य तत्र प्रतियोगिव्यधिकरणत्वसम्भवात् तद्व्यक्त्यभावप्रतियोगितैव लक्षणघटिका भवेदतोऽप्रसिद्ध्या नातिव्याप्तिवारणं तत्र सम्भवति। तत्रातः साध्याभावस्य प्रतियोगिव्यधिकरणत्वविरहादतिव्याप्तिः युक्तैव इति।

स्ववृत्तिवाच्यत्वादिकन्तु न सम्बन्धः। अत एव 'वह्निमान् धूमादित्यादावव्याप्तिसम्भवेऽतिव्याप्तिदानमसङ्गतमि'ति निरस्तम्। स्ववृत्तिवाच्यत्ववत्त्वादेः सम्बन्धत्वविरहेण वह्निमान् धूमादित्यादौ प्रतियोगिव्यधिकरणाभावाप्रसिद्ध्यसम्भवादित्याशयः।

पुनः शङ्कते यद् द्रव्यमात्मत्वादित्यादावव्याप्तिः, प्रतियोगिव्यधिकरणाभावाप्रसिद्धेः, विषयितासम्बन्धेन घटाद्यभावप्रतियोगितावच्छेदकावच्छिन्नस्य ज्ञानस्यात्मनि सत्त्वादिति।

तत्र समाहितम्। विषयित्वस्येदानीं संसर्गत्वानभ्युपगमादिति। अधिकरणतानिरूपकतावच्छेदकसम्बन्धसामान्येनैव प्रतियोगितावच्छेदकावच्छिन्नत्वस्य वाच्यत्वात्। विषयित्वस्य अधिकरणतानिरूपकतावच्छेदकत्वविरहादित्याशयः।

पुनः शङ्कते। न च तथापि आत्मनि वस्तुमात्रसमानकालीनस्य बुद्ध्यादिषट्कान्यतमस्य कस्यचिद्विशेषगुणस्य सर्वदैव सत्त्वात्प्रतियोगिव्यधिकरणाभावाप्रसिद्ध्याऽव्याप्तितादवस्थ्यमिति।

---

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. २८

अत्र समाधत्ते। चरमध्वंसावच्छिन्नाभावप्रतियोगित्वस्यैव लक्षणघटकत्वसम्भवादिति ध्येयम्।

यद्यप्यात्मनि बुद्ध्यादिविशेषगुणाः उत्पादविनाशशालिनो भवन्ति, किन्तु तेषामन्तिमे ध्वंसे जायमाने तत्र न कोपि विशेषगुणस्तिष्ठत्यतः प्रतियोगिव्यधिकरणोऽभावस्तत्र प्रसिद्धो भवेदेवातो नाव्याप्तिस्तत्रेति भावः।[३०३]

तत्त्वालोकः– 'यदवच्छेदकत्वं तन्निरूपितस्वरूपे'ति[१]। अत्रावच्छेदकतात्वावच्छिन्नप्रतियोगित्वप्रवेशफलमधिकरणतात्वावच्छिन्नप्रतियोगित्वप्रवेशफलवदेव बोध्यम्।

'अत्र यादृशप्रतियोगितावच्छेदकधर्म' इत्यादि[२]। अत्रैतत्कल्पपरिष्कारश्च हेत्वधिकरणत्वपरिष्कारवत्। तत्र सद्धेतावेव प्रायोऽहेत्वधिकरणस्य हेत्वधिकरणत्वापत्त्याऽव्याप्तिपरिहारः फलम्। अत्र प्रायो व्यभिचारिणि साध्याभावप्रतियोगितावच्छेदकावच्छिन्नाधिकरणत्वस्य हेत्वधिकरणे प्रसङ्गेनातिव्याप्तिपरिहारः।

द्रव्यानुयोगिकसमवाय, - विशिष्टसत्तात्वावच्छिन्ननिरूपितप्रकारितान्यतरसम्बन्धेन सत्तासाध्यकविशिष्टसत्त्वप्रकारकज्ञानत्वहेतुकेऽतिव्याप्तिवारणञ्च, द्रव्यत्वसाध्यक-उक्तान्यतरसम्बन्धेन सत्त्वे सद्धेतौ हेत्वधिकरणत्वपरिष्कारप्रदर्शिताव्याप्तेः प्रदर्शितवारणरीत्या कार्यम्। समवायेन घटत्वपटत्वोभयसाध्यकव्यभिचारिण्यतिव्याप्तिश्च साध्यतावच्छेदकसम्बन्धावच्छिन्नसम्बन्धितावच्छेदकत्वस्य साध्यतावच्छेदकविशेषणतामभ्युपेत्य वारणीया।

यत्तु प्रमीयप्रकारतावच्छेदकत्वविशेषणेन तद्वावारणं कार्यमिति। तन्न। तथासति प्रतियोगितावच्छेदकावच्छिन्नप्रकारतानिरूपितविशेष्यत्वस्य प्रमीयविशेष्यताप्रतियोगिकस्वरूपेणाभावस्य लक्षणघटकत्वोपेक्षाया निर्बीजत्वापत्तेः। अस्मत्कल्पे च प्रमीयत्वप्रवेशेन गौरवस्यैव तदुपेक्षाबीजत्वसम्भवात्।

न चोक्तविशेष्यत्वाभावश्च तादृशविशेष्यतात्वेतरधर्मानवच्छिन्नतादृशविशेष्यतात्वावच्छिन्नप्रतियोगिताक एव विवक्षणीयः, स चोक्तविशेष्यतात्वावच्छिन्नप्रतियोगिकस्वरूपसम्बन्धावच्छिन्नप्रतियोगिताकः केवलान्वयीति प्रति-

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. २९

२. तदेव, जागदीशीमूलम्, पृ. २९

योगितामात्रस्य लक्षणघटकत्वापत्तिरिति वाच्यम्, संसर्गीयप्रतियोगितायामुक्त-विशेष्यतात्वावच्छिन्नत्वस्याप्रवेश्यत्वात्।

न च वह्नीयसंयोगेन साध्यतायां [सद्धेतौ][१] प्रतियोगिव्यधिकरणाभावा-प्रसिद्धिः[२], स्वाश्रयाधिकरणत्वस्यावश्यं साध्यतावच्छेदकसम्बन्धेन वाच्य-त्वात्, अन्यथा धूमवान्वह्नेरित्यत्र धूमाभावस्य प्रतियोगिवैयधिकरण्यानुपप-त्त्याऽतिव्याप्तिस्स्यादिति वाच्यम्, प्रतियोगितावच्छेदकतात्वावच्छिन्नपर्या-प्त्यनुयोगितावच्छेदकरूपविशिष्टाधिकरणत्वस्य साध्यतावच्छेदकसम्बन्धाव-च्छिन्नाधिकरणत्वीयस्वरूपसम्बन्धेनाभावस्य विवक्षितत्वात्।

वैशिष्ट्यञ्च स्वावच्छिन्नानुयोगिताकपर्याप्तिप्रतियोगितावच्छेदकता-कत्व, - स्ववृत्तित्वोभयसम्बन्धेन। वृत्तिता च स्वाभाववत्त्वसम्बन्धेन। अभा-वश्च स्वसमानाधिकरणसाध्यतावच्छेदकसम्बन्धावच्छिन्नाधिकरणतानिरूप-कतावच्छेदकतात्वावच्छिन्नपर्याप्त्यनुयोगितानवच्छेदकत्व, - स्वकालीन-साध्यतावच्छेदकसम्बन्धावच्छिन्नाधिकरणतानिरूपकता[३]वच्छेदकतात्वाव-च्छिन्नपर्याप्त्यनुयोगितावच्छेदकत्वोभयसम्बन्धावच्छिन्नप्रतियोगिताको बोध्य इति।[३०४]

प्रकाशः – 'वस्तुतः साध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नं यत्प्रतियोगि-तावच्छेदकत्वं तन्निरूपितस्वरूपसम्बन्धेनैव निरुक्तप्रतियोगितावच्छेदकत्वस्याभावः साध्यतावच्छेदकधर्मे वक्तव्यः। तेन वह्निमान् धूमादित्यादौ वह्नित्वादिनिरूपितसमवा-यादिसम्बन्धेन वह्नित्वादेः साध्यतावच्छेदकत्वं तत्र तादृशसम्बन्धावच्छिन्नस्य प्रतियो-गिव्यधिकरणहेतुमन्निष्ठाभावप्रतियोगितावच्छेदकत्वस्याप्रसिद्धावपि न क्षतिरि'ति यदु-पन्यस्तं[४] तर्कालङ्कारेण, तत्र तत्त्वालोककृतोच्यते 'अत्र अवच्छेदकतात्वावच्छिन्नप्र-तियोगित्वप्रवेशफलमधिकरणतात्वावच्छिन्नप्रतियोगित्वप्रवेशफलवदेव बोध्यमि'ति।

अधिकरणतात्वावच्छिन्नप्रतियोगित्वप्रवेशफलस्य वाच्यं प्रमेयत्ववत्त्वादित्यत्र प्रतियोगिव्यधिकरणाभावाप्रसिद्ध्या प्राप्ताव्याप्तिवारणस्य पूर्वदर्शितत्वात्।

---

१. [ ] कोष्ठकान्तर्गतः पाठो नास्ति प्रकाशकृल्लेखे।

२. 'प्रतियोग्यधिकरणाप्रसिद्धिरि'त्येवं पाठः प्राचीनमुद्रितपुस्तके

३. 'निरूपिता' इति पाठः प्राचीनमुद्रितपुस्तके

४. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. २९

'अत्र यादृशप्रतियोगितावच्छेदकधर्मे' इत्यादि। अत्र यादृशप्रतियोगितावच्छेदकधर्मे तादृशप्रतियोगिताश्रयाधिकरणीभूतयद्यद्व्यक्तिनिष्ठाधिकरणतानवच्छेदकत्व[स्य] अधिकरणतावच्छेदकत्वस्य च द्वयोर्व्यतिरेकस्तत्तद्व्यक्तिभेदकूटवत्त्वमेव यादृशप्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वमित्यस्यार्थो बोध्यः। तेन धूमवदित्यादिप्रतीतेरवश्यक्लृप्ताभिः पर्वतत्वचत्वरत्वादितत्तद्धर्मविशिष्टतत्तद्धूमत्वावच्छिन्नाधिकरणताव्यक्तिभिरेवोपपत्तौ धूमत्वाद्यखण्डधर्मावच्छिन्नाधिकरणतायां मानाभावात् धूमादिसामान्याभावप्रतियोगितावच्छेदकं यद्धूमत्वादिकं तदवच्छिन्नाधिकरणत्वाप्रसिद्धावपि धूमवान् वह्नेरित्यादौ नातिव्याप्तिरि'ति[1] जगदीशः।

अत्र तत्त्वालोककृतोच्यते 'अत्रैतत्कल्पपरिष्कारश्च हेत्वधिकरणत्वपरिष्कारवत्। तत्र सद्धेतावेव प्रायोऽहेत्वधिकरणस्य हेत्वधिकरणत्वापत्त्याऽव्याप्तिपरिहारः फलम्। अत्र प्रायो व्यभिचारिणि साध्याभावप्रतियोगितावच्छेदकावच्छिन्नाधिकरणत्वस्य हेत्वधिकरणे प्रसङ्गेनातिव्याप्तिपरिहारः। द्रव्यानुयोगिकसमवायविशिष्टसत्तात्वावच्छिन्नप्रकारितान्यतरसम्बन्धेन सत्तासाध्यकविशिष्टसत्त्वप्रकारकज्ञानत्वहेतुकेऽतिव्याप्तिवारणञ्च द्रव्यत्वसाध्यक-उक्तान्यतरसम्बन्धेन सत्त्वे सद्धेतौ हेत्वधिकरणत्वपरिष्कारप्रदर्शिताव्याप्तेः प्रदर्शितवारणरीत्या कार्यम्। समवायेन घटत्वपटत्वोभयसाध्यकव्यभिचारिण्यतिव्याप्तिश्च साध्यतावच्छेदकसम्बन्धावच्छिन्नसम्बन्धितावच्छेदकत्वस्य साध्यतावच्छेदकविशेषणतामभ्युपेत्य वारणीया' इति।

तर्कालङ्कारेण 'यद्यप्यवश्यक्लृप्ताभिर्पर्वतत्वचत्वरत्वादितत्तद्धर्मविशिष्टतत्तद्धूमत्वाद्यवच्छिन्नाधिकरणताव्यक्तिभिरेव धूमवानिति प्रत्ययोत्पत्तौ धूमत्वावच्छिन्नाधिकरणतायां मानाभावाद् वह्निमान् धूमादित्यादावव्याप्तिः, हेतुतावच्छेदकीभूतधूमत्वावच्छिन्नाधिकरणत्वाप्रसिद्धेः, तथापि हेतुतावच्छेदकधर्मे स्वाश्रयाधिकरणीभूतयन्निष्ठाधिकरणतानवच्छेदकत्वस्य सामान्यतोऽधिकरणतावच्छेदकत्वस्य च द्वयोर्व्यतिरेकः, तथाविधं हेतुतावच्छेदकाश्रयाधिकरणमेव 'हेतुतावच्छेदकावच्छिन्नाधिकरणे'त्यनेन विवक्षितम्। वह्निमान् धूमादित्यादौ तादृशं हेत्वधिकरणं धूमस्याधिकरणमात्रम्, द्रव्यं विशिष्टसत्त्वादित्यादौ च तादृशहेत्वधिकरणं द्रव्यमेव, न तु गुणादि, विशिष्टसत्तात्वे तन्निष्ठाधिकरणतानवच्छेदकत्वस्य सामान्यतोऽधिकरणतावच्छेदकत्वस्य च द्वयोः सत्त्वादि'त्युपन्यस्तम्[2]।

---

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. २९

२. तदेव, जागदीशीमूलम्, पृ. ७

यद्यपि हेतुतावच्छेदकावच्छिन्नाप्रसिद्ध्या वह्निमान् धूमादित्यादावव्याप्तिपरिहार एव हेत्वधिकरणत्वपरिष्कारफलतया तत्रोक्तम्, तत्त्वालोककृता तु तत्राहेत्वधिकरणस्य हेत्वधिकरणत्वापत्त्याऽव्याप्तिपरिहारफलमित्युपन्यस्तम्।

तत्सङ्गतिस्तु धूमत्वावच्छिन्नाधिकरणत्वास्वीकारेऽपि सत्तात्वावच्छिन्नाधिकरणत्वस्य स्वीकाराद् द्रव्यं विशिष्टसत्त्वादित्यत्र सद्धेतौ अहेत्वधिकरणस्य गुणस्य हेत्वधिकरणत्वापत्त्या हेत्वधिकरणत्वपरिष्कारे तु नोक्ताव्याप्तिरिति। अथवा पूर्वं यथास्थानं यत्र हेत्वधिकरणत्वपरिष्कारो विशदरूपेण कृतस्तत्र तत्त्वालोकोक्तिसङ्गतिरनुसन्धेया।

'अत्र प्रायो व्यभिचारिणि साध्याभावप्रतियोगितावच्छेदकावच्छिन्नाधिकरणत्वस्य हेत्वधिकरणे प्रसङ्गेनातिव्याप्तिपरिहारः' इत्युपन्यस्तं तत्त्वालोककृता, तत्तु साध्याभावप्रतियोगितावच्छेदकावच्छिन्नाधिकरणत्वस्य हेत्वधिकरणे अयोगोलके कालिकेन प्रसक्तिः सम्भवति [इत्यभिप्रायेण]।

अनन्तरन्तेनोपन्यस्यते 'द्रव्यानुयोगिकसमवायविशिष्टसत्तात्वावच्छिन्नप्रकारित्वान्यतरसम्बन्धेन सत्तासाध्यकविशिष्टसत्त्वप्रकारकज्ञानत्वहेतुकेऽतिव्याप्तिवारणञ्च द्रव्यत्वसाध्यक-उक्तान्यतरसम्बन्धेन सत्त्वे सद्धेतौ हेत्वधिकरणत्वपरिष्कारदर्शिताऽव्याप्तेः प्रदर्शितवारणरीत्या कार्यम् इति।

पूर्वं यथास्थानं विस्तारतया विहितहेत्वधिकरणत्वपरिष्कारस्य यथावत् ध्यानस्थीकरणेनात्रत्यतत्त्वालोकाशयोऽवगन्तुं शक्यः।

पुनश्चोपन्यस्यते 'समवायेन घटत्वपटत्वोभयसाध्यकव्यभिचारिण्यतिव्याप्तिश्च साध्यतावच्छेदकसम्बन्धावच्छिन्नसम्बन्धितावच्छेदकत्वस्य साध्यतावच्छेदकविशेषणतामभ्युपेत्य वारणीया' इति।

यत्तु प्रमीयप्रकारतावच्छेदकत्वविशेषणेन तद्वारणं कार्यमिति। तन्न। तथासति प्रतियोगितावच्छेदकावच्छिन्नप्रकारतानिरूपितविशेष्यत्वस्य प्रमीयविशेष्यताप्रतियोगिकस्वरूपेणाभावस्य लक्षणघटकत्वोपेक्षाया निर्बीजत्वापत्तेरस्मत्कल्पे च प्रमीयत्वप्रवेशेन च गौरवस्यैव तदुपेक्षाबीजत्वसम्भवादिति।

अत्र शङ्कते। 'न चोक्तविशेष्यत्वाभावश्च = प्रतियोगितावच्छेदकावच्छिन्नप्रकारतानिरूपितविशेष्यत्वाभावश्च, तादृशविशेष्यतात्वेतरधर्मानवच्छिन्नतादृशविशेष्यतात्वावच्छिन्नप्रतियोगिताक एव विवक्षणीयः। स चोक्तविशेष्यतात्वावच्छिन्नप्रतियोगिकस्वरूपसम्बन्धावच्छिन्नप्रतियोगिताकः केवलान्वयीति प्रतियोगितामात्रस्य लक्षण-

घटकत्वापत्तिरिति वाच्यम्।

अत्र समाहितम्। संसर्गीयप्रतियोगितायामुक्तविशेष्यतात्वावच्छिन्नत्वस्याप्रवेश्यत्वादिति।[३०४]

तत्त्वालोकः – 'सर्वत्रासम्भव' इति[१]। इदमिदानीं प्रकारित्वादिना व्याप्यव्यापकभावाङ्गीकारेणान्यथा प्रकारितासम्बन्धेन घटसाध्यकतज्ज्ञानत्वेऽव्याप्त्यसम्भवेनासम्भवासङ्गत्यापत्तेरिति।

'अतिप्रसङ्गादि'ति[२]। न च प्रमेयवदभावप्रतियोगित्वस्य तत्तत्प्रतियोगित्वाभिन्नतत्तद्धर्मस्वरूपत्वेन तत्प्रतियोगित्वाभिन्नतयाऽसम्भव एवात्रापि सम्भवतीति वाच्यम्, स्वाभिन्नस्वावच्छेदकत्वस्य विवक्षणेऽसम्भवासम्भवात्।

न च कालिकोऽपि सम्बन्धो घटाद्यभावप्रतियोगिताघटकस्तेन घटत्वावच्छिन्नाधिकरणत्वमेव हेत्वधिकरणस्येति वाच्यम्, तत्पर्वतासमानकालीनव्यक्त्यभावप्रतियोगित्वस्यैव लक्षणघटकत्वसम्भवात्।

न च कालिकेन तादृशव्यक्तित्वविशिष्टाभावप्रतियोगित्वस्य तत्प्रतियोगित्वेन सहैक्यात्स्वावच्छेदकताघटककालिकेन प्रतियोगितावच्छेदकतद्व्यक्तित्वस्य पर्वतसमानकालीनेऽपि सत्त्वादप्रसिद्धिरिति वाच्यम्, तद्व्यक्तित्वस्य तद्व्यक्त्यात्मकत्वात् तद्व्यक्तिविशिष्टाभावस्य लक्षणघटकत्वात्प्रतियोगित्वस्य प्रतियोगितावच्छेदकताघटकसंसर्गप्रतियोगितावच्छेदकोभयात्मकत्वाभ्युपगमेन तत्प्रतियोगित्वयोरैक्यासम्भवाच्च।

न च प्रतियोगितावच्छेदकसम्बन्धात्मकत्वम्, संयोगेन रूपाभावप्रतियोगित्वस्य रूपेऽसत्त्वप्रसङ्गादिति भावः।[३०५]

प्रकाशः – ''नन्वत्र प्रतियोगित्वादिकं नातिरिक्तः पदार्थः, 'प्रतियोगित्वादिकन्तु स्वरूपसम्बन्ध' इत्याद्युत्तरग्रन्थविरोधात्, किन्तु स्वरूपसम्बन्धविशेषः। स च यदि प्रतियोगिस्वरूपः, तदा [वह्निमान् धूमादित्यादौ सर्वत्रासम्भवः, घटादिस्वरूपस्यैव] घटाद्यभावप्रतियोगित्वस्य घटत्वाद्यवच्छिन्नवद् द्रव्यत्वसमवेतत्वज्ञेयत्वाद्यवच्छिन्नतया तादृशावच्छेदकीभूतज्ञेयत्वाद्यवच्छिन्नस्य हेतुमति सत्त्वात् प्रतियोगिव्यधिकरणाभावाप्रसिद्धेः।

---

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. २९
२. 'अतिव्याप्तिप्रसङ्गादि'ति तूपलब्धजागदीशीपाठः।
—प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. २९

न च प्रतियोगितावच्छेदकरूपमेव प्रतियोगित्वमित्यदोषः। समवायेन वह्नेः साध्यत्वे धूमादावतिव्याप्तिप्रसङ्गात्, समवायावच्छिन्नवह्न्यभावस्य वह्नित्वरूपं यत्प्रतियोगित्वं, समवायवत् संयोगस्यापि तदवच्छेदकसम्बन्धतया, स्वावच्छेदकसम्बन्धेन साधनवतः प्रतियोग्यनधिकरणत्वाभावादि''ति[१] तर्कालङ्कारेण यदुपन्यस्तन्तत्र तत्त्वालोककृता विचार आरभ्यते।

इदमिदानीं प्रकारित्वादिना व्याप्यव्यापकभावानङ्गीकारेण, अन्यथा प्रकारितासम्बन्धेन घटसाध्यकतज्ज्ञानत्वेऽव्याप्त्यसम्भवेनासम्भवकथनासङ्गतिः स्यात्, घटविषयके ज्ञाने सर्वस्य प्रकारितासम्बन्धेनासत्त्वेन प्रतियोगित्वस्य प्रतियोगिस्वरूपत्वेऽपि न प्रतियोगिव्यधिकरणाप्रसिद्धिरित्याशयः।

प्रतियोगित्वस्य प्रतियोगितावच्छेदकरूपत्वे तर्कालङ्कारेण समवायेन वह्निसाध्यकधूमेऽतिव्याप्तिर्दर्शिता। तत्र तत्त्वालोककृतोच्यते यदत्रापि प्रमेयवदभावमादाय प्रतियोगिव्यधिकरणाभावाप्रसिद्धिरेव दोषः।

अत्र समाहितम्। स्वाभिन्नस्वावच्छेदकत्वस्य विवक्षणेऽसम्भवासम्भवादिति। प्रमेयवदभावप्रतियोगित्वस्य घटत्वपटत्वादितत्तत्प्रमेये विशेषात्मकप्रतियोगितावच्छेदकरूपत्वेऽपि प्रमेयसामान्यरूपत्वास्वीकारेण स्वाभिन्नस्वावच्छेदकावच्छिन्नानधिकरणत्वस्य हेत्वधिकरणसम्भवेनासम्भवासम्भवादिति तदाशयः।

पुनः शङ्कते। न च कालिकोऽपि सम्बन्धो घटाद्यभावप्रतियोगिताघटकः, तेन घटत्वावच्छिन्नाधिकरणमेव हेत्वधिकरणमिति वाच्यम्।

अत्र समाहितम्। तत्पर्वतासमानकालीनव्यक्त्यभावप्रतियोगित्वस्यैव लक्षणघटकत्वसम्भवादिति।

अत्र पुनः शङ्कितम्। न च कालिकेन तादृशतद्व्यक्तित्वविशिष्टाभावप्रतियोगित्वस्य तत्प्रतियोगित्वेन सहैक्यात् स्वावच्छेदकताघटककालिकेन प्रतियोगितावच्छेदकतद्व्यक्तित्वस्य पर्वतसमानकालीनेऽपि सत्त्वादप्रसिद्धिरिति वाच्यम्।

अत्र समाहितम्। तद्व्यक्तित्वस्य तद्व्यक्त्यात्मकत्वात्, तद्व्यक्तिविशिष्टाभावस्य लक्षणघटकत्वात् इति प्रतियोगित्वस्यं प्रतियोगितावच्छेदकताघटकसंसर्गप्रतियोगितावच्छेदकोभयात्मकत्वाभ्युपगमेन तत्प्रतियोगित्वयोरैक्यासम्भवाच्च। कालिकेन तादृशव्यक्तित्वविशिष्टाभावप्रतियोगित्व-तत्प्रतियोगित्वयोरैक्यासम्भवात्। तेन तयोरै-

---

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. २९

क्यमादाय प्रदत्तदोषो न सम्भवीत्यादि।

पुनः स्पष्टयति। न च प्रतियोगितावच्छेदकसम्बन्धात्मकत्वम्, प्रतियोगित्वस्य संयोगेन रूपाभावप्रतियोगित्वस्य रूपेऽसत्त्वप्रसङ्गादिति। रूपे संयोगप्रतियोगित्वासम्भवादित्याशयः।[३०५]

तत्त्वालोकः– **'यदभावीययत्प्रतियोगिते'ति[१]। यदभावीयत्व, -यत्प्रतियोगितात्वोभयधर्मावच्छिन्ननिरूप्यतानिरूपितनिरूपकतावदवच्छेदकतावत्सम्बन्धेन यदभावीयत्व, -यत्प्रतियोगितात्वोभयधर्मावच्छिन्ननिरूप्यतानिरूपितनिरूपकतावदवच्छेदकतावद्धर्मावच्छिन्नानधिकरणत्वमित्यर्थः।[३०६]**

प्रकाशः– 'प्रतियोगितावच्छेदकीभूतयत्किञ्चित्सम्बन्धेन प्रतियोग्यनधिकरणत्वोक्त्या तद्वारणे तु संयोगेन वह्निसाध्यके धूमादावव्याप्तिः, समवायावच्छिन्नवह्न्यभावस्यैव समवायेन प्रतियोगिव्यधिकरणस्य वह्नित्वस्वरूपं यत्प्रतियोगित्वम्, तस्यैव संयोगसम्बन्धेनाप्यवच्छिन्नत्वादिति चेत्।

अत्र वदन्ति। प्रतियोगिस्वरूपम्, तदवच्छेदकस्वरूपं वा यत्प्रतियोगित्वम्, तदपि कस्यचिदभावस्य केनचिदपि धर्मेण सम्बन्धेन वाऽवच्छिन्नम्, व्यवहारबलात्, न तु सर्वेण सम्बन्धेन धर्मेण वा। तथा च यदभावीययत्प्रतियोगितावच्छेदकसम्बन्धेन यदभावीययत्प्रतियोगितानिरूपितावच्छेदकीभूतधर्मावच्छिन्नासम्बन्धित्वं हेतुमतः, तदभावीयतत्प्रतियोगितानिरूपितावच्छेदकताशून्यत्वं साध्यतावच्छेदके विवक्षणीयमित्यदोषः' इति[२] तर्कालङ्कारेण यदुपन्यस्तम्, तत्र तदर्थस्तत्त्वालोककृतोपन्यस्तः 'यदभावीयत्व, -यत्प्रतियोगितात्वोभयधर्मावच्छिन्ननिरूप्यतानिरूपितनिरूपकतावदवच्छेदकतावत्सम्बन्धेन यदभावीयत्व, -यत्प्रतियोगितात्वोभयधर्मावच्छिन्ननिरूप्यतानिरूपितनिरूपकतावच्छेदकतावद्धर्मावच्छिन्नानधिकरणत्वमित्यर्थ' इति।

तत्रा'वच्छेदकतावत्संसर्गेण' इत्यन्तेन 'यदभावीययत्प्रतियोगितावच्छेदकसंसर्गेण' इत्यस्यार्थो दर्शितस्तदुत्तरभागेन 'यदभावीययत्प्रतियोगितानिरूपितावच्छेदकीभूतधर्मावच्छिन्नासम्बन्धित्वमि'त्यस्यार्थो दर्शित इति ध्येयम्।[३०६]

---

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. ३०

२. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. २९, ३०

तत्त्वालोकः – **'प्रतियोगिमत्त्वादि'ति[१]। प्रतियोगित्वस्योभयत्वरूपत्वेऽप्युभयत्वत्वेनैव तदवच्छिन्नाधिकरणत्वम्प्रत्येकवद्देशावृत्ति, न तु प्रतियोगितात्वेन, प्रत्येकवद्देशेऽप्युभयाभावप्रतियोगिमदिति प्रतीतेरिति भावः।[३०७]**

प्रकाशः – प्रतियोगिमत्त्वादिति। वह्निधूमोभयवान् वह्नेरित्यत्रातिव्याप्तिः, अयोगोलकस्य वह्निधूमोभयाभावप्रतियोगिमत्त्वेन साध्याभावस्य प्रतियोगिव्यधिकरणत्वविरहादिति न वाच्यम्।

प्रतियोगित्वस्योभयत्वरूपत्वेऽपि उभयत्वत्वेनैव तदवच्छिन्नाधिकरणत्वं प्रत्येकवद्देशावृत्ति, न तु प्रतियोगितात्वेन, प्रत्येकवद्देशेऽप्युभयाभावप्रतियोगिमदिति प्रतीतेरिति भावः।[३०७]

तत्त्वालोकः – **विरोधस्य साक्षादनुमितावेव विरोधित्वमतमालम्ब्याह 'यदि चे'ति[२]। 'अतिप्रसङ्गभङ्गादि'ति[३]। विरोधस्थल इति शेषः।**

तेन 'प्रवेशादेवे'[४]त्यत्र नैवकारव्यवच्छेद्यासम्भवः, साध्यसामानाधिकरण्यस्य सम्बन्धविशेषनियन्त्रितस्यापि साधारणहेतुसाधारणत्वादिति।[३०८]

प्रकाशः – 'अत्र च ग्राह्यसामानाधिकरण्ये हेतोर्यादृशः सम्बन्धः प्रविष्टस्तेन सम्बन्धेन यो हेतुमान्, तत्र वर्तमानत्वमभावस्य, साध्यस्य च यादृशः सम्बन्धः प्रविष्टस्तत्सम्बन्धावच्छिन्नायाश्च प्रतियोगिताया अनवच्छेदकत्वं बोध्यमि'ति[५] दीधितेर्व्याख्यां कुर्वता तर्कालङ्कारेण 'ग्राह्यसामानाधिकरण्ये' इत्यस्य 'परामर्शविषयसाध्यसामानाधिकरण्य' इत्यर्थमुपन्यस्य 'सम्बन्धविशेषेणैव साध्यसाधनयोः सामानाधिकरण्यज्ञानादनुमितिस्तज्ज्ञानप्रतिबन्धकतयैव विरोधस्य हेत्वाभासत्वमिति मतेनेदमि'त्युपन्यस्तम्[६]।

---

१. इदानीमुपलब्धजागदीशीग्रन्थेषु 'प्रतियोगिमत्त्वादि'ति प्रकृततत्त्वालोकस्य प्रतीकत्वेन पाठो नोपलभ्यते। अपि तु 'प्रतियोगित्वावच्छिन्नाधिकरणत्वादि'त्युपलभ्यते।
–प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. ३०

२. तदेव, जागदीशीमूलम्, पृ. ३०

३. तदेव, जागदीशीमूलम्, पृ. ३०

४. तदेव, जागदीशीमूलम्, पृ. ३०

५. तदेव, दीधितिमूलम्, पृ. ३०

६. तदेव, जागदीशीमूलम्, पृ. ३०

अनन्तरञ्च 'यदि च येन केनापि सम्बन्धेन साध्यसाधनयोः सामानाधिकरण्यज्ञानादनुमितिः, स्वव्यापकसाध्यसम्बन्धितामात्रं वा व्याप्तिः, व्यापकत्वदले साध्यसाधनयोः सम्बन्धविशेषप्रवेशादेवातिप्रसङ्गभङ्गादिति विभाव्यते, तदा परामर्शेन साधनस्य अनुमित्या च साध्यस्य यत् पक्षतावच्छेदकेन सार्द्धं सामानाधिकरण्यं तत्र प्रविष्टो यादृशः सम्बन्ध इत्यर्थो बोध्य' इति यदुपन्यस्तं[१] तर्कालङ्कारेण, तत्र तत्त्वालोककृतोपरिनिर्दिष्टभागेन विशेषप्रकाशः क्रियते 'विरोधस्य साक्षादनुमितावेव विरोधित्वमतमालम्ब्याह यदि चे'ति।

'अतिप्रसङ्गभङ्गादि'ति। विरोधस्थल इति शेषः। तेन 'प्रवेशादेवे'त्यत्र नैवकारव्यवच्छेद्यासम्भव इति।

साध्यसामानाधिकरण्यस्य सम्बन्धविशेषनियन्त्रितस्यापि साधारणहेतुसाधारणत्वादिति च।

पूर्वं 'ग्राह्यसामानाधिकरण्य' इत्यस्य यदा परामर्शविषयसाध्यसामानाधिकरण्य इत्यर्थः। ततस्तदा सम्बन्धविशेषेणैव (साध्यतावच्छेदकसाधनतावच्छेदकसम्बन्धेन साध्यसाधनयोः सामानाधिकरण्यज्ञानात्) तादृशसामानाधिकरण्यविषयकपरामर्शात्मकज्ञानादनुमितिस्तादृशपरामर्शात्मकज्ञानप्रतिबन्धकतयैव विरोधस्य साध्यतावच्छेदकसम्बन्धेन साध्याधिकरणनिरूपितहेतुतावच्छेदकसम्बन्धावच्छिन्नहेतुनिष्ठवृत्तित्वाभावात्मकस्य हेत्वाभासता उक्ता।

द्वितीयपक्षे 'यदि चे'त्यादिनोक्ते तु साक्षादनुमितावेव विरोधस्य विरोधित्वं, तच्च साध्यव्यापकीभूताभावप्रतियोगित्वरूपं हेतुनिष्ठमिति तदाशयः।

प्रवेशादेव व्यापकत्वदले साध्यसाधनयोः सम्बन्धविशेष (साध्यतावच्छेदकसाधनतावच्छेदकसम्बन्ध) प्रवेशादेव विरोधस्थले अतिप्रसङ्गभङ्गादनुमितेः प्रसक्त्यसम्भवादित्याशयः।[३०८]

तत्त्वालोकः – 'मानाभावस्ये'ति[२]।

अत्यन्ताभावप्रतियोगितायां सम्बन्धावच्छिन्नत्वसाधकस्य प्रतिबध्यप्रतिबन्धकभावाद्यनुपपत्यादेर्भेदस्थलेऽवतारासम्भवात्, सम्बन्धस्यैकप्रतियोगिकत्वापरानुयोगिकत्वनियमेन तादात्म्यस्य सम्बन्धत्वाभावाच्च — घटो द्रव्य-

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. ३०

२. तदेव, जागदीशीमूलम्, पृ. ३१

मित्यादिशाब्दस्य च प्रथमार्थतादात्म्यप्रकारकत्वं सम्बन्धानवच्छिन्नप्रकारकत्वम्वाभ्युपेयम्। प्रकारतात्वादिकन्तु विषयतात्वव्याप्यधर्मविशेष एवेति सम्बन्धानवच्छिन्नत्वेऽपि तत्र न प्रकारतात्वक्षतिः।

अस्तु वा सम्बन्धावच्छिन्नैव तत्प्रकारता, तथापि प्रतियोगिताया तदभ्युपगमोऽप्रामाणिक एवेति भावः।

तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकाभावत्वमेव भेदत्वम्, न त्वनुयोगिताविशेषः, प्रमाणाभावादिति मतेऽप्याह 'एवमि'ति[1]। स्वामित्वादिसम्बन्धस्य प्रतियोगितावच्छेकत्वे मानाभावादिति शेषः।[३०९]

प्रकाशः – 'ननु तादात्म्येन गवादेः साध्यतायां सास्नादावव्याप्तिस्तत्र साधनवन्निष्ठान्योन्याभावप्रतियोगितायाः साध्यतावच्छेदकतादात्म्यसम्बन्धावच्छिन्नत्वे मानाभावस्य स्वयमेव बौद्धाधिकारटिप्पण्यामुक्तत्वादि'ति यदुपन्यस्तम्[2] तर्कालङ्कारेण, तत्र मानाभावादिति [मानाभावस्येति] परिगृह्य तत्त्वालोककृतोक्तखण्डेनालोको विधीयते।

अत्यन्ताभावप्रतियोगितायां सम्बन्धावच्छिन्नत्वसाधकस्य प्रतिबध्यप्रतिबन्धकभावानुपपत्त्यादेर्भेदस्थलेऽवतारासम्भवात् सम्बन्धस्यैकप्रतियोगिकत्वापरानुयोगिकत्वनियमेन तादात्म्यस्य सम्बन्धत्वासम्भवाच्च घटो द्रव्यमित्यादिशाब्दस्य च प्रथमार्थतादात्म्यप्रकारकत्वं सम्बन्धानवच्छिन्नप्रकार[क]त्वम्वाभ्युपेयं प्रकारतात्वादिकन्तु विषयतात्वव्याप्यधर्मविशेष एवेति सम्बन्धानवच्छिन्ने[न्नत्वे]ऽपि तत्र न प्रकार[ता]त्वक्षतिः। अस्तु वा सम्बन्धावच्छिन्नैव तत्प्रकारता, तथापि प्रतियोगितायाः तदभ्युपगमोऽप्रमाणिक एवेति भावः।

तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकाभावत्वमेव भेदत्वम्, नत्वनुयोगिताविशेषः प्रमाणाभावादिति मतेऽप्याह 'एवमि'ति। स्वामित्वादिसम्बन्धस्य प्रतियोगितावच्छेदकत्वे मानाभावादिति शेषः। तत्त्वालोककृदुपपादनस्यातिस्पष्टतया व्याख्यापेक्षा नास्ति।[३०९]

तत्त्वालोकः – 'सम्बन्धान्तरावच्छिन्नतत्तदनन्ते'ति[3]। ननु प्रतियोगितावच्छेदकत्वस्योपलक्षणविधयैव[4] निवेश्यत्वमन्यथा प्रमेयधूमहेतुकस्थले गुरु-

---

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. ३१

२. तदेव, जागदीशीमूलम्, पृ. ३१

३. तदेव, जागदीशीमूलम्, पृ. ३१

४. '...त्वस्योपलक्षकतयैवे'ति पाठः प्राचीनमुद्रितपुस्तके।

धर्मस्य प्रतियोगितानवच्छेदकत्वपक्षेऽव्याप्तेश्चेति कथं गौरवमिति चेद्।

अत्र केचित् प्रतियोगितायां साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वप्रवेशे कम्बुग्रीवादिगुरुधर्मभेदस्य न प्रवेशोऽन्यथा विषयित्वादिसम्बन्धावच्छिन्नप्रतियोगितावच्छेदकत्वस्य कम्बुग्रीवादिमत्त्वेऽपि सत्त्वेन तद्भेदस्य प्रवेशनीयतया गौरवमिति वदन्ति।

अत्र ब्रूमः साध्यतावच्छेदकतात्वावच्छिन्नपर्याप्त्यनुयोगितावच्छेदकरूपावच्छेदेन पर्याप्तिसम्बन्धावच्छिन्नतादृशप्रतियोगितावच्छेदकत्वनिष्ठावच्छेदकताकप्रतियोगिताकभेदकूटस्य साध्यतावच्छेदकनिष्ठस्य चक्रवर्तिलक्षणोक्तत्वेन दीधितिकृत्सम्मतस्य लक्षणघटकतामभ्युपेत्य गौरवोद्भावनं कृतम्, तच्च स्फुटमेव। तत्तत्सम्बन्धावच्छिन्नप्रतियोगित्वस्य स्वप्रतियोगितावच्छेदकघटकतया भिन्नस्य घटत्वादिभेदस्य लक्षणघटकत्वात्।

न चोक्तप्रतियोगितावच्छेदकत्वावच्छिन्नभेदनिवेशनमप्रयोजनम्, महानसीयवह्न्यभावप्रतियोगित्वस्य साध्यतावच्छेदकतदितरोभयानवच्छिन्नत्वविशेषणेनैव वारणादिति वाच्यम्, तद्विशेषणोक्तेश्शिष्यबुद्धिवैशद्यार्थतायाष्प्राक्प्रपञ्चितत्वात्। पूर्वं तद्विशेषणमव्याख्यानरूपग्रन्थे शङ्कोत्तरभावेनाभिहितमिदानीं दीधितिव्याख्याने तत्सम्मते विशेषणानुसरणमेव युक्तमित्यस्यापि वक्तुं शक्यत्वाच्च।

अत एव सम्बन्धान्तरावच्छिन्नतत्तदनन्तप्रतियोगितावच्छेदकभेदकूटेत्यादिलिखनमपि सङ्गच्छतेऽन्यथा प्रतियोगितागतानन्त्यम्विहाय धर्मगतानन्त्यमेवोच्येतेति।[३१०]

प्रकाशः – 'यत्तु प्रतियोगितावच्छेदकसम्बन्धेन तद्वैयधिकरण्यं प्रवेश्य पुनः प्रतियोगितायाः साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वविवक्षायां गौरवमतो 'यद्वे'त्यादिकल्प इति, तन्न, सम्बन्धान्तरावच्छिन्नतत्तदनन्तप्रतियोगितावच्छेदकभेदकूटघटितत्वेन 'यद्वे'त्यादिकल्पस्यैव 'गुरुतरत्वादित्याहुरि'ति यदुपन्यस्तम्[१], तत्र तत्त्वालोककृतालोको दर्श्यते।

ननु प्रतियोगितावच्छेदकत्वस्योपलक्षणतयैव निवेश्यत्वमन्यथा प्रमेयधूमहेतुके गुरुधर्मस्य प्रतियोगितानवच्छेदकत्वेऽव्याप्तेश्चेति कथं गौरवमिति चेत्, साध्यतावच्छे-

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. ३१

दकसम्बन्धेन प्रतियोग्यसम्बन्धिहेतुमन्निष्ठाभावप्रतियोगितावच्छेदकत्वनिष्ठावच्छेदकताकप्रतियोगिताकभेदो न साध्यतावच्छेदके विवक्षितः, किन्तु तादृशप्रतियोगितावच्छेदकत्वोपलक्षितधर्मभेद एव साध्यतावच्छेदके विवक्षितः। अन्यथा प्रमेयधूमहेतुकस्थले गुरुधर्मस्य प्रतियोगितानवच्छेदकत्वे तादृशभेदस्याप्रसिद्ध्याऽव्याप्तिः स्यादिति।

प्रतियोगितावच्छेदकस्य सामान्यभेदो न प्रविष्टो यत्र तादृशभेदीयप्रतियोगिता गुरुधर्मेऽपि तिष्ठेत्, तादृशभेदप्रतियोगितावच्छेदकञ्च तादृशप्रतियोगितावच्छेदकत्वं स्यात्, तथाप्रवेशे गुरुधर्मस्य प्रतियोगितानवच्छेदकत्वे तादृशभेदाप्रसिद्ध्या प्रमेयधूमहेतुकस्थलेऽव्याप्तिः स्यादित्याशयः।

अथवा गुरुधर्मस्याभावप्रतियोगितानवच्छेदकत्वं यथा, तथैव सम्बन्धप्रतियोगितानवच्छेदकत्वमपि। तथासतिं संयोगात्मकसम्बन्धस्य प्रतियोगितावच्छेदकत्वमपि नैव गुरुधर्मस्य। तथा च प्रमेयधूमत्वावच्छिन्नप्रतियोगिताकसंयोगसम्बन्धेन हेत्वधिकरणाप्रसिद्ध्या प्रमेयधूमहेतुकेऽव्याप्तिः स्यादित्यत्र तत्तात्पर्यं भवेत्।

सरलाकृता तु तत्त्वालोकपाठं परिवर्त्त्य 'प्रमेयधूमसाध्यकेऽतिव्याप्तिरि'ति पाठं संस्थाप्य व्याख्या कृता[1], साध्यतावच्छेदकस्य गुरुधर्मस्य प्रतियोगितानवच्छेदकत्वात्। तत्तु साधु न प्रतीमः। तथा सति तत्र प्रतियोगितानवच्छेदकत्वात्साध्यतावच्छेदकस्यातिव्याप्तेः कथञ्चित्प्रसक्तावपि प्रतियोगितावच्छेदकत्वस्योपलक्षणतयैव निवेश्यत्वे सङ्गतिर्नैव प्रतीयते। मदन्तिके स्थितमत्पितृपाठित, - तथा मत्पितृव्यपाठितसंशोधितपुस्तकद्वये 'अन्यथा प्रमेयधूमहेतुकेऽव्याप्तिरि'त्येवास्ति पाठः।

अनन्तरमत्र केचित् प्रतियोगितायां साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वप्रवेशे कम्बुग्रीवादिगुरुधर्मभेदस्य न प्रवेशः, अन्यथा विषयित्वादिसम्बन्धावच्छिन्नप्रतियोगितावच्छेदकत्वस्य कम्बुग्रीवादिमत्त्वेऽपि सत्त्वेन तदभेदस्य प्रवेशनीयतया गौरवमिति वदन्ति।

व्याप्तिलक्षणे साध्यतावच्छेदके साध्यतावच्छेदकसम्बन्धावच्छिन्नतादृशप्रतियोगितावच्छेदकभेदप्रवेशपक्षे कम्बुग्रीवादिगुरुधर्मभेदप्रवेशो न, अन्यथा विषयित्वादिसम्बन्धावच्छिन्नप्रतियोगितावच्छेदकत्वस्य कम्बुग्रीवादिमत्त्वेऽपि सत्त्वेन तद्भेदस्य प्रवेशनीयतया गौरवमिति केचिद् वदन्ति।

---

१. सिद्धान्तलक्षणसुबोधनी, पृ. ४६६

'अत्र तत्त्वालोककृतो मतमत्र ब्रूमः' इत्यादिना उपस्थाप्यते। साध्यतावच्छेदकतात्वावच्छिन्नपर्याप्त्यनुयोगितावच्छेदकरूपावच्छेदेन पर्याप्तिसम्बन्धावच्छिन्नतादृशप्रतियोगितावच्छेदकत्वनिष्ठावच्छेदकताकप्रतियोगिताकभेदकूटस्य साध्यतावच्छेदकनिष्ठस्य चक्रवर्तिलक्षणोक्तत्वेन दीधितिकृत्सम्मतस्य लक्षणघटकतामभ्युपेत्य गौरवोद्भावनं कृतम्, तच्च स्फुटमेव, तत्तत्सम्बन्धावच्छिन्नप्रतियोगित्वस्य स्वप्रतियोगितावच्छेदकघटकतया भिन्नस्य घटत्वादिभेदस्य लक्षणघटकत्वात्।

अत्र शङ्कते। न चोक्तप्रतियोगितावच्छेदकत्वावच्छिन्नभेदनिवेशनमप्रयोजनम्महानसीयवह्न्यभावप्रतियोगित्वस्य साध्यतावच्छेदकतदितरोभयानवच्छिन्नत्वविशेषणेनैव वारणादिति वाच्यम्।

उक्तशङ्कायाः समाधानमुपस्थापयति। तद्विशेषणोक्तेश्शिष्यबुद्धिवैशद्यतार्थतायाष्प्राक्प्रपञ्चितत्वात्, पूर्वं तद्विशेषणमव्याख्यानरूपग्रन्थे शङ्कोत्तरक्रमेणाभिहितमिदानीं दीधितिव्याख्याने तत्सम्मतविशेषणानुसरणमेव युक्तमित्यस्यापि वक्तुं शक्यत्वाच्च।

अत एव = दीधितिकृत्सम्मतचक्रवर्तिलक्षणोक्तदिशा निवेशादेव, सम्बन्धावच्छिन्नतत्तदनन्तप्रतियोगितावच्छेदकभेदकूटेत्यादिलिखनमपि सङ्गच्छते। अन्यथा प्रतियोगितानन्त्यं विहाय धर्मगतानन्त्यमेवोच्येतेति।[३१०]

तत्त्वालोकः – **अथ स्वावच्छेदकावच्छिन्ननिरूपकताकाधिकरणतावान्नेति प्रतीतिसिद्धो यो हेत्वधिकरणवृत्तिभेदस्तदीयप्रतियोगितानिरूपितपरम्परावच्छेदकतावत्प्रतियोगितावच्छेदकतावान्नेति सामान्यभेद एव निवेश्यस्तत्र न गौरवप्रसरः।**

अत्र हेत्वधिकरणवृत्तिघटाधिकरणत्वविशिष्टभेदतत्प्रतियोगित्वघटाधिकरणत्वनिष्ठावच्छेदकत्वघटत्वावच्छिन्ननिरूपकत्वनिष्ठावच्छेदकत्वघटत्वात्मकधर्मनिष्ठावच्छेदकत्व-घटत्वनिष्ठावच्छेदकत्व-निष्ठावच्छेदकत्व-घटत्वनिष्ठावच्छेदकत्वनिष्ठावच्छेदकत्वघटनिष्ठप्रतियोगितानिष्ठावच्छेदकत्वघटनिष्ठप्रतियोगित्वघटत्वनिष्ठावच्छेदकत्वादिघटितविशेषावच्छेदकावच्छिन्नप्रतियोगिताकभेदानवच्छेदकघटोभयभेदञ्चादायातिव्याप्तिवारणाय तत्तदवच्छेदकनिष्ठावच्छेदकताभिन्नावच्छेदकत्वानिरूपितत्वम्, तद्व्यक्तेः स्वरूपतो भानेऽतिव्याप्तिवारणाय तत्तन्निष्ठावच्छेदकतानिरूपितत्वञ्च निवेश्यम्। एवमेव भट्टाचार्येण सामान्यभेदनिवेशः कृतः।

तत्र स्वावच्छेदकावच्छिन्नवत्त्वसम्बन्धस्य परम्परात्मकस्य यद्धेत्वधिक-

रणवृत्तिभेदप्रतियोगितावच्छेदकत्वेनोपादानम्, तल्लाघवानुरोधेन, न तु प्रकार-विधया प्रवेशस्यासम्भवेन।

हेत्वधिकरणवृत्तिभेदप्रतियोगित्वस्य स्वावच्छेदकघटकाशेष[१]निष्ठावच्छेदकताभिन्नावच्छेदकत्वानिरूपितत्वविशेषितावच्छेदकतानिरूपितस्योपादेयत्वेऽपि तत्कोटौ तत्तत्प्रतियोगित्वनिष्ठावच्छेदकतानां प्रतियोगित्वत्वसामानाधिकरण्येनोपादेयत्वेनो[२]ऽनुगमस्याभावादिति चेन्न। हेत्वधिकरणवृत्तिसामान्यभेदप्रतियोगितावच्छेदकत्वेनानुगतरूपेण प्रतियोगित्वस्यानुपादेयताया मतभेदेन प्रागुक्तत्वात्।

अत एव न हेत्वधिकरणवृत्तितावच्छेदककूटत्वप्रतियोगिकपर्याप्त्यनुयोगितानिरूपितपरम्परावच्छेदकतावत्त्वेन प्रतियोगित्वानुगमश्शक्यः। एवञ्च तन्मतावलम्बनेनापि परम्परासम्बन्धानुधावनं भट्टाचार्यस्येत्यपि युज्यते वाचो युक्तिः।

अथ वैतद्ग्रन्थस्य तादृशावच्छेदकत्वावच्छिन्नभेदनिवेशाभिप्रायकतायाष्प्रागुक्ततया सामान्यभेदनिवेशे धूमवान्वह्नेरित्यादिव्यभिचारिण्यतिव्याप्तेः। उक्तावच्छेदकतावत्प्रतियोगितावच्छेदकतात्वेन तादृशावच्छेदकताया व्यासज्यवृत्तित्वात्।

न च भट्टाचार्याणां सामान्यभेदोक्तिरसङ्गता, स्वावच्छेदकतापर्याप्त्यधिकरणत्वरूपपरम्परायास्संसर्गतामभ्युपेत्य तादृशप्रतियोगिताविशिष्टान्यत्वनिवेशे तस्य तात्पर्यादिति ध्येयम्।[३११]

प्रकाशः – प्रासङ्गिकदीधितिग्रन्थस्य व्याख्या गदाधरभट्टाचार्येण यथा कृता गौरवाभावश्च यथोपपादितस्तथैवेह निवेशः कुतो नेति शङ्कते'ऽथे'त्यादिनोपर्युक्तखण्डेन। अथ स्वावच्छेदकावच्छिन्ननिरूपकताकाधिकरणतावान्नेति प्रतीतिसिद्धो यो हेत्वधिकरणवृत्तिभेदस्तदीयप्रतियोगितानिरूपितपरम्परावच्छेदकतावत्प्रतियोगितावच्छेदकतावान्नेति सामान्यभेद एव निवेश्यस्तत्र न गौरवप्रसङ्गः।

अत्र हेत्वधिकरणवृत्तिघटाधिकरणत्वविशिष्टभेद = घटाधिकरणभेद, - तत्प्रतियोगित्वघटाधिकरणत्वनिष्ठावच्छेदकत्वघटत्वावच्छिन्ननिरूपकत्वनिष्ठावच्छेदकत्व-

---

१. 'स्वावच्छेदकाघटताशेषे'ति पाठः प्राचीनमुद्रितपुस्तके।

२. '...पादेयत्वेना' इति पाठ एव सङ्गत इति विभाव्यते।

घटत्वनिष्ठावच्छेदकत्वनिष्ठावच्छेदकत्वनिष्ठावच्छेदकत्वघटत्वनिष्ठावच्छेदकत्वनिष्ठावच्छेदकत्वनिष्ठावच्छेदकत्वघटनिष्ठप्रतियोगितानिष्ठावच्छेदकत्वघटनिष्ठप्रतियोगित्वघटत्वनिष्ठावच्छेदकत्वादिघटितविशेषावच्छेदकावच्छिन्नप्रतियोगिताकभेदानवच्छेदकघटोभयभेदञ्चादायातिव्याप्तिवारणाय तत्तदवच्छेदकनिष्ठावच्छेदकताभिन्नावच्छेदकत्वानिरूपितत्वमितरवारकं विशेषणन्निवेश्यमित्याशयः।

तद्व्यक्तेः स्वरूपतोऽतिव्याप्तिवारणाय न्यूनवारकविशेषणं तत्तन्निष्ठावच्छेदकतानिरूपितत्वञ्च निवेश्यम्। गदाधरभट्टाचार्येण एवमेव सामान्यभेदनिवेशः कृतः।

भट्टाचार्येण तत्र हेत्वधिकरणवृत्तिभेदप्रतियोगितावच्छेदकसम्बन्धतया स्वावच्छेदकावच्छिन्नवत्त्वसम्बन्धस्य परम्परात्मकस्य यदुपादानं कृतन्तल्लाघवानुरोधेन, न तु प्रकारविधया निवेशासम्भवबुद्ध्या।

हेत्वधिकरणवृत्तिभेदप्रतियोगित्वस्य स्वावच्छेदकाशेषनिष्ठावच्छेदकताभिन्नावच्छेदकत्वानिरूपितत्वविशेषितावच्छेदकतानिरूपितस्योपादेयत्वेऽपि तत्कोटौ तत्तत्प्रतियोगित्वनिष्ठावच्छेदकतानां प्रतियोगित्वत्वसामानाधिकरण्येनोपादानेनो[ना]ऽनुगमस्याभावादिति चेन्न।

समाधानं करोति। हेत्वधिकरणवृत्तिसामान्यभेदप्रतियोगितावच्छेदकत्वेनानुगतरूपेण प्रतियोगित्वस्यानुपादेयताया मतभेदेन प्रागुक्तत्वाद् मतभेदेन तर्कालङ्कारेण तथाऽनुपपादनादित्याशयः।

अत एव = मतभेदादेव, न हेत्वधिकरणवृत्तितावच्छेदककूटत्व = भेदकूटत्व, - प्रतियोगिकपर्याप्त्यनुयोगितानिरूपितपरम्परावच्छेदकतावत्त्वेन प्रतियोगित्वस्यानुगमश्शक्यः।

एवञ्च तन्मतावलम्बनेनापि परम्परासम्बन्धस्यानुधावनं भट्टाचार्येणानुसृतमित्यपि युज्यते वाचो युक्तिः।

अथ वा एतद्ग्रन्थस्य तादृशावच्छेदकत्वावच्छिन्नभेदनिवेशाभिप्रायकतायाष्प्रागुक्ततया गदाधरोक्तदिशा सामान्यभेदनिवेशे धूमवान् वह्नेरित्यादिव्यभिचारिण्यतिव्याप्तिः स्यात्, उक्तावच्छेदकतावत्प्रतियोगितावच्छेदकतात्वेन तादृशावच्छेदकताया व्यासज्यवृत्तितया साध्यतावच्छेदके धूमत्वे तादृशावच्छेदकताविरहात्।

एवं सति गदाधरभट्टाचार्याणां सामान्यभेदोक्तिरसङ्गतेति चेत्, तेषां स्वावच्छेदकतापर्य्याप्त्यधिकरणत्वरूपपरम्परासम्बन्धेन तादृशप्रतियोगिताविशिष्टान्यत्वनिवेशे

तात्पर्यादिति ध्येयम्।[३११]

तत्त्वालोकः – 'ध्येयमि'ति[१]। अन्योन्याभावत्वस्यानुयोगिताविशेषरूपत्वे न वैयर्थ्यसम्भव इति चिन्ताबीजम्।[३१२]

प्रकाशः – 'एवं स्थिते = सम्बन्धविशेषस्यात्र निवेशे स्थिते, सामानाधिकरण्यादौ सम्बन्धित्वं निवेशनीयम्। तथा च धर्मिणोऽपि व्याप्यत्वं व्यापकत्वञ्च निर्वहति। तथा हि तादात्म्येन सम्बन्धेन धूमवतः सम्बन्धिनि महानसे वर्तमानो योऽन्योन्याभावस्तस्य तादात्म्यसम्बन्धावच्छिन्ना या प्रतियोगिता, तदनवच्छेदकवह्निमत्त्वावच्छिन्नस्य वह्निमतस्तादात्म्येन सम्बन्धिनि महानसे धूमवतस्तादात्म्येन सम्बन्धित्वमि'ति[२] दीधितेर्व्याख्यावसरे 'योऽन्योन्याभाव' इति परिगृह्य 'योऽभाव इत्येव वक्तुमुचितम्, अन्योन्याभावत्वनिवेशे वैयर्थ्यादिति ध्येयमि'ति तर्कालङ्कारेण यदुपन्यस्तम्[३], तत्र तत्त्वालोककृतोच्यते 'अन्योन्याभावत्वस्यानुयोगिताविशेषरूपत्वे न वैयर्थ्यसम्भव इति चिन्ताबीजमि'ति।

अभावे तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकत्वकथनादेव तस्यान्योन्याभावत्वसिद्धे अन्योन्याभावत्वनिवेशे वैयर्थ्यादिति कथनमन्योन्याभावत्वस्यानुयोगिताविशेषरूपत्वे न सम्भवदुक्तिकमित्याशयः।[३१२]

तत्त्वालोकः – 'इत्यपि वदन्ती'ति[४]। व्याप्तेरेकरूपत्वाभावप्रसङ्गसूचनायापीति।

'अनुमितिरप्यनुपपन्ने'ति[५]। तथा च गोविधेयकानुमितेरप्यभ्युपगमे गवेतरावृत्तित्वरूपाया निरवच्छिन्नगोत्वविधेयकानुमितिप्रयोजकव्याप्तेरुपस्थितिध्रौव्ये गोविधेयकानुमितावपि[६] गोत्वविधेयकत्वस्य सम्भवेन गोस्साध्यत्वमप्रामाणिकमेवेति भावः।

---

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. ३२

२. तदेव, दीधितिमूलम्, पृ. ३१

३. तदेव, जागदीशीमूलम्, पृ. ३२

४. 'इति वदन्ती'त्येव पाठ इदानीमुपलब्धजागदीशीग्रन्थेषूपलभ्यते।
   –तदेव, जागदीशीमूलम्, पृ. ३२

५. तदेव, जागदीशीमूलम्, पृ. ३४

६. 'गोविधेयकत्वेनाभिमतानुमितावपी'ति पाठः प्राचीनमुद्रितपुस्तके।

नन्नु गोत्वत्वघटकगवेतरावृत्तित्वस्य समवायसम्बन्धावच्छिन्नवृत्तित्वप्रतियोगिकत्वात्सास्नानिष्ठस्य व्याप्तिरूपस्य समवेतत्वसम्बन्धावच्छिन्नवृत्तित्वप्रतियोगिताकत्वादुभयोर्भेदे गोत्वत्वोपस्थितेः कथं व्याप्त्युपस्थितिरूपत्वमिति चेद्, गोस्तादात्म्येन साध्यत्वे समवायेनैव सास्नाया इह हेतुत्वं गोपदञ्च पृथिवीपरम्। तथा च व्याप्तेर्गोत्वत्वघटकत्वन्निराबाधमिति नासङ्गतिरिति केचित्।

परे तु साध्यवदन्यावृत्तित्वरूपव्याप्तिपरामर्शस्य तादृशव्याप्त्यवच्छिन्नप्रकारताशालिनिश्चयत्वेनैव कारणत्वम्, न तत्र व्याप्तिधर्मितावच्छेदकतात्मकविषयत्वस्य प्रवेशोऽनावश्यकत्वात्। तथा च गवेतरासमवेतत्वोपस्थितौ तदवच्छिन्नगोरूपादेः रूपत्वमविषयीकृत्य परामर्षादनुमितेर्गोत्वविधेयकत्वसम्भवान्नासङ्गतिः। अत एव तद्विशिष्टस्य न यत्र पक्षधर्मताधीरित्येव वक्ष्यति, न तु तद्विशिष्टस्य सास्नादेरितीति प्राहुः।[३१३]

प्रकाशः – 'एवं स्थिते = सम्बन्धविशेषस्यात्र निवेशे स्थिते, सामानाधिकरण्यादौ सम्बन्धित्वं निवेशनीयम्, न त्वधिकरणत्वमि'ति दीधितेर्व्याख्यावसरे 'तथा च धर्मिणोऽपि व्याप्यत्वं व्यापकत्वञ्च निर्वहति' इत्यादि-तदग्रिमदीधितिव्याख्यानान्ते 'अत्र साध्यसाधनयोरिव तदीयसम्बन्धयोरपि भेदेन व्याप्तेर्भेदात् तादात्म्येन हेतुसाध्यकस्थले हेतुमन्निष्ठाभावाप्रतियोगिसाध्यतादात्म्यमेव व्याप्तिर्वक्तुमुचिता लाघवादिति वदन्ति (लाघवादित्यपि वदन्ति इत्येवमत्र पाठान्तरं) यदुपन्यस्तं[१] तर्कालङ्कारेण, तत्र तत्त्वालोककृता कथ्यते 'व्याप्तेरेकरूपत्वाभावप्रसङ्गसूचनाय 'अपी'ति।

साध्यसाधनभेदेन यथा व्याप्तिर्भिन्ना तथा साध्यताघटकसाधनताघटकसम्बन्धभेदेनापि व्याप्तिभेद एव उचित इत्याशयः।

"अत एव = धर्मिणो धर्मव्यापकत्वादेव, गोत्वत्वाद्यग्रहदशायां 'यत्र सास्नादिः सा गौरि'ति तादात्म्येन गोर्व्यापकत्वग्रहे, सास्नादिना तादात्म्येन गौरि"त्यादि[२] दीधितेर्व्याख्यावसरे "ननु तादात्म्येन गोः साध्यत्वेऽपि गोत्वं हेतुमन्निष्ठाभावप्रतियोगितानवच्छेदकमित्याकारकव्याप्तिधियोऽनुमितिहेतुत्वात्तत्र च धर्मितावच्छेदकविधयैव गोत्वत्वग्रहस्यापेक्षितत्वात्तदग्रहे गोविधेयकानुमितिरप्यनुपपन्नेत्यत आह 'आदी'ति।

---

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. ३२

२. तदेव, दीधितिमूलम्, पृ. ३३

आदिना पक्षधर्मतापरिग्रह'' इति यदुपन्यस्तं[1] तर्कालङ्कारेण, तत्र तत्त्वालोककृता कथ्यते 'तथा च गोविधेयकानुमितेरप्यभ्युपगमे गवेतरावृत्तित्वरूपाया निरवच्छिन्नगोत्वविधेयकानुमितिप्रयोजकव्याप्तेरुपस्थितिध्रौव्ये गोविधेयकानुमितावपि गोत्वविधेयकत्वसम्भवेन गोस्साध्यत्वमप्रामाणिकमेवेति भावः' [इति]।

अत्र शङ्कते। 'ननु गोत्वत्वघटकगवेतरावृत्तित्वस्य समवायसम्बन्धावच्छिन्नवृत्तित्वप्रतियोगिकत्वात् सास्नानिष्ठस्य व्याप्तिरूपस्य समवेतत्वसम्बन्धावच्छिन्नवृत्तित्वप्रतियोगिकत्वादुभयोर्भेदे गोत्वत्वोपस्थितेः कथं व्याप्त्युपस्थितिरूपत्वमिति चेद्।

अत्र केचित् गोस्तादात्म्येन साध्यत्वे समवायेनैव, न तु समवेतत्वेन, सास्नाया इह हेतुत्वम्, गोपदञ्च पृथिवीपरम्। तथा च व्याप्तेः = सास्नानिष्ठगवेतरावृत्तित्वरूपव्याप्तेः समवायसम्बन्धावच्छिन्नवृत्तित्वप्रतियोगिकाभावरूपायाः गोत्वत्व = समवायसम्बन्धावच्छिन्नवृत्तित्वघटितगोत्वत्व, - घटकत्वन्निराबाधमिति वदन्ति।

परे तु साध्यवदन्यावृत्तित्वरूपव्याप्तिपरामर्षस्य तादृशव्याप्त्यवच्छिन्नप्रकारताशालिनिश्चयत्वेनैव कारणत्वम्, न तत्र व्याप्तिधर्मितावच्छेदकतात्मकविषयत्वस्य प्रवेशोऽनावश्यकत्वात्। तथा च गवेतरासमवेतत्वोपस्थितौ तदवच्छिन्नगोरूपादेरूपत्व = गोत्वत्व, - मविषयीकृत्य परामर्षादनुमितेः गोत्वविधेयकत्वसम्भवान्नासङ्गतिः। अत एव तद्विशिष्टस्य न यत्र पक्षधर्मताधीरित्येव वक्ष्यति, न तु तद्विशिष्टस्य सास्नादेरितीति प्राहुः।[३१३]

तत्त्वालोकः – 'व्यापकत्वं वाच्यमित्याशय' इति[2]। इदमुपलक्षणम्। गोत्वत्वानुपस्थितावपि निरवच्छिन्नगोत्वनिष्ठावच्छेदकताकविधेयताशाल्यनुमितेस्साध्यविशेष्यकहेतुमन्निष्ठान्योन्याभावप्रतियोगितानवच्छेदकत्वरूपव्यापकत्वज्ञानादपि सम्भवो बोध्यः।

न चैवं व्यापकत्वज्ञानकारणत्वपक्षे स्वरूपतो ज्ञानत्वादिप्रकारकानुमित्यनुपपत्तिरूपदोषप्रतिपादककेवलान्वयिग्रन्थविरोध इति वाच्यम्। उक्तव्यापकत्वस्यावच्छेदकतानवच्छेदकधर्मावच्छेदो[दे]नावच्छेदकत्वाभावस्य सत्त्व एव तत्तत्साध्यवद्भेदप्रतियोगितावच्छेदके निर्वाह्यतया प्रतियोगितानवच्छेदकधर्मावच्छेदेन प्रतियोगित्वाभावस्येवावच्छेदकत्वाभावस्याप्यनभ्युपगमे तद्व्यापकत्वस्यासम्भवेन तदभिप्रायकत्वात्केवलान्वयिग्रन्थस्येत्यसङ्गतेर-

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. ३४

२. तदेव, जागदीशीमूलम्, पृ. ३४

भावादिति।[३१४]

प्रकाशः – 'तथा च गवेतरावृत्तित्वरूपव्याप्तेः सास्नाव्यापकतावच्छेदकताग्रहे धर्मितावच्छेदकतयोपस्थितिध्रौव्येऽपि तद्विशिष्टस्य = गोत्वत्वविशिष्टस्य, यत्र न पक्षधर्मताधीस्तत्रैव अयं गौरित्यनुमितेर्गोविधेयकत्वमावश्यकमिति, तदनुरोधेनैव तादात्म्येन व्यापकत्वं वाच्यमित्याशय' इति यदुपन्यस्तं[१] तर्कालङ्कारेण, तत्र तत्त्वालोककृतोच्यते 'इदमुपलक्षणम्। गोत्वत्वानुपस्थितावपि निरवच्छिन्नगोत्वनिष्ठावच्छेदकताकविधेयताशाल्यनुमितेस्साध्यविशेष्यकहेतुमन्निष्ठान्योन्याभावप्रतियोगितानवच्छेदकत्वरूपव्यापकत्वज्ञानादपि सम्भवो बोध्य' इति।

अत्र शङ्कते। न चैवं व्यापकत्वज्ञानकारणत्वपक्षे स्वरूपतो ज्ञानत्वादिप्रकारकानुमित्यनुपपत्तिरूपदोषप्रतिपादककेवलान्वयिग्रन्थविरोध इति वाच्यम्।

अत्र समाहितम्। उक्तव्यापकत्वस्यावच्छेदकतानवच्छेदकधर्मावच्छेदो[दे]नावच्छेदकत्वाभावस्य सत्त्व एव तत्तत्साध्यवद्भेदप्रतियोगितावच्छेदके निर्वाह्यतया प्रतियोगितानवच्छेदकधर्मावच्छेदेन प्रतियोगित्वाभावस्येवावच्छेदकत्वाभावस्याप्यनभ्युपगमे तद्व्यापकत्वस्यासम्भवेन तदभिप्रायकत्वात् केवलान्वयिग्रन्थस्येत्यसङ्गतेरभावादिति।

उक्तव्यापकत्वस्य = साध्यविशेष्यकहेतुमन्निष्ठान्योन्याभावप्रतियोगितानवच्छेदकत्वरूपव्यापकत्वस्य, अवच्छेदकतानवच्छेदकधर्मावच्छेदेन अवच्छेदकत्वाभावस्य सत्त्व एव = धूमवन्निष्ठाभावप्रतियोगितानवच्छेदकवह्नित्वावच्छेदेनावच्छेदकत्वाभावस्य हेतुमन्निष्ठान्योन्याभावप्रतियोगितावच्छेदकत्वाभावस्य सत्त्व एव, तत्तत्साध्यवद्भेदप्रतियोगितावच्छेदके तत्तद्वह्नौ निर्वाह्यतया प्रतियोगितानवच्छेदकधर्मावच्छेदेन = वह्नित्वावच्छेदेन, प्रतियोगित्वाभावस्येवावच्छेदकत्वाभावस्याप्यनभ्युपगमेन तद्व्यापकत्वस्यासम्भवेन तदभिप्रायकंत्वात् केवलान्वयिग्रन्थस्येत्यसङ्गतेरभावादिति तदाशयं प्रतीमः।[३१४]

तत्त्वालोकः – **'तच्चिन्त्यमि'ति[२]। सम्बन्धधर्मिकव्यापकताग्रहस्य सम्बन्धिविधेयकानुमितेरपि हेतुत्वे कदा गोतादात्म्यवानित्यनुमितिः, कदाऽयङ्गौरित्यनुमितिरिति नियमाभावप्रसङ्गेन तस्याकारणत्वे तदवलम्बनेन व्याख्यानस्या-**

---

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. ३४

२. तदेव, जागदीशीमूलम्, पृ. ३५

नुचितत्वमिह चिन्ताबीजम्।[1]

'इत्यपि वदन्ती'ति[2]। धर्मिभेदधर्मात्यन्ताभावयोरेकतया भेदबुद्धेरिवात्यन्ताभावबुद्धेरपि विरोधित्वमानुभविकमिति, गोत्वत्वावच्छिन्नाभावनिश्चयदशायां तादृशानुमित्यसम्भव एवास्वरसोऽपिना सूचित इति।

क्वचित्पुस्तके प्रतियोगिताधर्मिकोभयाभावघटितलक्षणाभिप्रायेण गोत्वत्वाद्यग्रहदशायामित्यादिग्रन्थव्याख्यानमस्ति, तस्यायमाशयः। अनुव्यवसायानुरोधेनोल्लेखमानस्यापि जातेर्निरूपितत्वादिसम्बन्धेन स्वरूपतो भाने प्रकारित्व इवावच्छेद्यत्वेऽपि निरूपितत्वसम्बन्धेन स्वरूपतो भानं स्वीक्रियत इति गोत्वत्वाद्यनुपस्थितावपि गोविधेयकानुमित्युपयोगिव्याप्तिग्रहस्य सम्भव इति।

न चैवं केवलान्वयिग्रन्थे स्वरूपतो ज्ञानत्वादिप्रकारकानुमित्यनुपपत्तेर्व्यापकता-ज्ञानकारणत्वपक्ष उद्भाविताया असङ्गतिरिति वाच्यम्।

अवच्छेद्यत्वे निरूपितत्वसम्बन्धेन स्वरूपतो भानानभ्युपगमेन तदुक्तेस्सङ्गतत्वसम्भवादिति।[३१५]

प्रकाशः – 'गोत्वत्वाद्यग्रहदशायामित्यस्य गोत्वत्वेनाग्रहो यस्मादिति व्युत्पत्त्या गोत्वबाधनिश्चयदशायामित्यर्थः। तथा च तदानीमयं गौरित्यनुमित्यर्थं धर्मिणो धर्मव्यापकत्वमवश्यं स्वीकार्यमित्यपि वदन्ति प्राञ्च' इति यदुपन्यस्तं[3] तर्कालङ्कारेण, तत्र तत्त्वालोककृतोच्यते 'धर्मिभेदधर्मात्यन्ताभावयोरेकतया भेदबुद्धेरिवात्यन्ताभावबुद्धेरपि विरोधित्वमानुभविकमिति, गोत्वत्वावच्छिन्नाभावनिश्चयदशायां तादृशानुमित्यसम्भव एवास्वरसोऽपिना सूचित' इति उपपादनं सुस्पष्टं व्याख्यानान्नापेक्षितम्, तथापि स्पष्टीक्रियते।

धर्मिभेदधर्मात्यन्ताभावयोरेकतया गवि गोभेदनिश्चयकाले गोस्तादात्म्येन ज्ञानं यथा न सम्भवति तथैव गोत्वाभावनिश्चयकालेऽपि गवि तादात्म्येन गोप्रकारकबुद्धिर्न सम्भवति इति गोत्वत्वावच्छिन्नाभावदशायां तादृशानुमित्यसम्भव एवास्वरसोऽपिनात्र सूचित इति।

---

१. एतत्तत्त्वालोकस्य स्पष्टत्वान्नोल्लिखितं व्याख्यानं प्रकाशकृतेति प्रतीमः।

२. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. ३५

३. तदेव, जागदीशीमूलम्, पृ. ३५

एतदग्रे तत्त्वालोककृतोपन्यस्यते यत् कचित्पुस्तके प्रतियोगिताधर्मिकोभयाभावघटितलक्षणाभिप्रायेण गोत्वत्वाद्यग्रहदशायामित्यादिग्रन्थस्य व्याख्यानमस्ति।

तस्यायमाशयः। अनुव्यवसायानुरोधेनोल्लेखमानस्यापि जातेर्निरूपितत्वादिसम्बन्धेन स्वरूपतोभाने प्रकारित्व इवावच्छेद्यत्वेऽपि निरूपितत्वसम्बन्धेन स्वरूपतोभानं क्रियत इति गोत्वत्वाद्यनुपस्थितावपि गोविधेयकानुमित्युपयोगिव्याप्तिग्रहस्य सम्भव इति।

उक्तकथनमनुसृत्यैव विवृतिकृता गुरुप्रसादशास्त्रिणा 'इदमत्रालोचनीयमि'त्युपन्यस्य 'गोत्वं हेतुमन्निष्ठाभावप्रतियोगितानवच्छेदकमित्याकारकज्ञाने धर्मितावच्छेदकविधया गोत्वत्वज्ञानस्यापेक्षितत्वेऽपि हेतुमन्निष्ठप्रतियोगिव्यधिकरणघटाद्यभावप्रतियोगितासामान्ये शुद्धगोत्वावच्छिन्नत्वघटितोभयाभावसत्त्वाद् गोत्वावच्छिन्ने हेतुव्यापकताया अक्षतत्वेन तादृशव्यापकताज्ञानाद् गोत्वत्वाद्यग्रहकालेऽपीयङ्गौरित्याकारिका तादात्म्येन गोसाध्यिकैव अनुमितिर्भविष्यती'त्युपन्यस्तम्[१]।

तत्त्वालोककृत्तदग्रे शङ्कते। न चैवं केवलान्वयिग्रन्थे स्वरूपतो ज्ञानत्वादिप्रकारकानुमित्यनुपपत्तेर्व्यापकता-ज्ञानस्य कारणत्वपक्ष उद्भाविताया असङ्गतिरिति वाच्यमिति। तत्र समाहितम् अवच्छेद्यत्वे निरूपितत्वसम्बन्धेन स्वरूपतोभाना[न]भ्युपगमेन तदुक्तेस्सङ्गतत्वसम्भवादिति।[३१५]

तत्त्वालोकः– 'वस्त्वन्तर' इति[२]। विभुरूप इत्यर्थः। विभुद्वयसंयोगस्यानङ्गीकारादिति भावः। गगनासंयुक्तपृथिव्युत्पत्तौ 'पृथिवीत्वादी'[३]त्यत्र गगनसंयुक्तमात्रवृत्तिधर्मोपग्रहायादीत्युक्तमिति।[३१६]

***प्रकाशः*– 'एवञ्च = सामानाधिकरण्यादौ सम्बन्धिनिवेशे च, संयोगेन गगनादेरपि द्रव्यत्वव्यापकत्वमि'ति दीधितेर्व्याख्यावसरे ''वृत्तिनियामकसंयोगमात्रस्याभावप्रतियोगितावच्छेदकसम्बन्धरूपत्वे साध्यतावच्छेदकसम्बन्धेन प्रतियोग्यसम्ब-

---

१. सिद्धान्तलक्षणजागदीशी, विवृतिः [श्रीगुरुप्रसादशास्त्रिसम्पादिता, काशी, १९३३ खिष्टाब्दे], पृ. १६७-६८

२. अधुनोपलब्धपाठस्तु 'विभ्वन्तर' इत्येव।
–प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. ३५

३. तदेव, जागदीशीमूलम्, पृ. ३५

न्धित्वाभिधाने वा पृथिवीत्वादिव्यापकत्वमपी'ति[१] तदग्रिमदीधितेर्व्याख्यायां 'द्रव्यत्वस्य गगनासंयुक्तवस्त्वन्तरे (पाठान्तरं 'गगनासंयुक्तविभ्वन्तरे) तद्व्यभिचारित्वाद्धेत्वन्तरमाह 'पृथिवीत्वादी'ति'' यदुपन्यस्तम्[२] तत्र तत्त्वालोककृता 'वस्त्वन्तर' इति पाठबुद्ध्या 'वस्त्वन्तर' इत्यस्य 'विभुरूप' इत्यर्थः कृतः।

विभुद्वयसंयोगस्यानङ्गीकारात्, आत्मनि द्रव्यत्वस्य सत्त्वात्, तत्र गगनस्य वृत्त्यनियामकसंयोगेनाप्यसत्त्वात्, गगनस्य द्रव्यत्वव्यापकत्वन्नैव सम्भवतीति तदाशयः। अतो हेत्वन्तरं 'पृथिवीत्वादी'ति। तत्र 'आदि'पदं गगनासंयुक्तपृथिव्युत्पत्तौ व्यभिचारवारणाय गगनसंयुक्तमात्रवृत्तिधर्मोपग्रहाय इति।[३१६]

तत्त्वालोकः – दीधितौ 'किमपि व्यापकन्न स्यादि'ति[३]। अथात्र महाकालत्वसमानाधिकरणप्रतियोगिव्यधिकरणाभावप्रतियोगितानवच्छेदकत्वरूपव्यापकतावच्छेदकत्वाभावः कालिकसम्बन्धावच्छिन्नाव्याप्यवृत्तितावच्छेदक आपाद्यते। आपादकञ्च महाकालवृत्तिभेदप्रतियोगितावच्छेदकाधिकरणतानिरूपकतानवच्छेदककालिकसम्बन्धावच्छिन्नाव्याप्यवृत्तितावच्छेदकत्वम्। महाकालवृत्तिभेदीयप्रतियोगितानिरूपितपरम्परावच्छेदकतावत्प्रतियोगितानवच्छेदकत्वसम्बन्धावच्छिन्नाव्याप्यवृत्तितावच्छेदकत्वम्वा। स च न सम्भवति, आपाद्याप्रसिद्धेः।

न च स्वसमानाधिकरणप्रतियोगिव्यधिकरणाभावप्रतियोगितानवच्छेदकत्वसम्बन्धावच्छिन्नप्रतियोगिताकमहाकालत्वाभाव आपाद्यः, उक्तसम्बन्धस्य तत्क्रियात्वादेः प्रसिद्धत्वेन तेन महाकालत्वाभावो नाप्रसिद्ध इति वाच्यम्, इष्टापत्तेः।

न च प्रतियोगिवैयधिकरण्यपदार्थत्वेन प्रवेशे नेष्टापत्तिरिति वाच्यम्, तथापीदानीम्प्रतियोगिवैयधिकरण्यान्तरस्याज्ञायमानतया आपाद्यव्यतिरेकनिश्चयस्यासम्भवेनापत्तिकारणस्याभावादिति चेद्।

न। व्यापकत्व-शब्दार्थतां[४] पक्षीकृत्य साध्यतावच्छेदकसम्बन्धावच्छि-

---

१. प्रकृतग्रन्थः (प्रथमो भागः), दीधितिमूलम्, पृ. ३३

२. तदेव, जागदीशीमूलम्, पृ. ३५

३. तदेव, दीधितिमूलम्, पृ. ३६

४. 'पदार्थताम्' इति प्रकाशकृतां पाठः।

न्नस्वप्रतियोगितावच्छेदकावच्छिन्नाधिकरणत्वादिरूपप्रतियोगिवैयधिकरण्यघटितवृत्तित्वेनापादकेनोक्तनिरूपकतानवच्छेदककालिकसम्बन्धावच्छिन्नाव्याप्यवृत्तितावद्वृत्त्यवृत्तित्वमेव ह्यापाद्यते, घटादिसाध्यकमहाकालत्वादेः सद्धेतुत्वनिश्चयादेव घटादौ महाकालत्वव्यापकत्वस्य निश्चयेनापाद्यव्यतिरेकनिश्चयसम्भवात्।

उत्तरग्रन्थेन प्रतियोगिवैयधिकरण्यान्तरस्य व्यापकत्वघटकस्य प्रतिपादनेनापादकासत्त्वप्रतिपादनमेव करिष्यत इति।

यद्वा महाकालत्वलिङ्गकघटादिविधेयकानुमितिर्यदि निरूप्यनिरूपकभावापन्नविषयताकमहाकालत्वसमानाधिकरणप्रतियोगिव्यधिकरणाभावप्रतियोगितानवच्छेदकघटत्वावच्छिन्नसमानाधिकरणमहाकालत्ववानयमिति परामर्षजन्या स्यादभ्रान्तपुरुषवृत्तिर्न स्यादित्यापादने तात्पर्यम्।

उत्तरग्रन्थे प्रतियोगिवैयधिकरण्यान्तरप्रतिपादनेन तद्घटितव्यापकताज्ञानस्य कारणत्वप्रतिपादनापादकासत्त्वसूचनेनापत्तिर्निराकरिष्यत इति।

केचित्तु विधेयतावच्छेदकत्वस्य व्यापकतावच्छेदकत्वनियतत्वेन तदभावप्रतिपादनेनोक्तनिरूपकतानवच्छेदककालिकसम्बन्धावच्छिन्नाव्याप्यवृत्तितावच्छेदकघटत्वे महाकालत्वलिङ्गकप्रमानुमितीयकालिकसम्बन्धावच्छिन्नविधेयतावच्छेदकत्वाभाव एवोक्तानुमितित्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकव्यापकत्वविषयतानिरूपितविषयत्वस्य प्रमीयविषयत्वीयस्वरूपसम्बन्धावच्छिन्नप्रतियोगिताकाभावेनापादकेनापाद्यते। व्यापकतावच्छेदकत्वविषयता च निरूप्यनिरूपकभावापन्ना ग्राह्येति नाप्रसिद्धिः। उत्तरग्रन्थेन कारणीभूतज्ञानस्य विषयसिद्धिद्वारा प्रमात्वप्रतिपादनेनापत्तिर्निराकरिष्यत इति वदन्ति।[३१७]

प्रकाशः – 'नन्वष्टद्रव्यातिरिक्तद्रव्यात्मककालमात्रवृत्तिधर्मस्य विशेषणताविशेषेणाव्याप्यवृत्ति किमपि व्यापकन्न स्यादि'ति दीधितिग्रन्थस्य आपाद्यापादकशैलीरीत्या कीदृशापाद्यापादकयोस्तात्पर्यमिति जिज्ञासायां तत्त्वालोककृता प्रथमतः कालिकसम्बन्धावच्छिन्नाव्याप्यवृत्तितावच्छेदके (घटत्वे) महाकालत्वसमानाधिकरणप्रतियोगिव्यधिकरणाभावप्रतियोगितानवच्छेदकत्वरूपव्यापकतावच्छेदकत्वाभावम् आपाद्यतया प्रदर्श्य आपादकतया च महाकालभेदप्रतियोगितावच्छेदकाधिकरणतानिरूपकतानवच्छेदककालिकसम्बन्धावच्छिन्नाव्याप्यवृत्तितावच्छेदकत्वम् अथवा महा-

कालवृत्तिभेदीयप्रतियोगितानिरूपितपरम्परावच्छेदकतावत्प्रतियोगितानवच्छेदकत्व-सम्बन्धावच्छिन्नाव्याप्यवृत्तितावच्छेदकत्वम्।

उक्ते आपाद्यापके [आपाद्यापादके] प्रदर्श्य तत्प्रतिषेधं करोति। स च न सम्भवति, आपाद्यस्याप्रसिद्धत्वात्, महाकाले घटादेः कालिकसम्बन्धेन सत्त्वेन महाकालत्वसमानाधिकरणप्रतियोगिव्यधिकरणाभावप्रतियोगितानवच्छेदकत्वरूपव्यापकतावच्छेदकत्वाभावस्याप्रसिद्धत्वात्।

अनन्तरम् 'न चे'त्यादिना स्व(महाकालत्व)समानाधिकरणप्रतियोगिव्यधिकरणाभावप्रतियोगितानवच्छेदकत्वसम्बन्धावच्छिन्नप्रतियोगिताकमहाकालत्वाभावस्यापाद्यतां शङ्कते।

तत्रोपपादनं करोति – उक्तसम्बन्धस्य तत्क्रियात्वादेः प्रसिद्धत्वेन तेन महाकालत्वाभावो नाप्रसिद्ध इति। अत्र 'इष्टापत्तेरि'त्युपन्यस्य प्रथमं स्वीकृतिं दर्शयति।

पुनरत्र शङ्कते। न च प्रतियोगिवैयधिकरण्यपदार्थत्वेन प्रवेशे नेष्टापत्तिरिति वाच्यम्।

अत्र समादधाति। तथापीदानीं प्रतियोगिवैयधिकरण्यान्तरस्याज्ञायमानतया आपाद्यव्यतिरेकनिश्चयस्यासम्भवेनापत्तिकारणस्याभावादिति चेन्न।

व्यापकत्वपदार्थतां पक्षीकृत्य साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगितावच्छेदकावच्छिन्नाधिकरणत्वादिरूपप्रतियोगिवैयधिकरण्यघटितवृत्तित्वेनापादकेनोक्तनिरूपकतानवच्छेदककालिकसम्बन्धावच्छिन्नाव्याप्यवृत्तितावद्वृत्त्यवृत्तित्वमेव ह्यापाद्यते।

व्यापकत्वशब्दार्थता महाकालवृत्तिभेदप्रतियोगितावच्छेदकाधिकरणतानिरूपकतानवच्छेदककालिकसम्बन्धावच्छिन्नाव्याप्यवृत्तितावद्वृत्त्यवृत्तिः, साध्यतावच्छेदकसम्बन्धावच्छिन्नस्वप्रतियोगितावच्छेदकावच्छिन्नाधिकरणत्वादिरूपप्रतियोगिवैयधिकरण्यघटितवृत्तित्वादिति तदर्थः।

यथा घटशब्दार्थता घटे घटत्वे च तिष्ठति, घटत्वविशिष्टघटे घटशब्दस्य शक्तिमत्त्वात्, तथैव व्यापकत्वशब्दार्थतापि व्यापके व्यापकतावच्छेदके च तिष्ठति। अतो व्यापकशब्दार्थता महाकालवृत्तिभेदप्रतियोगितावच्छेदकाधिकरणतानिरूपकतानवच्छेदककालिकसम्बन्धावच्छिन्नाव्याप्यवृत्तितावद्घटवृत्तिघटत्वावृत्तिः, साध्यतावच्छेदकसम्बन्धावच्छिन्नस्वप्रतियोगितावच्छेदकावच्छिन्नाधिकरणत्वादिप्रतियोगिवैय-

धिकरण्यघटितवृत्तित्वादिति तदर्थः। घटादिसाध्यकमहाकालत्वादेः सद्धेतुत्वनिश्चयादेव घटादौ महाकालत्वव्यापकत्वनिश्चयेन आपाद्यव्यतिरेकनिश्चयसम्भवात्।

उत्तरग्रन्थेन प्रतियोगिवैयधिकरण्यान्तरस्य [व्यापकत्वघटकस्य] प्रतिपादनेनापादकासत्त्व[प्रतिपादन]मेव करिष्यत इति।

यद्वा महाकालत्वलिङ्गकघटादिविधेयकानुमितिर्यदि निरूप्यनिरूपकभावापन्नविषयताकमहाकालत्वसमानाधिकरणप्रतियोगिव्यधिकरणाभावप्रतियोगितानवच्छेदकघटत्वावच्छिन्नसमानाधिकरणमहाकालत्ववानयमिति परामर्षजन्या स्यादभ्रान्तपुरुषवृत्तिर्न स्यादित्यापादने तात्पर्यम्।

उत्तरग्रन्थेन प्रतियोगिवैयधिकरण्यान्तरस्य प्रतिपादनेन तद्घटितव्यापकताज्ञानस्य कारणत्वप्रतिपादनापादकासत्त्वसूचनेनापत्तिर्निराकरिष्यत इति।

केचिदत्र वदन्ति यद् विधेयतावच्छेदकत्वस्य व्यापकतावच्छेदकत्वनियतत्वेन तदभावप्रतिपादनेनोक्तनिरूपकतानवच्छेदककालिकसम्बन्धावच्छिन्नाव्याप्यवृत्तितावच्छेदकघटत्वे महाकालत्वलिङ्गकभ्रमानुमितीयकालिकसम्बन्धावच्छिन्नविधेयतावच्छेदकत्वाभाव एवोक्तानुमितित्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकव्यापकत्वविषयतानिरूपितविषयत्वस्य प्रमीयविषयत्वीयस्वरूपसम्बन्धावच्छिन्नप्रतियोगिताकाभावेनापादकेनापाद्यते। व्यापकतावच्छेदकविषयता च निरूप्यनिरूपकभावापन्ना ग्राह्येति नाप्रसिद्धिः। उत्तरग्रन्थेन कारणीभूतज्ञानस्य विषयसिद्धिद्वारा प्रमात्वप्रतिपादनेनापत्तिर्निराकरिष्यत इति।[३१७]

तत्त्वालोकः – **'तदनधिकरणदेशे'ति[१]। देशपदोपादानादधिकरणत्वस्यावच्छेदको दैशिकसाक्षात्सम्बन्धेनोपलभ्यते[२]। तेन देशस्य कालिकेनाधिकरणत्वेऽपि न क्षतिर्न वा देशपदवैयर्थ्यमिति।[३१८]**

प्रकाशः – 'व्याप्यवृत्तिप्रमेयत्वादेः प्रतियोगिवैयधिकरण्याघटितमेव कालिकसम्बन्धावच्छिन्नव्यापकत्वं सम्भवत्यत उक्तम् अव्याप्यवृत्तीति। तादृशसाध्यं घटादिकं द्रव्यत्वादिकञ्च, तद्वतोऽपि कालस्य, तदनधिकरणदेशावच्छेदेन कालिकसम्बन्धावच्छिन्नतदभाववत्त्वादि'ति यदुपन्यस्तम्[३] तर्कालङ्कारेण, तत्र तत्त्वालोककृता 'देश'

---

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. ३७

२. 'साक्षात् सम्बन्धो लभ्यते' इति मुद्रितप्राचीनपुस्तके पाठः।

३. तदेव, जागदीशीमूलम्, पृ. ३७

पदोपादानप्रयोजनमुच्यते– 'देश' पदोपादानादधिकरणत्वस्यावच्छेदको दैशिकसाक्षात्सम्बन्धेनोपलभ्यत इति। तेन देशस्य कालिकेनाधिकरणत्वेऽपि[1] न क्षतिः, न वा 'देश'पदवैयर्थ्यमिति।[३१८]

तत्त्वालोकः– **'देशाप्रसिद्ध्या तदवच्छेदेने'ति[2]। वाच्यत्वत्वं यतो न किञ्चिन्निष्ठाधिकरणतानिरूपकतानवच्छेदकमतो न महाकालनिष्ठाभावप्रतियोगितावच्छेदकमिति तात्पर्यार्थः। तेनाप्रसिद्धस्यावच्छेदकत्वासम्भवेऽपि न क्षतिः।[३१९]**

प्रकाशः– 'देशाप्रसिद्ध्या तदवच्छेदेने'ति। 'तादृशसाध्यं घटादिकं द्रव्यत्वादिकञ्च, तद्वतोऽपि कालस्य, तदनधिकरणदेशावच्छेदेन कालिकसम्बन्धावच्छिन्नतदभाववत्त्वादि'त्युपन्यस्य 'नह्येवंविधो वाच्यत्वादिः, तदनधिकरणदेशाप्रसिद्ध्या तदवच्छेदेन कालिकसम्बन्धावच्छिन्नवाच्यत्वाभावस्य दैशिकविशेषणतया कालेऽसम्भवादि'ति यदुपन्यस्तम्[3] तर्कालङ्कारेण तदभिप्रेतार्थस्तत्त्वालोककृता उपस्थाप्यते– 'वाच्यत्वं यतो न किञ्चिन्निष्ठाधिकरणतानिरूपकतानवच्छेदकमतो न महाकालनिष्ठाभावप्रतियोगितावच्छेदकमिति तात्पर्यार्थः, तेनाप्रसिद्धस्यावच्छेदकत्वासम्भवेऽपि न क्षतिरि'ति।[३१९]

तत्त्वालोकः– **'महाकालान्यत्वविशिष्टघटाभावे'ति ['भाव'इति][4]। ननु घटवान् महाकालत्वादित्यत्राव्याप्तेरेव पूर्वमुक्ततया तत्स्थल एवाव्याप्तिवारणाशङ्का युक्ता, सा चासम्भाविनी, उक्तप्रतियोगित्वे साध्यतावच्छेदकतदितरोभयानवच्छिन्नत्वरूपविशेषणविरहात्, तस्य लक्षणघटकत्वे च तदवच्छेदकत्वस्यैव साध्यतावच्छेदके सत्त्वादिति चेद्।**

न। 'कालो घटवान् महाकालत्वादित्यादावि'त्यत्रादि[5] पदस्य प्रागुक्ततया महाकालान्यत्वविशिष्टघटाभावे[6]त्यत्राप्यादिपदस्योक्ततया च घटसाध्यके

---

१. 'दैशिक-साक्षात्सम्बन्धेनानधिकरणत्वादि'ति भावः।

२. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. ३७

३. तदेव, जागदीशीमूलम्, पृ. ३७

४. तदेव, जागदीशीमूलम्, पृ. ३७

५. तदेव, जागदीशीमूलम्, पृ. ३७

६. 'घटाद्यभावे'ति प्राचीनमुद्रितपुस्तके पाठः, स च समीचीनः प्रतिभाति। अनेन प्रतीयते यत्तदानीमुपलब्धजागदीशीग्रन्थे 'घटाद्यभाव' इत्यपि पाठ आसीत्।

महाकालान्यत्वविशिष्टपटाभावं पटसाध्यके महाकालान्यत्वविशिष्टघटाभाव-ञ्चादायाव्याप्तिवारण एव ग्रन्थतात्पर्यात्।

पृथिवीत्वव्याप्यघटत्वविशिष्टसाध्यके महाकालान्यत्वविशिष्टतेजस्त्व-व्याप्यघटत्वविशिष्टाभावमादायाव्याप्तिवारणे वा ग्रन्थतात्पर्यादिति।[३२०]

प्रकाशः – 'महाकालान्यत्वविशिष्टघटाभावे'ति। कालो घटवान् महाकाल-त्वादित्यत्र महाकालान्यत्वविशिष्टाभावस्य प्रतियोगिव्यधिकरणाभावत्वप्रसिद्धिर्यदुप-न्यस्ता तत्र तत्त्वालोककृत् शङ्कते– 'ननु घटवान् महाकालत्वादित्यत्राव्याप्तेरेव पूर्वमुक्ततया तत्स्थल एवाव्याप्तिवारणाशङ्का युक्ता, सा चासम्भाविनी, उक्तप्रतियोगित्वे साध्यतावच्छेदक-तदितरोभयानवच्छिन्नत्वविशेषणविरहादि'ति, 'तस्य लक्षणघटकत्वे च तदवच्छेदकत्वस्यैव साध्यतावच्छेदके सत्त्वान्नाव्याप्तिवारणसम्भव' इति च।

अत्र समाधानमुच्यते। कालो घटवान् महाकालत्वादित्यादावादिपदस्य पूर्वमुक्ततया महाकालान्यत्वविशिष्टघटा[द्य]भावेत्यत्राप्यादिपदस्योक्ततया च घटसा-ध्यके महाकालान्यत्वविशिष्टपटाभावं पटसाध्यके महाकालान्यत्वविशिष्टघटाभावञ्चा-दायाव्याप्तिवारण एव ग्रन्थतात्पर्यादिति, पृथिवीत्वव्याप्यघटत्वविशिष्टसाध्यके महा-कालान्यत्वविशिष्टतेजस्त्वव्याप्यघटत्वविशिष्टाभावमादायाव्याप्तिवारणे वा ग्रन्थतात्प-र्यादिति समाधानद्वयम्।[३२०]

तत्त्वालोकः– 'सुलभ' इति[१]। न च महाकालान्यत्वविशिष्टघटस्य महाकालावृत्तित्व एवाभावः प्रतियोगिव्यधिकरणस्तस्य च तत्त्वे महाकालस्य जगदाधारत्वप्रवादव्याकोप इति वाच्यम्, विशिष्टस्यानतिरिक्ततया कालिकेन विशेषणविशेष्योभयाधिकरणतयैव सर्वाधारत्वोपपत्तेरिति भावः।[३२१]

प्रकाशः – अत्र शङ्कते तत्त्वालोककृत्। न च महाकालान्यत्वविशिष्टघटस्य महाकालावृत्तित्व एवाभावः प्रतियोगिव्यधिकरणस्तस्य च तत्त्वे महाकालस्य जगदाधारत्वप्रवादव्याकोप इति वाच्यमिति।

अत्र समाधानमुच्यते। विशिष्टस्यानतिरिक्ततया कालिकेन विशेषणविशेष्योभ-याधिकरणतयैव सर्वाधारत्वोपपत्तेरिति भावः।[३२१]

---

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. ३७

तत्त्वालोकः – 'तथासति कालमात्रवृत्तिधर्मस्ये'ति[1]। 'मात्र'पदोपादानात् कालवृत्त्युभयावृत्तिधर्मस्य हेतुत्वं 'धर्म'पदोपादानाच्च येन सम्बन्धेन तन्मात्रवृत्तित्वं तेनैव सम्बन्धेन हेतुत्वञ्च लभ्यते।

तथा च कालवृत्त्युभयावृत्तिधर्ममात्रस्यैव विशेषणताविशेष[षे]ण स्वाश्रयनिरूपितविशेषणतया किमपि व्यापकन्न स्यादित्यर्थः।

तत्र धर्मस्य 'विशेषणताविशेषेणे'त्युक्तौ विशेषणतानिष्ठस्य प्रकृतहेत्वाश्रयनिरूपितत्वरूपस्य विशेषणस्यैव लाभेन कालत्वाश्रयनिरूपितविशेषणतया घटादिसाध्यककालत्वादिहेतोरप्युद्देश्यतया तत्राव्याप्तिविरहेण न्यूनता स्यादिति 'कालमात्रवृत्ती'ति।

प्रकृतहेत्वाश्रयनिरूपितत्वविशेषस्यैव[2] विवक्षितत्वेऽष्टद्रव्यातिरिक्तद्रव्यात्मककालमात्रवृत्तिधर्मस्य हेतुतायां महाकालनिरूपितविशेषणत्वमेव लभ्यत इत्याशयेन विशेषणताविशेषपदेन महाकालीयविशेषणतोक्ता।

एवञ्च महाकालीयविशेषणतयाऽव्याप्यवृत्ति किमपि व्यापकन्न स्यादिति कथन्नोक्तमित्याशङ्काप्यपास्ता, महाकालीयविशेषणतात्वेन शब्दानुपादेयत्वेन यथाश्रुते वैयर्थ्याभावादित्याशयः।[३२२]

प्रकाशः – ''न चात्र 'विशेषणताविशेष' पदेन महाकालनिरूपितविशेषणताया एव विवक्षितत्वात् तादृशसम्बन्धेन निरुक्तप्रतियोगिवैयधिकरण्याप्रसिद्ध्यैवोक्ताभावस्यापि प्रतियोगिवैयधिकरण्यासम्भव इति वाच्यम्, तथासति कालमात्रवृत्तिधर्मस्य तादृशविशेषणतया किमपि व्यापकन्न स्यादित्यस्यैव सम्यक्त्वेऽष्टद्रव्यातिरिक्तत्वाभिधानस्य सन्दर्भविरोधापत्तेरि''ति यदुपन्यस्तम्[3] तर्कालङ्कारेण, तत्र तत्त्वालोककृतोच्यते – 'मात्र'पदोपादानात् कालवृत्त्युभयावृत्तिधर्मस्य हेतुत्वं 'धर्म'पदोपादानाच्च येन सम्बन्धेन तन्मात्रवृत्तित्वं तेनैव सम्बन्धेन हेतुत्वञ्च लभ्यते। तथा च कालवृत्त्युभयावृत्तिधर्ममात्रस्यैव विशेषणताविशेष[षे]ण स्वाश्रयनिरूपितविशेषणतया किमपि व्यापकन्न स्यादित्यर्थः।

---

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. ३७

२. 'निरूपितत्वपरिशेषस्यैवे'ति प्राचीनमुद्रितपुस्तके पाठः।

३. तदेव, जागदीशीमूलम्, पृ. ३७

तत्र धर्मस्य 'विशेषणताविशेषेणे'त्युक्तौ विशेषणतानिष्ठस्य प्रकृतहेत्वाश्रयनिरूपितत्वरूपस्य विशेषणस्यैव लाभेन कालत्वाश्रयनिरूपितविशेषणतया घटादिसाध्यककालत्वादिरूपहेतोरप्युद्देश्यतया तत्राव्याप्तिविरहेण न्यूनता स्यादिति 'कालमात्रवृत्ती'ति।

यत्किञ्चित्काले तदसामानकालीनपटाद्यभावस्य प्रतियोगिव्यधिकरणत्वसम्भवेन तत्राव्याप्त्यसम्भवादित्याशयः। प्रकृतहेत्वाश्रयनिरूपितत्वविशेषस्यैव विवक्षितत्वेऽष्टद्रव्यातिरिक्तद्रव्यात्मककालमात्रवृत्तिधर्मस्य हेतुतायां महाकालनिरूपितविशेषणत्वमेव लभ्यत इत्याशयेन 'विशेष' पदेन महाकालीयविशेषणतोक्ता।

एवञ्च महाकालीयविशेषण[तया] अव्याप्यवृत्ति किमपि व्यापकन्न स्यादिति कथन्नोक्तमित्याशङ्काप्यपास्ता, उपपादितरीत्या तदर्थस्योक्तत्वादित्यर्थः। महाकालीयविशेषणतात्वेन शब्दानुपादेयत्वेन यथाश्रुते वैयर्थ्याभावादित्याशयः।[३२२]

तत्त्वालोकः – 'सन्दर्भविरोधापत्तेरि'ति[१]। तथा च विशेषरूपेण संसर्गत्वानभ्युपगमाभिप्रायकत्वमनुसृत्य विशेषणतानिष्ठस्य कालिकत्वस्यैव विशेषपदार्थताया वाच्यतया कालिकविशेषणतया साध्यतायां नाव्याप्तिरिति भावः।

'अष्टद्रव्यातिरिक्तद्रव्यात्मककालमात्रवृत्तिधर्मे'त्यन्तं 'विशेष'पदस्य महाकालीयत्वरूपविशेषे तात्पर्यग्राहकमिति न वैयर्थ्यसम्भव इति यदि ब्रूयात्तदाप्याह 'स्वरूपसम्बन्धेने'ति[२]।

'पूर्वपक्षस्यैवे'ति[३]। सम्बन्धधर्मिकोभयाभावघटितकल्पस्यैवेत्यर्थः। 'स्वरसत' इति[४]। महाकालत्वावच्छिन्नविषयत्वेनानुव्यवसीयमानतयेत्यर्थः। 'पटध्वंसविशिष्ट' इति[५]। इदानीं पटध्वंस इति प्रतीतेस्तत्तत्क्रियाविशिष्टमहाकालेऽधिकरणत्वावगाहिन्या विशेषणेऽधिकरणत्वानवगाहित्वे इत्यादिः। [३२३]

---

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. ३७

२. तदेव, जागदीशीमूलम्, पृ. ३७

३. 'पूर्वमतस्यैवे'ति पाठोऽधुनोपलब्धजागदीशीग्रन्थेषु। –तदेव, जागदीशीमूलम्, पृ. ३७

४. तदेव, जागदीशीमूलम्, पृ. ३८

५. तदेव, जागदीशीमूलम्, पृ. ३८

प्रकाशः – 'सन्दर्भविरोधापत्तेरि'ति यदुपन्यस्तन्तर्कालङ्कारेण, तत्रोच्यते। तथा च विशेषरूपेण संसर्गत्वानभ्युपगमाभिप्रायकत्वमनुसृत्य विशेषणतानिष्ठस्य कालिकत्वस्यैव विशेषपदार्थताया वाच्यतया कालिकविशेषणतया साध्यतायां (महाकालान्यत्वविशिष्टघटाभावमादाय लक्षणसङ्गतिसम्भवेन) नाव्याप्तिरिति भावः।

'अष्टद्रव्यातिरिक्तद्रव्यात्मककालमात्रवृत्तिधर्मे'त्यन्तं 'विशेष'पदस्य महाकालीयत्वरूपविशेषे तात्पर्यग्राहकमिति न वैयर्थ्यमिति यदि ब्रूयात्तदाप्याह 'स्वरूपसम्बन्धेने'ति।

पूर्वपक्षस्यैव = सम्बन्धधर्मिकोभयाभावघटितकल्पस्यैवेत्यर्थः। कालिकसम्बन्धेन गगनादेर्वृत्तिमत्त्वेऽपि तादृशसम्बन्धसामान्ये महाकालान्यत्वविशिष्टघटत्वावच्छिन्नप्रतियोगिकत्वविरहात्तादृशघटत्वावच्छिन्नाभावस्यैव निरुक्तक्रमेण प्रतियोगिव्यधिकरणत्वसम्भवेन पूर्वमतस्यैव = सम्बन्धधर्मिकोभयाभावघटितलक्षणस्यैव, सम्यक्त्वेन प्रतियोगिताधर्मिकोभयाभावघटितलक्षणानुसरणवैयर्थ्यापत्तेरिति भावः।

''इदानीं महाकालान्यत्वविशिष्टो घटः, कालोऽयं महाकालान्यत्वविशिष्टघटवानित्यादिप्रतीत्या महाकालस्यापि तत्तत्कालोपाध्यवच्छेदेन महाकालान्यत्वविशिष्टघटवत्त्वात्, अन्यथोक्तरीत्या खण्डकाल एव विशिष्टघटवत्त्वावगाहने वस्तुमात्रस्यैव महाकालेऽसत्त्वप्रसङ्गात्, इदानीं 'तदानीमि'त्यादिप्रतीतिव्यतिरेकेण महाकालविषयिण्याः प्रतीतेः स्वरसतः कुत्राप्यसत्त्वात्, न चैवं खण्डकालस्याधिकरणत्वे मानाभावः, 'पटध्वंसविशिष्टः कालः पटवदन्य' इत्यादिप्रतीतेः प्रमात्वानुरोधेन खण्डकालस्यापि तथात्वादिति सिद्धान्तानुसारी पन्थाः'' इति[१] यदुपन्यस्तन्तर्कालङ्कारेण, तत्रोच्यते। 'इदानीं पटध्वंस इति प्रतीतेस्तत्तत्क्रियाविशिष्टमहाकालेऽधिकरणत्वावगाहिन्या विशेषणेऽधिकरणत्वानवगाहित्वे इत्यादिः' इति।

'इदानीं पटध्वंस' इति प्रतीत्या खण्डकालेऽधिकरणत्वासिद्धावपि 'घटध्वंसविशिष्टः कालः पटवदन्य' इति प्रतीत्या प्रमात्मिकया खण्डकालेऽधिकरणत्वं सिद्ध्यत्येवेति भावः।[३२३]

तत्त्वालोकः – **एकव्यक्तिमात्रवृत्तिसाध्यकेऽप्यव्याप्तिं ग्राहयितुमाह 'उभयत्वेने'ति[२]।**

---

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. ३८

२. तदेव, जागदीशीमूलम्, पृ. ३८

यत्तु महानसीयत्वस्य महानसवृत्तित्वरूपतया तदवच्छिन्नप्रतियोगितायां साध्यतावच्छेदकताघटकसम्बन्धानवच्छिन्नावच्छेदकत्वानिरूपितत्वविरहेण लक्षणाघटकत्वादाह 'वह्निघटोभयत्वेने'ति[1]। न चोभयत्वमपि पर्याप्तिसम्बन्धेनैवावच्छेदकमिति तदवच्छिन्नाभावो न लक्षणघटक इति वाच्यम्, धर्मत्रयस्यावच्छेदकत्वस्थले समवायेनोभयत्वस्यावच्छेदकत्वेऽपि क्षत्यभावादिति।

तत्तुच्छम्। महानससंयोगविशिष्टवह्न्यभावस्यापि महानसीयवह्न्यभावत्वेन तदवारणादिति।[३२४]

प्रकाशः – 'अपरे तु महानसीयवह्नित्वेन वह्निघटोभयत्वेन वा अवच्छिन्नप्रतियोगिताकस्य धूमसमानाधिकरणाभावस्य प्रतियोगितावच्छेदकत्वं वह्नित्वेऽप्यस्तीत्यव्याप्तिभियाऽवश्यं साध्यतावच्छेदकत्वाघटको यः साध्यवृत्तिधर्मस्तदनवच्छिन्ना हेतुसमानाधिकरणाभावस्य प्रतियोगिता लक्षणे निवेशनीया, प्रत्येकमुभयत्र पर्याप्तिसम्बन्धेनासतो धर्मस्य तादृशसम्बन्धेनोभयवृत्तित्वासम्भवेन हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकतापर्याप्त्यधिकरणभिन्नत्वस्य निवेशायोगात्।

एवञ्च प्रकृते महाकालान्यत्वविशिष्टघटत्वा[द्य]वच्छिन्नाभावस्य प्रतियोगितायाः साध्यतावच्छेदकाघटकेन महाकालान्यत्ववैशिष्ट्यरूपसाध्यनिष्ठधर्मेणावच्छिन्नत्वात्तादृशप्रतियोगिताकाभावमादाय न प्रतियोगिव्यधिकरणाभावस्य प्रसिद्धिसम्भावनाऽपीति प्राहुः।

तच्चिन्त्यम्। प्रमेयवान् वाच्यत्वादित्यादौ हेतुसमानाधिकरणतादृशप्रतियोगिताकाभावाप्रसिद्ध्याऽव्याप्तिप्रसङ्गात्'।[2]

अत्रापरैरुपपादिते 'महानसीयवह्नित्वेन' इत्यादौ वह्निघटोभयत्वेन वेति कथमुपन्यस्तमिति जिज्ञासायां तत्त्वालोककृतोच्यते – 'एकव्यक्तिमात्रवृत्तिसाध्यकेऽप्यव्याप्तिं ग्राहयितुमाह वह्निघटोभयत्वेन वे'ति।

अत्र 'यत्तु' मतमुपन्यस्यते— यत्तु महानसीत्वस्य महानसवृत्तित्वरूपतया तदवच्छिन्नप्रतियोगितायां साध्यतावच्छेदकताघटकसम्बन्धानवच्छिन्नावच्छेदकत्वानिरूपितत्वविरहेण लक्षणाघटकत्वादाह 'वह्निघटोभयत्वेन वे'ति।

---

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. ३८

२. तदेव, जागदीशीमूलम्, पृ. ३८

न चोभयत्वमपि पर्याप्तिसम्बन्धेनैवावच्छेदकमिति तदवच्छिन्नाभावो न लक्षणघटक इति वाच्यम्, धर्मत्रयस्यावच्छेदकत्वस्थले समवायेनोभयत्वस्यावच्छेदकत्वे क्षत्यभावादिति।

तत्तुच्छम्। महानससंयोगविशिष्टवह्न्यभावस्यापि महानसीयवह्न्यभावत्वेन तदवारणात्। तत्र साध्यतावच्छेदकताघटकसमवायसम्बन्धेनैव महानससंयोगस्यावच्छेदकत्वादित्याशयः। अतो 'यत्तु' मतं निरस्तम्।[३२४]

तत्त्वालोकः– 'यत्र समवायेन घटत्व[1]विशिष्टस्ये'ति[2]। इदञ्च 'किमपि व्यापकन्न स्यादि'त्यत्र[3] 'किं' शब्दस्य समवायादिसम्बन्धेन धर्मविशिष्टार्थकतामभ्युपेत्य। तेन स्वरूपसम्बन्धेन यत्[4]किञ्चिद्विशिष्टसाध्यकस्थलेऽव्याप्त्यभावेऽपि न क्षतिः।[३२५]

***प्रकाशः*– 'वस्तुतो यादृशप्रतियोगितावच्छेदकविशिष्टस्यानधिकरणत्वं हेतुमत इत्यत्रावच्छेदकवैशिष्ट्यमवश्यं साध्यतावच्छेदकताघटकसम्बन्धेनैव वाच्यम्। अन्यथा तप्तायःपिण्डस्यापि कालिकेन धूमत्वविशिष्टस्य वह्न्यादेः संयोगसम्बन्धेनाधिकरणतया धूमवान् वह्नेरित्यादावतिव्याप्त्यापत्तेः। इत्थञ्च यत्र समवायेन घटत्वविशिष्टस्य कालिकेन साध्यता, तत्र महाकालान्यत्वविशिष्टघटत्वावच्छिन्नाभावस्य साध्यतावच्छेदकताघटकसम्बन्धेन प्रतियोगितावच्छेदकावच्छिन्नत्वमप्रसिद्धम्, स्वरूपसमवायाभ्यामेव तत्र तथात्वादि'ति यदुपन्यस्तम्[5] तर्कालङ्कारेण, तत्र तत्त्वालोककृतोक्तखण्डेनोच्यते। इदञ्च = यत्र समवायेन घटत्वविशिष्टस्य कालिकेन साध्यता इति कथनञ्च, 'किमपि व्यापकन्न स्यादि'त्यत्र किं शब्दस्य समवायादिसम्बन्धेन धर्मविशिष्टार्थकतामभ्युपेत्य। तेन स्वरूपसम्बन्धेन यत्किञ्चिद्विशिष्टसाध्यकस्थलेऽव्याप्त्यभावेऽपि न क्षतिः।

स्वरूपसम्बन्धेन तद्व्यक्तित्वविशिष्टस्य तद्व्यक्तेः कालिकेन साध्यतास्थलेऽव्याप्तिर्न स्यात्तत्र तद्व्यक्त्यसमानकालिकव्यक्त्यभावस्य महाकालान्यत्वविशिष्टघटा-

---

१. 'घटत्वादी'ति पाठः प्राचीनमुद्रितपुस्तके।

२. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. ३८

३. तदेव, दीधितिमूलम्, पृ. ३६

४. 'यदि'ति नास्ति प्राचीनमुद्रितपुस्तके।

५. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. ३८

भावादेर्वा लक्षणघटकत्वसम्भवादित्याशयः।[३२५]

तत्त्वालोकः– 'स्वरूपसमवायाभ्यामेव तत्र[१] तथात्वादि'ति[२]। अथ महाकालान्यत्वविशिष्टघटत्वावच्छिन्ननिरूपकताया अपि साध्यतावच्छेदकताघटकसमवायसम्बन्धावच्छिन्नघटत्वनिष्ठावच्छेदकताकतया कथन्तद्वारणमिति चेद्।

अत्र केचिद् वह्नित्वनिष्ठावच्छेदकतानिरूपिता सती महानसीयत्वनिष्ठावच्छेदकताकनिरूपकताया वह्न्यभावप्रतियोगितावच्छेदकावच्छिन्नतया तद्वारणाय साध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नत्वनिष्ठावच्छेदकतानिरूपिता सती प्रतियोगितावच्छेदकतासमानाधिकरणाधेयत्वसम्बन्धावच्छिन्नावच्छेदकतानिरूपिता या अवच्छेदकता, तद्भिन्ननिरूपकत्वनिष्ठावच्छेदकताभिन्नावच्छेदकतानिरूपितत्वेन भेदप्रतियोगितानिरूपितनिरूपकत्वनिष्ठावच्छेदकताया उपादेयतया महाकालान्यत्वनिष्ठावच्छेदकताया अधिकावच्छेदकत्वेन तादृशनिरूपकताकाधिकरणतावद्भेदस्य लक्षणाघटकत्वात्।

न च निरूपकतात्वनिष्ठावच्छेदकताभिन्नावच्छेदकताप्रतियोगितावच्छेदकताघटकसम्बन्धावच्छिन्नत्वनिष्ठावच्छेदकतानिरूपितावच्छेदकताभिन्नत्वेनाप्युपादेया। तथा च महाकालान्यत्वनिष्ठावच्छेदकतानिष्ठावच्छेदकताया उक्तभेदवत्त्वविरहेण महाकालान्यत्वविशिष्टघटत्वावच्छिन्ननिरूपकताकाधिकरणतावद्भेदस्य लक्षणघटकत्वसम्भवः।

यद्वा साध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नत्वनिष्ठावच्छेदकतानिरूपितावच्छेदकतानिरूपितत्वं स्वातन्त्र्येणैव निरूपकत्वनिष्ठावच्छेदकताविशेषणत्वेनोपादेयम्, न तु प्रतियोगितावच्छेदकतानिष्ठावच्छेदकतायां भेदप्रतियोगित्वेनोपात्तायामिति महाकालान्यत्वविशिष्टघटत्वावच्छिन्ननिरूपकताकाधिकरणतावद्भेदस्य लक्षणघटकत्वसम्भव इति वाच्यम्।

कालिकेन रूपत्वविशिष्टसाध्यकपृथिवीत्वे विषयितया रूपत्वविशिष्टाभावप्रतियोगितावच्छेदकावच्छिन्ननिरूपकतायाः कालिकसम्बन्धावच्छिन्नरूपत्वनिष्ठावच्छेदकतानिरूपितविषयित्वसम्बन्धावच्छिन्नावच्छेदकतानिरूपि-

---

१. 'तत्रे'ति पाठो नास्ति प्राचीनमुद्रिततत्त्वालोके।

२. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. ३८

ताया हेत्वधिकरणवृत्त्युक्तभेदप्रतियोगितावच्छेदकत्वेनाव्याप्तेः।

अथ प्रतियोगितावच्छेदकतात्वावच्छिन्नपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तिनिरूपकतायां साध्यतावच्छेदकताविशिष्टान्यसाध्यतावच्छेदकनिष्ठावच्छेदकत्वानिरूपितत्वं विशेषणम्वाच्यमन्यथा घटान्यत्वविशिष्टवाच्यत्वसाध्यकद्रव्यत्वे साध्याभावप्रतियोगितावच्छेदकावच्छिन्ननिरूपकतात्वस्य सामानाधिकरण्यसम्बन्धावच्छिन्नवाच्यत्वत्वनिष्ठावच्छेदकतानिरूपितस्वरूपसम्बन्धावच्छिन्नघटान्यत्वनिष्ठावच्छेदकतानिरूपितनिरूपकतायामपि सत्त्वेन तादृशनिरूपकताकाधिकरणतावद्भेदस्य हेत्वधिकरणे सत्त्वायोगादतिव्याप्त्यापत्तेः।

न चोक्तरूपवृत्तित्वनिष्ठावच्छेदकतानिरूपिता सती साध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नावच्छेदकताकत्वनिष्ठावच्छेदकतानिरूपितनिरूपकत्वनिष्ठावच्छेदकताभिन्नावच्छेदकत्वानिरूपिताधिकरणत्वनिष्ठावच्छेदकताभिन्नावच्छेदकत्वानिरूपितप्रतियोगिताकत्वेनैव भेद उपादेयः।

तथा चोक्तरूपवृत्तिसामानाधिकरण्यसम्बन्धावच्छिन्नघटभेदनिष्ठावच्छेदकतानिरूपितस्वरूपसम्बन्धावच्छिन्नवाच्यत्वत्वनिष्ठावच्छेदकतानिरूपितनिरूपकताकाधिकरणतावद्भेदस्याप्युक्तभेदत्वावच्छिन्नतया हेत्वधिकरणवृत्तित्वान्नातिव्याप्तिरिति वाच्यम्।

स्वरूपेण घटभेदविशिष्टत्वे सति सामानाधिकरण्यसम्बन्धेन वाच्यत्वत्वविशिष्टसाध्यकद्रव्यत्वे सद्धेतौ साध्याभावप्रतियोगितावच्छेदकगतरूपवृत्तिसामानाधिकरण्यसम्बन्धावच्छिन्नघटभेदनिष्ठावच्छेदकतानिरूपितस्वरूपसम्बन्धावच्छिन्नवाच्यत्वत्वनिष्ठावच्छेदकताकनिरूपकताकाधिकरणतावद्भेदस्य हेत्वधिकरणे सत्त्वेनाव्याप्त्यापत्तेः।

एवञ्च कालिकेन रूपत्वविशिष्टसाध्यकसद्धेतौ कालिकसम्बन्धावच्छिन्नरूपत्वनिष्ठावच्छेदकतानिरूपितविषयित्वसम्बन्धावच्छिन्नरूपत्वनिष्ठावच्छेदकतानिरूपितनिरूपकतायाः साध्यतावच्छेदकताविशिष्टान्यविषयित्वसम्बन्धावच्छिन्नावच्छेदकतानिरूपितत्वेनातादृशतयाऽव्याप्तिविरहेण साध्यतावच्छेदकताघटकसंसर्गतावच्छेदकतात्वावच्छिन्नपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तित्वं निरूपकतावच्छेदकतायान्निरूपकतायाम्वा न निवेश्यम्। तथा च घटवान् महाकालत्वादित्यत्र नाव्याप्तिसम्भवः।

यत्तु समवायेन वह्नित्वविशिष्टत्वे सति कालिकेन वह्नित्वविशिष्टस्य

प्रकारितया साध्यतायां समवायेन वह्नित्वविशिष्टविषयकज्ञानत्वे व्यभिचारिणि समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठावच्छेदकताकनिरूपकत्वमादायातिव्याप्तिवारणायोक्तरूपवृत्तित्वमेवावश्यन्निवेशनीयमेव, न तु भेदप्रतियोगितावच्छेदकतायां विशेषणत्वेन प्रागुक्तं साध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नत्वनिष्ठावच्छेदकतानिरूपितत्वमपीति।

तन्न। उक्तातिव्याप्तिवारणाय तादृशरूपावच्छिन्नानुयोगिताकपर्याप्तिकावच्छेदकताकसंसर्गताकत्वमात्रस्योपादेयत्वात्।

न च कालिकसम्बन्धावच्छिन्नावच्छेदकताकसमवायसम्बन्धावच्छिन्नावच्छेदकताकनिरूपकताक[1] निरूपकतावच्छेदकताया अपि नोक्तसंसर्गताकत्वसम्भव इति वाच्यम्। तादृशरूपवृत्तित्वस्यावच्छेदकतायामेव विशेषणत्वात्।

वृत्तित्वञ्च स्वनिरूपितसंसर्गतावच्छेदकताप्रतियोगिकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेनेति चेन्न।

साध्यतावच्छेदकताविशिष्टान्यावच्छेदकत्वानिरूपितत्वस्य निरूपकत्वविशेषणत्वाननुसन्धानेनैव समवायेन घटत्वविशिष्टसाध्यकमहाकालत्वेऽव्याप्त्यभिधानात्। तथासति समवायेन वह्नित्वविशिष्टस्य प्रकारितया साध्यतायां समवायेन वह्नित्वविशिष्टत्वे सति कालिकेन वह्नित्वविशिष्टविषयकज्ञानत्वे हेतौ साध्याभावप्रतियोगितावच्छेदकावच्छिन्ननिरूपकतात्वस्य कालिकसम्बन्धावच्छिन्नसमवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठावच्छेदकताकनिरूपकतायामपि सत्त्वेनातिव्याप्तेर्वारणाय साध्यतावच्छेदकताकसंसर्गतावच्छेदकतात्वावच्छिन्नपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तित्वस्य विवक्षणीयत्वात्।

वृत्तित्वञ्च व्यासज्यवृत्त्यवच्छेदकतापक्षे स्वनिरूपितसंसर्गतावच्छेदकतात्वावच्छिन्नपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धावच्छिन्नमवच्छेदकत्वनिष्ठमितरथा स्वावच्छेदकताघटकसंसर्गतावच्छेदकतात्वावच्छिन्नपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धावच्छिन्ननिरूपकत्वनिष्ठमेव बोध्यम्।

---

१. (क) 'निरूपकताके'ति नास्ति प्राचीनमुद्रितपुस्तके।

(ख) पं. षष्ठीनाथमिश्रैस्तु 'निरूपकताकनिरूपकतावच्छेदकताया' इत्यस्य स्थाने 'निरूपकताया' इत्येवं सङ्केतितम् स्वकीयपुस्तके।

यत्तु समवायेन वह्नित्वविशिष्टसाध्यके तत्तद्वह्न्यनुयोगिकसमवायेन वह्नित्वविशिष्टविषयकज्ञानत्वे हेतौ तत्तद्वह्न्यनुयोगिकसमवायेन वह्नित्वविशिष्टनिरूपकत्वमादायातिव्याप्तिवारणाय रूपवृत्तित्वन्निवेशनीयमिति।

तन्न। एतत्कल्पे विशेषरूपेण संसर्गत्वास्वीकारादन्यथा वह्नित्वप्रतियोगिकसमवायेन वह्नित्वविशिष्टसाध्यकसद्धेतौ प्रतियोगिव्यधिकरणाभावाप्रसिद्धेरव्याप्त्यापत्तेः।

न चैवं घटान्यत्वविशिष्टवाच्यत्वसाध्यके प्रागुक्तातिव्याप्तेः का गतिरिति वाच्यम्, प्रतियोगिताविशिष्टनिरूपकत्वस्यैव प्रतियोगितावच्छेदकरूपवृत्तित्वम्विहाय विवक्षितत्वात्।

वैशिष्ट्यञ्च स्वनिरूपितावच्छेदकताविशिष्टान्यावच्छेदकत्वानिरूपितत्वस्ववृत्तित्वोभयसम्बन्धेन।

वृत्तित्वञ्च स्वनिरूपितावच्छेदकताविशिष्टान्यावच्छेदकत्वानिरूपितत्व[1]सम्बन्धेन। वैशिष्ट्यञ्चोभयत्र स्ववृत्तित्वविकलचतुष्टयसम्बन्धेन।

तत्र च कालिकेन रूपत्वविशिष्टसाध्यके विषयितया रूपत्वविशिष्टत्वे सति कालिकेन रूपत्वविशिष्टाभावमादायाव्याप्तिवारणाय साध्यतावच्छेदकताघटकसंसर्गतावच्छेदकतात्वावच्छिन्नपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तित्वं विवक्षणीयम्।

एतेन महाकालान्यत्वविशिष्टघटत्वावच्छिन्ननिरूपकतायां समवायेन वह्नित्वविशिष्टस्य विषयितया साध्यतायां सद्धेतौ तत्तद्वह्न्यनुयोगिकसमवायेन वह्नित्वविशिष्टाभावमादायाव्याप्तिवारणाय विवक्षितस्य रूपवृत्तित्वस्य सम्पत्तये स्वनिरूपितसाध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नावच्छेदकतानिरूपितसंसर्गतावच्छेदकतात्वावच्छिन्नपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेनैव तद्वाच्यम्, निरूपकतावच्छेदकतायामेव वा तद् विशेषणम्।

घटकञ्च साध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नत्वन्न पर्याप्तिगर्भमिति निरस्तम्, उक्तदोषतादवस्थ्यात्, विशेषरूपेण संसर्गत्वानभ्युपगमात्।

व्यासज्यवृत्त्यवच्छेदकत्वपक्षे महाकालान्यत्वघटत्वोभयवृत्त्येकावच्छेदकताया सम्बन्धद्वयावच्छिन्नतया निरूपकत्वे रूपवृत्तित्वासम्भवाच्च।

---

१. 'निरूपितत्वोभये'ति पाठः प्राचीनमुद्रितपुस्तके।

साध्यतानिरूपितावच्छेदकताविशिष्टान्यावच्छेदकत्वानिरूपितत्वस्यैव विशेषणत्वे च कालिकेन घटत्वविशिष्टसाध्यकमहाकालत्वेऽव्याप्तिर्बोध्या। तत्र तादृशप्रतियोगितावच्छेदकावच्छिन्ननिरूपकतात्वस्य कालिकसम्बन्धावच्छिन्नमहाकालान्यत्वनिष्ठावच्छेदकतानिरूपितकालिकसम्बन्धावच्छिन्नघटत्व-निष्ठावच्छेदकतानिरूपितनिरूपकत्वेऽपि सत्त्वेन तादृशनिरूपकताकाधिकरणतावच्छेदस्य हेत्वधिकरणे विरहादिति।

इदन्तु चिन्तनीयम्। महाकालान्यत्वविशिष्टघटाभावस्य लक्षणघटकत्वसम्पत्त्यर्थमेव प्रतियोगितावच्छेदकावच्छिन्नत्वं प्रतियोगितावच्छेदकताघटकसम्बन्धेन वाच्यम्। प्रतियोगितावच्छेदकतायाः पारिभाषिकं साध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नत्वञ्च निवेशनीयम्।

न च साध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नत्वमपारिभाषिकं निरूपकतावच्छेदकतायामेव निवेशनीयम्, लाघवादिति वाच्यम्, फलमुखगौरवस्यादोषत्वात्, विशेषरूपेण संसर्गत्वास्वीकारे पारिभाषिक-तन्निवेशे प्रयोजनाभावाच्च।

अत एवानुपदमेवाविशिष्टसाध्यकेऽपि कालो घटवान् महाकालत्वादित्यत्राव्याप्तिवारणार्थमेव गुरुभूतस्य प्रतियोगितावच्छेदकविशिष्टाधिकरणत्वस्य प्रतियोगिवैयधिकरण्यघटकतया निवेशनं वक्ष्यति।

न च साध्यतावच्छेदकताघटकसम्बन्धेन प्रतियोगितावच्छेदकावच्छिन्नत्वघटितकल्पाभिप्रायेणैवाव्याप्त्यनुधावनमिति वाच्यम्, तथापि प्रतियोगितावच्छेदकताघटकसम्बन्धेन प्रतियोगितावच्छेदकावच्छिन्नत्वविवक्षयाऽव्याप्तिवारणसम्भवे प्रयासान्तरस्य सन्दर्भविरोधास्कन्दितत्वापत्तेरित्यलम्।[३२६]

प्रकाशः – [स्पष्टम्]।

तत्त्वालोकः – 'विशिष्टनिरूपितसमवायानभ्युपगमादि'ति[1]। तादृशप्रतियोगितावच्छेदकताघटकतयेत्यादिः। तथा च महाकालान्यत्वविशिष्टघटाद्यभावप्रतियोगितावच्छेदकं यदि सामानाधिकरण्यघटितसामानाधिकरण्यसम्बन्धेन महाकालान्यत्वविशिष्टघटत्वं स्यात्, स्यादेव समवायः प्रतियोगितावच्छेदकताघटकः। स च विशिष्टनिरूपित एव, विशिष्टस्य प्रतियोगितावच्छेदकत्वात्,

---

१. 'विशिष्टनिरूपितसमवायस्यानभ्युपगमादि'ति पाठोऽधुनोपलब्धजागदीशीग्रन्थेषु।
—प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. ३८

संसर्गता च तस्य विशिष्टनिरूपितसमवायत्वेन, समवायत्वमात्रेणेत्यन्यदेतत्।

परन्तु विशिष्टस्य प्रतियोगितावच्छेदकत्वमेव न स्वीक्रियते, गौरवात्, तदनुपस्थितावप्यभावप्रत्ययाच्च। तथासति न केवलः समवायः प्रतियोगितावच्छेदकताघटकः, स्वरूपस्य समवायस्य च तथात्वादित्याशयः।

ऋजवस्तु विशिष्टस्य प्रतियोगितावच्छेदकत्वे तन्निरूपितसमवाय एव प्रतियोगितावच्छेदकताघटकस्संसर्गः, स च न स्वीक्रियते इति महाकालान्यत्वविशिष्टघटत्ववदभावमादाय न प्रसिद्धिसम्भव इति वदन्ति।

तत्र सिद्धान्तभूतोभयाभावघटितकल्पे विशिष्टप्रतियोगिकसमवायाभ्युपगमस्य प्रतीयमानत्वात्, तादृशाभावपदेन महाकालान्यत्वविशिष्टघटत्ववदभावस्य विवक्षितत्वे 'अत'[1] इत्यस्यानन्वयापत्तेश्च।

अनभ्युपगमादित्यस्यैव प्रसिद्ध्यसम्भवे[2] हेतुत्वसम्भवात्। पूर्वव्याख्यानेऽनभ्युपगमादित्यन्तस्य स्वरूपसमवायाभ्यामेवेत्यत्र हेतुत्वाद् 'अत' इत्यस्योपसंहारार्थत्वान्नासङ्गतिः।[३२७]

प्रकाशः—तर्कालङ्कारेण 'वस्तुतो यादृशप्रतियोगितावच्छेदकविशिष्टानधिकरणत्वं हेतुमत इत्यत्रावच्छेदकविशिष्टत्वमवश्यं साध्यतावच्छेदकताघटकसम्बन्धेनैव वाच्यमन्यथा तप्तायःपिण्डस्यापि कालिकेन धूमत्वविशिष्टवह्न्यादेः संयोगसम्बन्धेनाधिकरणतया धूमवान् वह्नेरित्यादावतिव्याप्त्यापत्तेः, इत्थञ्च यत्र समवायेन घटत्वविशिष्टस्य कालिकेन साध्यता तत्र महाकालान्यत्वविशिष्टघटत्वावच्छिन्नाभावस्य साध्यतावच्छेदकताघटकसम्बन्धेन प्रतियोगितावच्छेदकावच्छिन्नत्वमप्रसिद्धम्, स्वरूपसमवायाभ्यामेव तत्र तथात्वात्, विशिष्टनिरूपितसमवायानभ्युपगमाद्, अतस्तादृशाभावमादाय न प्रसिद्धिसम्भव इति ध्येयमि'ति यदुपन्यस्तम्[3], तत्र तत्त्वालोककृतोच्यते 'तादृशप्रतियोगितावच्छेदकताघटकतयेत्यादिः। तथा च महाकालान्यत्वविशिष्टघटाभावप्रतियोगितावच्छेदकं यदि सामानाधिकरण्यघटितसामानाधिकरण्यसम्बन्धेन महाकालान्यत्वविशिष्टघटत्वं स्यात्, स्यादेव समवायः प्रतियोगितावच्छेदकताघटकः, स च विशिष्टनिरूपित एव, विशिष्टस्य प्रतियोगितावच्छेदकत्वात्, संसर्गता च तस्य विशिष्टनिरूपितसमवायत्वेन समवायत्वमात्रेण वेत्यन्यदि'ति।

---

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. ३८

२. 'प्रसिद्धिसम्भवे' इति पाठः प्राचीनमुद्रितपुस्तके।

३. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. ३८

विवक्षितार्थः अग्रे उच्यते 'परन्तु विशिष्टस्य प्रतियोगितावच्छेदकत्वमेव न स्वीक्रियते, गौरवात्, तदनभ्युपगमेऽपि अभावप्रत्ययाच्च' इति।

ऋजवस्तु विशिष्टस्य प्रतियोगितावच्छेदकत्वे तन्निरूपितसमवाय एव प्रतियोगितावच्छेदकताघटकः संसर्गः, स च न स्वीक्रियत इति महाकालान्यत्वविशिष्टघटत्ववदभावमादाय न प्रसिद्धिसम्भव इति वदन्ति।

तत्र सिद्धान्तभूतोभयाभावघटितकल्पे विशिष्टप्रतियोगिकसमवायाभ्युपगमस्य प्रतीयमानत्वात्, तादृशाभावपदेन महाकालान्यत्वविशिष्टघटत्ववदभावस्य विवक्षितत्वे 'अत' इत्यस्य अनन्वयापत्तेश्च, अनभ्युपगमादित्यस्यैव प्रसिद्धासम्भवे हेतुत्वसम्भवात्। पूर्वव्याख्याने अनभ्युपगमादित्यन्तस्य स्वरूपसमवायाभ्यामेवेत्यत्र हेतुत्वाद् 'अत' इत्यस्योपसंहारार्थकत्वान्नासङ्गतिः।[३२७]

तत्त्वालोकः– 'गौरवस्याकिञ्चित्करत्वादि'ति[१]। न चाविशिष्टसाध्यके प्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्यप्रवेशे घटवृत्तित्वोपलक्षितसत्तासाध्यकसद्धेतौ विशिष्टाभावमादायाव्याप्तिर्दोष इति वाच्यम्, पृथिवीसमवेतत्वासमनियतस्यापीत्याद्यवच्छेदकत्वनिरुक्तिग्रन्थव्याख्यानावसरे प्रसङ्गात्तद्वारणस्य वक्ष्यमाणत्वादिति।

'संयोगसामान्यस्य चेती'ति[२]। न च सत्त्वाधिकरणनित्यगुणे संयोगस्य वृत्तिनियामकेन सम्बन्धेन सत्त्वायोगात् कथमतिव्याप्तिरिति वाच्यम्, एकार्थसमवायेन तत्रापि सत्त्वादेकार्थसमवायस्य वृत्तिनियामकताया प्रागेवाङ्गीकृतत्वात्।

यत्तु नित्यान्यत्वविशिष्टसत्त्व 'आदि' पदग्राह्येऽतिव्याप्तौ तात्पर्यात्तत्र कालिकेन सर्वत्रैव हेत्वधिकरणे संयोगस्य सत्त्वादिति।

तन्न। तथासति ज्ञानसाध्यकेऽपि तथाऽतिव्याप्तेः सम्भवेन तत्परित्यागस्यानौचित्यात्। यदि चाव्याप्यवृत्तिसाध्यकेषु संयोगसाध्यकस्य प्रसिद्धत्वेन तत्रातिव्याप्तेस्सम्भविन्या अनुपादाने न्यूनता स्यादिति तदुक्तरीतिर्विभाव्यते, तदैतस्यैवावतरणत्वेन प्रतिपादयितुमुचितत्वादिति।[३२८]

---

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. ३९

२. तदेव, दीधितिमूलम्, पृ. ३९

प्रकाशः – 'न च तादृशसम्बन्धेन = साध्यतावच्छेदकसम्बन्धेन, हेत्वधिकरणीभूतयत्किञ्चिद्व्यक्त्यवृत्तिप्रतियोगितावच्छेदकविशिष्टप्रतियोगिसामान्यकत्वमेव वक्तव्यम्, तथा चावृत्तिगगनाभावद्वारैव तत्प्रसिद्धिरि'ति[१] दीधितेर्व्याख्यावसरे 'सत्ताधिकरणकर्मादौ समवायेन ज्ञानसामान्यस्य संयोगसामान्यस्य चावृत्तेर्ज्ञानवान् संयोगवान् वा सत्त्वादित्यादौ नातिप्रसङ्ग इत्यर्थः' इति[२] यदुपन्यस्तन्तत्रोच्यते —

'न च सत्त्वाधिकरणनित्यगुणे संयोगस्य वृत्तिनियामकेन सम्बन्धेन सत्त्वायोगात् कथमतिव्याप्तिरिति वाच्यम्, एकार्थसमवायेन तत्रापि सत्त्वादेकार्थसमवायस्य वृत्तिनियामकतायाः प्रागेवाङ्गीकृतत्वात्।

यत्तु नित्यान्यत्वविशिष्टसत्त्वे 'आदि' पदग्राह्येऽतिव्याप्तौ तात्पर्यात्तत्र कालिकेन सर्वत्रैव हेत्वधिकरणे संयोगस्य सत्त्वादिति। तन्न। तथासति ज्ञानसाध्यकेऽपि अतिव्याप्तेः सम्भवेन तत्परित्यागस्यानौचित्यात्।

यदि चाव्याप्यवृत्तिसाध्यकेषु संयोगसाध्यकस्य प्रसिद्धत्वेन तत्रातिव्याप्तेस्सम्भविन्या अनुपादाने न्यूनता स्यादिति तदुक्तरीतिर्विभाव्यते, तदैतस्यैवावतरणत्वेन प्रतिपादयितुमुचितत्वादि'ति।

तत्त्वालोकः – **'खण्डनादि'ति[३]। द्वित्वावच्छिन्नप्रतियोगित्वस्य व्यासज्यवृत्तित्वाद्वेत्यपि द्रष्टव्यम्। न च पूर्वं विशिष्टसाध्यकस्थलातिव्याप्तिपरिभवं मनसि निधाय विशिष्टसाध्यकस्थलोत्तरमुभयसाध्यकस्थलोत्कीर्तनमिदानीन्तद्विपरीतमिति सन्दर्भविरोध इति वाच्यम्, शिष्यबुद्धिवैशद्याय मतभेदेन तथोक्तेरदुष्टत्वादिति।**

यद्भट्टाचार्येण द्वन्द्वस्थलेऽल्पाचः पूर्वनिपातनियमेनोभयसाध्यकस्थलातिव्याप्तौ प्राधान्यसत्त्वेऽप्युत्तराभिधानस्याशक्यत्वादुपेक्षणमित्युक्तम्, तत्सन्दर्भसौष्ठवातिलोभादिति वेदितव्यम्। तत्रासमासेन सन्दर्भशुद्ध्यर्थमुभयसाध्यकस्थलस्य पश्चादुक्तेरेव न्याय्यत्वमस्वरसोऽभिमतस्तर्कालङ्कारस्येति ध्येयम्।-[३२९]

---

१. प्रकृतग्रन्थः (प्रथमो भागः), दीधितिमूलम्, पृ. ३९

२. तदेव, जागदीशीमूलम्, पृ. ३९

३. तदेव, जागदीशीमूलम्, पृ. ३९

प्रकाशः—दीधितिकृता 'भूतत्वमूर्तत्वोभयत्वविशिष्टं गुणकर्मान्यत्वविशिष्टसत्तात्वविशिष्टसत्तादिकन्तु न मनोगुणादिवृत्ती'ति यदुपन्यस्तम्[१], तत्र तर्कालङ्कारेण 'स्वयं मनसः खण्डनाद् भूतत्वमूर्तत्वोभयसाध्यकमूर्तत्वस्य सद्धेतुत्वमाशङ्कयाह गुणकर्मान्यत्वेत्यादी'ति यदुपन्यस्तम्[२], तत्र तत्त्वालोककृतोक्तखण्डेन विविच्यते।

द्वित्वावच्छिन्नप्रतियोगित्वस्य व्यासज्यवृत्तित्वाद्वेत्यपि द्रष्टव्यम्। मनसः सत्त्वेऽपि व्यासज्यवृत्तेः भूतत्वमूर्तत्वोभयत्वस्य मनसि सत्त्वासम्भवेन भूतत्वमूर्तत्वोभयसाध्यकमूर्तव्यस्य [मूर्तत्वस्य] सद्धेतुत्वमेवेत्याशयः।

अनन्तरं शङ्कते— यत् पूर्वं विशिष्टसाध्यकस्थलातिव्याप्तिपरिभवं मनसि निधाय विशिष्टसाध्यकोत्तरमुभयसाध्यकस्थलोत्कीर्तनमिदानीन्तद्विपरीतमिति सन्दर्भविरोध इति वाच्यम्।

अत्र समाधीयते। शिष्यबुद्धिवैशद्याय मतभेदेन तथोक्तेरदृष्टत्वादिति भट्टाचार्येण द्वन्द्वस्थले अल्पाचः पूर्वनिपातनियमेनोभयसाध्यकस्थलातिव्याप्तौ प्राधान्यसत्त्वेऽपि उत्तराभिधानस्याशक्यत्वात्तदुपेक्षणमिति[३]।

तत्सन्दर्भसौष्ठवातिलोभवशादिति वेदितव्यम्। तत्रासमासेनोभयसाध्यकस्थलस्य प्राधान्यासम्भवात् पश्चादुक्तेरेव न्याय्यम्, तत्रास्वरसोऽभिमतस्तर्कालङ्कारस्य। तथा चोभयसाध्यकस्थल इति व्याप्तौ तर्कालङ्कारेणादर्शितोऽस्वरस एव युक्तः, न तु भट्टाचार्योक्तं तत्र प्राधान्यमिति तदाशयः।[३२९]

तत्त्वालोकः— **'विशिष्टधर्मावच्छिन्नाधेयत्वस्यातिरिक्तत्वे'ति**[४]। तथा च विशिष्टसत्त्वसत्त्वयोरनतिरिक्तत्वेन गुणनिरूपिताधेयत्वस्य सत्तात्वावच्छेदेन तत्र सत्त्वेऽपि गुणनिरूपिताधेयत्वस्य विशिष्टसत्तात्वावच्छिन्नाधेयत्वातिरिक्ततयानवच्छेदकविशिष्टसत्तात्वावच्छेदेन तदभावस्तत्र वर्तत एव।

तयोरतिरिक्तत्वे मानञ्च सत्त्वं गुणवृत्ति, न विशिष्टसत्त्वमिति प्रतीतिरिति। प्रतियोगितावच्छेदकीभूतधर्मावच्छेदेन स्वप्रतियोगित्वसमानाधिकरणाभावाप्रतियोगियत्किंचिद्धेत्वधिकरणनिरूपितवृत्तित्वाभावकत्वरूपानुपदोक्तप्रतियोगिवैयधिकरण्यपर्यवसितार्थघटितलक्षणे नातिव्याप्तिसम्भवो न वा ग्रन्थासङ्गतिरित्याशयः।

---

१. प्रकृतग्रन्थः (प्रथमो भागः), दीधितिमूलम्, पृ. ३९
२. तदेव, जागदीशीमूलम्, पृ. ३९
३. अनुमानगादाधरी (प्रथमो भागः), सिद्धान्तलक्षणप्रकरणम्, पृ. ३५५
४. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. ४०

न च 'प्रतियोगितावच्छेदकावच्छेदेने'त्यनुक्तौ सत्तावान् जातेरित्यत्र विशिष्टसत्तात्वावच्छेदेन सत्ताभावप्रतियोगिनि गुणवृत्तित्वाभावसत्त्वेन तस्य लक्षणघटकत्वाव्याप्तिसम्भवे तत्परित्यागो नोचित इति वाच्यम्। स्वप्रतियोगि-वृत्तित्वस्य निरवच्छिन्नविशेषणतया विवक्षायां फलाभावेन व्यापकत्वासम्भ-वात्, भेदगर्भव्यापकताया आदरेऽव्याप्तिपरिहाराय वृत्तिभिन्नत्वस्यैव व्याप्यतया विवक्षितत्वादिति।

केचित्तु विशिष्टधर्मावच्छिन्नाधेयत्वस्यातिरिक्तत्वोक्त्या स्वप्रतियोगि-तावच्छेदकावच्छिन्नवृत्तित्वसामान्ये हेत्वधिकरणयत्किंचिद्व्यक्तिनिरूपितत्वा-भावस्य लक्षणघटकत्वमभिमतमिति वदन्ति।

तदसत्। जात्यादिसाध्यकातिव्याप्तेर्वक्ष्यमाणाया अलग्नकत्वापत्तेः।

यत्तु यत्किञ्चिद्धेत्वधिकरणनिरूपितवृत्तित्वसामान्यं स्वप्रतियोगिताव-च्छेदकानवच्छिन्नमिति, तद्यथाश्रुताननुगुणं तत्र 'सामान्य' पदस्य प्रतियोगिना सम्बन्धाव्याख्याने तु रमणीयमेवेति।[३३०]

प्रकाशः – 'भूतत्वमूर्तत्वोभयत्वविशिष्टं गुणकर्मान्यत्वविशिष्टसत्तात्वविशिष्ट-सत्तादिकन्तु न मनोगुणादिवृत्ती'ति दीधितेर्व्याख्यावसरे 'इदञ्च = निरुक्तातिव्याप्तिदा-नञ्च, विशिष्टस्यानतिरिक्तत्वं विशिष्टधर्मावच्छिन्नाधेयत्वस्यातिरिक्तत्वमभ्युपेत्य' इति[१] तर्कालङ्कारेण यदुपन्यस्तन्तत्रोक्तखण्डेनोच्यते—

विशिष्टस्य = भूतत्वविशिष्टमूर्तत्वस्य गुणकर्मान्यत्वविशिष्टसत्त्वस्य च, अ[न]तिरिक्तत्वं = शुद्धसत्त्वादितोऽनतिरिक्तत्वम्, एतेन प्रतियोगितावच्छेदकपर्यन्तान-नुसरणेऽतिव्याप्तिरस्त्येवेति सूचितम्।

विशिष्टधर्मावच्छिन्नाधेयत्वस्य विशिष्टसत्तात्वा[द्य]वच्छिन्नाधेयत्वस्य, अति-रिक्तत्वं = शुद्धसत्तात्वावच्छिन्नाधेयत्वादितो भिन्नत्वम्, एतेन प्रतियोगितावच्छेदकाव-च्छिन्नपर्यन्तानुसरणे नातिव्याप्तिरिति सूचितम्।

तथा च विशिष्टसत्त्वसत्त्वयोरनतिरिक्तत्वेन गुणनिरूपिताधेयत्व[स्य] सत्तात्वा-वच्छेदेन तत्र सत्त्वेऽपि गुणनिरूपिताधेयत्वस्य विशिष्टसत्तात्वावच्छिन्नाधेयत्वातिरिक्त-तयाऽनवच्छेदकविशिष्टसत्तात्वावच्छेदेन तदभावस्तत्र वर्तत एव। तयोरतिरिक्तत्वे मानञ्च सत्त्वं गुणवृत्ति न विशिष्टसत्त्वमिति प्रतीतिरिति।

---

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. ३९-४०

प्रतियोगितावच्छेदकीभूतधर्मावच्छेदेन स्वप्रतियोगित्वसमानाधिकरणाभावाप्रतियोगियत्किञ्चिद्धेत्वधिकरणनिरूपितवृत्तित्वाभावकत्वरूपानुपदोक्तप्रतियोगिवैयधिकरण्यपर्यवसितार्थघटितलक्षणे नातिव्याप्तिसम्भवो न वा ग्रन्थासङ्गति[रित्या]शयः।

तदर्थश्च यत्किञ्चिद्धेत्वधिकरणनिरूपितवृत्तित्वाभावः प्रतियोगितावच्छेदकधर्मावच्छेदेन स्वप्रतियोगित्वसमानाधिकरणाभावाप्रतियोगी, यस्याभावस्य तत्कत्वमेव, तत्राभावे प्रतियोगिवैयधिकरण्यम्, यथा वह्निमान् धूमादित्यत्र घटाभावे, तत्र यत्किञ्चिद्धेत्वधिकरणपर्वत[निरूपित]वृत्तित्वाभावो घटे, घटाभावप्रतियोगित्वसमानाधिकरणाभावाप्रतियोगीति भवति घटाभावः प्रतियोगिव्यधिकरणः, घटाभावस्य प्रतियोगित्वाश्रये घटे यत्किञ्चिद्धेत्वधिकरण (पर्वत) वृत्तित्वाभावस्याभावो नास्ति, अतः स्वप्रतियोगित्वसमानाधिकरणाभावाप्रतियोगी यत्किञ्चिद्धेत्वधिकरणनिरूपितवृत्तित्वाभावः सञ्जातः।

अत्र 'न चे'त्यादिना शङ्कते यत् 'प्रतियोगितावच्छेदेने'त्यनुक्तौ सत्तावान् जातेरित्यत्र विशिष्टसत्तावच्छेदेन सत्ताभावप्रतियोगिनि सत्तानतिरिक्तविशिष्टसत्त्वे गुणवृत्तित्वाभावसत्त्वेन तस्य लक्षणघटकतयाऽव्याप्तिसम्भवे तत्परित्यागो नोचित इति वाच्यमिति।

अत्र समाहितम्। स्वप्रतियोगिवृत्तित्वस्य निरवच्छिन्नविशेषणतया विवक्षायां फलाभावेन व्यापकत्वासम्भवादिति। सत्ताभावप्रतियोगिनि सत्त्वे गुणनिरूपितवृत्तित्वस्यैव सत्त्वेनोक्तदोषासम्भवादिति तदाशयः।

पुनश्चोच्यते भेदगर्भव्यापकत्वादरे = स्वसमानाधिकरणभेदप्रतियोगितानवच्छेदकधर्मवत्त्वरूपव्यापकत्वादरे, [अव्याप्तिपरिहाराय]वृत्तिभिन्नत्वस्यैव व्याप्यतया विवक्षितत्वादिति।

केचित्तु विशिष्टधर्मावच्छिन्नत्वस्यातिरिक्तत्वोक्त्या स्वप्रतियोगितावच्छेदकावच्छिन्नवृत्तित्वसामान्ये हेत्वधिकरणयत्किञ्चिद्व्यक्तिनिरूपितत्वाभावस्य लक्षणघटकत्वमभिमतमिति वदन्ति। तदसत्। जात्यादिसाध्यकातिव्याप्तेर्वक्ष्यमाणाया अलग्नकत्वापत्तेः।

यत्तु यत्किञ्चिद्धेत्वधिकरणनिरूपितवृत्तित्वसामान्यं स्वप्रतियोगितावच्छेदकानवच्छिन्नमिति। तद्यथाश्रुताननुगुणम्, तत्र 'सामान्य' पदस्य प्रतियोगिना सम्बन्धाव्याख्याने तु रमणीयमेवेति।[३३०]

तत्त्वालोकः— 'विशिष्टनिरूपिते'ति[१]। विशिष्टधर्मावच्छिन्नेत्यर्थः। गुणे विशिष्टसत्त्वन्नेति प्रतीतेः गुणेऽसमवायित्वभ्रमकालोत्पन्नाया विशिष्टसत्ताभाव-विषयकत्वावश्यकत्वे भ्रमविगमदशायामपि तदभावविषयकत्वस्यैव युक्तत्वा-द्विशिष्टसत्त्वन्न गुणवृत्तीत्यत्रापि हि विशिष्टसत्तात्वावच्छेदेन गुणनिरूपितवृत्ति-त्वाभावस्याविषयत्वाद्विशेष्यवृत्तित्वे विशिष्टावृत्तित्वस्य गुणवृत्तित्वेऽसम्भवाद्, गुणवृत्तित्वन्न विशिष्टसत्त्वावृत्तीति प्रत्ययविरहाद्।

न च कपिसंयोगो वृक्षावृत्तिरिति प्रत्ययविरहेऽपि प्रतियोग्यनवच्छेदकदे-शावच्छेदेन यथा तदभावस्तथा प्रकृतेऽप्यस्त्विति वाच्यम्। विशिष्टसत्तात्व-स्यान्यूनानतिप्रसक्ततया सत्तात्ववदवच्छेदकत्वेनानवच्छेदकत्वविरहाद्।

न च विशिष्टत्वन्न गुणवृत्तीत्यस्य का गतिरिति वाच्यम्, अस्वीकारस्यैव गतित्वाद्, नञर्थात्यन्ताभावस्य गुणवृत्तिना सहाभेदान्वयस्य वा व्युत्पत्तिवैचि-त्र्येणाङ्गीकारात्। प्रत्यक्षादावनियन्त्रितविषयताके स्व[सु]तरामेव सम्भवात्।-[३३१]

प्रकाशः—दीधितिकृता 'संयोगसामान्यन्तु न किञ्चिद् द्रव्यावृत्तीति वाच्यमि-'ति पूर्वपक्षग्रन्थानन्तरं 'विशिष्टस्यानतिरिक्तत्वादि'ति यदुपन्यस्तम्[२] तस्य व्याख्या तर्कालङ्कारेण 'विशिष्टनिरूपिताधेयत्वस्येत्यर्थः' इत्युपन्यस्य कृता[३]। तथा च 'विशिष्ट-सत्तावान् जातेरि'त्यादावतिव्याप्तिः, शुद्धसत्तात्वावच्छिन्ने गुणवृत्तित्वसत्त्वे विशिष्टस-त्ताभावप्रतियोगितावच्छेदकविशिष्टसत्तात्वावच्छिन्नेऽपि गुणवृत्तित्वस्य निर्बाधत्वेन साध्याभावस्य विशिष्टसत्ताभावस्य लक्षणाघटकत्वादिति तदाशयः।

तत्र तत्त्वालोककृतोच्यते 'विशिष्टधर्मावच्छिन्नाधेयत्वस्यानतिरिक्तत्वे गुणे विशिष्टसत्त्वन्नेति प्रतीतेः गुणेऽसमवायित्वभ्रमकालोत्पन्नायाः विशिष्टसत्त्वाभावविषयक-त्वावश्यकत्वे भ्रमविगमदशायामपि तदभाव = विशिष्टसत्त्वाभाव, विषयकत्वस्यैव युक्तत्वात्। विशिष्टसत्त्वं न गुणवृत्तीत्यत्रापि विशिष्टसत्तात्वावच्छेदेन गुणनिरूपितवृत्ति-त्वाभावस्याविषयत्वाद् विशेष्यवृत्तित्वे विशिष्टावृत्तित्वस्य गुणवृत्तित्वेऽसम्भावादि'ति, गुणवृत्तित्वन्न विशिष्टसत्त्वावृत्तीति प्रत्ययविरहात्।

---

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. ४०

२. तदेव, दीधितिमूलम्, पृ. ३९

३. तदेव, जागदीशीमूलम्, पृ. ४०

अत्र 'न चे'त्यादिना शङ्कते। न च कपिसंयोगो वृक्षावृत्तिरिति प्रत्ययविरहेऽपि प्रतियोग्यनवच्छेदकदेशावच्छेदेन यथा तदभावस्तथा प्रकृतेऽप्यस्त्विति वाच्यम् इति।

अत्र समाधानं करोति। विशिष्टसत्तात्वस्यान्यूनानतिप्रसक्ततया सत्तात्ववदवच्छेदकत्वेनानवच्छेदकत्वविरहादिति।

पुनः शङ्कते। न च विशिष्टसत्त्वं न गुणवृत्तीत्यस्य का गतिरिति वाच्यमिति।

समाधीयते। अस्वीकारस्यैव गतित्वात्। नञर्थात्यन्ताभावस्य गुणवृत्तिना सहाभेदान्वयस्य वा व्युत्पत्तिवैचित्र्येणाङ्गीकारात्, प्रत्यक्षादावनियन्त्रितविषयता[के] स्व[सु]तरामेव सम्भवादिति।[३३१]

तत्त्वालोकः – समवायेन कोऽपि न जातिवृत्तिरिति प्रतीत्यनुरोधेनोक्तविषयकत्वरीतेरङ्गीकरणीयत्वात्। विशिष्टसत्त्वं यदि गुणवृत्ति स्यात्, गुणवृत्तिसत्त्वभिन्नं स्यादिति सत्त्वाभेदेन गुणवृत्तित्वस्यैव प्रत्युत सिद्धेः, विशिष्टसत्तावान् जातेरित्यत्रातिव्याप्तिरिति भावः।

विशेष्यवृत्तेर्विशिष्टानुयोगिकाभावमनभ्युपेत्य विशिष्टधर्मावच्छिन्नाधेयत्वस्यातिरिक्तत्वमभ्युपेत्य चोक्तप्रतीतेर्विशिष्टसत्तात्वानवच्छिन्नगुणवृत्तित्वविषयकत्वेनोपपत्तिं विधाय विशिष्टस्यानतिरिक्तत्वादिति ग्रन्थो यद्भट्टाचार्येण ऋजुमार्गेण व्याख्यातस्तदनेन विशेष्यवृत्तेर्विशिष्टानुयोगिकाभावानभ्युपगमस्यायुक्तिकस्याङ्गीकारानर्हत्वमालोच्य तर्कालङ्कारेण तत्परित्यक्तम्, तत्र युक्त्यनुसरणे विशिष्टधर्मावच्छिन्नाधेयत्वस्यानतिरिक्ततायामेव पर्यवसानमिति गृहाण।[३३२]

प्रकाशः – [स्पष्टम्]।

तत्त्वालोकः – 'अतिरिक्तत्वोपगम' इति[१]। इदमुपलक्षणम्। अनतिरिक्तत्वोपगमेऽपि[२] हेत्वधिकरणयत्किञ्चिद्व्यक्तिनिष्ठाधिकरणत्वसामान्य उभयाभावविवक्षायां दोषाभाव इति।

अथ 'यत्किञ्चिद्धेत्वधिकरणनिरूपितसामान्य' इत्येवोच्यतामलं वृत्तितात्वनिवेशेनेति चेद्।

---

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. ४०

२. 'अनतिरिक्तत्वेऽपी'ति पाठः प्राचीनमुद्रिततत्त्वालोकग्रन्थे।

न। संयोगेन घटसाध्यकसंयोगसम्बन्धावच्छिन्नघटाभावत्वहेतुकव्यभिचारिण्यतिव्याप्तेर्घटाभावनिरूपितप्रतियोगित्वे घटाभावप्रतियोगितावच्छेदकावच्छिन्नत्वसंयोगसम्बन्धावच्छिन्नत्वयोस्सत्त्वाद्।

न चावच्छिन्नत्वस्य विलक्षणत्वेन वृत्तितानिष्ठस्यैव प्रवेश्यतया प्रतियोगित्वे तदभावोऽक्षत एवेति वाच्यम्।

प्रतियोगित्वाधेयत्वादेः प्रतियोग्याधेयस्वरूपत्वेऽवच्छेदकरूपत्वे वा घटत्वावच्छिन्नप्रतियोगित्वाधेयत्वयोरैक्येनाधेयतानिष्ठयोरपि तयोर्नाभावः प्रतियोगित्व इत्यतिव्याप्तेराधेयतात्वोपादाने चाधेयतात्वावच्छिन्ननिरूप्यताया एव निविष्टत्वेन प्रतियोगित्वे तद्विरहान्नातिव्याप्तिरिति।[३३३]

प्रकाशः – पूर्वदर्शितप्रतियोगिवैयधिकरण्यप्रकारे विशिष्टधर्मावच्छिन्नाधेयत्वस्यानतिरिक्तत्वे विशिष्टसत्तावान् जातेरित्यत्रातिव्याप्तिरुक्ता। तदनन्तरं 'अत्र विशिष्टनिरूपिताधेयत्वस्यातिरिक्तत्वोपगमे स्वप्रतियोगितावच्छेदकावच्छिन्नत्व, - साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वोभयाभाववद्धेत्वधिकरण-यत्किञ्चिद्व्यक्तिवृत्तित्वसामान्यकत्वस्य विवक्षणान्नोक्तदोष इत्यस्मद्गुरुचरणा' इति तर्कालङ्कारेणोपन्यस्तम्[१]।

यत्किञ्चिद्धेत्वधिकरणनिरूपितवृत्तित्वसामान्ये यदभावप्रतियोगितावच्छेदकावच्छिन्नत्व, - साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वोभयाभावस्तदभावव्यक्तित्वमेव प्रतियोगिव्यधिकरणत्वमिति तदर्थः।

तथाविवक्षणे विशिष्टधर्मावच्छिन्नाधेयत्वस्यातिरिक्तत्वोपगमे यत्किञ्चिद्धेत्वधिकरणगुणनिरूपितवृत्तित्वसामान्ये विशिष्टसत्ताभावप्रतियोगितावच्छेदकावच्छिन्नत्व, - साध्यतावच्छेदकसमवायसम्बन्धावच्छिन्नत्वोभयाभावसत्त्वेन विशिष्टाभावस्य प्रतियोगिव्यधिकरणतया लक्षणघटकत्वान्नातिव्याप्तिरिति तदाशयः।

तत्र तत्त्वालोककृतोक्तखण्डेन विशेषप्रकाशः क्रियते। इदमुपलक्षणम्। अनतिरिक्तत्वोपगमेऽपि हेत्वधिकरणयत्किञ्चिद्व्यक्तिनिष्ठाधिकरणत्वसामान्ये उभयाभावविवक्षायां दोषाभावात्।

हेत्वधिकरण-यत्किञ्चिद्व्यक्तिनिष्ठाधिकरणत्वसामान्ये यदभावप्रतियोगितावच्छेदकावच्छिन्नाधेयतानिरूपितत्व, - साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वो[भया]-

---

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. ४०

भावस्तदभावप्रतियोगितानवच्छेदकसाध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यं व्याप्तिरिति तत्पर्यवसितार्थः।

तथा विशिष्टसत्तावान् जातेरित्यत्र नातिव्याप्तिः। तादृशाधिकरणत्वसामान्यान्तर्गतकालिकादिसम्बन्धान्तरावच्छिन्नाधिकरणत्वे उक्तोभयाभावस्य सत्त्वात्।

अत्र शङ्कते। अथ 'यत्किञ्चिद्धेत्वधिकरणनिरूपितसामान्ये' इत्येवोच्यताम्। अलं वृत्तितात्वनिवेशेनेति।

अत्र समाधीयते। संयोगेन घटसाध्यकसंयोगसम्बन्धावच्छिन्नघटाभावत्वहेतुकव्यभिचारिण्यतिव्याप्तेः, घटाभावनिरूपितप्रतियोगित्वे घटाभावप्रतियोगितावच्छेदकावच्छिन्नत्वसंयोगसम्बन्धावच्छिन्नत्वयोस्सत्त्वात्, साध्याभावस्य लक्षणाघटकत्वेनातिव्याप्तेः।

पुनः शङ्कते। न चावच्छिन्नत्वस्य विलक्षणत्वेन वृत्तितानिष्ठस्यैव प्रवेश्यतया प्रतियोगित्वे तदभावोऽक्षत एवेति वाच्यम् इति।

अत्र समाधीयते। प्रतियोगित्वाधेयत्वादेः प्रतियोग्याधेयस्वरूपत्वेऽवच्छेदकरूपत्वे वा घटत्वावच्छिन्नप्रतियोगित्वाधेयत्वयोरैक्येनाधेयतानिष्ठयोरपि तयोर्नाभावः प्रतियोगित्वे इत्यतिव्याप्तेः। आधेयत्वोपादाने च = वृत्तितात्वोपादाने च, आधेयतात्वावच्छिन्ननिरूप्यताया एव निविष्टत्वेन प्रतियोगित्वे तद्विरहान्नातिव्याप्तिरिति।[३३३]

तत्त्वालोकः – ननु वृत्त्यनियामकसम्बन्धेन साध्यतायां सद्धेतौ हेत्वधिकरणनिरूपितवृत्तित्वसामान्ये साध्याभावप्रतियोगितावच्छेदकावच्छिन्नत्व, - साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वयोरभावसत्त्वेनाव्याप्तेरेतत्कल्पे सम्भवितया तदुपेक्षाया निर्बीजत्वापत्तिः। यदि च सम्बन्धित्वन्निवेश्यते, तदा प्रतियोगितावच्छेदकावच्छिन्न-यत्किञ्चिद्धेत्वधिकरणनिरूपितसम्बन्धित्वसामान्ये साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वाभावस्यैवास्तु लक्षणत्वमिति चेद्।

न। विभिन्नकालीनयोः स्ववृत्तिवाच्यत्वादीनामपि सम्बन्धत्वाभावे तद्घटवान् तत्क्रियात्वादित्यत्रातिव्याप्तेः। तेषां तत्सम्बन्धत्वे त्वेतस्य लक्षणान्तरत्वमेवावसेयमिति।

न चोभयाभावमुपेक्ष्य विशिष्टाभाववचनमेवोचितमिति वाच्यम्। व्यधिकरणसम्बन्धेन व्यापकत्वापत्तेरुभयोरेकत्राधेयत्वविरहेण वैशिष्ट्यासम्भवेन साध्याभावस्य लक्षणाघटकत्वात्। वह्नीयसंयोगेन साध्यतायां प्रतियोगि-

तावच्छेकावच्छिन्नत्व, - साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वयोरेकत्राधेयत्वे विरहेण वैशिष्ट्याप्रसिद्ध्याऽभावाप्रसिद्धेरव्याप्तेरिति।

अत्र साध्यतावच्छेदकसम्बन्धावच्छिन्नवृत्तित्वसामान्ये हेत्वधिकरणयत्किञ्चिद्व्यक्तिनिरूपितत्व, - यादृशाभावप्रतियोगितावच्छेदकावच्छिन्नत्वोभयाभावस्य यादृशाभावप्रतियोगितावच्छेदकावच्छिन्ननिरूपकत्वसामान्ये हेत्वधिकरणयत्किञ्चिद्व्यक्ति[1]निष्ठसम्बन्धितानिरूपितत्व,- साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वोभयाभावस्य च लक्षणान्तरत्वं बोध्यम्।

एवं हेत्वधिकरणयत्किञ्चिद्व्यक्तिनिरूपितवृत्तित्वनिरूपितवृत्तितानवच्छेदकत्वं यादृशप्रतियोगितावच्छेदकावच्छिन्नत्व, - साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वोभयत्वे लक्षणान्तरघटकतयाऽवगन्तव्यमिति।[३३४]

प्रकाशः – [स्पष्टम्]।

तत्त्वालोकः – 'नव्यास्तु साध्यतावच्छेदकसम्बन्धेने'त्यादि[2]। अत्र हेत्वधिकरणत्वव्यापकाधिकरणतानिरूपकतावच्छेदकधर्मावच्छिन्नप्रतियोगिताभिन्नत्वेन प्रतियोगितानिवेशः पर्यवसितः।

स्वावच्छेदकधर्मावच्छिन्नाधिकरणतावत्त्वसम्बन्धेन हेत्वधिकरणत्वव्यापकप्रतियोगिताभिन्नत्वेन वा संयोगादिसम्बन्धेन रूपादीनां पृथिवीत्वव्यापकत्ववारणाय च तादृशप्रतियोगितानवच्छेदके साध्यतावच्छेदकसम्बन्धावच्छिन्नसम्बन्धितावच्छेदकत्वं विशेषणं वाच्यम्।

यद्यपि हेत्वधिकरणत्वसमानाधिकरणावच्छेदकतानिरूपितवृत्तितात्वावच्छिन्नप्रतियोगिताकाभाववान्नेति प्रतीतिसिद्धसामान्यभेदवत्त्वस्य यादृशप्रतियोगितावच्छेदकावच्छिन्नाधिकरणत्वे निवेशे न कोऽपि दोषस्तथापि हेत्वधिकरणत्वव्यापकत्वनिवेशापेक्षया न पर्यवसाने लाघवमिति बोध्यम्।[३३५]

प्रकाशः – तर्कालङ्कारेण नव्यमततया साध्यतावच्छेदकसम्बन्धेन स्वप्रतियोग्यधिकरणयावद्धेत्वधिकरणको यो यस्तदन्यत्वं प्रतियोगिवैयधिकरण्यमुक्तम्[3]। वह्निमान् धूमादित्यत्र घटाभावस्य तादृशप्रतियोगिव्यधिकरणाभावतया लक्षणसङ्गतिः।

---

१. 'व्यक्ती'ति नास्ति प्राचीनमुद्रितपुस्तके।
२. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. ४१
३. तदेव, जागदीशीमूलम्, पृ. ४१

धूमवान् वह्नेरित्यत्र संयोगेन धूमाभावप्रतियोगिनो धूमस्य संयोगेनाधिकरणताया अयोगोलके विरहेण यदभावपदेन धूमाभावस्य धर्तुमशक्यत्वात्तादृशवह्न्यभावभिन्नत्वस्य धूमाभावे सत्त्वेनातिव्याप्तिविरहः।

घटवान् महाकालत्वादित्यत्र गगनाभावस्तादृशप्रतियोगिव्यधिकरणोऽभावः गगनस्य, कालिकेनाधिकरणत्वाप्रसिद्ध्या यदभावपदेन तस्य धर्तुमशक्यत्वात्, तत्त्वालोककृतात्रोच्यते — 'अत्र हेत्वधिकरणत्वव्यापकाधिकरणतानिरूपकतावच्छेदकधर्मावच्छिन्नप्रतियोगिताभिन्नत्वेन प्रतियोगितानिवेशः पर्यवसितः' इति।

'स्वावच्छेदकधर्मावच्छिन्नाधिकरणतावत्त्व' सम्बन्धेन हेत्वधिकरणत्वव्यापकप्रतियोगिताभिन्नत्वेन वा प्रतियोगिताया निवेशः।

अनन्तरमुच्यते 'संयोगादिसम्बन्धेन रूपादीनां पृथिवीत्वव्यापकत्ववारणाय च तादृशप्रतियोगितानवच्छेदके साध्यतावच्छेदकसम्बन्धितावच्छेदकत्वं विशेषणं वाच्यमि'ति। साध्यतावच्छेदकसंयोगसम्बन्धावच्छिन्नसम्बन्धितावच्छेदकत्वस्य रूपत्वे विरहान्नोक्तदोषः।

एतदग्रे तत्त्वालोककृता विशेष उच्यते — यद्यपि हेत्वधिकरणत्वसमानाधिकरणावच्छेदकतानिरूपितवृत्तितात्वावच्छिन्नप्रतियोगिताकाभाववान्नेति प्रतीतिसिद्धसामान्यभेदवत्त्वस्य यादृशप्रतियोगितावच्छेदकावच्छिन्नाधिकरणत्वे निवेशे न कोऽपि दोषस्तथापि हेत्वधिकरणत्वव्यापकत्वनिवेशापेक्षया न पर्यवसाने लाघवमिति बोध्यमिति।

हेत्वधिकरणत्वसमानाधिकरणावच्छेदकता = अत्यन्ताभावीया भेदीया वा प्रतियोगितानिरूपिता परम्परीयावच्छेदकता, निरूपिता वृत्तित्वावच्छिन्ना प्रतियोगिताकाभाववान्नेति प्रतीतिसिद्धसामान्यभेदवत्त्वस्य हेत्वधिकरणनिरूपितवृत्तित्वं नास्तीति सामान्याभावो वह्न्यभावे वर्तते, तादृशाभाववान्नेति भेदस्य यादृशप्रतियोगितावच्छेदकावच्छिन्नाधिकरणे निवेशे यद्यपि न कोषः [कोऽपि दोषः]।

साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकसाध्याभाववान्नेति भेदो लक्षणघटकाभावप्रतियोग्यधिकरणे वर्तते, तत्प्रतियोगितानवच्छेदकत्वस्य साध्यतावच्छेदके सत्त्वान्नाव्याप्तिरित्याशयः।[३३५]

तत्त्वालोकः– 'न चैवमि'ति[१]। 'एवमि'त्यस्य यथाश्रुतार्थपरित्याग इत्यर्थः। समवायेन घटाद्यभावोऽपि प्रतियोगिव्यधिकरण इति।

---

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. ४१

न चैतल्लक्षणस्याभावाघटिततयेदमसङ्गतमिति वाच्यम्, एतस्योदक्षरत्व-वारणाय स्वप्रतियोगितावच्छेदकसम्बन्धेन यत्प्रतियोगितावच्छेदकावच्छिन्ना-धिकरणं हेत्वधिकरणं तत्प्रतियोगितावच्छेदकसम्बन्धान्यसाध्यतावच्छेदकस-म्बन्धेन तत्प्रतियोगितावच्छेदकसाध्यतावच्छेदकावच्छिन्नसामानाधिकरण्ये तात्पर्यस्य वाच्यतया प्रतियोगिव्यधिकरणाभावघटितत्वेनासङ्गत्यभावात्।

प्रतियोगिवैयधिकरण्यकोटौ प्रतियोगितावच्छेदकत्वेन साध्यतावच्छेद-कस्यानुपादानत्वेन तत्त्वरूपप्रतियोगिव्यधिकरणाभावत्वस्य पटाद्यभावे सम्भ-वेन 'घटाद्यभावोऽपी'[1]त्यस्य नासङ्गतिः। यत्तत्पदञ्चाभावपरं बोध्यम्।

यत्प्रतियोगित्वप्रवेशस्य वैयर्थ्यन्तु नाशङ्कनीयम्। यथाश्रुतेऽपि यद्धर्माव-च्छिन्नानधिकरणं हेत्वधिकरणं तद्भिन्नत्वस्य लक्षणत्वसम्भवे धर्मस्याभावप्रति-योगितावच्छेदकत्वेनोपादाने वैयर्थ्यशङ्काया दुर्निवारत्वात्।

अनुगमस्तु अभावविशिष्टाभाववदन्यसाध्यतावच्छेदकसम्बन्धधर्माव-च्छिन्ननिरूपकताकाधिकरणतावद्वृत्तित्वनिवेशेन।

वैशिष्ट्यञ्च स्वतादात्म्य, - स्वप्रतियोगितावच्छेदकावच्छिन्नत्व-प्रतियोगितावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेन। स्वविशिष्टनिरूपकता-काधिकरणतावदन्यहेत्वधिकरणवृत्तित्वोभयसम्बन्धेन। अभाववत्ता च स्व-प्रतियोगितावच्छेदकसम्बन्धावच्छिन्नत्व, - स्वप्रतियोगितावच्छेदकधर्माव-च्छिन्नत्वोभयसम्बन्धेन।

यद्वा सम्बन्धवदन्यसाध्यतावच्छेदकसम्बन्धेन साध्यतावच्छेदकावच्छि-न्नसामानाधिकरण्यमनुगतम् व्याप्तिः। सम्बन्धवत्ता च स्वतादात्म्य, - स्ववृत्त्यभावीयसाध्यतावच्छेदकावच्छिन्नप्रतियोगितावच्छेदकत्वोभयसम्ब-न्धेन।

स्ववृत्तित्वञ्च हेत्वधिकरणवृत्तिभेदप्रतियोगितावच्छेदकतावच्छेदक-स्वप्रतियोगितावच्छेदकावच्छिन्ननिरूपकतावच्छेदकत्वसम्बन्धेनेति।

केचित्तु सम्पातायातं घटाभावः प्रतियोगिव्यधिकरण इति वदन्ति।

---

१. (क) प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. ४१

(ख) 'घटाभावोऽपी'ति पाठः प्राचीनमुद्रिततत्त्वालोके।

अन्ये त्वेतल्लक्षणस्य न लक्षणान्तरत्वमपितु प्रतियोगिव्यधिकरणाभाव-घटितलक्षणस्यैव तात्पर्यार्थत्वमिति सूचयितुम्प्रतियोगितावच्छेदकघटत्वाव-च्छिन्नानधिकरणं महाकाल इति वक्तव्ये घटाभावोऽपि प्रतियोगिव्यधिकरण इत्युक्तमिति प्राहुः।

परे तु घटत्वावच्छिन्नानधिकरणं महाकाल इत्येव युक्तः। स च पाठः क्वचित्पुस्तकेऽस्त्यपीत्याहुः।[३३६]

प्रकाशः—तर्कालङ्कारेण 'साध्यतावच्छेदकसम्बन्धेन स्वप्रतियोग्यधिकरणया-वद्धेत्वधिकरणको यो यस्तदन्यत्वं प्रतियोगिवैयधिकरण्यं वाच्यम्। अतो गगनाभावमा-दायैव प्रसिद्धेर्न कोऽपि दोष' इत्युपन्यस्य 'न चैवं यद्यत्सम्बन्धेन यद्धर्मावच्छिन्नानधि-करणं हेत्वधिकरणं तत्तत्सम्बन्धान्यसाध्यतावच्छेदकसम्बन्धेन तद्धर्मावच्छिन्नसामाना-धिकरण्यमेव लाघवाद् व्याप्तिरस्तु' इति यदुपन्यस्तम्[१], तद्घटकस्य 'एवमि'त्यस्य 'यथाश्रुतार्थत्याग' इत्यर्थस्तत्त्वालोककृता कृतः।

तदग्रे 'तथा च घटाभावोऽपि प्रतियोगिव्यधिकरण' इति जागदीश्यां यदुपन्यस्तमस्ति, तत्र शङ्कते— न चैतल्लक्षणस्याभावाघटिततयेदमसङ्गतमिति वाच्यम्।

तत्र समाहितम्। एतस्योदक्षरत्ववारणाय स्वप्रतियोगितावच्छेदकसम्बन्धेन यत्प्रतियोगितावच्छेदकावच्छिन्नानधिकरणं हेत्वधिकरणं तत्प्रतियोगितावच्छेदकसम्ब-न्धान्यसाध्यतावच्छेदकसम्बन्धेन तत्प्रतियोगितावच्छेदकसाध्यतावच्छेदकसाध्यताव-च्छेदकावच्छिन्नसामानाधिकरण्ये तात्पर्यस्य वाच्यतया प्रतियोगिव्यधिकरणाभावघटि-तत्वेनासङ्गत्यभावादिति।

प्रतियोगिवैयधिकरण्यकोटौ प्रतियोगितावच्छेदकत्वेन साध्यतावच्छेदकस्यानु-पादानत्वेन तत्त्वस्वरूपप्रतियोगिव्यधिकरणाभावत्वस्य पटाद्यभावे सम्भवेन 'घटाभा-वोऽपी'त्यस्य नासङ्गतिः, यत्[तत्]पदञ्चाभावपरं बोध्यम्। अनन्तरमुच्यते 'यत्प्रतियो-गित्वप्रवेशस्य वैयर्थ्यन्तु नाशङ्कनीयमि'ति।

समाधीयते च 'यथाश्रुतेऽपि यद्धर्मावच्छिन्नानधिकरणं हेत्वधिकरणं तद्भिन्न-त्वस्य लक्षणत्वसम्भवे वैयर्थ्यशङ्काया दुर्निवारत्वादि'ति।

---

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. ४१

अनुगमस्तु अभावविशिष्टाभाववदन्यसाध्यतावच्छेदकसम्बन्धधर्मावच्छिन्ननिरूपकताकाधिकरणतावद्वृत्तित्वनिवेशेन। वैशिष्ट्यञ्च स्वतादात्म्य-स्वप्रतियोगितावच्छेदकावच्छिन्नत्व-प्रतियोगितावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेन। अभाववत्ता च स्वप्रतियोगितावच्छेदकसम्बन्धावच्छिन्नत्व, - स्वप्रतियोगितावच्छेदकधर्मावच्छिन्नत्वोभयसम्बन्धेन।

वह्निमान् धूमादित्यत्र समवायसम्बन्धावच्छिन्नप्रतियोगिताको यो वह्न्यभावः स्वतादात्म्य-स्वप्रतियोगितावच्छेदकावच्छिन्नत्व-स्वप्रतियोगितावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेन समवायेन वह्न्यभावविशिष्टः, स एवाभावः। निरूपकतायामभाववत्ता च स्वप्रतियोगितावच्छेदकसम्बन्धावच्छिन्नत्व, - स्वप्रतियोगितावच्छेदकधर्मावच्छिन्नत्वोभयसम्बन्धेन।

तादृशाभाववदन्यसाध्यतावच्छेदकसम्बन्धावच्छिन्ननिरूपकताकाधिकरणतावद्वृत्तित्वस्य धूमे सत्त्वाल्लक्षणसङ्गतिः।

पुनरुच्यते यद्वा सम्बन्धवदन्यसाध्यतावच्छेदकसम्बन्धेन साध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यमनुगतं व्याप्तिः। सम्बन्धवत्ता च स्वतादात्म्य-स्ववृत्त्यभावीयसाध्यतावच्छेदकावच्छिन्नप्रतियोगितावच्छेदकत्वोभयसम्बन्धेन।

स्ववृत्तित्वञ्च हेत्वधिकरणवृत्तिभेदप्रतियोगितावच्छेदक-स्वप्रतियोगितावच्छेदकावच्छिन्ननिरूपकतावच्छेदकत्वसंम्बन्धेन।

केचित्तु सम्पातायातं घटाभावः प्रतियोगिव्यधिकरण इति वदन्ति। [अन्ये तु] एतस्य न लक्षणान्तरत्वमपितु प्रतियोगिव्यधिकरणाभावघटितलक्षणस्यैव तात्पर्यार्थत्वमिति सूचयितुं प्रतियोगितावच्छेदकघटत्वावच्छिन्नानधिकरणं महाकाल इति वक्तव्ये घटाभावोऽपि प्रतियोगिव्यधिकरण इत्युक्तमिति प्राहुः।

परे तु घटत्वावच्छिन्नानधिकरणं महाकाल इत्येव युक्तः पाठः, क्वचित्पुस्तकेऽस्त्यपीत्याहुः।[३३६]

तत्त्वालोकः – **'घटवृत्तित्वविशिष्टद्रव्यत्वे'ति[1]। घटपदं तद्घटपरम्। तेन विशेषरूपेण संसर्गत्वाभ्युपगमेऽपि नाव्याप्त्यसम्भवः। तद्घटवृत्तित्ववैशिष्ट्यमपि विशेषरूपेण संसर्गत्वाभ्युपगम एव सार्थकम्। तादात्म्यस्य संसर्गत्वे सम्बन्धित्वप्रवेशे च तद्दधिवृत्तित्वविशिष्टप्रमेयवान् तद्दधित्वादित्यत्राव्याप्तिः।**

---

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. ४१

तद्दधिवृत्तिता च तादात्म्यसंयोगान्यतरसम्बन्धावच्छिन्ना साध्यताऽपि तदन्यतरैव बोध्या।

इदञ्च तत्सम्बन्धावच्छिन्नवृत्तित्वविशिष्टस्य तेनैव सम्बन्धेन तत्रैव सत्त्वम्, नान्येन, तादात्म्यभिन्नेन, नान्यत्र च, विषयित्वादीनान्तु न संसर्गत्वमिति मतेन। तेन महाकालानुयोगिककालिकादिना विषयित्वादिना च साध्यानधिकरणत्वस्य हेत्वधिकरणे प्रसिद्धिमादाय नाव्याप्त्यसम्भव इति।

वस्तुतो विशेषरूपेण संसर्गतामनभ्युपेत्य विषयित्वादीनाञ्चासंसर्गतामङ्गीकृत्य पटत्वान्यप्रमेयवान् घटत्वादित्यादावेवाव्याप्तिर्दातुमुचितेति बोध्यम्।-[३३७]

प्रकाशः – नव्यमतमनुसृत्य तर्कालङ्कारेण दर्शिते प्रतियोगिवैयधिकरण्ये तर्कालङ्कारेण 'घटवृत्तित्व [विशिष्ट] द्रव्यत्ववान् घटत्वादित्यादावव्याप्तेरि'त्युपन्यस्य[१] यद्दोषो दर्शितस्तत्रोच्यते यद् 'घट' पदं 'तद्घट' परम्। तेन विशेषरूपेण संसर्गत्वाभ्युपगमेऽपि नाव्याप्त्यसम्भवः। तद्घटवृत्तित्ववैशिष्ट्यमपि विशेषरूपेण संसर्गत्वाभ्युपगम एव सार्थकमिति तद्घटानुयोगिकत्वविशेषितसमवायेनापि तद्घटवृत्तित्वविशिष्टद्रव्यत्वस्य तद्घटे वृत्तित्वादित्याशयः।

तादात्म्यस्य संसर्गत्वे सम्बन्धित्वप्रवेशे च पूर्वोक्तस्थलेतरघटवृत्तित्वविशिष्टद्रव्यत्वस्य तद्घटेऽसत्त्वेन दोषविरहेऽपि तद्दधिवृत्तित्वविशिष्टप्रमेयवान् तद्दधित्वादित्यत्राव्याप्तिः, समवायेन दधित्वाधिकरणे द्व्यणुकात्मके दधित्रसेरोः [त्रसरेणोः] समवायेन वृत्तितायाः सत्त्वात्।

अत्र विवृतिकृता श्रीगुरुप्रसादशास्त्रिणा 'अत्र दधित्ववैशिष्ट्यं सामानाधिकरण्यसम्बन्धेन, सामानाधिकरण्यञ्च समवायेन दधित्वाधिकरणे समवायावच्छिन्नवृत्तित्वं, तादृशप्रमेयञ्च त्रसरेण्वादिरूपम्, तस्य च तादात्म्यसम्बन्धेन साध्यत्वम् [बोध्यम्], अत एव स्थूलपदमपि व्यभिचारवारकतया सार्थकमन्यथा दधित्वाधिकरणे द्व्यणुके त्रसरेण्वादिरूपसाध्यस्यासत्त्वेन हेतोर्व्यभिचारित्वं स्यादि'त्युपन्यस्तम्[२]।

तदनुसृत्यैव पूर्वं व्याख्यातम्। तत्त्वालोककृता तूच्यते 'तद्दधिवृत्तिता च तादात्म्यसंयोगान्यतरसम्बन्धावच्छिन्ना, साध्यतापि तदन्यतरैव बोध्या' इति।

---

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. ४१

२. सिद्धान्तलक्षणजागदीशी (काशी, १९३३), विवृतिः, पृ. २०२

तत्त्वालोककृता पुनरग्रे स्पष्टीक्रियते 'इदञ्च तत्सम्बन्धावच्छिन्नवृत्तित्वविशिष्टस्य तेनैव सम्बन्धेन तत्रैव सत्त्वं नान्येन तादात्म्यभिन्नेन नान्यत्र च, विषयित्वादीनान्तु न संसर्गत्वमिति मतेन। तेन महाकालानुयोगिककालिकादिना विषयित्वादिना च साध्यानधिकरणत्वस्य हेत्वधिकरणे प्रसिद्धिमादाय नाव्याप्त्यसम्भव' इति।

अन्ते 'वस्तुतो विशेषसंसर्गतामनभ्युपेत्य विषयित्वादीनाञ्चासंसर्गतामङ्गीकृत्य पटा[पटत्वा]न्यप्रमेयवान् घटत्वादित्यादावेवाव्याप्तिर्दातुमुचितेति बोध्यमि'त्युपन्यस्तं तत्त्वालोककृता।

'पटत्वान्यप्रमेयवान्' अत्र 'पटान्यप्रमेयवान्' इति पाठभेदोऽप्यस्ति। पटत्वान्य(पटान्य)प्रमेयस्य हेत्वधिकरणे घटे कालिकादिना साध्यतावच्छेदकसम्बन्धान्यसम्बन्धेनापि सत्त्वेन साध्यतावच्छेदकसम्बन्धान्यसम्बन्धेन साध्यानधिकरणत्वस्य तत्रासम्भवेनाव्याप्तिरित्याशयं प्रत्येमि।[३३७]

तत्त्वालोकः– यद्यपि स्ववृत्तिवाच्यत्वादीनां संसर्गत्वे संयोगादिना वह्न्यादिसाध्यकसद्धेतुमात्रेऽभावाप्रसिद्ध्याऽसम्भव एव सम्भवति, तथापि साध्यतावच्छेदकत्वोपादानेऽपि स्ववृत्तिवाच्यत्वादिसम्बन्धेन साध्यकसद्धेतौ दोषस्य दुरुद्धरतया तेषामिदानीं संसर्गत्वानभ्युपगमस्यैव युक्तत्वादसम्भवं विहाय धूमवान् वह्नेरित्यादावतिव्याप्तीति।

न च स्ववृत्तिवाच्यत्वादीनां संसर्गत्वेऽपि तत्सम्बन्धसाध्यकस्थलस्य व्याप्यवृत्तिसाध्यकतया प्रतियोगिवैयधिकरण्यघटितलक्षणालक्ष्यत्वान्न दोष इति वाच्यम्। तथापि तेषां संसर्गत्वमनभ्युपगम्यातिव्याप्तिरुक्तेत्युक्तेस्सम्भवादिति।[३३८]

प्रकाशः– उक्तखण्डादौ शङ्कते 'यद्यपि स्ववृत्तिवाच्यत्वादीनां संसर्गत्वे संयोगादिना वह्न्यादिसाध्यकसद्धेतुमात्रेऽभावाप्रसिद्ध्याऽसम्भव एव सम्भवति, तथापि साध्यतावच्छेदकसम्बन्धोपादानेऽपि स्ववृत्तिवाच्यत्वादिना सम्बन्धेन साध्यकसद्धेतौ दोषस्य दुरुद्धरतया तेषां स्ववृत्तिवाच्यत्वादीनामिदानीं संसर्गत्वानभ्युपगमस्यैव युक्तत्वादसम्भवं विहाय धूमवान् वह्नेरित्यादावतिव्याप्तिरिति तत्र साध्याभावस्य लक्षणघटकत्वासम्भवे नातिव्याप्तिः'।

पुनरुच्यते— स्ववृत्तिवाच्यत्वादीनां संसर्गत्वेऽपि तत्सम्बन्धसाध्यकस्थलस्य व्याप्यवृत्तितया प्रतियोगिवैयधिकरण्यघटितलक्षणालक्ष्यत्वान्न दोष इति वाच्यम्। तथापि तेषां संसर्गत्वमनभ्युपगम्य अतिव्याप्तिरुक्ते[त्युक्ते]स्सम्भवादिति।[३३८]

तत्त्वालोकः – 'इति तु फलितार्थं' इति[1]। साध्यताघटकसंसर्गतावच्छेदकतात्वावच्छिन्नपर्याप्त्यनुयोगितावच्छेदकरूपविशिष्टावच्छिन्नसामान्ये संसर्गतावच्छेदकभेदमात्रेणैव संसर्गताभेदे साध्यताघटकसंसर्गताविशिष्टसंसर्गतासामान्ये वेति विवक्षणीयम्। तेन पर्वतीयसंयोगेन वह्नेस्साध्यतायां धूमे व्यभिचारिणि कालिकसंयोगोभयसम्बन्धेन धूमसाध्यकवह्नौ च व्यभिचारिणि साध्यतानिरूपितसंसर्गतावच्छेदकसंयोगत्वावच्छिन्नत्वस्य महानसानुयोगिकसंयोगे कालिकेऽपि च सत्त्वेन वह्न्यभावस्य लक्षणाघटकत्वेन नातिव्याप्तिः।-[३३९]

प्रकाशः – 'साध्यतावच्छेदकसम्बन्धसामान्ये निरुक्तप्रतियोगिप्रतियोगिकत्वहेत्वधिकरणीभूतयत्किञ्चिद्व्यक्त्यनुयोगिक[त्व]सामान्या[न्योभया]भावस्य विवक्षितत्वात्' इति[2] दीधितिग्रन्थघटक-प्रथम 'सामान्य' पदस्य 'यद्धर्मावच्छिन्नसंसर्गताकप्रकृतसाध्यकानुमितिः फलं तद्धर्मावच्छिन्नसम्बन्धसामान्ये इति तु फलितार्थः' इति तर्कालङ्कारेण व्याख्यातम्[3]।

तत्र 'इति तु फलितार्थं' इति परिगृह्य तत्त्वालोककृता व्याख्यायते 'साध्यताघटकसंसर्गतावच्छेदकतात्वावच्छिन्नपर्याप्त्यनुयोगितावच्छेदकरूपविशिष्टावच्छिन्नसामान्ये संसर्गतावच्छेदकभेदमात्रेण संसर्गताभेदे साध्यताविशिष्टसंसर्गतासामान्ये वेति विवक्षणीयम्, तेन पर्वतीयसंयोगेन वह्नेः साध्यतायां धूमे व्यभिचारिणि कालिकसंयोगोभयसम्बन्धेन धूमसाध्यकवह्नौ च व्यभिचारिणि साध्यतानिरूपितसंसर्गतावच्छेदकसंयोगत्वावच्छिन्नत्वस्य महानसानुयोगिकसंयोगे कालिकेऽपि च सत्त्वेन वह्न्यभावस्य लक्षणाघटकत्वेन नातिव्याप्तिरि'ति।

साध्यतानिरूपितसंसर्गतावच्छेदकसंयोगत्वावच्छिन्नत्वस्य महानसानुयोगिकसंयोगे सत्त्वेऽपि विवक्षितदर्शितरूपविशिष्टावच्छिन्नसामान्ये विवक्षितोभयाभावस्य सत्त्वेन वह्न्यभावस्य लक्षण[णा]घटकतया नातिव्याप्तिरित्याशयः।

एवं कालिके साध्यतानिरूपितसंसर्गतावच्छेदकोभयत्वावच्छिन्नत्वस्य सत्त्वेऽपि विवक्षितदर्शितरूपविशिष्टावच्छिन्ने विवक्षितोभयाभावस्य सत्त्वेन वह्न्यभावस्य

---

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. ४१

२. तदेव, दीधितिमूलम्, पृ. ४०

३. तदेव, जागदीशीमूलम्, पृ. ४१

लक्षण[णा]घटकतया नातिव्याप्तिरित्याशयः।[३३९]

तत्त्वालोकः – 'प्रथमं सामान्यपदमि'ति[1]। अत्र साध्यतावच्छेदकसम्बन्धनिरूपितवृत्तितानवच्छेदकत्वमेव तादृशोभयत्वे विवक्षणीयम्, न तु तादृशोभयाभावे साध्यतावच्छेदकसम्बन्धत्वव्यापकत्वं, गौरवादिति तु चिन्त्यम्।-[३४०]

प्रकाशः – 'घटीयसंयोगे पर्वतीयसंयोगे वा हेतुमन्महानसानुयोगिकत्ववह्नित्वावच्छिन्नप्रतियोगिकत्वोभयाभावसत्त्वाद् वह्निमान् धूमादित्यत्राव्याप्तिरतः प्रथमं 'सामान्यपदमि'त्युपन्यस्य तर्कालङ्कारेण प्रथम 'सामान्य' पदस्य व्यावृत्तिरुपपादिता[2]।

अनन्तरञ्च 'तथा च महानसीयवह्निसंयोग एव तादृशोभयाभावविरहान्नाव्याप्तिरि'ति स्पष्टीकृतम्।

निर्दिष्टजागदीश्यां 'घटीयसंयोगे पर्वतीयसंयोगे वे'त्येवमुपन्यासस्तु मूले दीधितौ 'साध्यतावच्छेदकसम्बन्धसामान्ये' इति 'साध्यप्रतियोगिकसम्बन्धसामान्ये' इति वा पाठबुद्ध्या। तत्र 'साध्यप्रतियोगिकसाध्यतावच्छेदकसम्बन्धे' इत्येवं स्थितौ घटीयसंयोगमादाय व्याप्तेरसम्भवात् 'पर्वतीयसंयोगे' इत्युक्तिः।

प्रथम 'सामान्य' पदानुपादाने समवाय-संयोगान्यतरसम्बन्धेन वह्निसाध्यकधूमहेतावपि साध्यतावच्छेदकसमवायसम्बन्धे विवक्षितोभयाभावसत्त्वादव्याप्तिः स्यात्। प्रथम 'सामान्य' पदोपादाने तादृशसम्बन्धसामान्यान्तर्गतसंयोगे विवक्षितोभयाभावसत्त्वेन नाव्याप्तिः।

प्रथम 'सामान्य' पदप्रयोजनव्याख्यावसरे तत्त्वालोककृतोच्यते 'अत्र साध्यतावच्छेदकसम्बन्धनिरूपितवृत्तितानवच्छेदकत्वमेव तादृशोभयत्वे विवक्षणीयम्, न तु तादृशोभयाभावे साध्यतावच्छेदकसम्बन्धत्वव्यापकत्वं, गौरवादिति चिन्त्यमि'ति।

यादृशप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिकत्वहेत्वधिकरणीभूतयत्किञ्चिद्व्यक्त्यनुयोगिकत्वोभयत्वे साध्यतावच्छेदकसम्बन्धतानिरूपितवृत्तितानवच्छेदकत्वस्य लघुभूतस्य निवेशेऽपि दोषाभावेन तादृशोभयाभावे साध्यतावच्छेदकसम्बन्धत्वव्यापकत्वस्य गुरुभूतस्य निवेशो नोचित इति तदाशयः।[३४०]

---

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. ४१

२. तदेव, जागदीशीमूलम्, पृ. ४१

तत्त्वालोकः – 'तथैवाऽव्याप्तिरत' इति[1]। न च सर्वत्रासम्भवसम्भवेऽव्याप्तिदानमसङ्गतमिति वाच्यम्, विशिष्टधीनियामकस्यैव संसर्गत्वे संयोगसमवायदैशिककालिकदिक्कृतविशेषणतानामेव संसर्गत्वेन तत्सम्बन्धावच्छिन्नवृत्तितावििशिष्टस्य तेनैव सत्त्वाभ्युपगमेन च सत्तावृत्तित्वविशिष्टप्रमेयत्वसाध्यकसत्तात्वेऽव्याप्त्यभावात्, सत्त्वानुयोगिकत्वस्य साध्याभावप्रतियोगिकत्वस्य च स्वरूपंमात्र एव सत्त्वेन तन्निष्ठ-तदुभयाभावस्य स्वरूपे विरहात्।

केचित्तु वह्निधूमोभयवान्धूमादित्यत्राव्याप्तेर्न प्रसक्तिरुभयत्वावच्छिन्नप्रतियोगिकत्वस्य सम्बन्धनिष्ठस्याप्रसिद्धेरिति वदन्ति।[३४१]

प्रकाशः – 'तथैवाव्याप्तिरि'ति। प्रथम'सामान्य'पदोपादानेऽपि 'संयोगसामान्य एव समवायनिष्ठपर्वतानुयोगिकत्वस्य वह्नित्वावच्छिन्नप्रतियोगिकत्वस्य च द्वयोरभावसत्त्वात्तथैवाव्याप्तिरि'ति तर्कालङ्कारेण यदुपन्यस्तम्[2], तत्र तत्त्वालोककृत् शङ्कते यत् 'न च सर्वत्रासम्भवसम्भवेऽव्याप्तिदानमसङ्गतमिति वाच्यमि'ति।

तत्र समाधानमुच्यते। विशिष्टधीनियामकस्यैव संसर्गत्वे संयोगसमवायदैशिककालिकविशेषणतानामेव संसर्गत्वेन तत्सम्बन्धावच्छिन्नवृत्तिताविशिष्टस्य तेनैव सत्त्वाभ्युपगमेन च सत्तावृत्तित्वप्रमेयत्वसाध्यकसत्तात्वेऽव्याप्त्यभावादिति।

उक्तस्थलेऽव्याप्त्यभावं स्वयमुपपादयति। सत्त्वानुयोगिकत्वस्य साध्याभावप्रतियोगिकत्वस्य च स्वरूपमात्र एव सत्त्वेन तन्निष्ठ-तदुभयाभावस्य स्वरूपे विरहादिति।

अत्र केषाञ्चिन्मतमुपपादयति यत् केचित्तु वह्निधूमोभयवान् धूमादित्यत्राव्याप्तेर्न प्रसक्तिरुभयत्वावच्छिन्नप्रतियोगिकत्वसम्बन्धनिष्ठस्याप्रसिद्धेरिति वदन्तीति। सम्बन्धनिष्ठस्योभयत्वावच्छिन्नप्रतियोगिकत्वाप्रसिद्ध्या तत्र साध्याभावस्य लक्षणघटकत्वविरहेण नाव्याप्तिरित्याशयः।[३४१]

तत्त्वालोकः — वह्निधूमोभयसाध्यकसद्धेतावव्याप्त्यभावम्मनसि निधायाह 'सद्धेतौ नाव्याप्तिरि'ति[3]। सद्धेतुत्वरूपलक्ष्यतावच्छेदकसामानाधिकरण्येन लक्षणासत्त्वमत्र नाव्याप्तिपदार्थस्सद्धेतावित्यस्यानन्वयापत्तेरपितु लक्षणासत्त्वन्तत्र सद्धेतावित्यस्यावच्छेदकावच्छेदेनान्वयोऽसति बाधकेऽवच्छेदकावच्छेदेनान्वयस्यैव व्युत्पन्नत्वादित्यसम्भवपरतैव वोक्तग्रन्थस्येत्यपि कश्चित्।[३४२]

---

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. ४१

२. तदेव, जागदीशीमूलम्, पृ. ४१

३. तदेव, जागदीशीमूलम्, पृ. ४१

प्रकाशः – 'तादृशोभयाभावश्च स्वरूपसम्बन्धेन बोध्यः। तेन समवायादिना तदुभयाभावस्य सम्बन्धमात्रे सत्त्वेऽपि सद्धेतौ नाव्याप्तिरि'ति तर्कालङ्कारेण यदुपन्यस्तम्[१], तत्रोच्यते 'वह्निधूमोभयसाध्यकसद्धेतावव्याप्त्यभावममनसि निधायाह सद्धेतौ नाव्याप्तिरि'ति। तत्र वह्निधूमोभयत्वावच्छिन्नप्रतियोगिकत्वस्य सम्बन्धनिष्ठस्याप्रसिद्ध्या साध्याभावस्य लक्षणघटकत्वासम्भवान्नाव्याप्तिरित्याशयः।

तत्र कश्चित् कथयति — अत्र सद्धेतुत्वरूपलक्ष्यतावच्छेदकसामानाधिकरण्येन लक्षणासत्त्वन्नाव्याप्तिपदार्थः, सद्धेतावित्यस्यानन्वयापत्तेः, किन्तु लक्षणासत्त्वमेवाव्याप्तिपदार्थस्तत्र सद्धेतावित्यस्य अवच्छेदकावच्छेदेनान्वयोऽसति बाधकेऽवच्छेदकावच्छेदेनान्वयस्यैव व्युत्पन्नत्वादित्यसम्भवपरतैवोक्तग्रन्थस्य। उभयाभावश्च स्वरूपसम्बन्धेन बोध्यः। तेन समवायादिना तदुभयाभावस्य सम्बन्धमात्रे सत्त्वेऽपि सद्धेतौ नाव्याप्तिः, समवायादेः तादृशप्रतियोगिकत्वानुयोगिकत्वयोर्व्यधिकरणसम्बन्धतया, तेन सम्बन्धेन तदुभयाभावस्य सर्वत्र सत्त्वेन, साध्यतावच्छेदकसम्बन्धसामान्येऽसत्त्वे बाधकाभावादुभयसाध्यकपूर्वनिर्दिष्टस्थलेऽपि सत्त्वेनासम्भव एवेति भावः। व्यधिकरणसम्बन्धस्थले तेन सम्बन्धेनोभयप्रतियोगिकत्वसम्बन्धनिष्ठस्य प्रसिद्धेरावश्यकत्वविरहादित्याशयं प्रतीमः।[३४२]

तत्त्वालोकः – 'अभावान्तरे'ति[२]। तद्घटाभावेत्यर्थः। तद्घटप्रतियोगिकत्व, - तद्घटानुयोगिकत्वयोस्तादात्म्यसम्बन्धे सत्त्वेन विशिष्टप्रसिद्धेरिति भावः।

'प्रकृताव्याप्तिवारणासम्भवः स्यादि'ति[३]। न च महाकालाभावमादायैवाव्याप्तिवारणं सम्भवति, महाकालप्रतियोगिकत्व, - महाकालानुयोगिकत्वोभयोस्तादात्म्ये सत्त्वेन तयोर्वैशिष्ट्यप्रसिद्धेरिति वाच्यम्, कालिकतादात्म्यान्यतरसम्बन्धेन साध्यतास्थलेऽभावस्य तादृशस्याप्रसिद्धिरिति।[३४३]

प्रकाशः —तर्कालङ्कारेण 'एतद्घटवान् कालान्तरीयतद्घटत्वादित्यादावेतद्घटत्वावच्छिन्नप्रतियोगिकत्वविशिष्टतद्घटानुयोगिकत्वाप्रसिद्धेरभावान्तरमादायातिव्याप्तिः, गगनप्रतियोगिकत्वविशिष्टमहाकालानुयोगिकत्वाप्रसिद्ध्या गगनाभावमादाय प्रकृताव्याप्तिवारणासम्भवश्च स्यात्, अतो निरुक्तप्रतियोगिकत्वविशिष्टयत्किञ्चिद्धेत्व-

---

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. ४१
२. तदेव, जागदीशीमूलम्, पृ. ४२
३. तदेव, जागदीशीमूलम्, पृ. ४२

धिकरणानुयोगिकत्वसामान्याभावं परित्यज्य तदुभयसामान्याभाव उक्त' इति यदुपन्यस्तम्[1], तत्रोच्यते 'न च महाकालाभावमादायैवाव्याप्तिवारणं सम्भवति, महाकालप्रतियोगिकत्वमहाकालानुयोगिकत्वयोस्तादात्म्ये सत्त्वेन तयोर्विशिष्टप्रसिद्धे-रिति वाच्यम्। तत्र समाधीयते – कालिकतादात्म्यान्यतरसम्बन्धेन साध्यतास्थलेऽभा-वस्य तादृशस्याप्रसिद्धेरिति।

पूर्वमेतद्घटवान् कालान्तरीयतद्घटत्वादित्यत्राभावान्तरमादायातिव्याप्तिरिति यदुपन्यस्तम्, तत्र तत्त्वालोककृतोक्तम् 'तद्घटाभावेत्यर्थः, तद्घटप्रतियोगिकत्व-तद्घटानुयोगिकत्वयोस्तादात्म्यसम्बन्धे सत्त्वेन विशिष्टप्रसिद्धेरिति भावः।[३४३]

तत्त्वालोकः – 'सामान्याभावमपहाये'ति[2]। ननूभयाभावापेक्षया यदि विशिष्टाभावे लाघवं स्यात्, स्यादपि तस्योपादेयत्वम्, अव्याप्त्या हेयत्वञ्च, तदेव नास्ति, सामानाधिकरण्यात्मकगुरुसम्बन्धस्यावच्छेदकताघटकत्वात्, प्रतियोगिकत्वस्यावच्छेदकत्वेनाधिकावच्छेदकत्वस्य द्वित्वे विरहाच्चेति चेद्।

न। अद्रव्ये द्वित्वस्यापेक्षाबुद्धिविशेषविषयत्वरूपतया तस्यावच्छेदकत्वे बहुष्ववच्छेदकत्वप्रसङ्गेन गौरवाद्, अवच्छेदकत्वबाहुल्ये संसर्गताया अपि बाहुल्येन सामानाधिकरण्यत्वावच्छिन्नैकगुरुसंसर्गताप्रवेशस्य गौरवसम्पादक-त्वादिति।[३४४]

प्रकाशः – 'अतो निरुक्तप्रतियोगिकत्वविशिष्टयत्किञ्चिद्वेत्त्वधिकरणानुयोगि-कत्वसामान्याभावम्परित्यज्य [अपहाय] तदुभयसामान्याभाव उक्त' इति तर्कालङ्कारेण यदुपन्यस्तम्[3] तत्र तत्त्वालोककृतोच्यते 'ननूभयाभावापेक्षया विशिष्टाभावे यदि लाघवं स्यात्, स्यादपि तस्योपादेयत्वमव्याप्त्या हेयत्वञ्च, तदेव नास्ति, सामानाधिक-रण्यात्मकगुरुसम्बन्धस्यावच्छेदकताघटकत्वात्, प्रतियोगिकत्वस्यावच्छेदकत्वेनाधि-कावच्छेदकत्वस्य द्वित्वे विरहाच्चेति चेन्न' [इति]।

अत्र समाधीयते। अद्रव्ये द्वित्वस्यापेक्षाबुद्धिविशेषविषयत्वरूपतया तस्याव-च्छेदकत्वे बहुष्ववच्छेदकत्वप्रसङ्गेन गौरवादवच्छेदकत्वबाहुल्ये संसर्गताया अपि

---

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. ४१-४२
२. 'सामान्याभावम्परित्यज्ये'ति पाठान्तरमपीदानीमुपलब्धजागदीशीग्रन्थेषु।
—प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. ४२
३. तदेव, जागदीशीमूलम्, पृ. ४२

बाहुल्येन सामानाधिकरण्यावच्छिन्नैकगुरुसंसर्गताप्रवेशस्य गौरवा[गौरव]सम्पादकत्वादिति।

अद्रव्ये गुणात्मकस्य द्वित्वस्यासम्भवेनापेक्षाबुद्धिविशेषविषयत्वरूपस्यैव तत्र तस्य स्वीकार्यतया तादृशस्य तस्यावच्छेदकत्वे बहुष्वेवावच्छेदकत्वप्रसक्त्याऽवच्छेदकताबाहुल्ये संसर्गताबाहुल्यप्रसङ्गात् सामानाधिकरण्यावच्छिन्नैकगुरुसंसर्गताप्रवेशस्य गौरवा[गौरव]सम्पादकत्वाद्दिति तदाशयः।[३४४]

तत्त्वालोकः– **द्वित्वस्य प्रतियोगितावच्छेदकतयाऽप्रवेशेन लाघवमनुसृत्याशङ्कते 'न चे'ति[1]। न चाभावलाघवमनुसृत्योक्तमिति वाच्यम्, सिद्धान्ते व्यापकस्वरूपाभावस्य पूर्वपक्षे व्यापकतारूपाभावस्य प्रतियोगितावच्छेदककोटौ तादृशप्रतियोगिकत्वस्य[2] प्रवेशेन साम्यादिति।[३४५]**

प्रकाशः– 'न च यादृशप्रतियोगितावच्छेदकावच्छिन्न[प्रतियोगिकत्वविशिष्ट]सम्बन्धसामान्ये, हेत्वधिकरणीभूतयत्किञ्चिद्व्यक्त्यनुयोगिक[त्वविशिष्ट]साध्यतावच्छेदकसम्बन्धत्वस्य, तथाविधसम्बन्धसामान्ये वा, यादृशप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिकत्व[स्य] सामान्याभावस्तादृशप्रतियोगितानवच्छेदकसाध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यमेव लाघवाद् व्याप्तिरस्तु' इति, द्वित्वस्य प्रतियोगितावच्छेदकतयाऽप्रवेशे लाघवमनुसृत्य शङ्कते 'न चेति' इति पूर्वं यदुक्तम्, तत्र शङ्कते 'न चाभावलाघवमनुसृत्योक्तमिति वाच्यमि'ति।

तत्र समाधीयते 'सिद्धान्ते व्यापकस्वरूपाभावस्य पूर्वपक्षे व्यापकतारूपाभावस्य प्रतियोगितावच्छेदककोटौ तादृशप्रतियोगितावच्छेदकत्वस्य प्रवेशेन साम्यादि'ति।

तथा च नाभावलाघवमनुसृत्य 'न चे'त्याद्युक्तपक्षः, किन्तु द्वित्वस्य प्रतियोगितावच्छेदकतयाऽप्रवेशप्रयुक्तलाघवमनुसृत्यैवेति ना[तदा]शयः।[३४५]

तत्त्वालोकः– **'धूमवान् वह्नेरित्यादावतिव्याप्तिरि'ति[3]। ननु कालिकसंयोगाभ्यां घटस्य, तादात्म्येन च महाकालस्य साध्यतायाम्, महाकालत्वे**

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. ४२

२. 'तादृशप्रतियोगिकत्वत्वस्ये'ति प्राचीनमुद्रितपुस्तके पाठः।

३. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. ४२

गगनादिप्रतियोगिक[1]संयोगे तादात्म्ये वा कालिकेन महाकालवृत्तित्वसत्त्वेनाभावाप्रसिद्ध्याऽव्याप्तिसम्भवेऽतिव्याप्त्यभिधानमनुचितमिति चेत्।

सत्यम्। अतिव्याप्तेष्प्रकारान्तरेणावार्यत्वमालोच्याभिधानम्। अव्याप्तिस्तु साध्यतावच्छेदकसम्बन्धस्य संसर्गतानियामको यः संसर्गस्तदतिरिक्तसम्बन्धावच्छिन्नत्वस्य साध्यवन्निरूपितत्वोभयाभावस्य वृत्तित्वनिष्ठस्य विवक्षयापि वारयितुं शक्यते इत्येतद्विशेषमालोच्य तदनभिधानमिति न सन्दर्भविरोधः।

यद्वातिव्याप्तेस्साध्यतावच्छेदकावच्छिन्नप्रतियोगिकसाध्यतावच्छेदकसम्बन्धधर्मिकोभयाभावघटितकल्पेऽपि सम्भवोऽव्याप्तेस्तु नेत्येतद्विशेषमालोच्यातिव्याप्त्यभिधाने न सन्दर्भविरोध इति।[३४६]

प्रकाशः – 'न च यादृशप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिकसम्बन्धसामान्ये हेत्वधिकरणीभूतयत्किञ्चिद्व्यक्त्यनुयोगिकसाध्यतावच्छेदकसम्बन्धत्वाभावस्तादृशप्रतियोगितानवच्छेदकसाध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यम् अथवा हेत्वधिकरणीभूतयत्किञ्चिद्व्यक्त्यनुयोगिकसाध्यतावच्छेदकसम्बन्धसामान्ये यादृशप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिकत्वसामान्याभावस्तादृशप्रतियोगितानवच्छेदकसाध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यं व्याप्तिरस्तु' इति दर्शितपूर्वपक्षस्य समाधानं तर्कालङ्कारेण "द्रव्यवान् प्रमेयत्वादि'त्यादौ संयोगेन साध्यतायामतिव्याप्त्यापत्तेः, प्रमेयानुयोगिकसंयोगसामान्यस्यैव द्रव्यत्वावच्छिन्नप्रतियोगिकत्वेन साध्याभावस्य लक्षणाघटकत्वादिति ध्येयमि"त्युपन्यस्य विहितम्[2]।

अनन्तरम् "एवञ्च कालिकसम्बन्धसामान्ये महाकालानुयोगिकत्वसत्त्वेऽपि गगनप्रतियोगिकत्वविरहाद् गगनाभाव एव 'घटवान् महाकालत्वादि'त्यादौ प्रतियोगिव्यधिकरणतया प्रसिद्ध" इत्युपन्यस्य 'ननु हेत्वधिकरणीभूतयत्किञ्चिद्व्यक्त्यनुयोगिकत्वं यदि तद्वृत्तित्वं, तदा धूमवान् वह्नेरित्यादावतिव्याप्तिः, धूमप्रतियोगिकस्यापि संयोगस्य कालिकसम्बन्धेनायोगोलकवृत्तित्वात्। यदि च साध्यतावच्छेदकसम्बन्धस्य संसर्गतानियामको यः सम्बन्धस्तेन सम्बन्धेन हेत्वधिकरणवृत्तित्वमेव तदनुयोगिकत्वं, तदा संयोगेन द्रव्यस्य साध्यतायां द्रव्यजात्यन्यतरत्वादावतिव्याप्तिः, जातौ समवायेन वृत्तेरप्रसिद्धेरि'ति यदुपन्यस्तम्[3], तत्र 'धूमवान् वह्नेरित्यादावतिव्याप्तिरि'ति परिगृह्य

---

१. 'गगनादिप्रतियोगिके' इति प्राचीनमुद्रितपुस्तके पाठः।
२. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. ४२
३. तदेव, जागदीशीमूलम्, पृ. ४२

विशेष उच्यते तत्त्वालोककृता 'ननु' इत्यादिना।

'ननु' इत्यादिना दर्शितस्थलविशेषे अव्याप्तिसम्भवेऽतिव्याप्तिदानमसङ्गतमिति यच्छङ्कितम्, तस्य समाधानं प्रकारद्वयेनोपन्यस्यते —

साध्यतावच्छेदकसम्बन्धस्य संसर्गतानियामको यः सम्बन्धस्तदतिरिक्तसम्बन्धावच्छिन्नत्व, - साध्यवन्निरूपितत्वोभयाभावस्य वृत्तित्वनिष्ठस्य विवक्षयोक्ताव्याप्तेर्वारणं सम्भवति।

यद्वाऽतिव्याप्तेः साध्यतावच्छेदकावच्छिन्नप्रतियोगिकसाध्यतावच्छेदकधर्मिकोभयाभावघटितकल्पेऽपि सम्भवः। अव्याप्तेस्तु नेत्येतद्विशेषमालोच्य नाव्याप्त्यभिधानम्। अतो न सन्दर्भविरोधः।

'यद्वा' कल्पके समाधाने साध्यतावच्छेदकधूमत्वावच्छिन्नप्रतियोगिकसंयोगात्मकसम्बन्धे विवक्षितोभयाभावविरहेण धूमवान् वह्नेरित्यत्रातिव्याप्तिः स्यादेव, दर्शितसद्धेतुस्थले न दर्शितरीत्याऽभावाप्रसिद्धया दर्शितस्थलेऽव्याप्तिः, गगनप्रतियोगिकसंयोगस्य तादात्म्यस्य वा साध्यप्रतियोगिकत्वाभावात्, एव [एवं] 'यद्वा' पूर्वकल्पकसमाधानेऽपि बोध्यम्।[३४६]

तत्त्वालोकः – 'संसर्गतानियामक' इति[1]। साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रकारतानिरूपितविशेष्यतासम्बन्धावच्छिन्नप्रमात्वावच्छिन्नकार्यतानिरूपितसाध्यतावच्छेदकसम्बन्धनिष्ठकारणतावच्छेदक इत्यर्थः।

यद्वा साध्यतावच्छेदकसम्बन्धनिष्ठसंसर्गताप्रयोजकवृत्तितावच्छेदक इत्यर्थः। स च समवायः स्वरूपश्चेति बोध्यम्।

ननु पर्वतानुयोगिकस्वरूपाभावस्य स्वरूपेण साध्यतायां पर्वतत्वे साध्यतावच्छेदकसम्बन्धसामान्यान्तर्गते पर्वतानुयोगिकसम्बन्धत्ववति स्वरूपे साध्याभावात्मकत्वेन तत्प्रतियोगितावच्छेदकीभूतधर्मावच्छिन्नप्रतियोगितानिरूपके तदुभयस्यैव सत्त्वेन साध्याभावस्य लक्षणाघटकतयाऽभावान्तरमादायातिव्याप्तिः एवं प्रतियोगितायाश्प्रतियोगिस्वरूपत्वे संयोगेन वह्निसाध्यके संयोगाभावत्वे व्यभिचारिणि वह्निप्रतियोगिकसम्बन्धत्ववति संयोगे संयोगाभावनिष्ठानुयोगितानिरूपितत्वस्य सत्त्वेनाभावान्तरमादायातिव्याप्तिः, अनुयोगिताया अनुयोगिस्वरूपत्वे संयोगेन वह्निसाध्यकसंयोगनिरूपिताधेयतात्वेऽपि व्यभि-

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. ४२

चारिण्यतिव्याप्तिरत आह 'निरुक्तप्रतियोगिकसम्बन्धत्व, -हेत्वधिकरणयत्किञ्चिद्व्यक्त्यनुयोगिकसम्बन्धत्वोभये'ति[1]।[३४७]

प्रकाशः—धूमवान् वह्नेरित्यत्र प्रसक्तातिव्याप्तिपरिहाराय पूर्वं यदुपायोऽवलम्बितस्तत्र पर्वतानुयोगिकस्वरूपाभावस्य स्वरूपेण साध्यतायां पर्वतत्वे व्यभिचारिणि अतिव्याप्तिः। यस्य स्वरूपस्य पर्वतोऽनुयोगी तादृशस्वरूपस्याभावो हेत्वधिकरणे पर्वते नास्ति। अतः स व्यभिचारी। तत्रातिव्याप्तिः, साध्याभावस्य लक्षणाघटकत्वात्। तदुपपादयति— साध्यतावच्छेदकसम्बन्धसामान्यान्तर्गते पर्वतानुयोगिकसम्बन्धत्ववति स्वरूपे साध्याभावात्मकत्वेन तत्प्रतियोगितावच्छेदकीभूतधर्मावच्छिन्नप्रतियोगितानिरूपकतदुभयस्यैव सत्त्वेनाभावान्तरमादायातिव्याप्तिः।

एवं प्रतियोगितायाः प्रतियोगिस्वरूपत्वे संयोगेन वह्नेः साध्यत्वे संयोगाभावत्वे व्यभिचारिणि वह्निप्रतियोगिकसम्बन्धत्ववति संयोगे संयोगाभावनिष्ठानुयोगितानिरूपितत्वस्य सत्त्वेनाभावान्तरमादायातिव्याप्तिः।

अनुयोगिताया अनुयोगिस्वरूपत्वे संयोगेन वह्निसाध्यकसंयोगनिरूपिताधेयतात्वे व्यभिचारिणि अतिव्याप्तिः। अतो धूमवान् वह्नेरित्यत्र प्रदत्तातिव्याप्तिवारणाय पूर्वमाश्रितप्रकारादपरः प्रकार आश्रितः।

स च साध्यतावच्छेदकसम्बन्धसामान्ये निरुक्तप्रतियोगिकसम्बन्धत्वहेत्वधिकरणीभूतयत्किञ्चिद्व्यक्त्यनुयोगिकसम्बन्धत्वा[त्वोभया]भावरूपो विवक्षितः।

धूमप्रतियोगिकसंयोगस्यायोगोलकानुयोगिकसंसर्गत्वविरहान्न तत्रातिव्याप्तिरिति।[३४७]

तत्त्वालोकः– 'यत्रैकसंयोगव्यक्त्ये'ति[2]। यत्रोपर्यधोभावेन संयुक्तौ घटपटावुपर्यधोभावविनिमयेनान्योन्याधाराधेयभावं भजेते तत्रोभयत्रैवोभयोर्विशिष्टबुद्धेष्प्रामाणिकतया तस्यैकस्यापि संयोगस्योभयानुयोगिकत्वमुभयप्रतियोगिकत्वञ्चाङ्गीकरणीयमिति तयोरेकस्य संयोगेन साध्यत्वे तदुभयान्यतरत्वे व्यभिचारिण्यतिव्याप्तिरत्र बोध्या, न तूपर्यधोभावविरहेण, संयुक्ताङ्गुल्याद्युभयघटैकसाध्यकतदुभयान्यतरत्वे तादृशसंयोगे प्रतियोगित्वानुयोगित्वनिरूपकत्वविरहादाधाराधेयभावस्थल एव तत्त्वस्य भट्टाचार्यादिभिष्प्रदर्शितत्वादिति भावः।

---

१. प्रकृतग्रन्थः (प्रथमो भागः),जागदीशीमूलम्, पृ. ४२-४३

२. तदेव, जागदीशीमूलम्, पृ. ४३

अत्र यद्यपि संयोगेन स्वस्य स्वस्मिन्विशिष्टबुद्ध्यनुत्पत्त्या स्वनिष्ठप्रतियोगित्व, - स्वनिष्ठानुयोगित्वयोः निरूप्यनिरूपकभावासम्भवात्साध्यतावच्छेदकसंसर्गतावच्छेदकधर्मावच्छिन्नसंसर्गताकानुयोगित्वे यादृशाभावप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिताकत्वहेत्वधिकरणयत्किञ्चिद्व्यक्तिनिष्ठत्वोभयाभावविवक्षणे संसर्गस्यैक्येऽपि संसर्गताया निरूपकभेदेन भिन्नत्वे संसर्गताधर्मिकोभयाभावविवक्षणे वा नातिव्याप्तिस्तथापि 'अत एवे'त्यादि[1]ग्रन्थासङ्गतेः सा विवक्षा नादृता। अत एवानुपदमेवाधिकरणताधर्मिकोभयाभाव आशङ्क्य परित्यक्तः।

यदि च समवायसम्बन्धसाध्यके वक्ष्यमाणातिव्याप्तिर्यथाश्रुताभिप्रायेणात एव तदस्वरसादुभयसाध्यकातिव्याप्तिम्वक्ष्यतीति यद्युच्यते तदा विवक्षणीयमेव तदिति।[३४८]

प्रकाशः – तर्कालङ्कारेण पूर्वं 'संयोगः पर्वते वह्नेः सम्बन्धो न तु वह्नौ पर्वतस्येत्यादिप्रतीत्या यत्किञ्चित्प्रतियोगिक-किञ्चिदनुयोगिकसम्बन्धत्वमनुभवसिद्धं कुत्रचिदेव संयोगादौ न तु सर्वत्र, तच्च स्वरूपसम्बन्धविशेषोऽतिरिक्तो वेत्यन्यदेतत्, तथा च साध्यतावच्छेदकसम्बन्धसामान्ये निरुक्तप्रतियोगिकसम्बन्धत्व, - हेत्वधिकरणीभूतयत्किञ्चिद्व्यक्त्यनुयोगिकसम्बन्धत्वोभयाभावस्य विवक्षणात् धूमसंयोगस्यायोगोलकानुयोगिकत्वविरहादेव नातिप्रसङ्गः, तत्र यथार्थविशिष्टधीनियामकस्यैव तदनुयोगिकसम्बन्धत्वात्। एतेन — वह्निमान् वह्निरूपादित्यादावतिव्याप्तिः, पर्वतवह्निसंयोग एव वह्निप्रतियोगिकत्वहेत्वधिकरणीभूतवह्न्यनुयोगिकत्वोभयाभावविरहेण वह्निसामान्याभावस्य लक्षणाघटकत्वादित्यपास्तम्। पर्वतवह्निसंयोगस्य हेतुमद्वृत्तित्वेऽपि वह्न्यनुयोगिकसम्बन्धत्वविरहेण तत्र तादृशोभयाभावसत्त्वादि'त्युपन्यस्य[2][पश्चाद्] 'इदन्त्ववधातव्यम् — यत्रैकसंयोगव्यक्त्या यत्पदार्थयोः परस्परं विशिष्टधीः प्रमा, तत्र तयोरेकस्मिन् संयोगेन साध्ये तदीयरूपादौ व्यभिचारिण्यतिव्याप्तिः, तदुभयसंयोगस्य निरुक्तोभयाभावविरहादि'ति यदुपन्यस्तम्[3], तत् परिगृह्य तत्त्वालोककृतोक्तखण्डेन प्रकाशः क्रियते।

---

१. 'अत एव समवायस्यैकत्वेने'त्यादिः 'नातिव्याप्तिरित्यपि वदन्ती'त्यन्तो दीधितिग्रन्थः। —प्रकृतग्रन्थः (प्रथमो भागः), दीधितिमूलम्, पृ. ४५-४६

२. तदेव, जागदीशीमूलम्, पृ. ४२-४३

३. तदेव, जागदीशीमूलम्, पृ. ४३

'यत्रोपर्यधोभावेन संयुक्तौ घटपटावुपर्यधोभावविनिमयेनान्योन्यमाधाराधेयभावं भजेते, तत्रोभयत्रैवोभयोर्विशिष्टबुद्धेष्प्रामाणिकतया तस्यैकस्यापि संयोगस्योभयानुयोगिकत्वमुभयप्रतियोगिकत्वञ्चाङ्गीकरणीयमिति तयोरेकस्य संयोगेन साध्यत्वे तदुभयान्यतरत्वे व्यभिचारिण्यतिव्याप्तिरत्र बोध्या।

ननु पर्यधोभावविरहेण संयुक्ताङ्गुल्याद्युभयघटकैकसाध्यकतदुभयान्यतरत्वे तादृशसंयोगे प्रतियोगित्वानुयोगित्वनिरूपकत्वविरहादाधाराधेयभावस्थल एव तत्त्वस्य भट्टाचार्यादिभिर्दर्शितत्वादिति भाव' इति।

व्याख्या स्पष्टैवास्ति। उपपादनस्य नास्त्यावश्यकता।

एतेन मेषद्वयसंयोगस्थलीयोद्धरणन्नैव युक्तमिति ध्येयम्, तत्रोपर्यधोभावस्याङ्गुलिस्थल इवैवाभावात्।

अनन्तरं प्रदत्तातिव्याप्तिपरिहाराय उपायो दर्श्यते 'अत्र यद्यपी'त्यादिना।

अत्र यद्यपि संयोगेन स्वस्य स्वस्मिन् विशिष्टबुद्ध्यनुत्पत्त्या स्वनिष्ठप्रतियोगित्वस्वनिष्ठानुयोगित्वयोर्निरूप्यनिरूपकभावासम्भवात् साध्यतावच्छेदकसंसर्गतावच्छेदकधर्मावच्छिन्नसंसर्गताकानुयोगित्वे यादृशप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिताकत्वहेत्वधिकरणयत्किञ्चिद्व्यक्तिनिष्ठत्वोभयाभावविवक्षणे संसर्गस्यैक्येऽपि संसर्गताया निरूपकभेदेन भिन्नत्वे संसर्गताधर्मिकोभयाभावविवक्षणे वा नातिव्याप्तिरिति।

अत्र प्रथमकल्पे उक्तस्थले विवक्षितानुयोगित्वे विवक्षितोभयाभावस्य सत्त्वान्नातिव्याप्तिः, तत्र पटनिष्ठानुयोगित्वे घटत्वावच्छिन्नप्रतियोगिताकत्वस्य सत्त्वेऽपि हेत्वधिकरणीभूतघटनिष्ठत्वविरहात् एव [एवं] द्वितीयकल्पेऽपि संसर्गताधर्मिकोभयाभावविवक्षायां तत्र नातिव्याप्तिः।

अत्रोच्यते। दर्शितयथाविवक्षायान्नातिव्याप्तिस्तथात्र नादृता। तत्र कारणं तथाविवक्षासत्त्वे 'अत एव = सम्बन्धधर्मिकोभयाभावघटितलक्षणं परित्यज्य प्रतियोगिताधर्मिकोभयाभावघटितलक्षणावलम्बनादेव, समवायस्यैकत्वेऽपि द्रव्यत्वादिप्रतियोगिकत्वगुणाद्यनुयोगिकत्वोभयसत्वेऽपि द्रव्यं जातेरित्यादौ नातिव्याप्तिरि'ति वक्ष्यमाणदीधिति[१] ग्रन्थासङ्गतिः स्यात्। तथाविवक्षायां सम्बन्धधर्मिकोभयाभावघटितलक्षणेऽपि समवायस्यैकत्वेऽपि द्रव्यं जातेरित्यत्र नातिव्याप्तिः स्यादिति तदाशयः।

---

१. प्रकृतग्रन्थः (प्रथमो भागः), दीधितिमूलम्, पृ. ४५-४६

अत एव = दर्शितवक्ष्यमाणदीधितिग्रन्थासङ्गतेरेव, अधिकरणताधर्मिकोभयाभावलक्षणमाशङ्क्य परित्यक्तम्।

पुनरुच्यते — यदि तु समवायसम्बन्धसाध्यके = समवायसम्बन्धेन साध्यतास्थले, वक्ष्यमाणातिव्याप्तिर्यथाश्रुताभिप्रायेणैव, अत एव = एतदस्वरसादेव, वस्तुतो विवक्षाविशेष[विशेषे]तत्रातिव्याप्त्यभावादेवोभयसाध्यकातिव्याप्तिं वक्ष्यति — 'वह्निधूमोभयवान् वह्नेरित्यादौ संयोगस्य द्वित्वावच्छिन्नप्रतियोगिकत्वविरहेऽपि च नातिव्याप्तिरि'त्युपन्यासेन[1] इत्युच्यते तदा विवक्षणीयमेव तत् इति।

तथा च दर्शितविवक्षाविशेषे नोक्तातिव्याप्तिर्न वोत्तरग्रन्थासङ्गतिरित्याशयः।-[३४८]

तत्त्वालोकः – 'तादृशसम्बन्धेन घटादेर्व्याप्यवृत्तितये'ति[2]।

इदमत्रावधेयम्[3]। यद्यपि नित्यज्ञानानुयोगिकविषयितया घटादेर्व्याप्यवृत्तित्वमस्ति, तथापि विषयितया घटादेः प्रागुक्तपारिभाषिकव्याप्यवृत्तित्वन्नास्तीति भवत्येव प्रतियोगिवैयधिकरण्यघटितलक्षणलक्ष्यत्वमिति।

न चैवमव्याप्तेः का गतिरिति वाच्यम्, स्वरूपसम्बन्धेन गगनादेर्वृत्तित्वपक्षे घटसाध्यकमहाकालत्वहेतुकाव्याप्तिसमत्वेनेदानीमिष्टत्वात्, वारणीयत्वे तु स्वप्रतियोगितावच्छेदकसम्बन्धसामान्ये तादृशोभयाभाववत्त्वस्य प्रतियोगितायाम्पारिभाषिकसाध्यतावच्छेदकसम्बन्धावच्छिन्नत्वस्य च विवक्षणीयत्वात्।

तस्य च प्रतियोगिताविशिष्टप्रतियोगितानवच्छेदकसाध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यं पर्यवसितार्थः।

वैशिष्ट्यञ्च स्वतादात्म्य-स्वावच्छेदकसम्बन्धत्वव्यापकाभावप्रतियोगितानिरूपितपरम्परावच्छेदकत्वोभयसम्बन्धेन।

तथा च पारिभाषिकसाध्यतावच्छेदकसम्बन्धावच्छिन्नत्ववत्समवायादिसम्बन्धावच्छिन्नघटत्वावच्छिन्न[4]प्रतियोगितैव प्रतियोगिताविशिष्टा भवतीति क्वाव्याप्तिशङ्कापि।

---

१. प्रकृतग्रन्थः (प्रथमो भागः), दीधितिमूलम्, पृ. ४६
२. तदेव, जागदीशीमूलम्, पृ. ४५
३. 'ध्येयमि'ति प्राचीनमुद्रितपुस्तके।
४. 'पटत्वावच्छिन्ने'ति पाठः प्राचीनमुद्रितपुस्तके।

एवं यथाश्रुतार्थपरित्यागेन साध्यतावच्छेदकावच्छिन्नप्रतियोगिकसाध्यतावच्छेदकसम्बन्धसामान्ये तादृशोभयाभाववत्त्वस्य वक्ष्यमाणतया तत्रैतद्दोषस्यापि न सम्भव इति।[३४९]

प्रकाशः–अत्रोक्तम्। यद्यपि नित्यज्ञानानुयोगिकविषयितया घटादेर्व्याप्यवृत्तित्वमस्ति तथापि विषयितया घटादेः प्रागुक्तं पारिभाषिकव्याप्यवृत्तित्वन्नास्ति। अतो भवत्येव प्रतियोगिवैयधिकरण्यघटितलक्षणस्य लक्ष्यत्वम्। तथासति तत्र सति तत्राव्याप्तेः स्वरूपसम्बन्धेन गगनादेर्वृत्तित्वपक्षे घटसाध्यकमहाकालत्वहेतुकाव्याप्तेः समत्वेनेदानीमिष्टतैव।

वारणीयत्वे[१] तु स्वप्रतियोगितावच्छेदकसम्बन्धसामान्ये तादृशोभयाभाववत्त्वस्य प्रतियोगितायाम्पारिभाषिकसाध्यतावच्छेदकसम्बन्धावच्छिन्नत्वस्य च विवक्षणीयत्वात्।

तस्य च प्रतियोगिताविशिष्टप्रतियोगितानवच्छेदकसाध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यं [व्याप्तिरिति] पर्यवसितार्थः।

वैशिष्ट्यञ्च स्वतादात्म्य, - स्वावच्छेदकसम्बन्धावच्छिन्नत्वव्यापकाभावप्रतियोगितानिरूपितपरम्परावच्छेदकत्वोभयसम्बन्धेन।

तथा च पारिभाषिकसाध्यतावच्छेदकसम्बन्धत्ववत् समवायादिसम्बन्धावच्छिन्नघटत्वावच्छिन्नप्रतियोगितैव प्रतियोगिताविशिष्टा भवतीति नाव्याप्तिशङ्कापीति।

पुनरग्रे कथ्यते— 'एवं यथाश्रुतार्थपरित्यागेन साध्यतावच्छेदकावच्छिन्नप्रतियोगिकसाध्यतावच्छेदकसम्बन्धसामान्ये तादृशोभयाभाववत्त्वस्य वक्ष्यमाणतया तत्रैतद्दोषस्यापि न सम्भव' इति।[३४९]

तत्त्वालोकः– **'अप्रवेशादि'ति[२]। ननु प्रतियोगिवैयधिकरण्याघटितलक्षणे साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वस्य प्रतियोगिताविशेषणतयोक्तस्थले तादृशप्रतियोगित्वाप्रसिद्ध्याऽव्याप्तिरिति चेन्न।**

पारिभाषिकस्य तस्य प्रवेश्यत्वात्, हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वाभावस्य साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगितावच्छेदकत्वीयस्वरूपसम्बन्धावच्छिन्नप्रतियोगिताकस्य विवक्षणीयत्वाद्वा।

---

१. 'घटवान् नित्यज्ञानत्वादि'त्यत्राव्याप्तेर्वारणीयत्वे– इत्यर्थः।

२. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. ४५

स्ववृत्तिवाच्यत्वादीनां संसर्गत्वे तेन सम्बन्धेन साध्यतायामत्राव्याप्तिर्दुरुद्धरैवेति बोध्यम्।[३५०]

प्रकाशः—'न चैवमपि घटवान् नित्यज्ञानत्वादित्यत्राव्याप्तिः, विषयितासम्बन्धे गगनीयत्वनित्यज्ञानानुयोगिकत्वोभयसत्त्वेन गगनाभावमादायापि प्रसिद्ध्यसम्भवात् [इति वाच्यम्], तादृशसम्बन्धेन घटादेर्व्याप्यवृत्तितया तत्साध्यके प्रतियोगिवैयधिकरण्यस्याप्रवेशादि'ति यदुपन्यस्तं[1] तर्कालङ्कारेण, तत्र शङ्कते—

न च [ननु] प्रतियोगिवैयधिकरण्याघटिते साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वस्य प्रतियोगिताविशेषणतयोक्तस्थले तादृशप्रतियोगित्वाविषयित्वसम्बन्धावच्छिन्नप्रतियोगित्वाप्रसिद्ध्याऽव्याप्तिरिति चेन्न।

समाधीयते। पारिभाषिकस्य तस्य प्रवेश्यत्वादिति। हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वाभावस्य साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगितावच्छेदकत्वीयस्वरूपसम्बन्धावच्छिन्नप्रतियोगिताकस्य विवक्षणीयत्वाद्वा।

स्ववृत्तिवाच्यत्वादीनां संसर्गत्वे तेन सम्बन्धेन साध्यतायामत्राव्याप्तिर्दुरुद्धरैवेति बोध्यम्। 'साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिता' पदेन साध्यतावच्छेदकसंसर्गातिरिक्तसम्बन्धावच्छिन्नत्व, - साध्यतावच्छेदकव्यापकत्वोभयाभाववत्प्रतियोगिताया एव विवक्षणीयत्वात्।

तथा च समवायादिना पटाद्यभावमादायैव लक्षणसमन्वयसम्भवान्नाव्याप्तिः, तत्र साध्यतावच्छेदकसंसर्गातिरिक्तसम्बन्धावच्छिन्नत्वस्य सत्त्वेऽपि साध्यतावच्छेदकत्वव्यापकत्वविरहेण विवक्षितोभयाभावस्य सत्त्वात्।

स्ववृत्तिवाच्यत्वादीनां संसर्गत्वे तेन सम्बन्धेन साध्यतायामव्याप्तिः। साध्यतावच्छेदकसम्बन्धसामान्ये स्ववृत्तिवाच्यत्ववत्त्वसम्बन्धे यादृशप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिकत्वहेत्वधिकरणीभूतयत्किञ्चिद्व्यक्त्यनुयोगिकत्वयोरुभयोः सत्त्वेन विवक्षितोभयाभावासत्त्वाल्लक्षणघटकाभावाप्रसिद्ध्याऽव्याप्तिरिति बोध्यम्।[३५०]

तत्त्वालोकः— **'प्राचां मते प्रकारित्वादेरि'ति**[2]।

अयमाशयः। यस्य च सम्बन्धत्वं तेन विशिष्टबुद्धिरवश्यं जन्यते, स

---

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. ४५

२. तदेव, जागदीशीमूलम्, पृ. ४४

च मत्वर्थीयैरभिलभ्यते, यथा वह्निमान् पर्वतो रूपवान् घट इत्यादि, नहि वह्निमज्ज्ञानम्वह्निमानभाव इत्यादिप्रामाणिकानामभिलाप इति विषयित्व-प्रतियोगित्वादिः संसर्गोऽपि नास्तीति ज्ञायते। दृश्यते च वह्निं जानामि, वह्निर्नास्तीत्याद्यभिलापः।

न च तेन तेषां सम्बन्धत्वसिद्धिर्द्वितीयाप्रथमयोः सम्बन्धाभिलापकत्वा-भावात्, ज्ञानाभावादिप्रत्यक्षादिकञ्च विषयित्वप्रतियोगित्वादिकं प्रकारतयैव गृह्णातीति।

'प्राचामि'त्यस्वरससूचनाय। स च[1] विषयित्व-प्रतियोगित्वाद्यनुप-स्थितिदशायामपि विषयविशिष्टज्ञानप्रतियोगिविशिष्टाभावादिप्रत्यक्षाद्युत्पत्तेर-निर्वाहः। तेषां[2] संसर्गत्वे च कार्यकारणभावादिलाघवम्। अन्यथा[3] वह्नित्वेतर-धर्मानवच्छिन्नप्रकारताकज्ञानत्वमणित्वमात्रावच्छिन्नप्रतियोगिताकाभावत्वा-दिना कारणत्व इतरधर्मानवच्छिन्नत्वस्याधिकस्य प्रवेशाद्गौरवं दुर्वचत्वञ्च स्यात्।

संसर्गत्वे च विलक्षणस्यैव संसर्गत्वात्, शुद्धवह्नित्वविशिष्टस्य तन्निनि-रूपितविषयितैव, शुद्धमणित्वविशिष्टस्य च तन्निरूपितानुयोगिता तदवच्छिन्न-प्रतियोगितैव हि संसर्गः। उक्तञ्चैतत् सिद्धान्तलक्षणव्याख्याने भट्टाचार्येणापी-ति।[३५१]

प्रकाशः – [व्याख्या स्पष्टैवास्ति]।

तत्त्वालोकः – यद्यपि साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकाभावत्वा-वच्छिन्ननिरूपितसाध्यवन्निष्ठाधिकरणताभिन्नहेतुमन्निष्ठाधिकरणताकत्वस्य मूलोक्तसामानाधिकरण्यान्तार्थतास्वीकारे न कोऽपि दोषस्तथाप्येतदर्थस्य सर्वथा मूलाक्षरार्थतालभ्यत्वमालोच्य विशेषरूपेण संसर्गतामभ्युपेत्याह 'अत्र ब्रूमः साध्यतावच्छेदकसम्बन्धावच्छिन्ने'त्यादि[4]।

---

१. 'अस्वरसश्चे'ति भावः।

२. विषयित्व-प्रतियोगित्वादीनामिति भावः।

३. विषयित्व-प्रतियोगित्वादीनां संसर्गत्वाभावे – इत्यर्थः।

४. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. ४५

अत्र साध्यतावच्छेदकावच्छिन्नत्वं पर्याप्तिघटितम्। प्रतियोगितावच्छेदकावच्छिन्नत्वञ्च प्रतियोगितानिरूपितावच्छेदकताविशिष्टावच्छेदकतानिरूपितत्वमात्रम्। वैशिष्ट्यञ्च प्रसिद्धचतुष्टयेषु यस्योपादेयत्वं तेन सम्बन्धेन।

एवञ्च महानसीयवह्निमान्महानसीयवह्न्यभावत्वादित्यत्र वह्न्यभावमहानसीयाभावौ वह्निमहानसीयाभावञ्चादाय नाव्याप्तिः। न वा महानसीयवह्न्यभावमादाय वह्निमान्धूमादित्यादावव्याप्तिः।

न च गोत्ववान् कालत्वादित्यत्र सृष्टिकालवृत्तित्वविशिष्टघटत्वाद्यभावस्य लक्षणाघटकत्वसम्भवो येन प्रतियोगितावच्छेदकावच्छिन्नत्वं पर्याप्तिसहितं निवेश्यं स्यादिति बोध्यम्।

इदमुपलक्षणम्। प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगिवैयधिकरण्यं, प्रतियोगितावच्छेदकत्वाभावश्च साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगितावच्छेदकत्वीयस्वरूपसम्बन्धावच्छिन्नप्रतियोगिताक इति विवक्षायामपि कालो घटवान्महाकालत्वादित्यत्र नाव्याप्तिरिति।[३५२]

प्रकाशः – 'अत्र ब्रूमः — साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रकृतसाध्याधिकरणतानिरूपितस्वरूपसम्बन्धेन यदभावप्रतियोगितावच्छेदकावच्छिन्नाधिकरणतासामान्याभाववत्त्वं हेतुमतस्तदभावप्रतियोगितानवच्छेदकत्वस्य साध्यतावच्छेदके विवक्षणेनैव सामञ्जस्ये निरुक्तप्रतियोगिकत्वेत्यादिखण्डशः प्रसिद्धिर्विफला, कालो घटवान् महाकालत्वादित्यादौ कालिकसम्बन्धावच्छिन्नघटाधिकरणतानिरूपितस्वरूपसम्बन्धेन पटत्वावच्छिन्नाधिकरणत्वसामान्याभावस्यैव हेतुमति सत्त्वेन पटत्वावच्छिन्नाभावस्यैव निरुक्तप्रतियोगिव्यधिकरणस्य सुलभत्वादिति ध्येयमि'ति यदुपन्यस्तम्[1], तत्रोच्यते निर्दिष्ट खण्डेन —

'यद्यपि साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकाभावत्वावच्छिन्ननिरूपितसाध्यवन्निष्ठाधिकरणताभिन्नहेतुमन्निष्ठाधिकरणत्वस्य मूलोक्तसामानाधिकरण्यपर्यन्तार्थतास्वीकारे न कोऽपि दोषस्तथाप्येतदर्थस्य सर्वथा मूलाक्षरालभ्यत्वमालोच्य विशेषरूपेण संसर्गताञ्चाभ्युपेत्याह 'अत्रे'त्यादि।

विवक्षितस्वरूपे कालो घटवान् महाकालत्वादित्यत्र यथा नाव्याप्तिस्तथोपादितमस्ति तर्कालङ्कारेणैव।

---

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. ४५

अत्र तत्त्वालोककृता विशेषो दर्श्यते 'अत्र साध्यतावच्छेदकावच्छिन्नत्वं पर्याप्तिघटितमि'त्यादिना। साध्यतावच्छेदकावच्छिन्नत्वस्य पर्याप्तिघटितस्य निवेशात् विषयितासम्बन्धेन महानसीयवह्निसाध्यकविषयितासम्बन्धेन महानसीयवह्न्यभावत्व-हेतुके वह्न्यभावमहानसीयाभाववादाय वह्निमहानसीयाभावञ्चादाय नाव्याप्तिः। अन्यथा दर्शिताभावमादाय तत्राव्याप्तिः स्यात्।

'प्रतियोगितावच्छेदकावच्छिन्नत्वञ्च प्रतियोगितानिरूपितावच्छेदकताविशिष्टा-वच्छेदकतानिरूपितत्वमात्रम्। वैशिष्ट्यञ्च प्रसिद्धचतुष्टयेषु यस्योपादेयत्वं तेन सम्बन्धे-न' इति यदुपन्यस्तं तस्य फलं दर्श्यते — 'न वा महानसीयवह्न्यभावमादाय वह्निमान् धूमादित्यत्राव्याप्तिरि'ति। अन्यथा वह्निमान् धूमादित्यत्र महानसीयवह्न्यभावमादाया-व्याप्तिः स्यात्।

यथोक्तनिवेशे तु नाव्याप्तिः, महानसीयवह्न्यभावप्रतियोगिताविशिष्टावच्छेदक-तानिरूपितत्वमात्रस्य वह्नौ सत्त्वेन तदधिकरणत्वस्यैव पर्वतादौ सत्त्वात्।

तत्र स्पष्टीक्रियते। न च गोत्ववान् कालत्वादित्यत्र सृष्टिकालवृत्तित्वविशिष्टघ-टत्वाद्यभावस्य लक्षणाघटकत्वसम्भवे येन प्रतियोगितावच्छेदकावच्छिन्नत्वं पर्याप्तिघ-टितनिवेशितं स्यादिति।

अन्ते उच्यते। इदमुपलक्षणम्। प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगिवैयधि-करण्यम्, प्रतियोगितावच्छेदकत्वाभावश्च साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियो-गितावच्छेदकत्वीयस्वरूपसम्बन्धावच्छिन्नप्रतियोगिताक इति विवक्षायामपि कालो घटवान् महाकालत्वादित्यत्र नाव्याप्तिरिति।[३५२]

तत्त्वालोकः – 'एवं यादृशप्रतियोगितावच्छेदकावच्छिन्ने'त्यादि[१]। अत्र समवायिनस्संयोगेन साध्यतायां जातिमत्त्वे व्यभिचारिणि साध्याभावप्रतियो-गितावच्छेदकावच्छिन्नप्रतियोगिकसमवाये साध्यतावच्छेदकत्वहेत्वधिकरणी-भूतयत्किञ्चिद्व्यक्त्यनुयोगिकत्वोभयोस्सत्त्वेनातिव्याप्तिः स्यादिति 'साध्यता-वच्छेदकसम्बन्धत्वे'ति कथं नोक्तेति।[३५३][२]

प्रकाशः – [नोपलब्धः]।

---

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. ४५

२. एतावानेव नैरन्तर्येण प्रकाशकृल्लिखितो लेख उपलब्धः।

तत्त्वालोकः– नन्वत्र यथाश्रुतोभयाभावनिवेशापेक्षया किं लाघवमस्ति येन 'तादृशप्रतियोगिता कथं नोक्ते'[1]त्युक्तमिति चेद्।

अत्र ब्रूमः। यद्यपि प्रकृतसाध्यतावच्छेदकसम्बन्धवृत्तिभेदप्रतियोगितावच्छेदकत्वाभावरूपव्यापकत्वापेक्षया यादृशप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिकसम्बन्धवृत्तिभेदप्रतियोगितावच्छेदकत्वाभावरूपव्यापकत्वे यथाश्रुते गौरवमेव, तथापि प्रकृतानुमितिविधेयतानिरूपितसंसर्गतावच्छेदकावच्छिन्नवृत्तिभेदप्रतियोगितावच्छेदकतात्वस्य संयोगवृत्तिभेदप्रतियोगितावच्छेदकतात्वापेक्षया गुरुत्वेन द्रव्यानुयोगिकसंयोगेन साध्यतास्थले द्रव्यानुयोगिकसंयोगवृत्तिभेदप्रतियोगितावच्छेदकतात्वस्य च संयोगवृत्तिभेदप्रतियोगितावच्छेदकतात्वापेक्षया गुरुत्वेन तत्तदवच्छिन्नाभावाप्रसिद्ध्याऽव्याप्तेर्वारणाय तादृशप्रतियोगितावच्छेदकं यद्यत्तत्तद्व्यक्तिभेदकूट एव यथाश्रुतलक्षणे प्रवेश्यः।

अत्र च प्रमेयवान् भावत्वादित्यत्र विषयित्वादीनामसंसर्गत्वे प्रमेयाभावप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिकसम्बन्धवृत्तिभेदप्रतियोगितावच्छेदकतात्वस्य सम्बन्धवृत्तिभेदप्रतियोगितावच्छेदकतात्वापेक्षया गुरुत्वेन घटाद्यभावप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिकसम्बन्धवृत्त्यभावप्रतियोगितावच्छेदकतात्वस्य च घटत्वावच्छिन्नप्रतियोगिकसम्बन्धवृत्त्यभावप्रतियोगितावच्छेदकतात्वापेक्षया गुरुत्वेन तदवच्छिन्नाभावाप्रसिद्ध्या दोषवारणाय तादृशावच्छेदकभेदकूटः प्रवेश्यः।

तत्र यथाश्रुतलक्षणे यादृशप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिकत्वभेदस्य प्रविष्टत्वेन गौरवम्। एवमुभयाभावो यथाश्रुते यादृशाभावप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिकत्वावच्छिन्नप्रतियोगिताकोऽत्र सांसर्गिकविषयताविशेषव्यक्तित्वावच्छिन्नप्रतियोगिताक इति स्फुटमेव यथाश्रुतलक्षणे यथाश्रुत एव तदंशे गौरवम्।

घटाभावप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिकत्वघटितोभयत्वस्य घटत्वावच्छिन्नप्रतियोगिकत्वघटितोभयत्वापेक्षया गुरुत्वेन तदवच्छिन्नाभावाप्रसिद्ध्या दोषः स्यादिति तादृशाभावप्रतियोगितावच्छेदक-यत्तदवच्छिन्नप्रतियोगिकत्वं निवेश्यम्।

---

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. ४५

तत्र वह्नेः साध्यतावच्छेदकतास्थले साध्याभावस्य लक्षणघटकत्वापत्त्याऽव्याप्तिः स्यात्। प्रतियोगिकत्वस्य विशिष्योपादाने समवायनिष्ठप्रतियोगिकत्वमादाय वह्निमान् धूमादित्यत्राव्याप्तिस्स्यादिति प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिकं यद्यत्तावदन्यान्यत्वमेव प्रतियोगितयोपादेयम्। तत्र स्व[सु]तरां गौरवम्।

एतेन हेत्वधिकरणभूतयत्किञ्चिद्व्यक्त्यनुयोगिकसम्बन्धसामान्ये साध्यतावच्छेदकसम्बन्धत्व, यादृशाभावप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिकसम्बन्धत्वोभयाभावस्तादृशप्रतियोगितोपादेयेत्येव कुतो नोक्तमिति 'कथन्नोक्तमि'त्याशंका निरस्ता।

एवं यथाश्रुतोभयाभावत्वस्यैतादृशोभयाभावत्वापेक्षया गुरुत्वेन व्यापकताशरीरे तादृशोभयाभावत्व-तदितरोभयानवच्छिन्नत्वप्रवेशेनापि दीधित्युक्तलक्षणे गौरवम्बोध्यमित्यलम् [३५४]

प्रकाशः – [नोपलब्धः]।

तत्त्वालोकः – 'प्रवादमनुसृत्याहे'ति[१]। गगनस्य कालासम्बन्धित्वे तुच्छत्वं स्यात्, कालसम्बन्धस्यैव सत्त्वरूपत्वात्। एवं शब्दादिकं प्रत्यकारणत्वमपि स्यात्कालासम्बन्धित्वे तस्य पूर्वकालसम्बन्धघटितत्वादित्याद्यपि यद्यपि गगनस्य कालसम्बन्धसाधकमस्ति तथापि प्रामाणिकत्वमेव सत्त्वम्, यस्य च व्यतिरेके यस्याभावस्तत्त्वमेव च कारणत्वमिति पक्षे तस्यासम्भवात्प्रवादानुसरणं कृतमिति बोध्यम्।

'धर्मसम्बन्धयोरुपादानमि'ति[२]। अथ धर्मविधया यत्साध्यतावच्छेदकं धर्मविधया तदवच्छिन्नत्वस्य संसर्गविधया यदवच्छेदकं संसर्गविधया तदवच्छिन्नत्वस्य च निवेशनमभिमतम्, तत्र समवायिनस्संयोगेन साध्यतायां सद्धेतावव्याप्तिवारणमेकतरनिवेशेनापि सम्भवादपरनिवेशनं व्यर्थमिति चेद्।

न। विषयितया घटसाध्यकतज्ज्ञानत्वहेतुकसद्धेतौ विषयितया विषय्यभावीयप्रतियोगितायां संसर्गविधया यदवच्छेदकं यद्विषयित्वं संसर्गविधया तदवच्छिन्नत्वस्य साध्यतावच्छेदकविषयित्वावच्छिन्नत्वस्य च द्वयोः सत्त्वेना-

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. ४६
२. तदेव, जागदीशीमूलम्, पृ. ४६

व्याप्तेर्धर्मविधया यदवच्छेदकमित्यस्य विवक्षणीयत्वात्।

विषयिणस्तादात्म्येन साध्यतायां घटज्ञानत्वे विषयिणो विषयित्वसम्बन्धावच्छिन्नप्रतियोगिताकतादृशाभावप्रतियोगितायां धर्मविधया साध्यतावच्छेदकं यद्विषयित्वं धर्मविधया तदवच्छिन्नत्वस्य साध्यतावच्छेदकविषयित्वावच्छिन्नत्वस्य च द्वयोः सत्त्वेनाव्याप्तेर्वारणाय संसर्गविधया यदवच्छेदकमित्यस्य च प्रवेश्यत्वात्।

एवञ्च समवायिनस्संयोगेन साध्यतायां सद्धेतौ[1] संयोगिनः समवायेनाभावमादा[या]व्याप्तिवारणाय धर्मविधया तदवच्छिन्नत्वं संसर्गविधया तदवच्छिन्नत्वम्वा प्रवेश्यमित्यत्र विनिगमकाभावेनोभयोरेव प्रवेश्यत्वात्।

यदि च संसर्गविधयावच्छिन्नत्वं सम्बन्धानवच्छिन्नावच्छेदकत्वं धर्मविधयावच्छेदकत्वं सम्बन्धानवच्छिन्नावच्छेदकत्वं धर्मविधयावच्छेदकत्वं सम्बन्धावच्छिन्नावच्छेदकताकत्वम्, तथा च लाघवमेव विनिगमकम्, निर्वचनसम्भवे वैलक्षण्यस्याखण्डस्याप्रामाणिकत्वाद्, तदा तदेकमेव निवेश्यताम्।

वस्तुतस्तु वह्निमान् धूमादित्यत्र महानसीय-वह्न्यभावं संयोगसमवायोभयसम्बन्धेन वह्न्यभावञ्चादाया[व्या]प्तिवारणाय साध्यतावच्छेदकधर्मातिरिक्तधर्मानवच्छिन्नत्वसाध्यतावच्छेदकसम्बन्धातिरिक्तसम्बन्धानवच्छिन्नत्वोभयाभावस्य प्रवेशनीयतया[2] तत्र सम्बन्धत्वधर्म्मत्वयोः सार्थक्यस्यातिसुलभत्वमेवेति।

यदि च महानसीयवह्न्यभावप्रतियोगितावारणाय साध्यतावच्छेदकतदितरोभयानवच्छिन्नत्वमेव प्रतियोगिताविशेषणं तदापि समवायिनः संयोगसमवायोभयसम्बन्धेन साध्यतायां घटत्वे संयोगिन उभयसम्बन्धेनाभावमादायाव्याप्तिवारणाय धर्म्मविधयावच्छिन्नत्वं प्रवेशनीयमेव।

एवं समवायिनः संयोगविशिष्टस्य संयोगेन साध्यतायां घटत्वे साध्यस्य समवायेनाभावमादायाव्याप्तिवारणाय सम्बन्धविधयावच्छिन्नत्वस्याप्यापाततः सार्थक्यं बोध्यमिति ध्येयम्।[३५५]

१. समवायिमान् घटत्वादित्यत्र

२. प्रतियोगितायां प्रवेशनीयतयेत्यर्थः।

तत्त्वालोकः – 'दधित्वविशिष्टप्रमेयवान् स्थूलदधित्वादि'ति[1]। 'दधित्वविशिष्टे'त्यव्याप्यवृत्तित्वसम्पत्त्यर्थम्, साध्यतावच्छेदक[स्य] तादात्म्येन प्रमेयस्य व्याप्यवृत्तित्वाद्। वैशिष्ट्यञ्च दधित्वाधिकरणे समवायेन वृत्तित्वरूपम्। एवञ्च 'स्थूल'पदं दधिद्व्यणुके व्यभिचारवारणार्थम्।

'घटवृत्तित्वविशिष्टे'ति[2] सम्पातायातम्, पूर्वं तादृशद्रव्यत्वसाध्यकस्थललिखनात्, अन्यथा विशेषरूपेण संसर्गत्वमन्तरेण तत्सार्थक्यस्यासम्भवेन तदभ्युपगमे दधित्वविशिष्टप्रमेयवान् स्थूलदधित्वादित्यत्राव्याप्तेरनुत्थानप्रसङ्गात्।

'विभावनीयमि'ति[3]। भावनाबीजन्तु विशेषरूपेण संसर्गत्वाभ्युपगमेऽपि स्थलविशेषेऽव्याप्तिः। सा च यद्यत्सम्बन्धेन यद्धर्म्मावच्छिन्नानधिकरणमित्यादिलक्षणखण्डनव्याख्यानावसरेऽभिहितैवेति।[३५६]

प्रकाशः – [नोपलब्धः]।

तत्त्वालोकः – व्यापकतालक्षणातिव्याप्तिमपि परिहरति 'यद्धर्म्मेत्यत्रे'ति[4]। न च साध्यतावच्छेदकसम्बन्धावच्छिन्नवृत्तितावच्छेदकत्वमेव लघुभूतं विशेषणमस्त्विति वाच्यम्, विशिष्टधर्मावच्छिन्नाधेयत्वस्यानतिरिक्तत्वे गुणानुयोगिकसमवायेन गुणान्यत्वविशिष्टसत्त्वस्य द्रव्यत्वव्यापकत्वापत्तेरिति।[३५७]

प्रकाशः – 'निरुक्तप्रतियोग्यनधिकरणहेतुमन्निष्ठाभावप्रतियोगितासामान्ये यत्सम्बन्धावच्छिन्नत्व-यद्धर्मावच्छिन्नत्वोभयाभावस्तेन सम्बन्धेन तद्धर्मावच्छिन्नस्य व्यापकत्वमि'त्यत्र संयोगेन रूपस्य पृथिवीत्वव्यापकत्वापत्तिः पूर्वमुक्ता[5]। संयोगेन रूपत्वावच्छिन्नाधिकरणाप्रसिद्ध्या संयोगेन रूपाभावस्य लक्षणाघटकत्वासम्भवात्, संयोगेन घटाभावादिप्रतियोगितायां संयोगसम्बन्धावच्छिन्नत्वस्य सत्त्वेऽपि रूपत्वावच्छिन्नत्वविरहेणोभयाभावस्य सत्त्वात्, तत्र पूर्वं 'तथात्वेऽपि तेन सम्बन्धरूपसामानाधिकरण्याप्रसिद्ध्यैव व्याप्तिलक्षणातिव्याप्तिविरहादि'ति समाहितम्[6]।

---

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. ४७

२. तदेव, जागदीशीमूलम्, पृ. ४७

३. तदेव, जागदीशीमूलम्, पृ. ४७

४. तदेव, जागदीशीमूलम्, पृ. ४७

५. तदेव, जागदीशीमूलम्, पृ. ४७

६. तदेव, जागदीशीमूलम्, पृ. ४७

अनन्तरं ''यद्धर्मे'त्यत्र धर्मस्य साध्यतावच्छेदकसम्बन्धावच्छिन्नाधिकरणतानिरूपकतावच्छेदकत्वेनापि विशेषणीयत्वाद्'' इति यत्समाहितम्[१], तेन संयोगेन रूपस्य पृथिवीत्वव्यापकत्वापत्त्यवसरः।

तत्र तत्त्वालोककृतोच्यते — 'न च साध्यतावच्छेदकसम्बन्धावच्छिन्नवृत्तितावच्छेदकत्वमेव लघुभूतं विशेषणमस्त्विति वाच्यम्' इति। रूपत्वस्य संयोगसम्बन्धावच्छिन्नवृत्तितावच्छेदकत्वविरहान्न दोष इति तदाशयः।

तत्र समाहितं 'विशिष्टधर्मावच्छिन्नाधिकरणत्वस्यानतिरिक्तत्वे गुणानुयोगिकसमवायेन गुणान्यत्वविशिष्टसत्त्वस्य द्रव्यत्वव्यापकत्वापत्तेरि'ति।

गुणानुयोगिकसमवायेन गुणान्यत्वविशिष्टसत्तावान् द्रव्यत्वादित्यत्र द्रव्यत्वाव्यापकस्य गुणान्यत्वविशिष्टसत्त्वस्य द्रव्यत्वव्यापकत्वापत्तिः स्यात्, विशिष्टधर्मावच्छिन्नाधेयत्वस्य शुद्धधर्मावच्छिन्नाधेयत्वतोऽनतिरिक्तत्वात्, सत्तात्वस्य गुणवृत्तितावच्छेदकत्वादित्याशयात्।[३५७]

तत्त्वालोकः— 'यद्वा स्वावच्छेदकताघटकसम्बन्धेने'त्यादि[२]। अथ तादृशप्रतियोगितानिरूपितावच्छेदकतासामान्ये यत्सम्बन्धावच्छिन्नत्वयद्धर्म्मावच्छिन्नत्वोभयाभाव इत्येव लाघवाद्विवक्षणीयमिति चेद्।

मैवम्। विशिष्टसत्तावान् जातेरित्यत्र विशिष्टसत्तावदभावस्य प्रतियोगिवैयधिकरण्यसम्पत्त्यर्थं स्वावच्छेदकतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्य्याप्त्यनुयोगितावच्छेदकरूपवृत्तिनिरूपकताकाधिकरणतावदन्यत्वस्यैव विवक्षणीयतया वह्निमत्पर्वतत्ववदभावस्य लक्षणघटकत्वेन तदीयप्रतियोगितानिरूपितवह्नित्वावच्छिन्नावच्छेदकतायामुभयोः सत्त्वेनाव्याप्त्यापत्तेः।[३५८]

प्रकाशः— यत्सम्बन्धावच्छिन्नत्वघटितप्रतियोगिताधर्मिकोभयाभावघटितलक्षणे वृत्त्यनियामकस्वामित्वादिसम्बन्धेन साध्यतायामव्याप्तिः प्रसज्यति, तादृशसम्बन्धस्य प्रतियोगितानवच्छेदकतया तत्सम्बन्धावच्छिन्नत्वस्य प्रसिद्धिविरहात्। उक्ताव्याप्तिपरिहाराय 'निरुक्तप्रतियोगितासामान्ये यत्सम्बन्धातिरिक्तसम्बन्धानवच्छिन्नत्वयद्धर्मावच्छिन्नत्वोभयाभावस्तेन सम्बन्धेन तद्धर्मावच्छिन्नस्य व्यापकत्वमि'त्युक्तौ वृत्त्य-

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. ४७

२. तदेव, जागदीशीमूलम्, पृ. ४७

नियामकसम्बन्धेन साध्यतायां व्यभिचारिणि स्वामित्वसम्बन्धेन धनसाध्यकद्रव्यत्वहेतावतिव्याप्तिः स्यात्, समवायसम्बन्धावच्छिन्नलक्षणघटकधनाभावप्रतियोगितायां स्वामित्वरूपयत्सम्बन्धातिरिक्तसमवायानवच्छिन्नत्वविरहेणोभयाभावसत्त्वात्।

अतो जगदीशेन 'यद्वे'त्युपन्यस्य 'स्वावच्छेदकताघटकसम्बन्धेन यादृशप्रतियोगितावच्छेदकानधिकरणं हेत्वधिकरणम्, तादृशप्रतियोगितासामान्ये यद्धर्मावच्छिन्नावच्छेदकताकत्वयत्सम्बन्धावच्छिन्नावच्छेदकताकत्वोभयाभावस्तेन सम्बन्धेन तद्धर्मावच्छिन्नस्य व्यापकत्वं विवक्षणीयमि'त्युक्तम्[१]।

'वृत्त्यनियामकस्य प्रतियोगितावच्छेदकत्वाभावेऽपि प्रतियोगितावच्छेदकताघटकसम्बन्धत्वस्य सर्वसम्मतत्वात् चैत्रो न पचतीत्यादौ वृत्त्यनियामकानुकूलत्वसम्बन्धेन पाकविशिष्टायाः कृतेरभावस्य चैत्रादावन्वयदर्शनादि'त्युक्तम्[२]।

तत्र तत्त्वालोककृता 'अथे'त्यादिना शङ्क्यते यत् 'तादृशप्रतियोगितानिरूपितावच्छेदकतासामान्ये यत्सम्बन्धावच्छिन्नत्व-यद्धर्मावच्छिन्नत्वोभयाभाव इत्येव लाघवाद् विवक्षणीयमि'ति।

तत्र समाहितञ्च — गुणकर्मान्यत्वविशिष्टसत्तावान् जातेरित्यत्र विशिष्टसत्ताया अभावप्रतियोगिव्यधिकरणत्वसम्पत्त्यर्थं स्वावच्छेदकतावच्छेदकतात्वावच्छिन्न[प्रतियोगिताक]पर्याप्त्यनुयोगितावच्छेदकरूपवृत्तिनिरूपकताकाधिकरणतावदन्यत्वस्यैव हेत्वधिकरणे विवक्षणीयतया वह्निमान् धूमादित्यत्र वह्निमत्पर्वतत्ववदभावस्य लक्षणघटकत्वेन तदीयप्रतियोगितानिरूपितवह्नित्वावच्छिन्नावच्छेदकतायामुभयोः सत्त्वेनाव्याप्त्यापत्तेरिति।[३५८]*

तत्त्वालोकः – न च वह्निमत्पर्वतत्ववदभावप्रतियोगितावच्छेदकतावच्छेदकत्वावच्छिन्न[३]पर्य्याप्त्यनुयोगितावच्छेदकरूपवृत्तिनिरूपकत्वाप्रसिद्धिः, वह्नित्वपर्वतत्वत्वोभयधर्म्मावच्छिन्ननिरूपकताया उभयत्वानवच्छिन्नाया

---

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. ४७

२. तदेव, जागदीशीमूलम्, पृ. ४७

३. '...प्रतियोगितावच्छेदकतात्वावच्छिन्ने'ति प्राचीनमुद्रितपुस्तकपाठं संस्कृत्य '...प्रतियोगितावच्छेदकतावच्छेदकत्वावच्छिन्ने'ति पाठो विहितः प्रकाशकृत्पितृभिः पण्डितषष्ठीनाथमिश्रैः।

* एतावानेव 'प्रकाश'टीकाग्रन्थ उपलब्धः।

अलीकत्वादिति वाच्यम्, वह्निमत्पर्वतीयवदभावमादायाव्याप्तेः वह्नित्वपर्वतीयत्वोभयधर्म्मावच्छिन्ननिरूपकत्वस्य प्रसिद्धत्वात्।

न च प्रतियोगिताधर्म्मिकोभयाभावविवक्षायामपि तद्दोषतादवस्थ्यम्, वह्नित्वगतैकत्ववृत्त्यवच्छेदकताकत्वस्य[1] तत्प्रतियोगितायां सत्त्वादिति वाच्यम्, साध्यतावच्छेदकतात्वावच्छिन्नपर्य्याप्त्यनुयोगितावच्छेदकरूपवृत्तित्वस्यैवोभयाभावप्रतियोगित्वेन विवक्षितत्वात्। वृत्तित्वञ्च स्वावच्छेदकतावच्छेदकतात्वावच्छिन्नपर्य्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन। वह्निमत्पर्वताभावीयप्रतियोगितायामुक्तरूपवृत्तित्वस्य सत्त्वेऽपि तदभावस्य निरुक्तप्रतियोगिवैयधिकरण्यविरहान्नाव्याप्तिः। अत एव प्रतियोगिवैयधिकरण्यमत्र स्वप्रतियोगिभिन्नत्वमेव लाघवाद्विवक्षणीयमित्यपि निरस्तम्, वह्निमत्पर्वताभावस्य स्वप्रतियोगिभिन्नहेत्वधिकरणकतया तमादायाव्याप्तेः। किञ्च समवायेन द्रव्यत्वसाध्यक-गगनत्वहेतौ समवायेन द्रव्यत्ववतस्समवायेनाभावस्यापि लक्षणघटकत्वात्तत्सम्बन्धावच्छिन्नप्रतियोगित्वस्य तत्सम्बन्धप्रतियोगिन्येवाभ्युपगमपक्षे तत्प्रतियोगिभिन्नत्वस्य गगने सत्त्वादव्याप्तेः।

अथ स्वनिरूपितावच्छेदकतावदन्यत्वमेव प्रतियोगिवैयधिकरण्यघटकं वाच्यम्, अवच्छेदकतावत्ता च स्वावच्छेदकतात्वावच्छिन्नपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तिनिरूपकताकाधिकरणतावत्त्वसम्बन्धेन।

यद्वा स्वप्रतियोगितावच्छेदकताविशिष्टनिरूपकताकाधिकरणतावदन्यत्वं विवक्षणीयम्। वैशिष्ट्यं च स्वावच्छेदकावच्छिन्नत्व-स्वावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेन। एवञ्च वह्निमत्पर्वतीयवदभावस्य लक्षणाघटकत्वेनाव्याप्त्यभावेनावच्छेदकताधर्मिकोभयाभावपरित्यागो नोचितः।

न चोक्तपरम्परायाः संसर्गत्वाभावे चोक्तनिवेशासम्भवः, स्वनिरूपितयत्किञ्चिदवच्छेदकतावच्छेदकतात्वावच्छिन्नपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तिनिरूपकताकाधिकरणतावदन्यंत्वं पर्वतीयत्वावच्छिन्नावच्छेदकतामादाय हेत्वधिकरणमहानसादावस्त्येवेति वाच्यम्, स्वनिरूपितावच्छेदकतात्वसमानाधिकरणनिरूपितत्वसम्बन्धावच्छिन्नावच्छेदकतानिरूपितावच्छेदकतात्वनिष्ठावच्छेदकताकप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तिनिरूपक-

---

१. 'वृत्त्यवच्छेदकताकताकत्वस्ये' ति प्राचीनमुद्रितपुस्तके पाठः।

ताकाधिकरणतावद्भेदस्यैव निवेशनीयत्वात्। एवञ्च वह्नित्वगतैकत्वस्यापि तादृशरूपत्वेन तद्वृत्तिनिरूपकताकाधिकरणतावत्त्वसत्त्वे उक्तभेदासत्त्वात्।

न च स्वावच्छेदकताघटकसम्बन्धावच्छिन्नत्वप्रवेशादननुगम इति वाच्यम्, उक्तपरम्परायाः संसर्गत्वाभावे तस्य तुल्यत्वात् इति चेद्।

मैवम्। महानसीयवह्निमान् धूमादित्यादौ महानसीयवह्निमदभावप्रतियोगितावच्छेदक[त्व]निष्ठां [नि]रूपितत्वसम्बन्धावच्छिन्नवह्नित्वनिष्ठावच्छेदकतानिरूपितवृत्तित्वविशिष्टमहानसीयवह्निमदभावप्रतियोगितावच्छेदकताविशिष्टावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपितामवच्छेदकतामादाय वह्नित्वगतैकत्वस्य तादृशावच्छेदकरूपत्ववत्त्वेन तद्वृत्तिनिरूपकताकाधिकरणत्वसत्त्वेनोक्तभेदस्य हेत्वधिकरणे विरहेणातिव्याप्तिवारणाय स्वनिरूपितावच्छेदकताकत्वसमानाधिकरणोभयावृत्तिधर्म्ममात्रावच्छिन्ननिरूपितत्वसम्बन्धावच्छिन्नावच्छेदकतानिरूपितत्वेन प्रतियोगितायाः प्रवेशनीयतया प्रतियोगिताधर्म्मिकोभयाभावकल्पेऽवच्छेदकत्वैकाधिकरणप्रवेशापेक्षयावच्छेदकताधर्मिकोभयाभावकल्पे प्रतियोगिवैयधिकरण्यशरीरे उभयावृत्तित्वप्रवेश एव गौरवस्यापत्तेः।

यत्तु गुरुधर्मस्य प्रतियोगितानवच्छेदकत्वे तादृशाधिकरणत्वावच्छिन्नसामान्यभेदस्य निवेशयितुमशक्यत्वमिति।

तन्न। भवत्कल्प इवात्रापि तादृशाधिकरणसमानाधिकरणोभयावृत्तिधर्मावच्छिन्नप्रतियोगिताकभेदत्वत्वेनानुयोगितावच्छेदकमनुगमय्य तदवच्छिन्नानुयोगिताकपर्याप्तिप्रतियोगिकूटत्वावच्छिन्ननिवेशे दोषाभावादिति।

अत्रोक्तपरम्परायास्संसर्गत्वमभ्युपेत्य तादृशप्रतियोगितावच्छेदकतावदन्यत्वादेः कूटत्वाद्यघटितत्वेन लघुभूतस्य प्रतियोगिवैयधिकण्यघटकताम्मनसि निधाय भट्टाचार्य्येणावच्छेदकताधर्म्मिक उभयाभाव आदृतः[1]। वह्निमत्पर्वतीयवदभावमादाय[या]व्याप्तेरेव यत्सम्बन्धावच्छिन्न-यद्धर्मावच्छिन्नावच्छेदकता[2]कत्वविवक्षापि निरस्ता।

---

१. अनुमानगादाधर्यां सिद्धान्तलक्षणप्रकरणे आदृतः।

२. 'यत्सम्बन्धावच्छिन्नावच्छेदकता' इति प्राचीनमुद्रितपुस्तके पाठः। स च पण्डित-षष्ठीनाथमिश्रैः स्वकीयपुस्तके संशोधितः।

उक्ताव्याप्तिवारणाय साध्यतावच्छेदकतात्वावच्छिन्नपर्य्याप्त्यनुयोगितावच्छेदकरूपवृत्तित्वस्य स्वनिरूपितसाध्यतावच्छेदकसम्बन्धावच्छिन्नावच्छेदकतावच्छेदकतात्वावच्छिन्नपर्य्याप्त्यनुयोगितावच्छेदकत्वेन विवक्षणेपि पर्वतानुयोगिक-संयोगेन पर्वतीयवद्वह्निमदभावमादायाव्याप्तेर्दुरुद्धरतया साध्यतावच्छेदकसम्बन्धावच्छिन्नावच्छेदकताकत्वस्य पृथगेव निवेशनीयत्वादिति।

केचित्तु गुरुधर्मस्य प्रतियोगितानवच्छेदकत्वे प्रमेयवह्निमान् धूमादित्यादौ संयोगेन प्रमेयवह्निमदभावप्रतियोगितावच्छेदकत्वस्य वह्नावेव कल्पनीयतया प्रमेयवह्नित्वावच्छिन्नसंयोगसम्बन्धावच्छिन्नावच्छेदकत्वाप्रसिद्ध्याऽव्याप्त्यापत्तेः, सिद्धान्ते च विषयितया प्रमेयवह्निमदभावप्रतियोगितावच्छेदकतायां तत्प्रसिद्धिरिति वदन्ति।

तन्नातिसमञ्जसम्। गुरुधर्मसाध्यकव्यभिचारिण्यतिव्याप्तिवारणाय यद्धर्मत्वस्य पारिभाषिकस्यैव विवक्षणीयतया दोषाभावादिति। यद्यप्यत्रोक्तरीत्या प्रतियोगिवैयधिकरण्यस्य परिष्कार उभयावृत्तित्वस्य प्रवेशेऽपि प्रतियोगितावच्छेदकतयोभयत्वस्याप्रवेशेन गौरवाभावस्तथापि यथाश्रुते वह्निमत्पर्वतीयवदभावमादायाव्याप्तिवारणायोभयाभावनिवेशसार्थक्यम्, तत्रोभयावृत्तित्वप्रवेशे तेनोभयाभावनिवेशपक्षस्यागुरुत्वेऽपि पूर्वपक्षबीजस्य लाघवस्याभावश्चेति।

वस्तुतस्तु स्वरूपसंयोगसमवायान्यतमसंबन्धेन प्रमेयस्य साध्यत्वे वाच्यत्वहेतौ साध्यतावच्छेदकसम्बन्धेन प्रमेयवद्भेदस्याप्रसिद्धत्वात्, प्रमेयवतः संयोगेन समवायेन वाऽभावस्य प्रतियोगितावच्छेदकताया द्रव्यत्वे सत्त्वे वा कल्पनीयत्वात्, स्वरूपेण तदभावस्याप्रसिद्धत्वात्, प्रमेयवद्घटाद्यभावप्रतियोगितावच्छेदकत्वस्य घटत्वादिष्वेव कल्पनात्, प्रमेयत्वावच्छिन्नसाध्यतावच्छेदकसम्बन्धावच्छिन्नावच्छेदकत्वाप्रसिद्धेः केवलान्वय्यतिरिक्ते पारिभाषिकयद्धर्म्मत्वस्यापि विरहात्, साध्यवन्निष्ठप्रतियोगिव्यधिकरणाभावप्रतियोगितानिरूपितसाध्यतावच्छेदकसम्बन्धावच्छिन्नावच्छेदकतावच्छेदकत्वात्केवलान्वयिधर्म्ममात्रस्य च प्रमेयत्वतुल्यत्वादव्याप्तिः स्यादित्युभयाभावनिवेश आवश्यकः। अत एव यद्धर्मावच्छिन्नावच्छेदकताकत्वविशिष्ट-यत्सम्बन्धावच्छिन्नावच्छेदकताकत्वाभावनिवेशोऽप्यपास्तः।

केचित्तु भेदप्रतियोगितानिष्ठतदुभयस्यैव लाघवेनाभावप्रतियोगित्वेन प्रविष्टतया तत्र विशिष्टाभावप्रवेशे प्रमेयसाध्यकेऽव्याप्तिस्स्यादित्याहुः।

ऋजवस्तु यत्सम्बन्धावच्छिन्नयद्धर्म्मावच्छिन्नावच्छेदकत्वाभावनिवेश एव तात्पर्यम्, अन्यथा धूमवान् वह्नेरित्यत्रातिव्याप्तेर्धूमवदभावप्रतियोगितायामवच्छेदकतानिरूपितत्वद्वयविरहादिति वदन्ति।

तदसत्। संयोगेन घटवद्धूमवदभावादि[1]प्रतियोगितायामुभयस्य यथाश्रुतस्यापि सत्त्वाद्विवक्षितस्य रूपवृत्तित्वद्वयस्य धूमवदभावप्रतियोगितायामपीत्यतिव्याप्तिविरहादुक्तयुक्त्या प्रमेयसाध्यकाव्याप्तेश्चेति दिक्।

अत्रापि स्वप्रतियोगितावच्छेदकसम्बन्धेन यत्प्रतियोगितावच्छेदकानधिकरणत्वं हेतुमतो यद्धर्म्मावच्छिन्नावच्छेदकताक-तत्प्रतियोगितासामान्ये यत्सम्बन्धावच्छिन्नावच्छेदकत्वाभावविवक्षाऽपि दधित्वविशिष्टप्रमेयादिसाध्यकस्थलाव्याप्त्या पूर्ववदेव निरस्ता वेदितव्या।[३५९]

प्रकाशः – [नोपलब्धः]।

तत्त्वालोकः – 'अन्यथा दण्डिमानित्यादावि'ति[2]। सर्वेषां दण्डानां हेतुमन्निष्ठतत्तद्दण्डावच्छिन्नाभावप्रतियोगितावच्छेदकत्वेन तदभावस्य तत्तद्दण्डानधिके[करणे] शुद्धदण्डे सत्त्वायोगादव्याप्तिप्रसंगेऽपि तत्ताविशिष्टदण्डावच्छिन्नत्वस्य शुद्धदण्डावच्छिन्नत्वस्य च विलक्षणत्वेन साध्यतावच्छेदकशुद्धदण्डावच्छिन्नत्वघटितोभयाभावस्य प्रतियोगित्वसामान्ये सत्त्वेन नाव्याप्तिसम्भव इत्याशयः।

न चैवं तद्दण्डवतः साध्यतायां व्यभिचारिण्यतिव्याप्तिः, प्रतियोगित्वसामान्ये शुद्धदण्डावच्छिन्नत्वघटितोभयाभावसत्त्वेन परम्परया तदवच्छेदकत्वस्य शुद्धदण्डे सत्त्वे विशिष्टेऽपि सत्त्वादिति वाच्यम्, यादृशधर्म्मावच्छिन्नविधेयकानुमितिः फलं तादृशधर्म्मावच्छेद्यत्वघटिताभावस्यैव व्याप्तिघटकत्वेन तद्दण्डावच्छेद्यत्वघटितोभयाभावस्य प्रतियोगित्वसामान्ये विरहादतिव्याप्त्यभावात्। यद्यप्यवच्छेदकताघटितलक्षणेऽपि यादृशधर्म्मेऽनवच्छेदकत्वविवक्षायां न दोषः, तथापि पर्य्याप्तेरव्याप्यवृत्तिताया निराकृतत्वेन साध्यतावच्छेदकधर्म्मिकव्यापकतावच्छेदकत्वग्रहस्य प्रमात्वासम्भवाद् व्यापकतावच्छेदकतावच्छेद-

---

१. 'धूमवत्संयोगेन घटवदभावादि' इत्येवं प्राचीनमुद्रितपुस्तके पाठः।
स चोपरिनिर्दिष्टः संशोधितः प्रकाशकृता स्वकीयपुस्तके।

२. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. ४८

कत्वग्रहस्येदानीमनुमित्यजनकत्वस्याभ्युपगमादवच्छेदकत्वगर्भनिरुक्तिपरि-त्यागः।

तस्यानुमितिजनकत्वे च 'यद्रूपावच्छिन्नं यादृशरूपावच्छिन्नमि'त्यादि-विशेषव्याप्तौ वक्ष्यति[1]। अवच्छेद्यतागर्भे तु तत्तद्दण्डावच्छिन्नविधेयकानुमितौ तादृशप्रतियोगितात्वव्यापकत[त्त]द्दण्डावच्छिन्नत्वघटिताभावप्रतियोगितानि-रूपितपरम्पराऽवच्छेदकत्वरूपव्यापकतावच्छेदकत्वग्रहस्य भ्रमत्वात्, शुद्धद-ण्डावच्छेद्यत्वघटितोभयाभावस्य प्रतियोगित्वसामान्यनिष्ठस्य प्रतियोगिताव-च्छेदकत्वरूपव्यापकतावच्छेदकत्वग्रहस्य च प्रमात्वान्न दोष इति ध्येयम्।-[३६०]

प्रकाशः – [नोपलब्धः]।

तत्त्वालोकः – ननु साध्यतावच्छेदकताघटकसम्बन्धेन प्रतियोगितावच्छे-दकवैशिष्ट्योक्तौ तद्व्यक्तित्वविशिष्टप्रमेयत्वप्रतियोगिकस्वरूपेण तादृशप्रमेय-त्वविशिष्टसाध्यकतद्दधित्वेऽव्याप्त्यापत्त्या प्रतियोगितावच्छेदकताघटकसम्ब-न्धेनैव तद्वाच्यम्, तथासति रूपत्वविशिष्टाभावमादायाव्याप्तिवारणाय साध्य-तावच्छेदकताघटकसम्बन्धावच्छिन्नयद्धर्म्मनिष्ठावच्छेदकताकत्वमेव यद्धर्म्मा-वच्छिन्नत्वं विवक्षणीयमिति घटाभावाद्यनुयोगिक-स्वरूपेण प्रमेयत्वविशिष्टस्य साध्यतावच्छेदकसम्बन्धेनाभावप्रतियोगितायां प्रमेयत्वावच्छिन्नत्वस्य तादृ-शस्य न प्रसिद्धिसम्भवः।

न च तादृशाभावो गुरुधर्म्मावच्छिन्नाभाव इत्यप्रसिद्ध इति वाच्यम्, समवायसम्बन्धेनाभावप्रतियोगितायाम्प्रमेयत्वावच्छिन्नप्रसिद्धिम्वदता गुरुध-र्म्मस्यावच्छेदकताभ्युपगमस्येदानीं दर्शितत्वात्। एवञ्च साध्यतावच्छेदकसम्ब-न्धावच्छिन्नप्रतियोगितायामेव प्रमेयत्वावच्छिन्नत्वप्रसिद्धिसम्भवे सम्बन्धान्त-रावच्छिन्नप्रतियोगितायां तत्प्रसिद्ध्यनुधावनं वृथेत्यपि निरस्तमित्याशयेनाह 'प्रमेयत्वावच्छिन्नत्वाप्रसिद्धेरि'ति[2]। अत्र विषयित्वप्रतियोगित्वादीनां संसर्गत्वे साध्यतावच्छेदकताघटकसम्बन्धेन प्रतियोगितावच्छेदकवैशिष्ट्योक्तौ दोषाभा-

---

१. दीधितौ 'यद् यद्रूपावच्छिन्नं यादृशरूपावच्छिन्नमनवच्छेदकमिति वा यथायथं वक्तव्यम्, शब्दैक्यस्यानुपादेयत्वादि'ति।

– अनुमानगादाधर्याम्, विशेषव्याप्तिप्रकरणे दीधितिः, पृ. ५७

२. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. ४८

वाद्यद्धर्म्मनिष्ठावच्छेदकतायां सम्बन्धविशेषावच्छिन्नत्वप्रवेशस्यानावश्यकतया साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगित्वेऽपि प्रसिद्धिर्भवत्येवेत्यवधेयम्।-[३६१]

प्रकाशः – [नोपलब्धः]।

तत्त्वालोकः – 'उभयसाधारणैके'ति[१]। ज्ञाननिरूपितत्वाभावनिरूपितत्वाभ्यां वैलक्षण्येनेत्यादिः।

'प्रकृतसाध्यीयसाध्यतावच्छेदकसम्बन्धसामान्ये'ति[२]। इदमुपलक्षणम्। साध्यतावच्छेदकसम्बन्धसामान्ये साध्यतावच्छेदकावच्छिन्नप्रतियोगिकत्वघटितत्रितयाभावोऽपि निवेशयितुं योग्य इति। अत्र विषयित्वादिसम्बन्धेन व्याप्यव्यापकभावस्याभ्युपगमे तेन प्रमेयसाध्यकस्थलस्याव्याप्यवृत्तिसाध्यकस्थलत्वेऽपि च न प्रमेयवन्नित्यत्वादित्यत्राव्याप्तिसम्भवः, प्रमेयत्वावच्छिन्नप्रतियोगिताकविषयितातो घटत्वाद्यवच्छिन्नप्रतियोगिताकविषयित्वस्य वैलक्षण्याद्। अन्यथा घट इति ज्ञानात् प्रमेय इति ज्ञानस्यापि वैलक्षण्यानुपपत्तेरिति प्रमेयत्वावच्छिन्नप्रतियोगिकविषयित्वे घटत्वावच्छिन्नप्रतियोगिकत्वविरहेण घटाभावस्य लक्षणघटकत्वात्।

यत्त्वत्र नित्यज्ञानानुयोगिकप्रमेयघटत्वावच्छिन्नविषयित्वे घटत्वावच्छिन्नप्रतियोगिताकत्वसत्त्वान्नाव्याप्ति[३]वारणम्। न च प्रतियोगितावच्छेदकमात्रावच्छिन्नप्रतियोगिताकत्वं विवक्षणीयमिति वाच्यम्, केवलघटत्वविशिष्टसाध्यकप्रमेयघटज्ञानत्वे सद्धेतौ हेत्वधिकरणानुयोगिकविषयित्वे साध्याभावप्रतियोगितावच्छेदकघटत्वमात्रावच्छिन्नप्रतियोगिताकत्वविरहेण साध्याभावस्य लक्षणघटकतयाऽव्याप्तेः।

न च हेत्वधिकरणानुयोगिकसाध्यतावच्छेदकसम्बन्धस्य साध्यतावच्छेदककेवलघटत्वावच्छिन्नप्रतियोगिताकत्वविरहे कथं सद्धेतुत्वं सद्धेतुत्वे वा[४]

---

१. प्रकारित्व-प्रतियोगित्वसाधारणैके'ति पाठोऽधुनोपलब्धजागदीश्याम्।
—प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. ४८

२. तदेव, जागदीशीमूलम्, पृ. ४८

३. 'नातिव्याप्ती'ति मुद्रितपुस्तके पाठः, संशोधितश्च प्रकाशकृता स्वकीयपुस्तके।

४. 'वे'ति तु प्रकाशकृता स्वकीयपुस्तके योजितम्।

कथमव्याप्तिरिति वाच्यम्, विषयित्वरूपसंसर्गप्रतियोगित्वस्यैव विषयतारूपतया प्रमेयघटज्ञाने केवलघटत्वविशिष्टस्याविषयत्वे तज्ज्ञानानुयोगिकविषयित्वस्य केवलघटत्वावच्छिन्नप्रतियोगिताकत्वविरहात्, तद्धर्म्मविशिष्टस्य तद्धर्म्मविशिष्टप्रतियोगिकविषयित्वादिसंसर्गानुयोगिन्यपि सत्त्वाभ्युपगमात्, तद्धर्म्ममात्रविशिष्टप्रतियोगिकत्वं नहि तन्त्रं, गौरवादिति सद्धेतुत्वस्यापि निर्वाहादिति भट्टाचार्य्यैरुक्तम्।

तन्नातियुक्तम्। तादृशधर्म्मावच्छिन्नप्रतियोगिताकेनैव संसर्गेण तादृशधर्म्मावच्छिन्नसत्त्वस्य युक्तत्वात्। यदि विशिष्टधर्म्मावच्छिन्नप्रतियोगिकसंसर्गः शुद्धधर्मविशिष्टबोधे भासेत भवेदपि स शुद्धस्य संसर्गस्तथात्वे तद्बोधस्य विशिष्टधर्म्मविशिष्टवैशिष्ट्यावगाहित्वापत्तेः, प्रकारतावच्छेदकधर्मन्यूनाधिकस्य भासमानसंसर्गप्रतियोगितावच्छेदकत्वेऽतिप्रसङ्गपाताच्च। अत एव यद्रूपविशिष्टेत्युक्तेः फलप्रपञ्चे भट्टाचार्य्येण विशिष्टसत्तात्वावच्छिन्नप्रतियोगिकसमवायस्य हेतुतावच्छेदकसम्बन्धत्वे तेन सत्तात्वावच्छिन्नस्यासत्तया यद्रूपविशिष्टपदस्य वैयर्थ्यमाशङ्कितं प्राक्। अन्यथा विशिष्टसत्तात्वावच्छिन्नप्रतियोगिकसंसर्गस्य सत्तात्वावच्छिन्नप्रतियोगिकतया तेन सम्बन्धेन सत्तात्वावच्छिन्नस्यापि सत्त्वप्रसङ्ग[प्रसङ्गे] तद्ग्रन्थासङ्गतेः।

न च विषयित्वादिष्वेवेदृशनियम इति वाच्यम्, नियमभेदकल्पनायामतिगौरवात्। अन्यथा घटत्वावच्छिन्नप्रतियोगिताकविषयित्वप्रमेयत्वावच्छिन्नप्रतियोगिकविषयित्वयोर्वैलक्षण्येऽपि प्रमेयविषयकज्ञाने घटस्यापि सत्त्वं स्याद्विषयित्वसंसर्गस्थले तद्धर्म्मविशिष्टस्य तदाश्रयप्रतियोगिकसम्बन्धेन सत्त्वमित्यस्यैव लाघवेनाभ्युपेयत्वात्। न च प्रमेयत्वावच्छिन्नप्रतियोगिकविषयित्वस्य घटत्वविशिष्टसंसर्गत्वे प्रमेयज्ञानानन्तरं घटं जानामीत्यनुव्यवसायापत्तिरिति वाच्यम्, तुल्यन्यायेन घटत्वमात्रविशिष्टविषयकज्ञानसाधकानुव्यवसायस्य घटं जानामीत्येतद्भिन्नस्याभावात्तस्य च केवलघटत्वविशिष्टविषयकज्ञानप्रमेयघटत्वविशिष्टविषयकज्ञानयोः शुद्धघटत्वविशिष्टवैशिष्ट्यावगाहित्वेऽपि प्रमात्वे प्रमेयघटज्ञानविलक्षणशुद्धघटज्ञानग्राहकत्वानुपपत्तेस्तस्य च तदभावे ग्राहकान्तराभावेन तज्ज्ञानस्यैवालीकत्वापत्तेरिति विशिष्टघटज्ञाने शुद्धघटत्वविशिष्टस्याप्यसत्त्वमभ्युपेयं स्यात्। भवति चेत्सत्त्वम्, विशेष्यविधया शुद्धघटत्वविशिष्टस्य तत्र विषयत्वादेवेति गृहाणेत्यलमप्रस्तुतजल्पनेन।[३६२]

प्रकाशः – [नोपलब्धः]।

तत्त्वालोकः – 'व्याप्यवृत्तितये'ति[१]। ननु तत्क्षणान्यवृत्तित्वविशिष्टप्रमेयस्य विभुत्वविशिष्टप्रमेयस्य वा न[ना]धिकरणदेशस्य प्रसिद्धतया तस्याव्याप्यवृत्तित्वेन तत्साधकस्यैतल्लक्षणलक्ष्यतया तत्राव्याप्तिस्सम्भवत्येवेति चेन्न, तत्सम्बन्धावच्छिन्नवृत्तिताविशिष्टस्य तेनैव सत्त्वन्नान्येनेति मते स्वरूपसम्बन्धावच्छिन्नवृत्तित्वस्य साध्यविशेषणत्वे कालिकेन साध्यत्वासम्भवात्कालिकसम्बन्धावच्छिन्नवृत्तित्वस्य तथात्वे च स्वरूपेण तदनधिकरणत्वस्य वस्तुमात्रे सत्त्वेन तादृशानधिकरणस्य कालनिष्ठाभावावच्छेदकत्वासम्भवाद्। अन्यथा संयोगेन रूपानधिकरणघटादेरपि कालनिष्ठावच्छेदकत्वापत्तेः। कालस्य च कालनिष्ठाभावाधिकरणतायामवच्छेदकत्वानभ्युपगमेन तत्क्षणस्य तत्क्षणान्यवृत्तित्ववि[शि]ष्टप्रमेयाभावावच्छेदकत्वासम्भवादित्याशयः।

यद्वा यादृशप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगित्वसामान्ये साध्यतावच्छेदकावच्छिन्नत्वसाध्यतानिरूपितसंसर्गतावच्छेदकधर्म्मावच्छिन्ननिरूपितत्वहेत्वधिकरणीभूतयत्किञ्चिद्व्यक्त्यनुयोगिकसंसर्गनिरूपितत्वैतत्त्रितयाभावस्तादृशप्रतियोगित्वस्य लक्षणघटकत्वमभिमत इति घटत्वावच्छिन्नप्रतियोगित्वस्य प्रमेयत्वाद्यनवच्छिन्नतया घटाभावप्रतियोगित्वस्य लक्षणघटकत्वसम्भव इति भावः।[३६३]

प्रकाशः – [नोपलब्धः]।

तत्त्वालोकः – 'अत एवेती'ति[२]। ननु समवायस्य भिन्नत्वेऽपि कालिकसमवायोभयसम्बन्धेन सत्तासाध्यके समवायेन व्यभिचारिणि सत्त्वेऽतिव्याप्तिः, साध्यतावच्छेदकसम्बन्धसामान्यान्तर्गतसमवाये उभयाभावविरहादिति समवायैक्यमतानुसरणन्निर्बीजमिति चेन्न, संसर्गतावच्छेदकमात्रभेदेन संसर्गताभेदे संसर्गताधर्मिकोभयाभावविवक्षायां दोषाभावात्।

यद्वा साध्यतावच्छेदकसम्बन्धेन साध्यवदनुयोगिकसाध्यतावच्छेदकसम्बन्धसामान्ये उभयाभावो विवक्षणीयः। तथा च जन्यानुयोगिकसमवाये कालिके वा गगनादि-यत्किञ्चिद्द्रव्यक्त्यनुयोगिकत्वघटितोभयाभावसत्त्वान्न समवायभेदमतेऽतिव्याप्तिरिति। अत्र 'वह्निधूमोभयवान् वह्नेरित्यादावि'[३]त्या-

---

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. ४८

२. तदेव, जागदीशीमूलम्, पृ. ४८

३. तदेव, दीधितिमूलम्, पृ. ४६

दिग्ग्रन्थस्योभयसाध्यकाव्याप्तिवारणाय प्रतियोगितावच्छेदकाश्रयप्रतियोगिकत्वे विवक्षितेऽतिव्याप्तिरित्येतत्परतया व्याख्यानं न सम्भवतीत्यवगन्तव्यमिति भावः।[३६४]

प्रकाशः – [नोपलब्धः]।

तत्त्वालोकः – अथ 'वह्निधूमोभयवान् वह्नेरित्यादावि'त्यादिग्रन्थेन दीधितिकारोक्तदोषस्य कृतो भट्टाचार्येण परिहारः[१] संक्षेपादिह प्रदर्श्यते।

तथाहि घटद्वयवानितीयं बुद्धिर्द्वित्वेनोपलक्षितवैशिष्ट्यावगाहिनी विशिष्टवैशिष्ट्यावगाहिनी वा। नाद्यः, एकघटवत्यपि तत्प्रसङ्गात्। न चोपलक्षितवैशिष्ट्यावगाहित्वेऽप्युभयवैशिष्ट्यावगाहित्वमेवेति वाच्यम्, प्रविरलशाखे एकस्मिन्नपि वृक्षे दूराद्भेदभ्रमे द्वित्वप्रकारेण बुद्धिदर्शनात्तदभावबुद्ध्यविरोधित्वप्रसङ्गाच्च। द्वितीयेऽपि संयोगस्य संसर्गत्वे तस्य भिन्नत्वेनोभयप्रतियोगिकत्वासम्भवेन तद्बुद्धेः प्रमात्वानुपपत्तिः। प्रकारतावच्छेदकीभूतधर्म्मावच्छिन्नप्रतियोगिकसंसर्गानुयोगिन्येव तेन सम्बन्धेन बुद्धेः प्रमात्वात्। तस्मादुभयत्वावच्छिन्नैकनिरूपकतानिरूपितसंयोगावच्छिन्नाधारतैव संसर्गस्तस्य चोभयत्वावच्छिन्नप्रतियोगिकतया प्रमात्वनिर्वाहः। एवञ्चोभयसाध्यकस्थले तस्यैव साध्यतावच्छेदकसम्बन्धत्वेन न दोषसम्भवः।

वस्तुतस्तु कुत्रापि न संयोगस्य संसर्गताऽपि तु तदवच्छिन्नाधारत्वाधेयत्वयोरेव। अन्यथा पर्वतो वह्निमानित्यत्र संयोगः, पर्वते वह्निरित्यत्राधेयत्वम्, पर्वते वह्निरित्यत्र संयोगः, पर्वतोवह्निमानित्या[त्यत्रा]धारत्वमित्यत्र विनिगमकाभावादुभयत्रैव संयोगस्य संसर्गताया वाच्यतया तद्बुद्ध्योरविशेषप्रसङ्गः। न चैकसंसर्गावगाहित्वेऽपि प्रकारविशेष्यभावभेदाद्भेद इति वाच्यम्, पर्वतो वह्निमान्, वह्नौ पर्वत इत्येतयोः पर्वते वह्निः पर्वतान्[पर्वतवान्] वह्निरित्येतयोस्तथाऽप्यविशेषप्रसङ्गात्। न च संयोग एवाधारता, अनुयोगित्वन्तु तन्नियामकमिति संयोगस्य द्विनिष्ठत्वेऽपि नाधेये आधारत्वप्रसङ्गे[ङ्गो] न वा पर्वतवान् वह्निरित्येतस्य प्रमात्वप्रसङ्गः, पर्वते वह्निरित्यत्र च स्वनिष्ठसंयोगप्रतियोगित्वं संसर्ग इति वाच्यम्, आधाराधेयोभयनिष्ठसंयोगसमवायातिरिक्ताधेयव्यावृत्तानुयोगित्वस्वीकारे तस्यैव संयोगिप्रतियोगिकत्वेन संयोगातिरिक्ताधारत्वरूपसंसर्गत्वोपगमाद् अन्यथाऽऽधेय एव संयोग आधारस्य संसर्गः प्रतियोगित्वं

---

१. अनुमानगादाधर्यां सिद्धान्तलक्षणप्रकरणे, पृ. ३७०-७२

[प्रतियोगित्व]नियामकं वह्निमान् पर्वत इत्यत्र स्वनिष्ठसंयोगानुयोगित्वं संसर्ग इति वा स्वीकरणीयं, प्रागुक्तम्वेत्यत्र विनिगमकाभावादुभयत्र[1] सतः संयोगस्य बुद्धिवैलक्षण्याय कल्पनीयत्वेऽनुयोगित्वप्रतियोगित्वयोराधेयेऽनुयोगित्वम्, आधारे प्रतियोगित्वम्, आधेयविशेष्यकबुद्धौ संयोगस्संसर्गानुयोगित्वन्नियामकम्, आधारविशेष्यकबुद्धौ च स्वनिष्ठसंयोगप्रतियोगित्वमित्येतस्यापि विनिगमकाभावेन वक्तुं शक्यत्वाच्च।

न चैवं समवायस्यापि संसर्गत्वानुपपत्तिरिति वाच्यम्, आधारत्वस्य समवायानतिरेकात्। न च घटे रूपमित्यस्य रूपवान् घट इत्यतो वैलक्षण्यायाधेयत्वरूपातिरिक्तसंसर्गविषयत्वं रूपवान् घट इत्यस्य ततो वैलक्षण्याय वाऽतिरिक्ताधारत्वसंसर्गविषयकत्वमित्यत्र विनिगमनाविरह इति वाच्यम्, उक्तबुद्ध्योर्वैलक्षण्याय ह्यवश्यं विलक्षणसंसर्गविषयकत्वं तत्राधारमात्रनिष्ठ आधारविशेष्यकबुद्धिविषयस्समवायत्वेन परिभाष्यते, नत्वाधेयनिष्ठः, स तु समवेतत्वत्वेनैवेति परिभाषायां कः पर्यनुयोगावसर इत्यलम्॥

यद्वा संयोगस्य भिन्नत्वेन तत्प्रतियोगितायाः प्रत्येकमुभयत्वावच्छिन्नत्वासम्भवेऽपि प्रतियोगिताद्वयत्वावच्छेदेनोभयत्वावच्छिन्नस्य सम्भवाद्यत्रानुयोगिन्युभयसंयोगस्तदनुयोगिक एव प्रत्येकेऽपि तादृशप्रतियोगिताकत्वाभ्युपगमाच्च नोभयसाध्यकस्थलीयदोषसम्भव इति।

सम्बन्धर्मिकोभयाभावघटितकल्पे लौहित्यस्य यत्र स्वसमवायिसंयोगेन साध्यता जपासंयुक्तस्फटिकव्यक्तित्वस्य हेतुता तत्राव्याप्तिः, स्फटिकानुयोगिकसंयोगस्य लौहित्यप्रतियोगिकत्वविरहात्परम्परासम्बन्धस्थले सम्बन्धघटकस्य विशेषणस्य प्रतियोगित्वाद्विशेष्यस्य चानुयोगित्वादेव सम्बन्धत्वोपपत्तौ विशिष्टप्रतियोगितानुयोगित्वयोर्म्मानाभावात्। साक्षात् परम्परासाधारणप्रतियोगिताकत्वस्य दुर्वचत्वादयोगोलकानुयोगिकसंयोगस्यापि धूमीयपरम्परासम्बन्धघटकत्वसम्बन्धेन धूमप्रतियोगिकतया धूमवान् वह्नेरित्यत्रातिव्याप्तिः।

न च सम्बन्धभेदेनापि भिन्नमेव व्यापकत्वम्, तत्र परम्परासम्बन्धस्थले स्वप्रतियोगिकसमवायवत्प्रतियोगिकत्वमेव निवेश्यते, न तु प्रतियोगिकत्वमिति नाव्याप्तिरिति वाच्यम्, यत्र कालिकघटितसामानाधिकरण्येन घटादेः साध्यता महाकालवृत्तित्वस्य हेतुत्वं तत्र गगनाभावस्यापि लक्षणघटकत्वानुपपत्तिः,

१. आधेये आधारे च

गगनप्रतियोगिककालिकविशेषणत्वाप्रसिद्ध्या तद्वत्प्रतियोगिकत्वाप्रसिद्धेः। न च परम्पराघटकविशेषणस्य स्वप्रतियोगिकसम्बन्धत्वेनैवोपादेयतया गगनप्रतियोगिकविषयित्वादिप्रसिद्ध्या तद्वत्प्रतियोगिकत्वप्रसिद्धेर्नाव्याप्तिरिति वाच्यम्, स्वसमवायिसमवेतत्वसम्बन्धेन घटसाध्यकघटसंयुक्तजलरूपत्वे व्यभिचारिणि रूपानुयोगिकसमवेतत्वे घटप्रतियोगिकसंयोगात्मकसम्बन्धवज्जलप्रतियोगिकत्वसत्त्वेनातिव्याप्तेः। एवमेवानुयोगिकत्वस्य परम्परात्मकस्य परम्परासम्बन्धघटकविशेषणनिष्ठाभावप्रतियोगितया विवक्षणेऽपि दोष उ[ऊ]ह्यः।

संसर्गताऽपि परम्परासम्बन्धस्थलेऽनेकैवेति संसर्गताधर्मिकोभयाभावविवक्षाऽप्यशक्या। न च संयोगत्वेन संयोगस्य लौहित्यप्रतियोगिकत्वविरहेऽपि स्वसमवायिसंयोगत्वेन लौहित्यप्रतियोगिकत्वस्वीकारान्न दोष इति वाच्यम्, स्वत्वस्य संसर्गानिविष्टतया किञ्चित्समवायिसंयोगात्मकेन साक्षात्सम्बन्धेन लौहित्यबुद्धेः प्रमात्वापत्तेः, तत्सम्बन्धस्य परम्परात्मकत्वेन लौहित्यप्रतियोगिकत्वात्, प्रकारप्रतियोगिकविशेष्यानुयोगिकसम्बन्धावगाहिबुद्धेरेव प्रमात्वादित्यवधेयम्।

प्रतियोगिताधर्मिकोभयाभावघटितकल्पे तु न दोषः। समवायिसंयोगात्मकपरम्परासम्बन्धेन लौहित्याभावस्य समवायिसंयोगात्मकसाक्षात्सम्बन्धेन लौहित्याभावस्य च परस्परं वैलक्षण्योपपत्तये परम्परासम्बन्धावच्छिन्नप्रतियोगितावच्छेदकत्वस्य परम्पराघटकनिखिलपदार्थे पर्याप्तिः, साक्षात्सम्बन्धावच्छिन्नप्रतियोगितावच्छेदकतायाश्च विशेषणमात्रे तद्विशेषणस्यावच्छेदकतावच्छेदकत्वमित्यस्य स्वीकरणीयतया साक्षात्सम्बन्धावच्छिन्नलौहित्याभावप्रतियोगित्वे साध्यतावच्छेदकतापर्याप्त्यधिकरणपरम्परासम्बन्धघटकाशेषपर्याप्तावच्छेदकताकत्वविरहेणोभयाभावस्य विद्यमानतया प्रागुक्तलौहित्यादिसाध्यकस्थले सद्धेतौ नाऽव्याप्तिः, न वा परम्परासम्बन्धसाध्यके व्यभिचारिण्यतिव्याप्तिः, साध्यतावच्छेदकसम्बन्धपर्याप्तावच्छेदकताकनिरूपकताकाधिकरणत्वस्य हेत्वधिकरणे विरहेण परम्परासम्बन्धावच्छिन्नप्रतियोगित्वस्य लक्षणघटकत्वादिति।[३६५]

प्रकाशः – [नोलपब्धः]।

तत्त्वालोकः – 'सम्बन्धित्वस्यावश्यमि'त्यादि[१]। इदमुपलक्षणम्। साध्य-

---

१. प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. ४९

वत्संयुक्तत्वस्य व्याप्तित्वे तस्य साध्यवदनुयोगिकसंयोगप्रतियोगित्वरूपत्वेन संयोगत्वेन तत्प्रवेशाद्गौरवमिति तदपेक्षया साध्यवदनुयोगिकत्वेन प्रवेशो लाघवादुचितः, विरोधस्य हेत्वाभासता च साक्षादनुमितिविरोधित्वादेव, सम्बन्धत्वमपि तदनुयोगिकत्वप्रतियोगिकत्वविशेष एवेत्यपि बोध्यम्।

'प्रकारताविशेष्यताभिन्नविषयत्वे'ति[१]। इदञ्च तज्ज्ञानभासमानसम्बन्ध-लक्षणम्। तादात्म्येन सम्बन्धत्वसामान्यलक्षणम्वा। तत्प्रतियोगिकसम्बन्ध-त्वञ्च नेदम्, तथासति संयोगेन द्रव्यत्वप्रकारकज्ञानीयतादृशविषयताश्रयस्य संयोगस्य द्रव्यत्वसम्बन्धत्वापत्तेः। न च प्रमीयत्वं विषयताविशेषणम्, प्रमात्वस्य तत्सम्बन्धानुयोगिकविशेष्यकत्वावच्छेद्यतत्प्रकारकत्वरूपत्वेऽत्र सम्बन्धत्वघटिततयात्माश्रयप्रसङ्गात्। प्रमात्वस्य निश्चयत्ववदव्याप्यवृत्तिजा-तिविशेषत्वे तत्सम्बन्धत्वलक्षणत्वमपि तस्य सम्भवत्येव। यद्वा तद्व्यक्तिनि-रूपिततादृशविषयताविशिष्टविषयत्वम्परम्परायाः संसर्गत्वमंगीकृत्य विवक्ष-णीयम्। वैशिष्ट्यञ्च स्वावच्छेदकावच्छिन्नत्वसम्बन्धेनेत्यपि बोध्यम्।[३६६]

प्रकाशः – [नोपलब्धः]।

तत्त्वालोकः – दीधितौ 'स्वरूपसम्बन्धविशेष' इति[२]। अभाव[:] स्वरूप-सम्बन्धविशेष इत्यर्थः। न चाभावत्वस्य स्वरूपसम्बन्धत्वेऽननुगततयाऽनुगतप्र-त्ययानुपपत्तिरिति वाच्यम्, तद्गतधर्मान्तरस्यानुयोगितात्वरूपस्यानुगतस्य स्वीकारादतिरिक्तानुयोगित्वस्वीकारेऽपि निरूपकभेदेन सम्बन्धान्तरवत्तद्भेद-स्यावश्यकतयाऽनुगमकधर्मान्तरस्य स्वीकरणीयत्वादिति भावः।

दीधितौ 'अतिरिक्ता एव पदार्था' इति[३]। यथा च विषयत्वादीनामतिरि-क्तत्वं तदालोचनीयं भट्टाचार्यकृतविषयतावाद इति।[३६७]

प्रकाशः – [नोपलब्धः]।

---

१. 'विशेष्यविशेषणत्वान्यविशिष्टधीविषयत्वे'त्यादिपाठ एवाधुनोपलब्धजागदीशीग्रन्थेषु। –प्रकृतग्रन्थः (प्रथमो भागः), जागदीशीमूलम्, पृ. ४९

२. प्रकृतग्रन्थः (प्रथमो भागः), दीधितिमूलम्, पृ. ४९

३. तदेव, दीधितिमूलम्, पृ. ४९

गुरूणामुपदेशेन ग्रन्थार्थानां विचारणात्।
तर्कसाराभिधग्रन्थे पूर्णः सिद्धान्तसारकः ।।१।।

श्रीधर्मदत्तकृतिना[1] रचितेन यत्ना-
देतेन मा मुदमुपैतु जनोऽपि विद्वान्।
बालोपकारकृतमेनमवैत्वसूया-
तीतो मुदम्भजतु चाच्छमयूखचूडः ।।२।।

स्वश्चारिचञ्चलदृगञ्चलचञ्चरीक-
सञ्चारिचारुचरणाब्जरसञ्चरन्तु।
चेतोमधुप्रणयिनः परिचिन्तनैक-
लभ्यं विनिन्दितसुधारसमद्रिपुत्र्याः ।।३।।

...सर्वतन्त्रस्वतन्त्रमिथिलामण्डलमण्डनपण्डितकुलपतिझोपाख्यधर्मदत्त-(बच्चा) सूरि[2] विरचितं सिद्धान्तलक्षणजागदीश्या क्रोडपत्रं[त्रं] समाप्तम्।।

[व्याप्तिसिद्धान्तलक्षणजागदीश्याः गूढार्थतत्त्वालोकग्रन्थस्य श्रोत्रियकुलावतंस-मैथिल-पण्डितखड्गनाथमिश्रविरचितायास्तदन्तेवासिना पण्डितश्रीकृष्णशर्मणा सम्पादितायाश्च 'प्रकाश' टीकायास्तृतीयो भागः]

।। सम्पन्नश्चायं ग्रन्थः ।।

———.———

१. प्रसिद्ध-'झो'पाख्य-बच्चाशर्म्मणा
२. 'सूर' इति प्राचीनमुद्रितपुस्तके

ग्रन्थपरिचयः

व्याप्तिसम्बन्धस्य लोके सर्वेषु शास्त्रेषु चोपादेयत्वं सर्वैः शास्त्रविद्भिः स्वीक्रियते। अस्य स्वरूपनिरूपणपरकविचारो यथा नव्यन्यायशास्त्र उपलभ्यते, न तथान्यत्र। अनुमानचिन्तामणौ व्याप्तिवादे गङ्गेशोपाध्यायैर्व्याप्तिसिद्धान्तलक्षणं प्रस्तुतम्। तदुपरि रघुनाथशिरोमणिना दीधितिः, तदुपरि जगदीशतर्कालङ्कारेण जागदीशी, तदुपरि धर्मदत्त(बच्चाझा)शर्मणा तत्त्वालोकश्चेति विवेचितम्। अत्रायं परिष्कारसङ्ग्रहात्मकस्तत्त्वालोको नव्यन्यायविचारपद्धतेर्दुर्गमत्वात् प्रौढशास्त्रीयव्याख्यानमपेक्षते। अतस्तदभिनवसरलविस्तृतव्याख्यानमावश्यकमित्यभिज्ञाय पण्डितखड्गनाथमिश्रेण प्रस्तुतोऽयं 'प्रकाशः'। तस्य प्रथमो द्वितीयश्च भागौ प्रकाशितौ वर्तेते। अन्तिमः तृतीयभागोऽयमिदानीं प्रकाशतां लभते। तत्त्वालोकस्य खण्डशो विभजनपूर्वकं तदनुसारि'प्रकाश'व्याख्यानमत्र प्रस्तुतम्।

ग्रन्थकारपरिचयः

धर्मदत्तसूरिशिष्यपण्डितषष्ठीनाथमिश्रस्य पुत्रः शिष्यश्च ग्रन्थकारः श्रोत्रियकुलावतंसः मैथिलपण्डितखड्गनाथमिश्रः बिहारप्रान्तस्य मधुबनीमण्डले लालगञ्जग्रामे 15.10.1921 खीष्टाब्दे जनिमलभत। धर्मदत्तसूरिस्थापिते शारदाभवनसंस्कृतमहाविद्यालये न्यायव्याकरणवेदान्तशास्त्रेषु कृतभूरिपरिश्रमः। राजस्थाने उदयपुरस्य राजकीयमहाराणासंस्कृतमहाविद्यालये जयपुरस्य राजकीयमहाराजसंस्कृतमहाविद्यालये च प्राचार्यपदम्, राजस्थानविश्वविद्यालयस्य संस्कृतसङ्काये अधिष्ठातृपदम्, दर्शनविभागे च 'शास्त्री' पदमलङ्कृतवान्। एषां 'शाब्दबोधादिवादपञ्चकप्रकाशः' इति ग्रन्थोऽपि भागद्वये विरचितो वर्तते। मनीषी चाऽयं जयपुरे न्यवसदित्यासीत् सौभाग्यम्, अधुना तु विपुलां कीर्तिमवाप्य दिवङ्गत इति खेदः।

ISBN 81-86027-12-2 तृतीयो भागः
मूल्यम्: 350.00

दर्शन विभाग द्वारा प्रकाशित ग्रन्थ

राजस्थानविश्वविद्यालयभारतीयदर्शनाध्ययनमाला :

1.	**बौद्धार्थवाह्यार्थपर्यालोचनम्** – राजेन्द्र प्रसाद शर्मा	225.00
2.	**सिद्धान्तलक्षणतत्त्वालोकप्रकाशः** (प्रथमभागः) - पं. खड्गनाथमिश्र धर्मदत्त झा कृत *सिद्धान्तलक्षणजागदीशी तत्त्वालोक* की संस्कृत व्याख्या	400.00
3.	**न्यायलीलावती** (प्रथम भाग) - श्रीवल्लभाचार्य दुर्गाधर झा कृत *शाम्भवी* एवं चन्द्रकान्त दवे कृत *चन्द्रकान्ति* हिन्दी व्याख्या द्वय संवलित	400.00
4.	**सिद्धान्तलक्षणतत्त्वालोकप्रकाशः** (द्वितीयभागः) - पं. खड्गनाथमिश्र	400.00
5.	**पदार्थतत्त्वनिरूपणम्** - रघुनाथशिरोमणि विश्वम्भर पाहि एवं कुसुम जैन कृत हिन्दी पदानुवाद, भावानुवाद तथा रामभद्रसार्वभौमकृत *पदार्थतत्त्वविवेचनप्रकाश* संस्कृत टीका सहित	125.00
6.	**वैशेषिक पदार्थव्यवस्था का पद्धतिमूलक विमर्श** – विश्वम्भर पाहि	350.00
7.	**तत्त्वसङ्ग्रहः–शब्दार्थपरीक्षा** - आचार्यशान्तरक्षित रमेशचन्द्र शर्मा कृत हिन्दी अनुवाद एवं कमलशील की *पञ्जिका* पर आधारित व्याख्या सहित	200.00
8.	**सिद्धान्तलक्षणतत्त्वालोकप्रकाशः** (तृतीयभागः)- पं. खड्गनाथमिश्र	350.00
9.	**न्यायलीलावती (द्वितीय भाग) - श्रीवल्लभाचार्य (यन्त्रस्थ)**	

University of Rajasthan Philosophy Series:

1.	**The Nietzschean Vision of Man** - Shirley Jethmalani	200.00
2.	**The Burden of Poetic Consciousness** Edited by Shirley Jethmalani & P.C. Kar	125.00

University of Rajasthan Foundational Studies:

1.	**Studies in Formal Logic** – Biswambhar Pahi	250.00

Journal of Foundational Research:

1.	**Foundational Investigations in Greek Thought** Vol.I.1, January 1993	80.00
2.	भारतीय काव्यमीमांसा Vol.IV.1-2, 1996 (सजिल्द)	200.00
3.	शाव्दवोधमीमांसा Vol.V & VI, 1-2, 1997, 1998 (सजिल्द)	200.00
4.	**Current Approaches in Philosophy of Science** Vol.VII.1, January 1999	100.00
5.	वाक्यार्थमीमांसा Vol.VIII & IX,1-2,2000,2001 (सजिल्द)	200.00
6.	**Foundations of Classical Indian Law & Social Justice** Vol.X.1-2, 2002 (Hard Bound)	200.00